# श्री पार्श्वनाथपरम्पराया इतिहासः

( संस्कृत गद्यमय )


हिन्दी संस्करण का मूल लेखक—

आचार्य श्री देवगुप्त सूरि

संस्कृत अध्यापक—

शास्त्री गोरीनाथ शुक्ल

साहित्यतीर्थ

संस्कृताध्यापक ज्युबीली हाईस्कूल, उमरेठ.

श्री यदुपकेश गच्छाचार्य
श्री देवगुप्तसूरीश्वरजी महाराज



| जन्म | लग्न | स्था० दीक्षा | जैन दीक्षा | सूरिपद |
|---|---|---|---|---|
| १९३७ विजयादशमी | १९५४ मागसर वद १० | १९६३ चैत्र वद ३ | १९७२ मौन एकादशी | २००० वैशाख शुद ५ |

श्रीज्ञान-गुण-पुष्पमालायाः ४१ पुष्पम् ।

श्रीमद्रत्नप्रभसूरीश्वरपादपद्मेभ्यो नमः ।

# श्रीपार्श्वनाथपरम्पराया इतिहासः ।


हिन्दीसंस्करणस्य लेखकः

श्रीमदुपकेशगच्छाचार्यः श्रीदेवगुप्तसूरीश्वरापरनामा

श्रीज्ञानसुन्दरसूरीश्वरमहाराजः

संस्कृतानुवादकः—

शास्त्री गौरीनाथशुक्लः । साहित्यशास्त्री ।

साहित्यतीर्थः ।

संस्कृताध्यापकः—ज्युबीली हाईस्कुल, उमरेठ



प्रकाशक

श्री रत्नप्रभाकरज्ञानपुष्पमाला—फलोदी (मारवाड़)

वीर सं० २४७१ । ओसवाल सं० २४०१ । वि० सं० २००१



सर्वहक्क स्वाधीन है



मुद्रक—

| | | |
|---|---|---|
| प्रथमावृत्तिः ५०० | बाबू चिम्मनलाल जैन द्वारा<br>आदर्श प्रिंटिंग प्रेस, अजमेर | मूल्यं रूप्यकद्वयम् |

OM

*Shree Dnyaagunan Pushpamal's Book 41*

# HISTORY OF
# SHREE PARSHWANATHPARAMPARA

*Original in Hindi by*
**Dnyanasundar Suri**
**Alias**
**Shree Devagupta Suri, Shreemad Upakeshgachhacharya**

*Sanskrit Translation by*
**Shree Gaurinath Shukla Shastri**
Shahitya Shastri (Govt.) and Sahitya Tirtha (Calcutta)
*Sanskrit Teacher*
**Jubilee Institution, UMRETH (Gujarat)**

Vir Samvat 2471
Osawal „ 2401
Vikram „ 2001

First Edition
**500**
Copies

All rights reserved

Price
**Rs. 2-0-0**
only

# किञ्चित् प्रास्ताविकम् ॥

इह हि विकरालकरालकलिकालकवलीकृते विरञ्चिप्रपञ्चे सुखदुःखमिश्रितासु नानायोनिषु बंभ्रम्यमाणा बहवोऽत्रावलोक्यन्ते निरतिशयसुखसंप्राप्तिदृढपरिकरा मानवाः । तथापि तदनुकूलोपायमलभमाना रागद्वेषविमोहितमतयो दुःखेऽपि सुखं मन्यमानाः शाश्वतिकसुखलेशमपि न लभन्ते मृगतृष्णाकुलमतयो मृगाः सलिलमिव । भविष्यति काले समेषामियं दुःखपरम्परामाकलय्य स्वचेतसि परहितनिरताः स्वसुखनिरपेक्षाः परमकरुणावलया महामहिमशालिनः सरलोदारचरित्रचित्रीकृतसकलजनमानसा महामतयो महापुरुषा निखिलजनश्वःश्रेयसाय विविधानुपायभूतान् शास्त्रप्रमाणप्रमाणितान् मार्गान् स्वकीयानवद्यविद्याविभूषितान् प्रकटीचक्रुः । यतस्तत्प्रदर्शितमार्गानुसरणेन ते स्वाभिमतां सिद्धिं प्राप्नुयुः परत्रेह च कुर्युश्च निजमनुजजनिकृतार्थतां सौकर्येण ।

## भिन्नरुचिर्हि लोकः ।

न खल्वेकेनाविष्कृतेन सुदृढेन मार्गेणापि भिन्नरुचीनां सकलजनानां चेतांसि सन्तोषं मोदं प्रमोदं सुखञ्चाप्नुवन्तीति विविधा निखिलसुखसंपादका आगमग्रन्थप्रदर्शिता महापुरुषप्रणीताः पन्थानः समुपलभ्यन्त एव । सहायभूतैस्तैरुपायभूतैश्च मार्गैराचरणे क्रियमाणेऽञ्जसा स्यात्सुखं मानवानाम् । एवं सति नाममात्रे विविदमानानां शास्त्राणां सकलानां भगवतः परमात्मनः स्वरूपैक्ये न कस्यचिद् विप्रतिपत्तिः । तथा च "अहिंसा परमो धर्म" इत्यत्रापि सैषा रीतिः । पन्थाश्च सार्वजनीनः ।

परमार्थतः सकलागमोपनिबद्धोऽप्ययं सिद्धान्तः प्राधान्येन जैनसंप्रदाये प्रचारं प्रभूतं प्राप्तो मौलिकतां भजत इति निर्विवादम् । सिद्धान्तोऽयं किंस्वरूपः ? कथञ्चाचरणीय इत्यत्र बहवो हि तत्प्रतिपादकाः ग्रन्था जिनागमग्रन्था इदानीं प्रसिद्धिं यान्ति । तैश्च तत्संप्रदायप्रचारकैः परिपोषकैश्चानेके ज्ञानकोशाः पुरा निर्मिताः । परं यवनैराक्रान्ते भारते धर्मान्धप्रकृतिकैस्तैर्दग्धा बहवः, केचन गुप्तस्थले च संरक्षिताः ग्रन्थाः । शैथिल्यं गते तत्संप्रदाये पुनस्तदुद्धारो दुःशक एवेति महान् खलु खेदस्यायमवसरः । अधुना वैक्रमस्य विंशतितमे शतके विज्ञानवादः सर्वत्र प्राधान्यं प्राप्तो येन जैनसाहित्यस्य संशोधनं प्राचीनं भारतीयमिदं साहित्यमिति पर्यालोच्य गवेषकैः सुनिपुणं निरूप्यानुष्ठीयते । प्रसिद्धाश्च भवन्ति प्रभूता ग्रन्थास्तदीयसाहित्यस्य भारतस्य विविधासु भाषासु ।

इदानीन्तनेषु प्राक्तनेषु च ग्रन्थेषु तत्संप्रदायसिद्धान्तस्वरूपं तदितिहासश्च विस्तरशो विज्ञायत एव । भगवतां परमवन्दनीयचरणपंकजयुगलानां श्रीमदाचार्यवर्याणां परम्परायाः इतिवृत्तमितस्ततो विक्षिप्तं क्वचनैकदेशे च विस्तृतं यद्यपि लभ्यत एव तथापि क्रमश उपवर्णितं चेतश्चमत्कृतिजनकं सर्वत्र प्रायो दुर्लभमेव । प्रभावकचरितमन्येऽपि च सन्ति चरित्रवर्णनपरा ग्रन्थाः किन्तु तत्र प्राधान्येनैव तत्तदाचार्याणामितिवृत्तमुपनिबद्धं, न क्रमानुसारेण समेषाम् । तत्रापीदानीन्तनसंशोधनप्राप्तसाहित्यानुकूल्याभाव एवेति मत्वा समर्चनीयचरणकमलस्य आचार्यस्य श्रीदेवगुप्तसूरेः ( ज्ञानसुंदरसूरेः ) प्रयासस्तां क्षतिं दूरीकर्तुं भूयसाऽनेहसेति मरुधरनिवासिनां बलीयसी समास्था ।

श्रीमता तत्रभवता आचार्यवर्येण जैनसंप्रदायस्यातिमहती सेवा सुविहिता, नूतना काचित् चेतना च समर्पितेति २४१ ग्रन्थानां निर्माणमेव निदर्शनम्। संप्रदायस्यास्य कथंकारं समुन्नतिः स्यात्, कथञ्च तद्दूषणानां परिहारं भवेदिति निपुणं निरूप्य स्वधर्मसंरक्षणं तत्प्रचारञ्च स्वकीयं मुख्यं कर्तव्यमिति विचार्य, समुपेक्ष्य च जनापवादं, विहृत्य च यत्र तत्र जीवितनिरपेक्षं परिश्रमः कृत इति नातिशयोक्तिः। विशेषश्च आदर्शज्ञान-नामके हिन्दीभाषायां लिखिते ग्रन्थे द्रष्टव्यः।

स्वनामधन्येन विद्वद्वरेण्येन आचार्येण श्रीदेवगुप्तसूरिणा (श्रीज्ञानसुन्दरसूरिणा) हिन्दीभाषायां २००० पत्रात्मको महान् "श्रीपार्श्वनाथपरम्पराका इतिहास"-नामकः स्वजीवनसर्वस्वरूपो ग्रन्थः पाथोदधिमन्थनसारभूतं पीयूषमिव निर्माय सकलधार्मिकसुखसाधकसाधनभूतः प्रकटीकृत इति जानन्त्येव भवन्तः। परं संस्कृतज्ञा अप्येतदीयं रसं संस्कृतेऽप्यास्वादयन्त्विति विचार्य तदनुवादकरणेऽहमादिष्टः। मया च स्मृतस्तत्रभवान् कविकुल-चूडामणिः कालिदासः—क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः। तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥ यतो हि साधारणमतेर्ममायं संस्कृते प्रथमः प्रयत्नः। तदनु विचार्यमाणे "अथवा कृतवाग्द्वारे०० साहसे श्रीः प्रतिष्ठिते" त्यादि च स्मृतिपथमारूढम्। वस्तुन आविष्करणे हि गुणदोषचर्चा, प्रयत्ने सफलता निष्फलता चेत्यपि सुदूरं स्वचेतसि न्यरूपयम्।

अत्र लेखनकार्ये कियदवधिकं सौकर्यमासीत्। यतो हि सूरिवर्यसमीपे केनचित् पण्डितेन कृतोऽनुवादः कियत्पर्यन्तं विद्यते स्म। स च वस्तुप्रथनमात्रे मे सहायमकृत। परमत्र सम्प्रदायसिद्धान्तनिरूपणविषये तस्मिन्ननुवादे मूलग्रन्थे चापि सुस्पष्टं नालेखि किञ्चित्। ततो हि महती विप्रतिपत्तिरजनि। येन तत्स्वरूपनि-रूपणे मया मौलिकतामनुसरता प्रकृतिवदनुकरणमेव सिद्धान्तितम्। यथा-५० पृष्ठे आत्मतत्त्वनिरूपणप्रसंगे ४ मुनिवाक्ये "न जायते म्रियते वा कदाचित्" इदं मूलकारलेखाक्षरतात्पर्यानुसारेण मया तथैवोट्टंकितम्। प्रायोऽनुवादकानां लेखकानामिव नास्ति स्वातंत्र्यम्।

अपरञ्च दूरस्थानस्थितिः कादाचित्क आचार्यवर्यस्य समागमोऽनियतस्थितिकः, सहायकग्रन्थानां दौर्लभ्यम्, वर्तमानपरिस्थितेः सापेक्षत्वम्, मुद्रापणे च महती त्वरा, साप्यावश्यकी, सर्वाण्येतानि ग्रन्थलेखनप्रतिकूलानि मे वास्तविकानि कारणानि, तथापि "न निश्चितार्थाद् विरमन्ति धीरा" इति मे प्रभूतमत्र लेखने प्रोत्साहकं सुभाषितम्।

## ग्रन्थस्योपादेयत्वम्॥

"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" धर्मादर्थश्च कामश्च "धर्मो विश्वस्य जगतः प्रतिष्ठा" इत्यादिभिः प्रमाणैः सर्वपुमर्थसाधकत्वे धर्म एव मुख्यं निदानम्। स च तत्तत्संप्रदायनिरूपितस्वरूपः। ततश्चात्र जैनसम्प्रदाये तत्तदाचार्याणां यत्र तत्र विहरणेन धर्मतत्त्वोपदेशः, तत्प्रचारः, तीर्थयात्रायै संघनिष्कासनम्, अभिनवजिनप्रतिमानां चैत्यानां च निर्मापणम्, पुरातनानां जीर्णोद्धारः, सधर्मिभ्यः सजातीयेभ्यश्च सहायप्रदानम्, आगमग्रन्थानां निर्मापणे मुक्तहस्तो द्रव्यव्ययः, श्रीमद्भगवतीसूत्रवाचनामहोत्सवानुष्ठानम् अन्येषामपि धर्मरुचिसंवर्धकानामष्टाह्निकादीनां महोत्सवानां समारोहः; आचार्यचरणानां भव्यः स्वागतविधिः, दीनेभ्य-श्चान्नवस्त्रादीनां वितरणम्, अहिंसाव्रतपालनार्थं महान् द्रव्योत्सर्गः—एवमादीनि बहुविधानि धर्माचरणानि ग्रन्थेऽस्मिन् तत्तदाचार्यजीवनचरितप्रसंगानुषङ्गेण प्रदर्शितानि।

इदमत्रावश्यं वक्तव्यं यदन्यधर्मापेक्षया जैनसम्प्रदाये स्वधर्माचरणे प्राक्तनपुण्यपुञ्जलब्धं द्रविणराशि-मुपयोक्तुमिदानीमपि जैना मनागपि पश्चात्पदं न कुर्वन्ति। किमु वक्तव्यं तत्र विविधसमृद्धिमति प्राचीने भारते सरलोदारसंस्कृतमतीनां धर्ममयैकजीवनानां वैश्रवणोपमानां जनानां विद्यमानत्वे। अत्र ग्रन्थे भूरिशस्ता-

दृशानि वर्णनानि - समायान्ति । तानि च वस्तुगत्या प्रदर्शितानीतिवृत्तानुसारेण येन पाठकाः पिष्टपेषणा- ग्रालोचनक्लिष्टमानसा न भवेयुः । जिनधर्मः पुरा सर्वत्र प्राप्तप्रचारो राजभिर्महाराजैर्धनिकैश्चादृतः पूर्णकलः कलानिधिरिव तदानीन्तने कालेऽत्र भारते विद्योतते स्मेति सूक्ष्मेक्षिकया विचारणीयम् ।

अपरञ्च दयाधर्ममास्थाय भावुकानां सांसारिकक्लेशपरिहारपूर्वकं निरतिशयसुखसंपादनाय वीतरागाणा- माचार्यवर्याणां मन्त्रतंत्राद्यनुष्ठानेन विविधा महान्तो दरीदृश्यन्तेऽत्र ग्रन्थे प्रयत्नाः । उपायेन येन शक्येत साध- यितुं शासनसमुन्नतिः, यत्र चान्यमतानुयायिकृता स्वधर्मक्षतिस्तत्र झटिति समेत्य परमतदूषणपूर्वकं स्वसिद्धान्त- स्वरुपप्रतिपादनपुरःसरं स्वधर्मस्योपादेयत्वमाचार्याणां शासनशुभचिन्तकानां बहुशो दृग्गोचरं भवति । हन्त ! गतः स समयः । अधुना चिराद् विदेशीयैराक्रान्तं ध्वस्तधर्ममर्यादं स्वेच्छाचारबहुलं विपद्ग्रस्तं परवशं कथंक- थमपि प्राणान् धारयति भारतम् । इदमत्र दृढमास्थेयम्—न खलु धर्ममन्तरा जातु कश्चिदपि जनः शर्म परत्रेह च विन्दत इति ।

## एतद्ग्रन्थविषये

श्रीमन्तः परममान्याः केशवरामशास्त्रिणः ( क्यूरेटर-गुजरात वर्नाक्युलर सोसायटी ) श्रीमधुकुमार- महोदयाश्च ( प्रिन्सिपल—ज्युबीली हाईस्कूल ) स्वाभिप्रायप्रदर्शनेन मामुपकृतिभरानतमकार्षुः । प्रत्युपकर्तुमशक्तः केवलं भगवन्तं परमेश्वरं साञ्जलिबन्धं भूयो भूयोऽभ्यर्थये तेषां भूयसीमभिप्रेतां भूतिं विदध्यादिति ।

अन्यच्च श्रीमन्त आदर्शमुद्रणालयाध्यक्षाः श्रीरामलालमहोदया अस्य मुद्रणप्रबन्धं कृत्वा महता परिश्रमेण प्रकाशने साहाय्यमाचरंस्तदर्थं ते धन्यवादार्हाः ।

जानाम्यहमत्र बह्व्यः खलु त्रुटयः, ताश्च मदीयपारतंत्र्यनिबन्धनाः । यथामति शुद्धिपत्रे संस्कृताः । तथापि सर्वज्ञः सर्वविदीश्वर एव । मम चान्तर्भावो युष्मदीये पक्षे । अन्ते च—

गुणदोषौ बुधो गृह्णन्-इन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

विद्वच्चरणकमलचञ्चरीकः
शास्त्री गौरीनाथशुक्लः ।
संस्कृताध्यापकः ज्युबीली हाईस्कूल ।
उमरेठ । गुजरात ।

संं० २००० विजयादशम्यां
सौम्यवासरे ताः २७-९-४४
दलालपोल, वडा बजार

# Some Opinions.

Ahmedabad,
1st August, 1944

श्री पार्श्वपरम्पराया इतिहासः, a Sanskrit prose work is in the form of narrative biographies of Jain preceptors from पार्श्वनाथ, the 23rd Tirthamkara in fine style, mostly resembling old प्रबन्ध s. Such being the case, one should not expect a classical style, strictly observing the orthodoxy of the Sanskrit grammar. The author seems to be conversant with old पट्टावलीs and has been able to get authentic information about the preceptors.

To reconstruct the Jain history, publications of such पट्टावलीs are essential. Not only पट्टावलीs but also प्रशस्तिs at the ends of MSS and their colophons are very useful in reconstructing history. Old Jain Bhandaras possess such literature in great quantity, and it is worth publishing. Such efforts have been already begun and the texts require careful editing.

**Keshavram K. Shastree**
*Curator,*
Research and Postgraduate Department,
Gujarat Vernacular Society,
**AHMEDABAD.**

I have read with interest the Sanskrit book 'श्री पार्श्वपरम्पराया इतिहासः written by Mr. G. M. Shukla. The History of Jain Tirthamkaras is given in chronological order. This might greatly facilitate the compilation of Jain History. In the book we find scattered here and there the jain religious tenets as also the ways and means they adopted for spreading their religion. The language is every easy but terse. Mr. Shukla has made a laudable and patient attempt after compiling a book which may not find many readers. The book must however prove a very welcome addition to Jain literature and history.

**M. S. Desai,** M. A., S. T. C. D.
*Principal,*
***JUBILEE INSTITUTION, UMRETH.***

# अनुक्रमणिका


| क्रमाङ्कः | आचार्यनाम | विक्रमपूर्वतः | | विक्रमपूर्वपर्यन्तम् | पृष्ठम् |
|---|---|---|---|---|---|
| १ | श्रीशुभदत्तो गणधरः | ७२० | तः | ६९६ | १ |
| २ | श्रीहरिदत्तसूरिः | ६९६ | तः | ६२६ | १ |
| ३ | श्रीसमुद्रसूरिः | ६२६ | तः | ५५४ | २ |
| ४ | श्रीकेशिश्रमणसूरिः | ५५४ | तः | ४७० | २ |
| ५ | श्रीस्वयंप्रभसूरिः | ४७० | तः | ४१८ | २ |
| ६ | श्रीरत्नप्रभसूरिः ( १ ) | ४१८ | तः | ३८६ | ३ |
| ७ | श्रीयक्षदेवसूरिः ( १ ) | ३८६ | तः | ३४२ | ८ |
| ८ | श्रीकक्कसूरिः ( १ ) | ३४२ | तः | २८८ | ९ |
| ९ | श्रीदेवगुप्तसूरिः ( १ ) | २८८ | तः | २४७ | १० |
| १० | श्रीसिद्धसूरिः ( १ ) | २४७ | तः | २१७ | ११ |
| ११ | श्रीरत्नप्रभसूरिः ( २ ) | २१७ | तः | १८२ | १२ |
| १२ | श्रीयक्षदेवसूरिः ( २ ) | १८२ | तः | १३६ | १३ |
| १३ | श्रीकक्कसूरीः ( २ ) | १३६ | तः | ७६ | १३ |
| १४ | श्रीदेवगुप्तसूरिः ( २ ) | ७६ | तः | १२ | १४ |
| १५ | श्रीसिद्धसूरिः ( २ ) | वि. पू. १२ | तः | बि. सं. ५२ | १५ |
| १६ | श्रीरत्नप्रभसूरिः ( ३ ) | वि. सं. ५२ | तः | वि. सं. ११५ | १६ |
| १७ | श्रीयक्षदेवसूरिः ( ३ ) | ११५ | तः | १५७ | १७ |
| १८ | श्रीकक्कसूरिः ( ३ ) | १५७ | तः | १७४ | १९ |
| १९ | श्रीदेवगुप्तसूरिः ( ३ ) | १७४ | तः | १७७ | २२ |
| २० | श्रीसिद्धसूरिः ( ३ ) | १७७ | तः | १९९ | २४ |
| २१ | श्रीरत्नप्रभसूरिः ( ४ ) | १९९ | तः | २१८ | २६ |
| २२ | श्रीयक्षदेवसूरिः ( ४ ) | २१८ | तः | २३५ | २९ |
| २३ | श्रीकक्कसूरिः ( ४ ) | २३५ | तः | २६० | ३२ |
| २४ | श्रीदेवगुप्तसूरिः ( ४ ) | २६० | तः | २८२ | ३५ |
| २५ | श्रीसिद्धसूरिः ( ४ ) | २८२ | तः | २९८ | ३७ |
| २६ | श्रीरत्नप्रभसूरिः ( ५ ) | २९८ | तः | ३२० | ४० |
| २७ | श्रीयक्षदेवगुप्तसूरिः ( ५ ) | ३१० | तः | ३२६ | ४३ |
| २८ | श्रीकक्कसूरिः ( ५ ) | ३३६ | तः | ३५७ | ४८ |
| २९ | श्रीदेवगुप्तसूरिः ( ५ ) | ३५७ | तः | ३७० | ५१ |

| क्रमाङ्कः | आचार्यनाम | वि० सं० | | वि० सं० | पृष्ठम् |
|---|---|---|---|---|---|
| ३० | श्रीसिद्धसूरिः ( ५ ) | ३७० | तः | ४०० | ५४ |
| ३१ | श्रीरत्नप्रभसूरिः ( ६ ) | ४०० | तः | ४२४ | ५९ |
| ३२ | श्रीयक्षदेवसूरि ( ६ ) | ४२४ | तः | ४४० | ६१ |
| ३३ | श्रीकक्कसूरिः ( ६ ) | ४४० | तः | ४८० | ६४ |
| ३४ | श्रीदेवगुप्तसूरिः ( ६ ) | ४८० | तः | ५२० | ७० |
| ३५ | श्रीसिद्धसूरिः ( ६ ) | ५२० | तः | ५५८ | ७४ |
| ३६ | श्रीकक्कसूरिः ( ७ ) | ५५८ | तः | ६०१ | ८० |
| ३७ | श्रीदेवगुप्तसूरिः ( ७ ) | ६०१ | तः | ६३१ | ८२ |
| ३८ | श्रीसिद्धसूरिः ( ७ ) | ६३१ | तः | ६६० | ८४ |
| ३९ | श्रीकक्कसूरिः ( ८ ) | ६६० | तः | ६८० | ८६ |
| ४० | श्रीदेवगुप्तसूरिः ( ८ ) | ६८० | तः | ७२४ | ८७ |
| ४१ | श्रीसिद्धसूरिः ( ८ ) | ७२४ | तः | ७७८ | ९० |
| ४२ | श्रीकक्कसूरिः ( ९ ) | ७७८ | तः | ८३७ | ९३ |
| ४३ | श्रीदेवगुप्तसूरिः ( ९ ) | ८३७ | तः | ८९२ | ९६ |
| ४४ | श्रीसिद्धसूरिः ( ९ ) | ८९२ | तः | ९५२ | १०० |
| ४५ | श्रीकक्कसूरिः (१०) | ९५२ | तः | १०११ | १०५ |
| ४६ | श्रीदेवगुप्तसूरिः (१०) | १०११ | तः | १०३३ | १०८ |
| ४७ | श्रीसिद्धसूरिः (१०) | १०३३ | तः | १०७४ | ११५ |
| ४८ | श्रीकक्कसूरिः (११) | १०७४ | तः | ११०८ | १२० |
| ४९ | श्रीदेवगुप्तसूरिः (११) | ११०८ | तः | ११२८ | १२५ |
| ५० | श्रीसिद्धसूरिः (११) | ११२८ | तः | ११७४ | १३० |

# शुद्धिपत्रम्

| पृष्ठम् | अशुद्धम् | शुद्धम् | पृष्ठम् | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|
| १ | द्रव्यभाहर्तु | द्रव्यमाहर्तु | १२ | पूर्णान्रंगः | पूर्णान्तरंगः |
| १ | क्रिया निमग्नान् | क्रियानिमग्नान् | ,, | ममस्यन्त | ममन्यन्त |
| २ | माधवो | साधवो | ,, | सूरिति | सूरिरिति |
| ४ | द्वसुतौ | द्वौ सुतौ | ,, | सुरि | सूरि |
| ५ | विमानोः | विमानो | १३ | लाक्षण्येन | लाक्षण्येन |
| ५ | भविष्यती | भविष्यतीति | १४ | नियारय | निवारय |
| ६ | भवत्विस्युक्त्र | भवत्विस्युक्त्वा | ,, | संधेन | संघेन |
| ६ | हृदये | हृदये | ,, | गौत्रैर्मे | गौत्रैर्मु |
| ६ | श्रावकाना | श्रावकाणा | ,, | सूरिश्वरः | सूरीश्वरः |
| ६ | गगना | गमना | १५ | मुमूर्छी | मुमूर्च्छ |
| ७-८ | श्रावकाना | श्रावकाणा | १६ | स्वोत्वाच | स्वोवाच |
| ८ | सोत्सहापुरःसरं | सोत्साहपुरःसरं | ,, | आश्चर्य युक्तो | आश्चार्ययुक्तो |
| ,, | कोरेण्टक | कोरण्टक | ,, | विघाय | विधाय |
| ,, | निग्रहीतो | निगृहीतो | ,, | मूलामिधानम | मूलाभिधानम् |
| ,, | ह्युपसर्गाः | ह्युपसर्गाश्च | ,, | सुरे | सूरे |
| ,, | ऽनने | ऽनेन | १७ | संघस्तु | संघस्तु |
| ,, | रादार्श | रादर्श | ,, | श्राद्धो | श्राद्धः |
| ,, | लक्ष्यीकृत्य | लक्ष्यीकृत्य | ,, | स्पृशं | स्पृक् |
| ९ | धमोत्साहो | धर्मोत्साहो | ,, | मागम | मगाम |
| १० | श्रेष्ठः | श्रेयान | ,, | काऽभा | काऽ |
| | मगृह्हात् | मगृह्णात् | १८ | वीरपूर | वीरपुर |
| ११ | श्रीसंघं | श्रीसंघं | ,, | राख्यः | राख्यः |
| ,, | अष्टान्हिका | अष्टाह्निका | ,, | निवृत्ति | निर्वृत्ति |
| ,, | चकारः | चकार | १९ | धमा | धर्मा |
| ,, | ऐश्र्यान्विता | ऐश्वर्यान्विता | ,, | द्वहि | द्रुहि |
| ,, | करुणार्द्र | करुणार्द्र | २० | स्वश्रेयसकरः | स्वःश्रेयसकरः |
| ,, | मगृह्नात् | मगृह्णात् | ,, | संख्यकैजनै | संख्यकैर्जनै |
| १२ | द्वितिय | द्वितीयः | ,, | संघो | संघो |
| ,, | सुतुरूप | सुतुरूप | ,, | निर्मित | न्निर्मित |
| ,, | पित्रोः | पित्रोः | ,, | देहमसृजत् | देहमुदसृजत् |

| पृष्ठम् | अशुद्धम् | शुद्धम् |
|---|---|---|
| २१ | तमसो | तमसस्य |
| २२ | संधं | संघं |
| ,, | संधेना | संघेना |
| २३ | त्पीउं | त्पीहं |
| २४ | दीक्षा | दीक्षां |
| ,, | बहुविद्यां | बहुविधां |
| ,, | प्राप्या | प्राप्स्या |
| २५ | सूरे | सूरेः |
| ,, | ध्याय | ध्यायाय |
| २६ | गुरूणा | गुरुणा |
| २८ | राचायै | राचार्यै |
| ३१ | बह्व्यो | बह्व्यो |
| ,, | निष्फला | निष्फलाः |
| ३२ | सूरेदा | सूरेर्दा |
| ३३ | संघो | संघ |
| ३४ | देव्यश्चा सनतानि | देव्यश्चासन् तानि |
| ,, | देवीन | देवान |
| ३५ | चिन्हानि | चिह्नानि |
| ,, | वसा | नसा |
| ,, | रूपदेशं | रुपदेशं |
| ३६ | मेहति | मर्हति |
| ,, | कौतुहल | कौतूहल |
| ,, | पञ्चाननः | पञ्चाननं |
| ३८ | संसेव्य | संसेव्य |
| ४० | सख्या | संख्या |
| ४१ | मगृह्णात् | मगृह्णात |
| ४३ | ३१० | ३२० |
| ४४ | राज्यप्राति | राज्यप्राप्तिः |
| ,, | पपन्ना | पपन्न |
| ४५ | सवऽस्मिन | सर्वस्मिन् |
| ,, | दृष्टव्यम | द्रष्टव्यम् |
| ,, | सर्वेभ्यो | सर्वान |
| ४७ | पृष्ठम | पृष्ठम् |
| ४८ | ३३६ | |
| ४९ | संधो | संघो |
| ५० | धर्म | धर्म |
| ,, | निरुपितम | निरूपितम् |
| ५१ | पदवीम | पदवीम |
| ,, | वास्तव्य | वास्तव्य |
| ,, | न्नाचार्यो | न्नाचार्यौ |
| ५२ | वरदत्तोऽस्यं | वरदत्तोऽयं |
| ,, | तन्त्र | तत्र |
| ,, | दाह्वान | दाह्वान |
| ,, | बुमूक्षा | बुभुक्षा |
| ५२ | श्वसुर | श्वशुर |
| ,, | श्चौरो तस्या | श्चोरस्तस्या |
| ,, | श्वसुरा | श्वशुरा |
| ५३ | तीथ | तीर्थे |
| ,, | सहस्त्र | सहस्र |
| ,, | ठाकरशी | ठाकरशी |
| ५४ | दृश्यन्त | दृश्यत |
| ,, | अपिच | अपि च |
| ,, | एवास्तु | एवातु |
| ,, | ३७० | |
| ५५ | संधं | संघं |
| ,, | संघस्था | संघस्थाः |
| ,, | ष्टान्हिका | ष्टाह्निका |
| ,, | भ्पितृ | पितृ |
| ५६ | गमिष्यामि | गमिष्यामि |
| ,, | मिष्टान्नकोपाच | मिष्टान्नपाचको |
| ,, | स्तपोलिका | घृतपोलिका |
| , | स्थापिना | स्थापिताः |
| ,, | जामा | जामा |
| , | वह | बहु |
| ,, | कर्मकेति | कर्म करोति |
| ५६ | सहस्त्राद् | सहस्राद् |
| ,, | कल्याणा | कल्याण |
| ,, | मापमायरु | मापमायए |

| पृष्ठम् अशुद्धम् | शुद्धम् | पृष्ठम् अशुद्धम् | शुद्धम् |
| --- | --- | --- | --- |
| ५७ सार्द्ध | सार्धं | ८० रत्नुज्ञां | रनुज्ञां |
| ,, मातत्वे | मातृत्वे | ,, निरुशो | निराशो |
| ,, तर्हि | तर्हि | ८० देहमुदत्सृजत् | देहमुदसृजत् |
| ,, श्वाश्वतो | शाश्वतो | ८१ चैत्यानिवासिनां | चैत्यनिवासिनां |
| ,, म्रियते | म्रियते चेत्यादि | ,, सधूनां | साधूनां |
| ५९ रुत्पद्यते | रुत्पद्यते | ८४ निर्द्धिः | निर्बुद्धिः |
| ,, निरुत्या | निरूत्या | ,, निर्धनता | निधनता |
| ,, ह्याचार्या | ह्याचार्यो | ८५ शरीरकार्श्यतां | शरीरकार्श्यं |
| ६० वराग्या | वैराग्या | ८५ कालान्तेर | कालान्तरे |
| ,, वराग्य | वैराग्य | ८७ एकादा | एकदा |
| ,, सर्वे चाज्जीविताः | सर्वे चोऽज्जीविताः | ८८ जलवुद्बुद वाति | जलबुद्बुद इवाति– |
| ,, क्रमण | क्रमेण | ८९ धर्मो | धर्मः |
| ,, स्थान | स्थानं | ९० प्रतिनिवृत्य | प्रतिनिवृत्य |
| ,, परिमित | परिमि | ,, पयामास | च |
| ६१ सोधर्मे | सौधर्मे | ९१ शय्या | शय्यायां |
| ,, तस्येव | तस्यैव | ,, स्वब्रह्मचर्यव्रते | स्वब्रह्मचर्यव्रते |
| ६२ भृत्या | भृत्याः | ९२ पुण्यगनेना | पुण्यमनेना |
| ,, मध्यान्हे | मध्याह्ने | ,, आचर्यो | आचार्यो |
| ,, श्रीसंघः | श्रीसंघः | ९४ स्वधर्म विधातका | स्वधर्मविघातका |
| ६४ संस्कारी | संस्कारो | ९५ खलन | खलु न |
| ६४ विविद्यान् | विविधान् | ,, तन्मूलाश्च | तन्मूला च |
| ६६ ताम्यं | ताभ्यां | ९७ सुस्पष्टमित्त्यं | सुस्पष्टमित्थं |
| ,, निवेदतः | निवेदितः | ,, स्वविर | स्थविर |
| ,, व्यहारं | व्यवहारं | ९८ यतो | यतः |
| ७१ त अयुध्यन्त | तेऽयुध्यन्त | ९९ बमुवु | बभूवु |
| ,, सर्वमिदं | सर्वमिमं | ,, श्रवणसमा | श्रवणसभा |
| ,, संजहः | संजहुः | ,, तद्वार्तालापेन | तद्वार्तालापेन |
| ७१ मुदत्सृजत् | मुदसृजत् | ,, भावुका | भावुकाः |
| ,, नाम्मि | नाम्नि | ,, नानवादीत् | तानवादीत् |
| ७३ दशाम्योः | दशाभ्यः | १० निरुधेमिनः | निरुद्यमिनः |
| ,, पौरेः | पौरैः | १०२ पर्जयामासुः | मर्जयामासुः |
| ७४ बाल्या | बाल्या | ,, तद्वचो | तद्वचो |
| ७५ कुर्वन्ति | कुर्वन्ति | १०३ वाक्ष्यण | बाण |
| ७७ मुद्धर्तुं | मुद्धर्तुं | ,, जंधां | जघां |

| पृष्ठम् | अशुद्धम् | शुद्धम् | पृष्ठम् | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|
| १०३ | मिलिता | मिलिता | ११३ | त्युक्त्वसा | त्युक्त्वा सा |
| १०४ | त्यक्तवाक्वा | त्यक्त्वा | ,, | पातायामासा | पातयामास |
| १०७ | मारब्धम् | मारब्ध | ,, | यन्त्रयुक्तं | यन्त्रयुक्तमंजन |
| ,, | जतीयः | जातीयः | ,, | मरेषयत् | मप्रेषयत् |
| ,, | एतद्वंशीया | एतद्वंशीयाः | ,, | घृतं | घृतं |
| ,, | विह्वर्थं | विहार्थं | ११४ | लधु | लघु |
| ,, | मप्रहिषुः | मप्रहीषुः | ११५ | दारिद्रय | दारिद्र्य |
| ,, | अस्चा | अस्या | ,, | मत्रं | मन्त्रं |
| १०८ | सौज्य | सौजन्य | ,, | लाडुलः | लाडुकः |
| १०९ | विभूपितं | विभूषितं | ११६ | क्षर्मे | क्षर्मं |
| १ ० | भगमत् | मगमत् | ,, | लोत्पज्ना | लोत्पन्ना |
| १११ | वयमेवा | वयमेव | ,, | देव्युपम्हार | देव्युपहार |
| ,, | न्धं | × | ११७ | स्तैन | स्तैस्तेन |
| ,, | परामविन्तुकुयात् | पराभवितुं शक्नुयात् | ,, | विधास्ये | विधास्ये |
| ,, | जिनालषा | जिनालया— | ११८ | निवेद्यतेवि | निवेद्यतेति |
| ,, | स्याफदादिति | सफला स्यादिति | ,, | तव | × |
| ,, | निस्तमवो— | मुनिस्तमवो | ,, | भ्रातृष्य | भ्रातृव्य |
| १११ | दीशतु | दिशतु | ,, | तमाव्हयत् | तमाह्वयत् |
| ११२ | तथैवासान् | तथैवासन् | ,, | तत्स्थतुः | तस्थतुः |
| ,, | प्लावितः | पावितः | ,, | मद्र | भद्र |
| ,, | चतुः पुषष्ठि | चतुः षष्ठि | ,, | संन्तिधानया | सन्निधानया |
| ,, | छत्र | च्छत्र | ,, | नृपत्ति | नृपतिः |
| ,, | मान्त | ममान्त | ,, | संख्यकान | संख्यकान् |
| ,, | समाधिक | समधिक | ,, | वहिर्मोक्ष्यामति | वहिर्मोक्ष्यामीति |
| ११३ | श्वरसूरि | श्रीश्वरसूरि | ,, | पद्मप्रमेण | पद्मप्रभेण |

# विज्ञापनम्

शुद्धिपत्रमिदं

शास्त्रिणा छोटेलालशर्मणा, शास्त्रिणा च रमणलालशुक्लेन कृतम् । अत्र हि प्रायः पारिभाषिकाः शब्दास्तथैव स्थापिताः । देशभाषायां प्रचलितानि नामानि यथाकथंचित् कुत्रचित् परिवर्तितानि । साधारणजनोपयोगं च विचार्य संधिरपि साधारणतः स्वीकृतः । मुद्रापणे च बहवः कार्यकराः । कानिचित् पत्राणि मया महाराजेन च शोधितानि सर्वमिदं समीक्ष्य गुणैकगृह्यालवो भविष्यन्ति भव्याः पाठका इत्याशासे

उपरोक्तयोरुभयोः सहयोगोऽत्र मया चिरं स्मरणीयः प्रियसुहृदोरेतयोरुपकारस्मरणसमुल्लेखोऽनावश्यकः सुहृद्धर्मत्वेन तत्कर्तव्यात् । अपरञ्च मदन्तेवासी मनोहरलालशाहः प्रभूतमत्र सौकर्यमकृतेत्याशिषा भावनीय एव । लेखकः ।

# श्रीपार्श्वपट्टावली

श्रीपार्श्वनाथाङ्घ्रिसरोजलग्नस्तदीयसौगन्ध्यमुदान्वितोऽहम् ।
अलौकिकानन्दपरम्परायै पुनः पुनस्तच्छरणं प्रपद्ये ॥

इह तावत् त्रिभुवनोपकर्ता परमपिता परमात्मा षट्चत्वारिंशद्गुणसंयुक्तो ब्रह्मविष्णुरुद्रनारदखेचरपूजितः परमशिवंकरः सकलपापसन्तापहर्ता त्रयोविंशस्तीर्थंकरः पार्श्वनाथो बभूव । स चेक्ष्वाकुवंशसमुद्भवो वाराणसीनगरीशस्य राज्ञोऽश्वसेनस्य वामाराज्ञ्याश्च पुत्रः पौषकृष्णदशम्यां जन्म लेभे । स भगवान् त्रिंशद् वर्षाणि यावद् गृहे स्थित्वा सप्तति ७० वर्षाणि केवलपर्यायं पूरयामास । सर्वत्र जिनधर्मप्रचारं च कृत्वा दिगन्तकीर्तिमासाद्य च सम्मेतशिखरपर्वते श्रावणशुक्ल ८ मुक्तिमाप । तत्रभगवतः श्रीपार्श्वनाथस्य चरितमाबालवृद्धविदितं, नाविदितं च विशेषतो जिनधर्माचरणशीलानां श्रावकाणाम् । अतोऽत्रायुक्तमेव पिष्टपेषणम् । अत्रोद्देश्यभूतं तु तत्पट्टाधिष्ठातॄणामाचार्यवर्याणां संक्षिप्तमितिवृत्तम् ।

## भगवान् श्रीपार्श्वनाथपट्टवर्णनम्

वि० पू० ७२० तः ] १–शुभदत्तो गणधरः [ वि० पू० ६९६ पर्यन्तम्

श्रीशुभदत्तो गणधरः सूर्य इवाज्ञाननिवारको जिनकुलकमलदिवाकरो भक्तजनहृदयपुण्डरीकविबोधको जिनशासनधुरावाहको शास्त्रविचक्षणश्चारित्रचूडामणिरुत्कृष्टक्रियापालको गणधरपदविभूषितोऽभूत् । एकदा तच्छिष्यो वरदत्तो निर्दिष्टनगरान्तिकमपि नगरं गच्छति स्म । पथि सूर्यास्तोऽभवत् । अथागमपाठानुसारेण तत्रैव तरुशाखामासाद्य ज्ञानध्याननित्यनियमादिषु कार्येषु शिष्यैः सह संलग्नोऽभूत् । तस्मिन्नेवावसरे स्तेनवृत्तिविशारदाः कुकर्मनिरताः परमाधार्मिकाः हरिदत्तप्रमुखाः स्तेना अज्ञातमुनिधर्मा मुनीसमीपद्रव्यमाहर्तुमागच्छन् । ज्ञानध्यानादिविमलक्रिया निमग्नान् मुनिपुंगवान् दृष्ट्वाऽऽश्चर्यनिमग्नास्ते तत्रैवस्थिताः । समयज्ञेन वरदत्तेनापि सुयोग्यक्षेत्रं ज्ञान दृष्ट्यावलोक्य तेभ्यो जिनगदितागमानुकूला देशना दत्ता । भगवतः पार्श्वनाथस्य चातुर्यामप्रधानं धर्ममाकर्ण्य सर्वे स्तेनाः संसाराद् विरक्ता वरदत्तसमीपे भागवतीं दीक्षां गृहीत्वा मोक्षमार्गस्याराध काः समभवन् ।

वि० पू० ६९६ तः ] २–हरिदत्तसूरिः [ वि० पू० ६२६ प०

श्रीहरिदत्तसूरिर्विविधशास्त्रविशारदो सर्वविद्याकलापारगो महामहिमशाली जितानेकवादी सञ्जातः । एकदानुक्रमेण ग्रामानुग्रामं विहरन् स्वस्त्याख्यां नगरीमगमत् । तत्रोचितस्थानशय्याद्यानुकूल्यं दृष्ट्वा तत्रैव धर्मकार्यनिरतोऽभूत् । तस्मिन्नेव समयेतत्र वेदमार्गानुगामी न्यायव्याकरणकाव्यशास्त्रविचक्षणो वैदिकी हिंसा हिंसा न भवतीति वादस्य समर्थकः प्रचारकश्च लोहित्याचार्यो

वेदपुराणस्मृतिशास्त्रपारदृश्वा पण्डितप्रकाण्डो यज्ञधर्मस्योपदेशं ददाति स्म। अथैकदा भूपप्रवरस्य "अदीनशत्रोः" सभायां लोहित्याचार्यस्य हरदत्तसूरिणा सह शास्त्रार्थोऽभूत् । लोहित्याचार्यस्य हिंसाविषयकं मतं खण्डितं तेन सूरिणा स्वबुद्धिप्रभावेण । छात्रसहस्रपरिवृतं तं जित्वा दीक्षया दीक्षयन् अनेकान् शिष्यान् महाराष्ट्रप्रान्ते स्वधर्मप्रचारार्थं च स प्राहिणोत्। एवमतीते काले च मोक्षपदवीमवाप।

वि० पू० ६२६ तः ] ३—समुद्रसूरिः [ वि० पू० ५५४ प०

श्रीसमुद्रसूरिः काव्यकलाकोविदः परमसौभाग्यवान् भव्यसहस्रपत्रप्रकाशकः द्वादशांगमर्मज्ञः समागतः। तच्छिष्यो जिननिगमनिगदितयमनियमतत्परो विदेशी मुनिः। स चैकदा पञ्चशत ५०० संख्याकैः शिष्यैः परिवृतः उज्जयिनीमगच्छत्। तत्र च राजानं जयसेनं केशिकुमारं राजकुमारमनंगसुन्दरीं राज्ञीं च पार्श्वप्रभुदर्शितशिक्षोपदेशेन चातुर्यामतत्त्वं सम्बोध्य जिनधर्मदीक्षादीक्षितामकारयत्। एवं सोऽपि मोक्षमार्गमनुससार।

वि० पू० ५५४ तः ] ४—केशिश्रमणाचार्यः [ वि० पू० ४७० प०

४ केशिश्रमणसूरिः परमयशोभाजनं विविधविद्याविद्योतितः परमोपकारनिरतो जिनशासनोन्नतिकर्ता तपःकर्मसंलग्नो बालब्रह्मचारी बभूव। तदा हिंसाधर्मस्य यज्ञादौ पशुविशसनरूपस्य प्राबल्यमासीत्। तत्तद्देशीयाः सर्वेऽपि राजानो वेदमार्गानुसारिणो यज्ञधर्मसमर्थकाश्चासन्। पशुप्रधानैर्यज्ञैः सर्वत्र मेदिनीरुधिरप्रवाहपरिपूर्णा नदीवादृश्यत। अस्मिन् संघर्षसमये बहुसंख्याकाः साधवोऽहिंसाधर्मस्योपदेशकाः सर्वत्र धर्मप्रचाराय पर्यटनमकार्षुः। अथ स्वकीयप्रकृष्टज्ञानबलात् श्रीकेशिश्रमणसूरिणा प्रदेशिप्रभृतयोऽनेके महीपालाः प्रबोधिताः जिनमतानुयायिनोऽभवन्। तत्रापरोऽपि केशिश्रमणसूरिरभूद् यो गौतमस्वामिना सह शास्त्रचर्चां विधाय पञ्चमहाव्रतधर्मं श्रीवीरकथितमङ्गीकृत्य मुक्तिमलभत।

अस्मिन्नेव समये चरमतीर्थंकरस्य भगवतो महावीरस्य, बौद्धधर्मप्रवर्तकस्य दयाधर्मनिरतस्य बुद्धस्य च जन्मासीत्। श्रीकेशिश्रमणसूरिरपि मोक्षपथप्रवासी जातः।

वि० पू० ४७० तः ] ५—श्रीस्वयंप्रभसूरिः [ वि० पू० ४१८ प०

स्वयंप्रभसूरिर्विद्याधरकुलसमुद्भवः जिनशासनप्रचारकोऽतिभाग्यवान् व्याख्यानविचक्षणस्तपस्तेजोराशिः सञ्जातः। सकलशिष्यगणयुतः स पूर्वदेशे विहरन् व्यचिन्तयद् यदस्मिन् देशे बहवः साधवो धर्मप्रचारकाः सन्त्यतोऽन्यत्र गन्तव्यम्" इति पञ्चशत ५०० संख्यकान् शिष्यानादाय स शत्रुञ्जयं प्रति प्रतस्थे। विधाय च शत्रुञ्जययात्रामर्बुदाचलं प्रत्यागतस्तत्राहिंसातत्त्वं सर्वान् बोधयामास।

एवं प्रयाते च काले श्रीमालनगरनिवासिनो गृहस्था दर्शनाय तत्र समागच्छन्। सूरीश्वरस्य च प्रभावोपेतं व्याख्यानमाकर्ण्य ते प्रार्थयन्ति स्म प्रभो! भवानागमनेन श्रीमालपत्तनमप्यलंकरोतु,

तत्र च हिंसाधर्मस्यैव प्राधान्यं वर्तते़ऽतोऽहिंसाधर्मं विस्तारयतु । प्रार्थनाञ्च तेषां विदित्वा क्रमेण विहरन् स श्रीमालपत्तनमगच्छत् । भिक्षासमये मुनयो भिक्षार्थं पर्यटन् गृहस्थानां गृहेषु किन्तु सर्वतः सुरामांसाद्यमेध्यानभक्ष्यांश्च पदार्थान् दीयमानान् दृष्ट्वा यथागतं प्रत्याजग्मुः ।

ततः सर्वजीवदयापरः सूरीश्वरो यज्ञे यज्ञीयानां जीवानां हिंसकं जयसेननामानं राजानं प्रत्यबोधीत् । राजसभायामनेकहेतुदृष्टान्तगर्भितं विशिष्टप्रतिभापूर्णं व्याख्यानं दत्त्वा तेनैव नृपेण सह नवतिसहस्रगृहाणि जैनतत्त्वं संप्रदर्श्य जैनधर्मे न्यवेशयत् । मासपर्यन्तं च तत्रैव स्थित्वा तेषां धर्मभावनामुपदेशेन वर्धयामास । ततः पद्मावत्यां नगर्यां यज्ञस्यायोजनमाकर्णयन् पशुवधनिवारणार्थं गतः । तत्र पद्मसेनस्य राज्ञः सभायां जिनतत्त्वमुपदिश्यात्मकल्याणमार्गं दर्शयामास । विवादमप्यकरोद् विप्रपण्डितैः सह । एवं महामतिः सूरिः प्रत्यरौत्सीत् जीवानां हिंसाम् । पञ्चचत्वारिंशत्सहस्रसंख्यकान् क्षत्रियान् जिनधर्मेऽस्थापयच्च । तदनन्तरं वीरनिर्वाणाद् द्विपञ्चाशद् ५२ वर्षे रत्नप्रभसूरिं स्वकीयपट्टे संस्थाप्य स्वर्गं प्रत्यपद्यत ।

वि० पू० ४१८ तः ]　　६ श्रीरत्नप्रभसूरिः　　[ वि० पू० ३८६ प०

रत्नप्रभसूरीश्वरो विद्याधरकुलभूषणोऽखिलविद्यालंकारभूतो महाजनसंघस्याद्यसंस्थापको ग्रादिमानविमर्दको महाप्रभावकोऽभूत् । तस्मिन्नेव काले रथनुपुरे महादेवीश्रीलक्ष्मीसमन्वितो महेन्द्रचूडो नाम नृप आसीत् । स स्वपुत्रं रत्नचूडं राजसिंहासनोपरि समारोप्य वृद्धत्वे स्वकल्याणार्थं निवृत्तिमार्गमङ्गीचकार । एकदा तत्रागतेन चारणमुनिना व्याख्यानकाले नन्दीश्वरद्वीपस्थितद्विपञ्चाश ५२ जिनालयानामनुभूतं सौख्यप्रदं वर्णनं विहितम् । सुतरां च तत्समाकर्ण्य तीर्थयात्रां विधातुं रत्नचूडविद्याधरस्य सकलनगरनिवासिनाञ्चेच्छा सञ्जाता । ततो निर्दिष्टनिश्चयानुसारेण स विमानमारुह्य नन्दीश्वरमभिप्रतस्थे । मार्गे पृथिव्यां देवदेवीभ्यो देशनां ददतः श्रीस्वयंप्रभसूरेरुपरि रत्नचूडविमानोऽवष्टब्धः । किमिदमिति विचिन्तयन्नसौ यावदधः पश्यति तावद्देशनां ददतं तं मुनिं ददर्श । दृष्ट्वा च जंगमतीर्थरूपस्यास्य मुनेरुल्लंघनरूपो महानविनयो मे जात इति विचार्य तत्रागत्य तं मुनिं प्रणनाम क्षमाञ्च ययाचे । गुरुप्रदत्तदेशनाञ्च निर्मलचेतसा शुश्राव । श्रुत्वा च स संसाराद्विरक्तः सन् दीक्षां ग्रहीतुमिच्छया स्वप्रतिज्ञां तस्मै व्यज्ञापयद् भो प्रभो ? मम समीपे परम्पराप्राप्ता श्रीपार्श्वनाथस्य प्रतिमा वर्तते । तस्या वंदनार्चनादिक्रियाकरणनियमोऽस्ति मे । पूर्वं लंकेश्वरस्य रावणस्य चैत्यालये साऽसीत् । यदा रामचन्द्रेण लंका विध्वस्ता तदा मदीयपूर्वजेन चन्द्रचूडनरनाथेन सा प्रतिमाऽनीता । अनुक्रमसंप्राप्तां तामहमहर्निशं पूजयामि । तया प्रतिमया सहैवाहं दीक्षां ग्रहीष्यामि । इति तद्वचः समाकर्ण्य धर्मलाभकारणं च विज्ञाय श्रीस्वयंप्रभसूरिणा पञ्चशत ५०० संख्याकैर्विद्याधरैः सह रत्नचूडो दीक्षितः कृतः । अनन्तरञ्च रत्नप्रभसूरीति तन्नाम परिवर्तितम् । क्रमेण सोऽपि द्वादशाङ्गी चतुर्दशपूर्वी च बभूव । श्रीस्वयंप्रभसूरिणा वीरनिर्वाणाद् द्विपञ्चाशद् ५२ वर्षातिक्रमणे सति स्वपट्टेऽधिष्ठापितः ।

अथ पञ्चशतसाधुभिः सह श्रीरत्नप्रभसूरिरितस्ततः परिभ्रमणं चकार । एकदा तीर्थयात्रायै

अर्बुदाचलं प्रत्याययौ । तत्र तस्याधिष्ठायिका चक्रेश्वरी देवी मरुभूमिं प्रति विहाराय तं प्रेरयामास । तदुद्दिश्य स साधुभिः सह मरुभूमिमाजगाम । अस्मिन् विकटविहारकाले क्षुत्पिपासाद्यनेकोपसर्गाः समभूवन् । मिथ्यात्ववशीभूता जीवाः शस्त्रास्त्रैस्ताडयन्ति तर्जयन्ति च मुनीन् किन्तु जिनधर्मप्रचारार्थमेव सर्वस्वसमर्पणमिति निश्चित्य सर्वेषां परिषहाणामुपेक्षणमेव विहितं मुनिभिः । अनन्तरमुपकेशपुरं सशिष्यः सूरिर्ययौ ।

## अथ उपकेशपुरनिर्माणवर्णनम् ॥

श्रीसूर्यवंशोद्भवः श्रीभीमसेनः श्रीमालपुर [ भिन्नमाल ] स्यासीद् भूपतिः । तस्य च सुरसुन्दरोत्पलदेवनामानौ द्वौ पुत्रावास्ताम् । सुरसुन्दरो युवराजो राज्यभारधुरंधरः । उत्पलदेवश्च तेनापमानितः । तत्प्रतीकाराय नूतननगरनिर्माणाय स इतस्ततो बभ्राम ।

अपरश्च भीमसेनामात्यस्य—उहडोद्धरणनामानौद्वसुतौ । तत्रानुजस्योद्धरणस्य गृहेऽष्टादशकोटिसंख्यापरिमितं धनम् । ज्यायस उहडस्य च नवनवतिलक्षमुद्राः । तदा नियमस्त्वेवंविधः—ये कोटीश्वरास्ते दुर्गमध्ये ये च लक्षाधिपास्ते बहिरध्यवसन् । उहडेन नगरमध्येऽधिवासार्थं स्वानुजसमीपे मुद्राणामेकलक्षं याचितम् । भ्रातृपत्न्या सासूयमुक्तम् "न खलु त्वामन्तरेणेदं नगरं शून्यमास्ते येनाधिवासार्थमेकलक्षं दद्यात् ते भ्राता" इति मर्मरुजोत्पादकं तदीयं वचो निशम्य मन्त्रिपुत्र उहडो राजकुमारोत्पलदेवपार्श्वमाययौ । समदुःखाभ्यामुभाभ्याञ्च विचारितम्—नूनमावाभ्यां नूतनमेकं नगरं निर्मातव्यम्—इत्यालोच्य तदर्थं तौ ततो निर्जग्मतुः । मध्ये च संग्रामसिंहो मिलितः । पृष्टं च तेन कुत्र गच्छन्ति भवन्तः ? राजकुमारेणोक्तम् "अभिनवरमणीयनगरनिमार्णाय स्थानान्वेषणाय वयं यत्र कुत्र व्रजामः" इति श्रुत्वा संग्रामसिंहो जगाद—"कुत्र सन्ति भवदीयानि शस्त्रास्त्राणि ? नवनगरनिर्माणमिदं न बालानां खेलनम्" अस्तु शस्त्रास्त्राभावेऽपि वयं बाहुबलादेव विजयलक्ष्मीं प्राप्स्यामः इति राजकुमारवचनं समाकर्ण्य परमसन्तुष्टः संग्रामसिंहः स्वसुतायाः पाणिग्रहणं तेनोत्पलदेवेन सहोत्साहहर्षपुरःसरं चकार । एवं समाप्य तद्विधिं ते त्रयोऽग्रे जग्मुः मध्येऽध्वनि च तानश्वक्रेतारो मिलिताः अशीत्यधिकशतं घोटकान् ददतु यूयं, मूल्यं च राज्यप्राप्त्यनन्तरमेवावश्यं दास्याम-इति प्रतिज्ञाय तान् घोटकानक्रीणाद् राजकुमारः । ततो ढेलीपुरमासाद्य तदधिपतये राज्ञे तानुपायनरूपेण ददौ । तेन च परमसत्कारसन्तुष्टेन नूतननगरनिर्माणानुकूल ओसनामा प्रदेशः समर्पितः । निर्माय च तत्र नगरं भिन्नमालातोऽष्टादशसहस्रकौटुम्बिकाः समाहूता निवासार्थम्, तदर्थं च द्विजातीनामन्येऽपि भिन्नजातीयास्तत्र निवासार्थं समागमन् । तत्प्रदेशस्य समुद्रसामीप्यात् क्षाराधिक्याद् ओस इति नाम प्रसिद्धिं ययौ । अत्र शैवमतानुयायिनां नास्तिकानां, यज्ञादौ पशुहिंसनकर्मनिरतानां वैदिकानां, वाममार्गानुसारिणाञ्च विशेषतः प्राधान्यमासीत् ।

अथ जिनधर्मप्रचारार्थमत्र समागता मुनयः किन्तु सर्वेऽप्युपकेशपुरनिवासिनो जनास्तान्

तिरश्चक्रुः, न चात्र ते भिक्षादिकं प्रापुः। यत्र च ययुर्भिक्षार्थं तत्र सुरामिषाद्यभक्ष्यपदार्थान् ददृशुः, अतो भिक्षार्थं महत्कष्टमनुबभूवुस्ते मुनयः। यथैवागतं तथैव तैः प्रत्यागतम्। पात्राणि दृष्ट्वा च मासावधिकं सन्तोषमास्थाय स्थितिं चक्रुः। पश्चाद् विहारः कृतः। अनुक्रमेण पुनस्तत्र समाजग्मुः किन्तु कार्यसिद्धिमनवलोक्य पुनर्विहारमैच्छन्। तदा चामुण्डया देव्या कथितम्—भो आचार्य! सर्वे यूयमत्रैव मासचतुष्टयपर्यन्तं निवसत! महानुपकारो भविष्यति। न खलु मदीयनगरान्निर्गतव्यं संकटेऽपि" इति समाकर्ण्य देवीवाक्यं विश्वस्य च ते ३५ संख्यकाः मुनयो मासिका द्विमासिकास्त्रिमासिकाश्चतुर्मासिकाश्च तत्रैव न्यवात्सुः। अन्ये तु चतुर्मासचिकीर्षयाऽन्यत्र प्रतस्थिरे।

अस्योपकेशपुराधिपस्य "उत्पलदेवस्य" पाणिपीडनविधिः संग्रामसिंहस्य कन्यया जाल्हणादेव्या सह समभवत्। व्यतीते च कियति काले सा सौभाग्यसुन्दरीं नाम तनयां सुषुवे। तदुद्वाहश्चोत्पलदेवेनामात्यपुत्रेण-उहडसुतेन त्रिलोकसिंहेन साकं विहितः। दुर्दैववशात्स कदाचित् केनचिद् भुजंगेन दष्टः। समाहूताश्च सर्वे सर्पमन्त्रतन्त्रविशारदाः किन्तु विफलप्रयत्नास्ते जाताः। कथितं च मृतोऽयं, दाह एवाशु विधीयतां, नात्र प्रतीकारोपायः कश्चित्। सर्वे जनाः सौभाग्यसुन्दरी च सतीभवितुमिच्छती तमादाय दाहार्थं प्रेतवनं (श्मशानं) समाव्रजन्। अस्मिन्नेव काले महानुपकारो भविष्यतीति विचार्य साधुरूपं गृहीत्वा देवी चामुण्डा तत्रैवागता। जनान् सा प्राह सर्वे यूयं जीवन्तमेनं कथं धक्ष्यथ? इत्याकर्ण्य मन्त्रिणा शवशिबिका परावर्तिता, किन्तु स साधुर्न तेषां दृग्गोचरो बभूव। अथ च सर्वे ते मिलित्वा सूरिपार्श्वं ययुः। मृतकविमानोः गुरुसमीपे स्थापितः, रुदन्तस्ते प्रोचुः "दयासिन्धो! देवोऽस्माकं रुष्टः। पुत्रमरणादस्माकं गृहमरण्यमिव शून्यम्। जीवय सुतम्। याचकानां नो याचनां सफलीकुरु" इति करुणार्द्रं वचो निशम्य तेषां किंचिदुष्णं वारि समानीतम्। स्वचरणौ च प्रक्षाल्य तेन तज्जलं मृतकस्योपरि संसिक्तम्। स मन्त्रिपुत्र उज्जीवितः। सर्वे च ते कथयामासुः-अहो नूतनं जन्म प्राप्तमनेन पुत्रेण। मन्त्री च सूर्यवर्चसे सूरये तस्मै मणिमुक्ताफलवस्त्रादिकमुपायनमर्पयामास। सूरिणाचोक्तम्-न खलु धनेन मे प्रयोजनम्, अत्रत्याः सर्वे त्वं च निष्कपटं जिनधर्मं गृह्णन्तु समेषामात्मकल्याणाय श्रेयसां पन्था एष एवेति। ते तथैव जिनधर्मं स्वीचक्रुः। गुरुणा च तेन स्वधर्मोपरि दृढश्रद्धार्थं प्रभावपूर्णं सकलजनमनोरञ्जकं व्याख्यानतः शिक्षणं दत्तम्। सपादलक्षकाश्च जाताः श्रावकाः।

अपरञ्चेयं विशिष्टा घटना, तथाहि श्रावकावस्थायाः पूर्वमेवोहडेन श्रीनारायणमन्दिरनिर्माणार्थं महान् यत्नो विहितः। स दिवा देवालयकार्यं कारयति रात्रौ च तन्नष्टं भवत्यकस्मादेव। चिन्तासमाकुलचेतसा तेन सर्वे ते दार्शनिकाः पृष्टाः किमत्र कारणमिति, न च तैः समाधानं कृतम्। ततः सः कृताञ्जलिः सूरिपार्श्वं गत्वा देवालयपतनकारणमपृच्छत्। तेन सूरिणा चोक्तम्-कस्य देवालयः क्रियते? नारायणस्येति, तदुत्तरं श्रुत्वा पुनः प्रोवाच सूरिः—अस्मिन्नेव देवालये महावीरस्य स्थापनां करिष्यामीति संकल्प्य तत्कार्यमारभस्व मङ्गलं ते भविष्यती तद्वचोऽङ्गीकृत्य तेन तथैव प्रतिपन्नं, कार्य-

मारब्धम् । देवप्रासादश्च परिपूर्णो जातः । सर्वे च विस्मयान्विताः बभूवुः ।

अथ चामुण्डादेव्या सूरिः कथितः—भगवन् ! महावीरप्रतिमानिर्माणाय देवगृहादुत्तरस्यां दिशि लुणाद्र्यभिधानपर्वतोपत्यकायां वालुकया श्रेष्ठिनो घटोध्नीगोदुग्धादहं प्रतिमाविचरनं करोमि। निमार्णकालस्य षण्मासावधिकं मानमित्युक्त्वा सा विरराम ।

अथैकदा मन्त्री गोदुग्धन्यूनत्वकारणं ज्ञातुं गोपालकमपृच्छत्-तेन च दुग्धस्रावस्थलं तस्मै दर्शितम् । किमर्थमत्रैवेयं गौर्दुग्धं स्रावति ? इति कारणान्वेषणाय सोऽखिलान् दार्शनिकानाहूय पप्रच्छ । केचिदत्र स्थले कृष्णस्य, केऽपि गणपतेः, अपरे बुद्धस्य च प्रतिमाऽधस्ताद् वर्तत इति कथयामासुः । न च ते निश्चयं चक्रुः । अतोऽसौ गत्वा सप्रश्रयं सूरिं तत्कारणं पप्रच्छ । सूरिणा चोक्तम्-भो मन्त्रिन् ! प्रातस्ते सन्देहसमाधानं भविष्यति । तद्वचः श्रद्दधानोऽसौ गृहं प्रत्याययौ । सूरिश्च ध्याने स्थितः । रात्रावागता देवी । सूरिश्च तामुवाच हे देवि ! प्रत्यक्षीभूय सर्वमेतत्कारणं स्वमुखेनैव ब्रूहि सचिवस्योहडस्य सम्मुखम् । सा च निद्रानिलीनं तं प्रत्यक्षीभूय प्रोवाच भो मन्त्रिन् ! मदनुज्ञाता त्वदीया गौस्तत्र दुग्धं स्रवति, तत्क्षीरेणाहं महावीरस्य प्रतिमां विरचयामि-इदं कारणं ज्ञापयितुं गुरुणाप्रेरिताहमत्रागता, अतः संशयं दूरीकुरु, कल्याणं ते भवत्वित्युक्त्व सा तिरोदधे । प्रातः स सूरिसमीपं गत्वा रात्रिवृत्तान्तं निवेद्य तदग्रे महावीरप्रतिमादर्शनेच्छां प्रकटीचकार। आचार्येणोक्तम्-अधुना नियतकालात्किंचिदवशिष्टं कार्यस्यातो विलम्बं कंचित्सहस्व । तेनोक्तम्-गुरुकृपया तत्प्रतिमाकार्यमवशिष्टमपि पूर्णमेव भविष्यति-इति तदाग्रहात्पूज्यो मुनिस्तेन सार्द्धं तत्र गतो यत्र जिनेश्वरप्रतिमा । तत्र स्वर्णमययवस्वस्तिककुसुमादीनि च विकीर्य स्वयमुर्वीं खनित्वा मन्त्री जिनप्रतिमां बहिरानयत् । सप्तदिनसमयस्य न्यूनत्वाद्धृदये निम्बफलसमग्रन्थियुक्तो महावीरो बहिराजगाम । व्योममण्डलाच्च पञ्चवर्णा पुष्पवृष्टिः पपात । हस्तिन उपरि समारोप्य प्रतिमां मन्दिरमानयत् । विशुद्धबुद्धिरसौ प्रतिमाप्रतिष्ठापनलग्नं सर्वदोषविवर्जितं निश्चिकाय । प्रतिष्ठा माघशुक्लपञ्चम्यां बृहस्पतिवासरे धनुर्लग्ने कर्तव्येति निश्चितम् । तस्मिन्नेव काले कोरंटकात् श्रावकानामाह्वानमागतम् "भगवन् ! प्रतिष्ठार्थं सत्वरमागच्छतु" इति विचार्योवाच-अत्रापि प्रतिष्ठा-कार्यं तत्रागमनं कथं घटते ? तच्छ्रुत्वा सर्वे कोरंटकवास्तव्या विनिश्चितलग्नसमये विषादान्विता अभवन् । तान् दृष्ट्वा स आह यूयं मा विषीदत, तत्राप्यहं आगमिष्यामि । हर्षिताश्च ते प्रत्याग-च्छन् । ततः श्रीमत्युपकेशपुरे महावीरप्रतिष्ठाविधिं समाप्य निजरूपेण, वैक्रियरूपेण च व्योममा-र्गेण कोरंटकं गत्वा तस्मिन्नेव धनुर्लग्ने मूर्तिप्रतिष्ठां चकार। श्रीवीरजिनेश्वरनिर्वाणात् सप्ततिवत्सरे-षु व्यतीतेषूपकेशपुरे श्रीमद्वीरस्थापनं समजनि ।

एकदाऽऽचार्येणोक्तम् "श्रावकाः ! किमर्थं यूयं देवीमन्दिरं गच्छथ ? विविधवधस्थानं तद्" इति तद्वचः श्रुत्वा ते प्रोचुः प्रभो ! युक्तमेतत् किन्तु रौद्रस्वभावां देवीं छलयामस्तदा कुपिता साऽस्मत्कुटुम्बमवसादयेत् । पुनराचार्येणोक्तम्-अहं रक्षां करिष्यामीति श्रुत्वा ते मन्दिरगगमा-न्निवृत्ता बभूवुः । अपरत्र देव्या विचारितम्-अयमेवाचार्यो यस्य मया बहूपकृतम् । सोऽपि मदुपास-

त्कान्मम मन्दिरमागन्तुं निषेधति, मयाऽवश्यमेव किमप्यस्य दर्शयितव्यं प्रभुत्वमिति। किन्तु मुनेर्ध्यानज्ञानादिक्रियानिरतत्वात्सा कालं प्रतीक्षमाणा स्थिता। एकदा विकालसमये ज्ञानध्याना-देर्निवृत्तस्यास्य वामनेत्रे कापि पीडा विहिता तया। देव्या एवेदं कार्यमिति ज्ञानदृष्ट्या विचार्यैव-मेव सः स्थितः। प्रत्यक्षीभूता च सा जगाद-यदि त्वं करडां मरडां (मांसं मदिराञ्च) दास्यसि तदैव ते पीडा नंक्ष्यति नान्यथेति। आचार्येणोक्तम्-अवश्यं ते दापयिष्यामि। सा चाकर्ण्य तिरोदधे।

अन्येद्युरुपकेशपुरवास्तव्याः श्रावका आचार्यपार्श्वमागत्यावदन्-भो आचार्य! देव्याः कोपा-द्भवतोऽपीदृशी पीडा तदात्वस्माकं का वार्ता? अस्तु नवरात्रदिवसोऽतः किमप्यनुष्ठानमनुष्ठेयम्, तच्च परम्पराप्राप्तम्-। त्यक्त्वा तद् वयं कथं सुखिनः स्यामेति श्रुत्वा मुनिनोक्तम्-अहं युष्माभिः सहागच्छामि नात्र कापि चिन्ता विधेयेति श्रद्दधानास्ते शान्तिमवलम्ब्य स्वगृहमगमन्। आगत्य च सूरिकथितविधिना कुंकुंमकर्पूराद्यर्चनोपचारान् सज्जीचक्रुः। अथ सर्वे ते प्रभाते पक्वान्नखज्जका-दिकं कुंकुंमकर्पूराद्युपचारांश्चादायाचार्येण सार्द्धं देव्यर्चनाय मन्दिरं ययुः। श्रावकपाश्र्वात् पूजनं का-रयित्वा पाणिभ्यां पक्वान्नं चूर्णयताऽचार्येण प्रोक्तम् देवि? तेऽभिमतं गृहाण। ततो रोषारुणनेत्रया तया चोक्तम्-मया कथितमन्यत्, त्वया चोपहृतमप्यन्यद्। आचार्येणेरितम्-त्वया पशुवधरूपो बलि-र्याचितः स तु कर्तुमर्पयितुश्चाशक्यो न चात्मकल्याणकरः। हे देवि! लोकास्त्वां प्रीणयितुमेव त्वदग्रे पशुहननं कुर्वन्ति, कृत्वा गृहं गत्वा च त एवादन्ति न तु त्वमश्नासि। मुधैव हिंसां कुर्वाणा कारयन्ती च त्वं न खलु नरकाद् बिभेषि? पापकर्मनिरतानां देवमानुषाणां सर्वेषामेव नारकीया गतिरवश्यमेव भवति। सर्वसिद्धान्तसम्मतो दयाधर्म एव त्वयाऽश्रयणीय इति मुनिकथितं वचः समाकर्ण्य प्रबुद्धा सा प्राह सत्यमुक्तमतः परं साधुसमर्पितरक्तपुष्पमप्यहं न धारयिष्यामि। श्रावकैः कुंकुंमनैवेद्य-कुसुमादिभिरेव मे पूजा विधेया। भवतो भवत्परम्परागतस्याचार्यस्य श्रीमहावीरस्य च समुपासकानां समेषामुपद्रवानखिलान्नाशयिष्यामि स्तुता पूजिता चाहं सदैव कुमारीशरीरं प्रविष्टाऽसंशयम्। त्वया ममापि धर्मलाभो देय इति श्रुत्वा सूरिणा च तदङ्गीकृतम्। सा च तिरोदधे। ततःप्रभृति सा सच्चिका ( सत्यका ) इति प्रसिद्धिं जगाम।

## ब्राह्मणपुत्रकथा मुनेश्चमत्कारश्च।

कस्मिश्चित्समये कोट्यधीशस्य ब्राह्मणस्य पुत्रः केनचिद् दुष्टभुजंगमेन दष्टो मृतकल्प आसीत्। जनकेनापि मन्त्रतन्त्रज्ञानखिलानाहूय विषापहरणोपायाः कारितास्ते च विफलाऽभवन्। अतो दुःखविह्वलाः पितृप्रभृतयो विप्राः करुणं क्रन्दन्तः शिबिकायां संस्थाप्य ब्राह्मणपुत्रं दाहार्थं स्मशानं ययुः। सूरिरप्यन्तर्लब्धसंज्ञं तं जानन् धर्मोन्नत्यै शोकसंविग्नमानसं तज्जनकमाकारयामास। भो विप्र! यदि जीवेत्तव तनयस्तदा त्वं किं करिष्यसि?। स आह भगवन्? तव किंकरो भविष्या-म्यहमाजीवनं, किं बहुना श्रावकानामिव भवानेव मे माता पिता देवतेति स्वीकरोमि। ततो मुनिना पादप्रक्षालितं वारि मृतपुत्रस्योपरि प्रक्षिप्तं येनासौ संज्ञां लेभे। उत्तिष्ठमानः स चैतन्यशीलं किमेतद् इति पृष्ठवान् पितरम्। पित्रोक्तम्—कृपासिन्धुना सूरिणानेन त्वं पुनर्जीवनं लब्धवान्। ज्ञात्वाऽसौ

सादरं मुनिचरणौ ववन्दे, जगाद च भगवन्! विप्रश्रमणयोर्वैरमिति लौकिकोक्तिः स्वसाधुत्वं दर्शयता भवता मिथ्याकृता, अतः प्रभृति श्रावकानामिव ब्राह्मणानामपि त्वमर्चनीयः। ततः सर्वे ब्राह्मणाः श्रावका इव सुरेर्गौरवमादधिरे। सुरेराज्ञाश्च नावमेनिरे। एवंविधप्रभावशाली स सूरिरष्टादशसहस्र १८००० संख्यकान् जनान् जिनधर्मं स्वीकारयामास, धर्मतत्त्वं च बोधयामास।

राजसचिवेन—उहडेनेव-उत्पलदेवेनापि पार्श्वनाथमन्दिरनिर्माणार्थं सामग्री सज्जीकृता। प्रतिमा च शिल्पकर्मकुशलैः शिल्पिभिरतिरमणीया विरचिता। वीरमन्दिरनिर्माणात् सप्तवर्षसम्मिते काले पार्श्वनाथप्रतिष्ठामवलोकयितुमुपकेशपुरे सोत्सुकाः सर्वे परिभ्रमन्तीतस्ततः। श्रीरत्नप्रभकनकप्रभसूरिभ्यां भगवतः पार्श्वनाथस्य सच्चिकाया ( चामुंडायाः ) श्च प्रतिमा शुभे मुहूर्ते प्रतिष्ठापिता।

## कोरंटकगच्छोत्पत्तिः।

श्रीरत्नप्रभसूरिणा कोरंटकोपकेशपुरयोर्मध्ये महावीरमन्दिरप्रतिष्ठा धनुर्लग्ने वैक्रयिकसाक्षाद्रूपाभ्यां च विहितासीदित्युक्तं प्राक्। अतस्तत्रत्या जना विचिन्तयन्ति स्म यन्मायिकरूपधरेण कृतायाः प्रतिष्ठाया न किमपि फलं स्यात्। अस्माभिः कनकसूरये तच्छिष्यमण्डलमध्यादत्रस्थिताय सूरिपदं देयम्, एवं विचार्य सर्वे ते श्रावकाः सोत्सहापुरःसरं सुरिपदमहोत्सवं समारेभिरे। अतिक्रान्ते च काले गच्छभेदकारणं विज्ञाय स्वयमेव रत्नप्रभसूरिः कोरंटकमगमत्। स्थिरप्रशान्तमनसा च सर्वान् समाश्वास्य सूरिपदे कनकप्रभमुनिं स्थापयामास। इतः प्रभृति कनकप्रभसूरिपरम्परा कोरण्टकगच्छनाम्ना लोके प्रसिद्धिमियाय।

## वि० पू० ३८६ तः ] ७—यक्षदेवसूरिः [ वि० पू० ३४२ पः

यक्षदेवसूरिः सकलशास्त्रवेत्ता विमलक्षत्रियवंशोद्भवः सत्यार्थप्रकाशको वादिकुंजरकेशरी यक्षप्रतिबोधको बभूव। तन्मूलाभिधानं वीरधवलेत्यासीत्।

अनुक्रमेण ग्रामनगरेषु विहरन् सूरिप्रवरः पञ्चशतसंख्यकैर्मुनिभिःसार्द्धं कोरेण्टकपुरं ययौ। तत्र तदीयबालशिष्येण खल्वेकदा यक्षप्रतिमोपरि पात्रप्रक्षालितं जलं पातितम्। ततो रुष्टो यक्षः प्राकृतिकराक्षसवृत्तितो मुनेर्देहे विकृतिं चकार सूरिरपि ज्ञानदृष्ट्या विकृतिकारणं विज्ञाय यक्षनिग्रहं चकार। निग्रहीतोऽसावपि सुरेर्दासत्वमङ्गीचकार। एवमेव कस्मिंश्चिद्राजगृहेऽनने सूरिणा यक्षः प्रतिबोधितः संघविध्वंसश्च निवारितः ततः प्रभृति यक्षदेवेत्यन्वर्थकनामाऽभवत्।

पूर्वाचार्याणामादर्शमनुसृत्य वङ्गकलिङ्गपञ्चालादिषु प्रान्तेषु शत १०० परिमितैः शिष्यैः सह परिभ्रमन् सूरिः सिन्धदेशं जगाम। पथि यत्र यत्र वाममार्गिणां गृहाण्यासन्। तत्र तत्र भोजनादिखाद्यपदार्थच्छलः ताडनतर्जनाद्युपसर्गाः प्राप्ताः। धर्ममार्गाभिमुखो मुनीश्वरस्तान् सर्वानुपेक्ष्य रत्नप्रभसूरेरादार्शं लक्ष्यीकृत्य शान्तचेतसा सुखदुःखलाभालाभशीतोष्णाद्युपसर्गान् सहित्वा धर्मप्रचारमार्गाग्रेसरो भूत्वाऽग्रे गच्छति स्म। एवं तत्र देशेदुःसहान्यनेकानि कष्टान्यनुभूतानि सशिष्येण तेन सूरिणा। तथापि सिन्धदेशमाजगाम।

कदाचिदरण्यभूमिं गच्छन् सूरीश्वरो मृगयायै व्रजन्तमश्वारूढं राजपुत्रमद्राक्षीदध्वनि। मृत्युभयत्रस्ता मृगशशकादयो दीनाः पशवोऽश्वस्याग्रे धावन्ति स्म। इदं करुणाजनकं दृश्यं विलोक्य सूरिणोक्तम् कुमार! तिष्ठतु कुत्र गच्छति भवान्! इत्याकर्ण्याश्वारूढेन तेन प्रोक्तम्, महात्मन्! यत्कथनीयं तत् सत्वरं कथयतु। कुरंगशशकादयो ममाखेटकस्योपस्करभूता अग्रे गच्छन्त्यतो मा विलम्बस्व। आचार्येण सुक्षेत्रं विज्ञायोक्तम् भव्य! पापात्मकमिदं कर्म त्यक्त्वा दयाधर्मं भजस्व। एष एव सर्वदर्शनसंमतो मार्गः। यादृशी भवतः पीड़ा तादृश्येव सर्वेषां प्राणिनां भवति। अतो दुःखोत्पादिका जीवानां हिंसा न कर्तव्येत्युपदेशप्रतिबुद्धोऽसौ सूरिं शिवपुरं प्रति विहाराय प्रार्थयामास। नृपात्मजः कक्ककुमारोऽपि पादचारीभूत्वा सूरिणा सहैव चचाल। क्रमेण शिवपुरं प्राप्य बहिरुद्याने सशिष्यो मुनिरतिष्ठत् कुमारस्यानुशासने। प्रातःकाले जिनतत्त्वं सम्बोध्य रुद्राटनृपसहितान् सर्वान् जनान् जिनधर्मरतान् विधाय सूरिर्मन्दिरनिर्माणार्थं तानुवाच। धर्मोत्साहोत्साहितः शिवपुराधीशोऽपि सूरेरुपदेशात्प्रभावशाली विनयप्रणतो देवगृहमकारयत्। शुभे मुहूर्ते तत्र शासनाधीशस्य महावीरस्य मनोहरा प्रतिमा प्रतिष्ठापिता तेन सूरिणा।

वैराग्योत्पादकमुपदेशं च श्रुत्वा वैराग्यपरिपूर्णहृदयः कक्ककुमारः पितरावापृच्छ्य-विपुलसंख्यकैर्मानवैः स्त्रीभिश्च जनकेन च सार्द्धं सूरेः पार्श्वे दीक्षामङ्गीचकार। गृहीतदीक्षश्च स जननीं जन्मभूमिञ्च भव्यैर्जिनालयैरुज्जहार। क्रमेण द्वादशाङ्गी चतुर्दशपूर्वी च बभूव। वीराद् १२८ वर्षे व्यतिक्रान्ते श्रीयक्षदेवसूरिः श्रीकक्कमुनिं स्वपट्टे प्रतिष्ठाप्य स्वर्गमगमत्।

## वि० पू० ३४२ तः ] ८ श्रीकक्कसूरिः [ वि० पू० २८८ पः

श्रीकक्कसूरिः सर्वसत्वशिवंकरो ज्ञानाम्भोधिर्जिनशासनरतोऽखिलशास्त्रविचक्षणोऽतितेजस्वी समायातः। अयमपि मातुलादेव्याः परामर्शमासाद्य सर्वोपसर्गान् दूरीकृत्य कच्छप्रान्तं प्रति प्रतस्थे।

एकदा विस्मृतमार्गोऽसौ मार्गभ्रान्त्या समीपवर्तिपर्वतपार्श्वस्थं देव्यालयं ययौ। तत्र देव्यै बलिकरणायोपनीतं राजपुत्रं ददर्श। भयत्रस्तं च तं विलोक्य सूरिर्घातकान् वधकर्मसमुत्सुकान् जगदम्बिकोपासकान् सप्रगल्भमाह-भो मनुजाः? किमर्थमिदमनर्थकरं कर्म कुरुथ? इत्याकर्ण्य क्रूरकर्मणि तत्परास्ते प्रोचुः—महात्मन्! पश्य नरममुं वयं देव्यै प्रसन्नतार्थं बलिं समर्पयामः। अस्मादेव कारणाद् वयं ग्रामीणा मिलिताः स्मः। समाकर्ण्य तदीयं वचो मुनिस्तानाह-नैतत्सौख्यसंबर्धकं कर्म। जगदम्बिका हि सर्वेषां प्राणिनां रक्षिका न तु भक्षिकेति।

अथ ते मुनिवचोऽवगण्य हठाग्रहात्कुठारमादाय देवीसमीपे तं हन्तुमुद्यता बभूवुः, मुनेः प्रभावातिशयाच्च सः कुठारः कुण्ठितोऽभवत्। हस्तावप्यवरुद्धौ। तत आचार्यप्रभावप्रभावितास्ते विस्मयमादधुः। बलिकरणायोपनीतो राजपुत्रो देवगुप्तश्च प्राणसंकटान्मुक्तः।

ततश्च राजकुमारो मुनिचरणसरोजसंलग्नशिराः सविनयं तमाह—प्रभो! पुरीं मे भद्रावतीं समागच्छतु। आचार्येणोक्तम्-देवगुप्त! वयं पञ्चशतसंख्याका मुनयस्त्यक्तमार्गाः परिभ्रमन्त इतस्ततोऽत्र समागताः। अवशिष्टा मुनयः कुत्र गता इति न जाने। अतोऽस्माकमागमनं कथं भवेत्?

तेन चोक्तम्-प्रभो ! प्रातस्ते सर्वे भवता सह मिलिष्यन्त्यतो नात्र चिन्ता विधेया। देवगुप्तस्यातिशयमाग्रहं वीक्ष्य कक्कसूरिरपि भद्रावतीमभिप्रतस्थे।

अवशिष्टा मुनयस्तु सूर्यास्तमनवेलायां समीपस्थपर्वतस्थितवृक्षस्याधस्ताद् ज्ञानध्यानादिक्रियानिरताअभवन्। तेऽपि प्रभाते तेनैव सूरिणा सार्द्धं समागच्छन्।

अथ क्रमेण विहरन् निर्दिष्टस्थानमासाद्य मुनिर्वाटिकायां स्थितः। प्रातश्च महत्यां सभायां मुनिना धर्मतत्वप्रतिपादिका जिनोक्तदेशना दत्ता। अतस्ते सर्वेऽपि पौराः स्वेच्छया दयाप्रचुरं जिनधर्मं भेजिरे। शिवगुप्तराज्ञः कुमारो देवगुप्तस्तु विरक्तः। क्रमेण पितरावापृच्छ्य कतिपयैर्मुमुक्षुभिः सह महतीं जिनधर्मदीक्षामाप। अस्मान्महती जैनधर्मप्रभावना प्रादुरभवत्।

इतश्च शिवदत्तस्याध्यक्षत्वे लक्षाधिकैर्भावुकैः सार्द्धं सिद्धाचलयात्रायै संघः शत्रुञ्जयं प्रति निर्जगाम। विधाय च तीर्थयात्रां संगत्यागी सूरीश्वरः संघमामन्त्र्य प्रोवाच—अयं देवगुप्तः सर्वधर्मकर्मधुरीणः सकलशास्त्रनिष्णातः सूरिपदसमुचितः, अहममुं सूरिपदे नियुज्य सर्वथा शान्तिं समभिलषामि ततोऽत्रैव सूरिपदोत्सवो विधेयः। सूरिवचःसंमाननं कृत्वा धर्मोत्साहसंभृतास्ते जिनधर्मप्रवर्धकं महोत्सवमनुतिष्ठन्ति स्म। एवं देवगुप्तं महामुनिं पट्टे प्रतिष्ठाप्य तत्रैवानशनं विधाय च समाधिना देहं जहौ।

वि० पू० २८८ तः ] ६ देवगुप्तसूरिः। [ वि० पू० २४७ पः

श्रीदेवगुप्तसूरिः संसाराम्बुधिनौकर्णधारकश्चारित्र्यचूडामणिरुत्कृष्टक्रियाकलापको वादिमानविमर्दकोऽभवत्। एकदा कर्मशाह-नामापञ्चनददेशवास्तव्यः श्रावको दर्शनार्थमाजगाम। मुनेर्मुखकमलाद् हिंसाधर्मस्य हेयतां श्रुत्वा मुदितः सन् जगाद। प्रभो! पञ्चालदेशे यज्ञधर्मप्रचारकः श्रीसिद्धाचार्यो वर्तते। तदुपदेशात्सर्वेजना उन्मार्गगामिनो दृश्यन्ते। यदि कल्पवृक्षकल्पो भवान् पञ्चनददेशमागमनेनालंकुर्यात्तदा दयाप्रधानस्य जिनधर्मस्य प्रचुरः प्रचारोऽवश्यं भवेदिति दृढं विश्वसिमि। प्रेमपीयूषपूर्णं तदोयं वचनं श्रुत्वा सूरिः पञ्चनददेशगमनमकरोत्। क्रमेण स्वस्त्याख्यां नगरीं प्राप्य तत्रैव वसतिं चकार। प्रातःकाले विद्वत्सभायां दयाधर्ममाहात्म्यं वर्णयामास। इतश्च सिद्धाचार्यो "यजेत स्वर्गकामः" इति वेदप्रमाणतो यज्ञधर्मं प्रतिपादयामास। पारस्परिकविरोधोत्पादकं व्याख्यानमाकर्ण्य सर्वेऽपि किमिदमित्याश्चर्यान्विता बभूवुः पौराः। सञ्जातसंशयाश्च ते "अनयोः कतरः श्रेष्ठः" इति निर्णयाय समुत्सुका राजसमीपं ययुः।

अथैकदा नीतिनिपुणेन राज्ञा तत्वनिर्णयाय वादिप्रतिवादिपक्षौ समाहूतौ। केशरिकुञ्जरयोरिव तयोर्मध्ये महान् संघर्षोऽभूत्। अन्ते च मुदितेन नृपेण जयपत्रं सूरये समर्पितम्। अतो जिनधर्मस्य चमत्कृतिजनकः कोऽपि महान् प्रभावः सर्वेषां चेतसि पदं लेभे। सिद्धाचार्योऽपि सर्पः कञ्चुकमिव स्वकीयं दुराग्रहं त्यक्त्वा सशिष्यो जिनधर्मदीक्षामगृह्णात्।

ततो विहरन् कोरण्टकपुरमागतो देवगुप्तसूरिः कोरण्टकगच्छाधिपेन सोमप्रभसूरिणा मिलितः। उभयोर्व्याख्यानमप्येकस्मिन्नेवावस्थानेऽभवत्। चंद्रावत्यामेकदा तीर्थयात्राजनितफलं

व्याख्यानतः श्रुत्वा शुभाशयो जिनदेवः श्रावकोऽभ्युत्थाय श्रीसंघं व्यज्ञापयत् सिद्धाचलयात्रायै संघनिष्कासने ममाभिलाषा वर्तते । श्रीसंघोऽपि तद्वचनं स्वीचकार ।

श्रीजिनदेवस्य संघाधिष्ठातृत्वे शुभे मुहूर्ते श्रीसंघः शत्रुञ्जयं प्रति प्रतस्थे। अष्टान्हिकामहोत्सवादिकानि पुण्यजनकानि कर्माणि कृत्वा श्रीसंघस्तु चन्द्रावतीं प्रत्याजगाम, किन्तु शान्तिनिकेतनः श्रीदेवगुप्तसिरिस्तु तत्रैव स्थितिं चकारः ।

क्रमेण च श्रीसिद्धसूरिं स्वपट्टे संस्थाप्य वीरनिर्वाणात्त्रयोविंशत्यधिकद्विशत २२३ तमे वर्षेऽतिक्रान्ते स्वर्गपथप्रवासी बभूव ।

वि० पू० २४७ तः ] १०—श्रीसिद्धसूरिः । [ वि० पू० २१७ पः

विद्यावारिधिर्धीरधीषणः काव्यकलाकलापकः श्रीसिद्धसूरिः समागतः । स च चन्द्रपुरीपालकस्य कनकसेनराज्ञः कनीयान् पुत्र आसीत् । शिशुत्वेऽप्यसौ संसाराद्विरक्तः सिद्धार्थाचार्यस्य समीपे वैदिकीं दीक्षां जग्राह । पञ्चालप्रान्ते सूरिणा सह धर्मतत्वं दृढं विनिश्चित्य दृढप्रतिज्ञया जिनधर्मरतिर्दीक्षितो बभूव । सिद्धसाधुना सत्वरमेव गुरोरनुग्रहात्सकलशास्त्रवैदग्ध्यमासादितम् ।

अथ सूरिपदमासाद्य धरणीतले परिभ्रमन् कदाचित् पालिकानगरीं ययौ । तत्रैका श्रमणसभा कारिता । सहस्राधिकाश्च शासनोन्नतिसमुत्सकाः साधवश्च समाययुः । मिथश्च मिलितास्ते शासनोत्कर्षसाधकान् नियमान् व्यरचयन् । तत्रत्यं कार्यं समाप्य चन्द्रावतीमियाय सूरिः । तत्र च वेदधर्मप्रकाशकः शिवाचार्य आसीत् । स एकदा चन्द्रावतीनगराधिपतिमकथयत् राजन् ! नगरीयं नूनं यातना पीडिता भविष्यत्यतो कस्यचित्तदुपद्रवनाशकस्य यज्ञस्यायोजनं कर्त्तव्यमन्यथा प्रकुपितो देवो महान्तं संक्षयं विधास्यति, शान्तिस्तुष्टिः पुष्टिः कार्या सिद्धिश्चावश्यं भविष्यतीति श्रुत्वा जिनदासो नाम तत्सचिवोऽब्रवीत् न हि स्वीकुर्मो वयमिदं भवदीयमनृतं वचः, कर्ममार्गतत्परा अपि वयं यज्ञार्थं पशुहननं कदाचिदपि न करिष्यामः इति मन्त्रिगदितं निशम्य स्वापमानखिन्नमानसोऽसौ नगराद् बहिर्निर्गत्य मन्त्रतन्त्रादिसाधनैरनेकविधानुपद्रवान् चकार । नागरिकाश्चदुःखभाजोऽभवन् । अतः सर्वे मिलित्वा सूरिपार्श्वे ययुः प्रार्थयामासुश्च भगवन् ! निवारयतु चास्माकमिदं कष्टम्, ऐश्वर्यान्विता अपि भवादृशाः सन्तः संघं नमस्यन्ति, संघसेवा च पुण्यफलप्रदा । विमृश्य च सूरिराह—नात्र भवद्भिश्चिन्ता विधेया,अतः परं न विघ्ना न चोपसर्गाः भविष्यन्ति । एवं संघं सन्तोष्य मुनिः शान्तचेतसा ध्यानस्थितस्तस्य विद्याप्रभावं शिथिलीचकार । शिवाचार्योऽपि स्वशक्तिशैथिल्यं वीक्ष्य विस्मयमाययौ । किमिदम् ! शक्तिशैथिल्य किंहेतुकम् ! इति निपुणं निरूपयन् मुनेरेवेदं कार्यमिति स निश्चित्य तत्समीपमाजगाम । तच्चरणयोः सन्निवेशितशिरा उवाच—प्रभो ! प्रमादकृतमपराधं मे क्षमस्व संसाराम्बुधिनिमग्नं मां करावलम्बनेन त्वरितमुद्धर । एवं सप्रश्रयमार्द्रञ्च वचो निशम्य करुणार्द्रचेता मुनिस्तन्मस्तके हस्तं निधाय प्राह-आत्मकल्याणसाधकः सर्वत्राबाधितो जिनधर्मः स्वीक्रियताम्,संप्राप्यताञ्च श्वः श्रेयसम् +" इति परमप्रेमपीयूषपूर्णं मुनिवचनमुररीकृत्याऽसौ मुनेः पार्श्वादेव दीक्षामगृह्णात् ।

निमित्तज्ञानेन स्वमृत्युकालं परिज्ञाय श्रीसिद्धसूरिस्तस्य रत्नप्रभेति नाम विधाय स्वपट्टे च प्रतिष्ठाप्य वीरनिर्वाणात् त्रिपञ्चाशदधिकद्विशत २५३ तमे वर्षे स्वर्गमव्रजत् ।

वि० पू० २१७ तः ] ११—श्रीरत्नप्रभसूरिः द्वितिय । [ वि० पू० १८२ प०

तत्पट्टे भव्यकुलकमलदिवाकरो विविधवाङ्मयविदग्धः क्षत्रियवंशालंकारभूतः श्रीरत्नप्रभसूरिः समायातः । अलौकिकप्रभावपुञ्जपुञ्जितवदनपुण्डरीकोऽसौ राज्ञ उत्पलदेवस्य वंशपरंपरायां सूर्यवंशीयक्षत्रियालंकारभूतस्य असलरावस्य सूनुरूपकेशपुरवास्तव्यः । माता चास्य ललनाकुलललामभूता सतीशेखरमणिर्जैतीदेवी । तयोरयं रत्नसिंहनामा कुलदीपकस्तनयः ।

शैशवे शिशुजनसमुचितां केलिमनुभवन्नसौ पित्रोः स्वान्ते समधिकमानन्द मातेने । लक्षणान्यप्यस्याधारणाभ्युदयसूचका न्यासन् । पितृसंपर्क संलग्न धर्मसंस्कारो धर्मेऽधिकां रुचिं दधौ ।

समतिक्रान्ते कियति काले पुरातनसंस्कारवशादमोघदर्शनस्याचार्यवर्यस्य सकललोकैकमण्डनस्य तत्रभवतः श्रीसिद्धसूरेर्दृग्गोचरतामियाय । तस्यैवोपदेशामृतास्वादनपरिपूर्णान्तरंगः शिक्षितमतिरसौ दीक्षितोऽभूत् शुभेऽहनि । अभिधेयश्च दीक्षानन्तरमस्य रत्नमुनिरिति ख्यातिमलभत । तदनु च जिनप्रत्नतत्त्वचित्तापरवशोऽध्यैत जिनागमानखिलानाचार्यसकाशम् ।

कस्मिंश्चित् समये श्रीसिद्धसूरिरुपकेशपुरमात्मना भूषयामास । रावसारंगदेवेन श्रीसंघेन च समारोहपुरः सरं स्वागतं विहितम् । आत्मकल्याणसाधकानि व्याख्यानानि चाभूवन् । रञ्जितानि समेषां मानसानि भावुकानाम् । कलयन्नसारत्वं संसारस्य रावसारंगदेव आत्मनः श्वःश्रेयसे समर्प्य सर्वस्वं पुत्राय धनदेवाय निवृत्तिमार्गाभिरुचिर्बभूव । अन्येऽपि स्वधर्मतत्त्वं वोधिता जन्मनः कृतार्थतामममत्यन्त । आचार्यवर्योऽपि रत्नमुनेरसाधारणं पाण्डित्यं योग्यताञ्च समीक्ष्य शुभेऽहनि मुहूर्ते च तत्रैव स्वपट्टे श्रीसंघसमक्षं तंस्थापयामास । श्रीरत्नप्रभसूरिरिति नाम्ना च सभाजयामास ।

सम्प्राप्य चासौ सूरीश्वरःस्वधर्म प्रचार एव परमः पावनो मदीयोऽनुष्ठेयत्वेन प्राधान्यं प्राप्तः पन्था इति निपुणतरं स्वस्वान्ते निरूपयन् तदर्थमितस्ततः परिभ्रमणच्छलेन भावुकानुद्बोधयामास ।

एकदाऽवन्तिकायामाचार्यःसुहस्ती सभामेकामकारयत् । तत्र सूरिमप्याह्वयत् । स च धर्मोन्नतये ययौ । क्रमेण विहरन्नवंतीं प्राप । ततः सम्प्रतिनामकेन राज्ञा महासमारोहपूर्वकं कोटिप्रमाणकं द्रव्यं व्ययीकृतम् । स्वधर्मप्रचारकौ तौ द्वौ मुनीश्वरौ मिलितौ । ततः सत्ववत्सलः सुहस्ती सम्प्रतिमुवाच—राजन् ! अस्य मुनेः पूर्वजैर्जिनधर्मस्य महती सेवा विहिता, ओसमहाजनसंघश्च प्रतिष्ठाप्य सुदृढो जैनसंस्कारः कृतः । अयमपि सूरिः कर्मठः जिनधर्मप्रचारकश्चेति स्तुतिवचनं समाकर्ण्य—भगवान्नाहं प्रशंसनीयः, पूर्वेषामाचार्याणामपेक्षया नाहं किंचिदपि कर्तुं शक्नोमि, भाग्यवान् तु संप्रतिरेव येनाचार्यसुहस्तिसेवा सर्वसिद्धिप्रदा लब्धा । एवं ते सर्वे परस्परं प्रशंसन्ति दर्शयन्ति च मिथः सद्भावम् । श्रमणोचितान् धर्मनियमांश्च विरचयन्ति । अहो कियान् प्रमोदः !

ततो विहरन् मुनीश्वरो रत्नप्रभसूरिः लवपुरीं [ लोहाकोटं ] ययौ । तत्र व्याख्यानकाले सम्मेतशिखरयात्रायाः पुण्यप्रदं फलं विशदीचकार । अतः आश्चर्यान्वितेन मन्त्रिणा पृथुसेनेना-

भ्युत्थाय निवेदितम्—भगवन् ! यात्रायै संघनिष्क्रमणमहमिच्छामि, अहमेकाकी श्रीसंघस्याज्ञामधिगन्तुमभिलषामि। संघेन च नृपामात्यस्य वचः श्रुत्वा सहर्षमाज्ञा दत्ता। शुभे च मुहूर्ते मन्त्रिणः पृथुसेनस्य संघो लक्षात्रधिकजनसंयुक्तः प्रयाणं चकार। स्पर्शनदर्शनपूजादीनि च धार्मिकाणि कृत्यानि विधाय संघस्थास्ते सदानन्दनिमग्ना बभूवुः। ततो गुरुचरणसरोजसमर्पितमस्तकास्ते व्याख्यानं शुश्रुवुः। समाप्य च मुनिस्तान्सर्वानुवाच—सञ्जातवार्द्धकोऽहं सर्वतः शान्तिमिच्छामि ततः पृथुसेनात्मजं धर्ममुनिं पट्टे नियुज्यात्रैव स्थास्यामि। श्रावका अपि मुनिकथितमादृत्य पट्टमहोत्सवं विदधिरे।

अथ संघस्तु यक्षदेवसूरेरध्यक्षत्वे प्रतिनिवृत्तः। आत्मशान्तिमनुभवितुं श्रीरत्नप्रभसूरिस्तत्रैव स्थितः। तत्र च समाध्यनशनादिभिः शरीरं विमुच्य वीरनिर्वाणाद् २८८ वर्षे स्वर्गमगच्छत्।

वि० पू० १८२ तः ] १२ श्रीयक्षदेवसूरिः। [ वि० पू० १३६ प०

श्रीयक्षदेवसूरिः चारित्रज्ञानपारावारोऽर्थिमनोरथकल्पद्रुमः लवपुरवास्तव्यश्चासीत्। भानूदये तम इव सर्वे पाखण्डिनो मुनिसमीपं स्थातुं नाशक्नुवन्। पूर्वबङ्गदेशे गुणाकरैः शिष्यैः सह गत्वा धर्मविवादे बौद्धाचार्यं पराजयत।

अथ कदाचित् सूरिसमीपं सच्चायिका (चामुण्डा) देवी वन्दनार्थमाजगाम। प्रणम्य चावदत् मुने ! मरुभूमौ तेऽनन्यसाधारणः शिष्यलाभोऽवश्यं भविष्यति यश्च त्वयाऽत्र वृद्धत्वे विचिन्त्यते इति कथयित्वा सा तिरोदधे। मानयित्वा च तद्वचनं मरुभूमिमुद्दिश्य स चचाल। विहरंश्च क्रमेणोपकेशपुरमाययौ। तत्र विरक्त्युत्पादकं मुनेर्व्याख्यानं श्रुत्वा तत्पुराधीशो रावः खेतसिंहः कनीयसा लाक्षेण्येन पुत्रेण सह सूरिपार्श्वे दीक्षामग्रहीत्।

अथ कालान्तरे निजमृत्युसमयं ज्ञात्वा लाक्षण्यं मुनिं तत्पट्टे नियोज्यात्माराधनमुद्दिश्य स शत्रुञ्जयं प्राप।

वि० पू० १३६ तः ] १३—श्रीकक्कसूरिः। [ वि० पू० ७६ प०

श्रीयक्षदेवसूरिपट्टे श्रीकक्कसूरिः। स चोपकेशपुरवास्तव्यो खेतसिंहनृपस्यात्मजः। प्रभावभूयिष्ठोऽसौ विहरन्नितस्ततश्चन्द्रावतीं पुरीमाययौ। तत्र तदधिपतिं त्रिभुवनसेनमुपदिदेश—राजन् ! अत्रैव पुरे श्रमणानामेका बृहती सभा कर्तव्या। सोऽप्यन्वमोदत। प्रेषितानि चामन्त्रणानि। यथासमये सर्वे तत्र समाययुः। मुनीन् संबोध्याह सूरिः—भो व्याख्यानान्ते युष्मभ्यं मे वक्तव्यमस्ति तच्च श्रोतव्यमनुष्ठेयश्च। व्याख्यानमारब्धम्। जातश्च महान् धर्मलाभः। अन्ते सः प्राह-दक्षिणदेशे वाममार्गानुगानां सुगतानाञ्च प्राबल्यं, जिनधर्मश्च निस्तेजस्कः, सर्वैश्चात्र स्वधर्मोद्धारे प्रयत्नो विधेयः। शिरोमान्यं तद्वचो हृदये कृत्वा ते दक्षिणस्यां दिशि प्रतस्थिरे। कोरण्टकगच्छाधीशो द्वितीयः सोमसूरिरपि मुनेरनुज्ञां गृहीत्वा पूर्वदेशं जगाम। कक्कसूरिस्तु योगाराधनाय -अर्बुदाचलं ययौ।

कदाचिदुपकेशपुरे स्वयंभूश्रीमहावीरस्नात्रविधिकालेऽष्टान्हिकामहोत्सवं विदधतां जनानां मध्येऽपरिणितवयसां केषांचिन्मनसीदमभूत्—अहो प्रतिमा वक्षसि ग्रन्थिद्वयमिदं शोभाविधातकम्,

मशकव्याधिसंयुक्तमिव दूरीकरणीयमिति निश्चित्य ते स्थविरान् प्रोचुः ।—वृद्धैरुक्तम्—इदमवाच्यमपुण्यजनकं वचः कदाचिन्न वाच्यम् । अनादृत्य वृद्धानां वचनं ते सूत्रधारं प्रलोभ्य तद् ग्रन्थिद्वयच्छेदनमकारयन् । सूत्रधारस्तु तत्क्षणमेव प्राणान् जहौ । छेदस्थलाच्च रक्तधारा निर्गता । तद्रोधनार्थं कृतप्रयत्नास्ते निष्फला अभवन् । अतः श्राद्धाः व्याकुला जाताः । ततः सूरिमाह्वातुं ते सविज्ञप्तिकं कञ्चनौष्ट्रिकं माण्डव्यपुरं प्राहिण्वन् । असौ गतस्तत्र । श्रुतं मुनिनेदं दुःखाकरमुदन्तजातम् । अन्ते चोपकेशपुरं गन्तुं विहारं चकार । अथागत्य च तत्र संघयुक्तेन तेन मुनिनोपवासत्रयं विहितम् । तृतीयोपवासावसाने शासनामरी (चामुण्डा) प्रत्यक्षं प्राह—बालश्रावकैर्मन्निर्मितं बिम्बमाघातितं तन्न युक्तं कृतम्, अतोऽत्र परस्परं जनानां विरोधः जनाश्च दिशो दिशं परिभ्रमिष्यन्ति, किं बहुना कियद्भिर्वासरैश्च नूनं पुरभंगो भविष्यति । सूरिः प्रोवाच—कर्मयोगेन जीवानां यद् भावि तन्न-कोऽपि मिथ्याकर्तुं शक्नोति । अतो येन केन प्रकारेण सबद्रक्तं तु नियार्य । देव्या प्रोक्तम्—चतुर्विधसंघेन शुद्धाष्टमं तपो विधाय सर्वौषधिभृतैर्दधिदुग्धघृतेक्षुरसपूरितैर्घटैरष्टादशगौत्रैर्मख्यपुरुषैः संमील्य स्नात्रं कारयितव्यम् । वीरप्रतिमाया उभयपार्श्वेऽष्टादशगोत्रपुरुषास्त्वधोदर्शितक्रमेण ज्ञेयाः ।

प्रथमतो दक्षिणपार्श्वे यथा

तप्तभट्टो बप्पनागस्ततः कर्णाटगोत्रजः ।<br>
तुर्यो बालभ्यनामाथ श्रीमालः पञ्चमस्तथा ॥<br>
कुलभद्रो मोरिशश्च भिरिहियाह्वयोऽष्टमः ।<br>
श्रेष्टिगोत्राण्यमून्यासन् पक्षे दक्षिणसंज्ञके ॥

ततो वामपार्श्वे यथा—

सुचिंतितादित्यनागौ भोरोभाद्राथ चिंचिटिः ।<br>
कुंभटः कान्यकुब्जोऽथ डिडुभाख्योऽष्टमोऽपि च ॥<br>
तथाऽन्यः श्रेष्ठिगोत्रीयो महावीरस्य नामतः ।<br>
नव तिष्ठन्ति गोत्राणि पंचामृतमहोत्सवे ॥

मूलप्रतिष्ठानन्तरं वीरप्रतिष्ठादिवसात् ३०३ वर्षातिक्रमे चतुर्मासानन्तरं गुरूपदेशप्रभावित आसलः शत्रुञ्जययात्रार्थं संघं निःसारितवान् । तीर्थयात्रानन्तरं सूरिश्वरः संघमामन्त्र्य प्रोवाच-अहं तु सर्वथा शान्तिमिच्छामि । सूरिपदसमुचितो देवसिंहो मुनीश्वरोऽतोऽत्रैव सूरिपदमहोत्सवं कुर्वन्तु । यात्रार्थमायातास्ते सर्वे मुनिवचनमनुमान्य सोत्साहं तथैव चक्रुः । संघश्च स्वस्थानं प्रतिनिवृत्तः । कक्कसूरिश्च तत्रैव स्थितः । निमित्तज्ञानेन स्वमृत्युकालं परिज्ञायाऽनशनसमाधिना ३६१ वर्षे स्वर्गं जगाम ।

वि० पू० ७९ तः ]    १४—श्रीदेवगुप्तसूरिः ।    [ वि० पू० १२ प०

पितास्य रावखर्ता मातादेवी कुमारिका । बाल्य एव श्रीमतः कक्कसूरेर्व्याख्यानमाकर्ण्य संसाराद्विरक्तः । गृहमागत्य पितुः समीपे स्वस्य दीक्षाया इच्छां प्रकटीचकार । श्रुत्वा च

पिता मुमूर्छी। जलाभावे कमलिनीव माता म्लानिमाप। न चापि कुमारो वैराग्यभावनां तत्याज। तदीयं दृढं वैराग्यं वीक्ष्य तावपि तत्क्षणादेव विरक्तौ। अन्येऽपि कोट्यधिपास्तेन सह विरक्ता बभूवुः। क्रमेण ३५ भावुकैः, ६० स्त्रीभिश्च युतो दीक्षामग्रहीत्। अल्पीयसि काले सर्वशास्त्रपारदृश्वा स परमपण्डितो बभूव। समुचितोऽयमिति ज्ञात्वा सूरिपदे प्रतिष्ठापितः। ततो विविधग्रामनगरेषु विहरन्नसौ दयार्द्रचेताः क्रमेण मरुधरप्रान्तमाययौ। तत्र स्थितश्च श्रीमालनगरे यज्ञारंभमशृणोत्। असौ तत्र यातः। सूरेश्चागमनं ज्ञात्वा शंकितमानसा यज्ञकर्मनिष्णाता याज्ञिका नृपसमीपमीयुः प्रोचुश्च राजन्! नास्तिको यज्ञोत्थापकोऽश्रद्धेयो वेदविध्वंसको जैनाचार्यः समागतः, किन्तु न तत्र विश्वासो विधेयो भवता, इति निवेद्य निर्वेदमुक्तास्ते स्वस्थानमगमन्। राजाऽपि तद्वचः श्रुत्वा स्थितः। इतश्चानेकवादिमतजिष्णुर्धार्मिकाग्रणीः सूरिर्नित्यं सर्वशिवंकरं दयाधर्मं प्रत्यपादयत्। तदीयवाङ्माधुरीचातुर्यात् व्याख्यानश्रवणसमुत्सुका विपुलसंख्याका जनास्तत्सभायां समाजग्मुः।

एकदा व्याख्यानश्रवणसमुत्सुका मन्त्रिणो यज्ञदत्तस्य गृहं ययुः। व्याख्यानश्रवणार्थञ्च तं प्रेरयामासुः। सुरेरसाधारणं पाण्डित्यं ज्ञात्वा यज्ञदत्तो नृपसमीपमेत्योवाच राजन्! देवगुप्तसूरि-इति नामको धुरन्धरो जैनाचार्योऽत्र समागतः, स च नित्यं शास्त्रप्रमाणतो दयाधर्मं सयुक्तिकं वर्णयति जनाश्च निर्निमेषनयनास्तदीयं वदनकमलमालोकयन्तो न तृप्तिमधिगच्छन्ति, श्रवणसादरा व्याख्यानञ्च शृण्वन्ति" इति वचो निशम्य धर्मतत्वनिर्णयाय राजा सूरीन् विप्रांश्चामन्त्रयामास। ते च यथाकालं सभायामाजग्मुः। पारस्परिकचर्चासु प्रवर्तमानासु सुरिराड् विप्रान् संबोध्य प्राह—यज्ञकरणेनैव स्वर्गप्राप्तिश्चेद् यज्ञकर्तारस्तदर्थं स्वपुत्रादीन् बलिहेतवे कथमग्नौ न जुह्वति! किमयमेव न्याय्यः पन्थाः? वराका मूका निर्दोषाः पशव एते ज्वलने प्रवेश्यन्त इत्यहो धर्मविडम्बनम्, तत्वज्ञा ये, ते कदाप्येवं नानुमन्यन्ते न समाचरन्ति चेति" वचः श्रुत्वा ते सर्वे विप्रपण्डिता लज्जाभरावनतमस्तकाः पराभूताः। परञ्च जिनधर्मानुयायिनोऽभवन्।

एवं विविधस्थानेषु परिभ्रमता ज्ञाननिधिना देवगुप्तसूरिणा जिनधर्मपताकाः सर्वत्र प्रसारिता। योग्यकाले च मृत्युं परिज्ञाय धनदेवं नाम मुनिं स्वपट्टे प्रतिष्ठाप्य श्रीवीरनिर्वाणाद् ४५८ वर्षे दिवं जगाम।

वि० पू० १२ तः]　　　　१५—श्रीसिद्धसूरिः।　　　　[वि० सं० ५२

विशालयशाः श्रीसिद्धसूरिः परदुःखदारिद्र्यदलनपटुः-ओसवंशविवर्द्धकः समागतः। अस्य पिता रूपणसिंहो माता च जाल्हणदेवी। धर्मव्रतपरायणोऽसौ बाल्यादेव भोपालो देवगुप्तसूरेर्व्याख्यानं श्रुत्वा विरक्तो गृहमागत्य दीक्षार्थं पितरौ पप्रच्छ। तद्वचो निशम्य तस्य पिता सूरिसमीपमेत्यावदत्-प्रभो! भोपालो दीक्षाविषयमेव न जानाति शिशुकल्पो दीक्षानर्हः। अहमेव दीक्षां ग्रहीष्यामि। ततः सूरिः प्राह भवदाज्ञाभावे नाहं तं दीक्षितं विधास्यामि, किन्तु भवानात्मनः श्रेयोमार्गे प्रयान्तममुं कथं निवारयति विघ्नभूतो भवति च। प्रभावपूर्णं चेतस आल्हादकं सूरेर्वचः श्रुत्वा पुत्रेण सार्द्धमसौ दीक्षार्थं तत्परोऽभवत्। जाल्हणदेवी च पतिपथानुसरणशीला बभूव। अथ सप्तत्रिंशन्नागरिकसमा-

वृतौ भोपालो दीक्षामग्रहीत्। प्रव्रज्यासौ धनदेवाभिधानं लेभे। शास्त्रवैदग्ध्यश्चासाद्य सूरिपदे प्रतिष्ठितः।

अथ क्रमेण विहरन् स सौराष्ट्रदेशं ययौ। वल्लभीं नगरीं प्राप्य तत्रैव मासावधिकमुवास। तदधीशः शिलादित्यः सूरिणा प्रतिबोधितः। अन्ये च बहवो जनाः सत्पथे स्थापिताः। तत्पार्श्वे शत्रुञ्जयमाहात्म्यं श्रुत्वा शत्रुञ्जये बहूनुद्धारान् विदधे। पर्युषणे चतुर्मासीत्रये च राजा नियमतः शत्रुञ्जययात्रायै गच्छति स्म। राज्ञ आग्रहात् सूरेश्चतुर्मासस्तत्रैवाभवत्। तत्र मुनेर्व्याख्यानं श्रुत्वा शोभनोऽसावसारात्संसाराद्विरक्तः। ततः सा वृद्धा निराश्रया शिलादित्यमुवाच-राजन्! एक एव मे पुत्रः स च दीक्षां समीहते। अतो दीक्षानिरोधः कर्त्तव्योऽन्यथाहमात्मघातं करिष्यामि-इत्याकर्ण्य दयार्द्रचेता नृपः सूरीश्वरमुवाच-प्रभो! तस्मै दीक्षा न देया, वृद्धस्य यष्टिरिव सर्वालम्बनरूपः सूरिराह नाहं कालत्रयेऽपि दीक्षां दास्यामि किन्त्वयं मे पुत्रः, इयं मे मातेति मोहोऽनर्थजनकः सर्वथा त्याज्य एवेत्याकर्ण्य जातवैराग्या वृद्धा प्रसन्नतयाज्ञां दीक्षायै ददौ। शोभासिंहेन सानन्दं सप्रश्रयं दीक्षा गृहीता। ततः परमसौ तपःकर्मणि संलग्नः। मासानन्तरं सोऽभिग्रहं जग्राह। तदर्थं वने पुरे ग्रामे रथ्यायाश्च नित्यं पर्याटत्, किन्तु मनसा यन्निर्धारितं तत् सफलं न जातम्।

जैनसाधूनामभिग्रहव्रतं पाखण्डमेवेति ब्रुवाणो योगिराड् मुनिमनुगच्छति स्म। आत्मोपशमनतत्परो मुनिः कदाचिन्नित्यनियमानुसारेण विपिनं प्रत्यगच्छत्। तत्र दैवयोगादेका सिंही दृष्टा। तां दृष्ट्वा च पात्रमभिमुखं गृहीत्वोवाच मुनिः—भिक्षां मे देहीति। सा च किंचिद् भैक्ष्यं ददौ। समभावान्वितः साधुर्भिक्षामादाय स्वस्थानमगमत्। सूरिपार्श्वमागत्यावेदयदखिलं वृत्तान्तम्। विबुधाग्रणीः सूरिरपि प्रसन्नवदनोऽभवत्। तत आश्चर्ययुक्तो योगी क्षमामयाचत। सूरिपार्श्वे मुदान्वितो जैनदीक्षामग्रहीत्। ततः परं योगकलानिपुणः सः कल्याणमूर्ति-इत्याख्यां जगाम।

अथ ग्रामानुग्रामं विहरन्मुनिः सिद्धसूरिरुपकेशपुरमाजगाम। तदधिपतिं रत्नसिंहं प्रबोध्य महती श्रमणानामेका सभा कारिता। 'रत्नसिंहोऽपि' पूर्वजानामादर्शमनुसृत्य स्वीचकार सुरेराज्ञाम्। सभायामुपाध्यायगणिपदादिभिर्बहवो मुनयो विभूषिताः। सभासमाप्तौ च धर्मप्रेमभरितमानसास्ते मुनय इतस्ततः परिभ्रमणं चक्रुः।

कालान्तरे च श्रीसिद्धसूरिर्निजशिष्यं गुणचन्द्रं सकलशास्त्रार्थतत्वविबोधकं निखिलगुणगणगणनीयकीर्तिं श्रीरत्नप्रभ-नाम विधाय स्वपट्टे नियोज्य वीरनिर्वाणात् ५२२ वर्षे दिवमगात्

### वि० सं० ५२ तः ] १६ श्रीरत्नप्रभसूरिः ( तृतीयः ) [ वि० सं० ११५ पः

श्री सिद्धसूरिपट्टे श्रीरत्नप्रभसूरिः समायातः। असौ च ॐकारपुरवास्तव्यः। कुलीनान्यां मातरि शाहपेथा-संज्ञकेन जनकेन तस्य जन्मासीत्। राजसिंह इति मूलाभिधानम्। सकलशिशुशिरोमणिरसौ बाल्येऽपि मुनिवदेव कांचित् क्रियामकरोत्। यदा श्रीसिद्धसूरिस्तत्राजगाम तदास्य जननी तं पप्रच्छ-सुरे! मदीयः पुत्रो मुनिवत् कांचित् क्रियां करोति किं तस्य कारणम्? सूरिराह प्राक्तनजन्मसंस्कारोऽयम्। दीक्षामसौ स्वीकुर्याच्चदा महामुनिप्रभावकः सकलविद्वद्गणललामभूतो धुरंधरो भवेदिति।

एवं सूरिकथितमाकर्ण्य गृहमागत्य च सा पतिमुवाच-स्वामिन् ! राजसिंहस्य सत्वरमेवोद्वाहः कर्तव्यः, अन्यथाऽसौ विरक्तो भविष्यति। भयत्रस्तमानसः स तस्य श्रेष्ठया लावणवत्या कन्यया सह पाणिग्रहणमकारयत्। षण्मासा व्यतीताः। दैवयोगाच्च सूरिस्तत्पुरमाजगाम क्रमेण विहरन्। सूरिवदनकमलाच्छ्रुतं व्याख्यानं संसारासारविषयकम्। राजसिंहो विरक्तः सन् पितरौ पर्यपृच्छत्-दीक्षामङ्गीकुर्यामिति। पुत्रस्याग्रहातिशयं ज्ञात्वा तावप्यनुमोदनं ददतुः। अन्येऽपि बहवो भावुका दीक्षायै तत्परा बभूवुः। सर्वैस्तैः सहितः, स दीक्षामग्रहीत्। प्रव्रज्यानन्तरमसौ गुणचन्द्रेति संज्ञां लेभे। गुरुप्रसादपरिपूर्णो व्याकरणादिसकलशास्त्रपारगोऽसाधारणः पण्डितप्रकाण्डश्चाभवत्। सूरिणा च स्वपट्टेऽधिष्ठापितः।

अथानुक्रमेण विहरन् विविधान् देशान् सूरिः पद्मावतीं प्राप। तत्र व्याख्यानेन शत्रुञ्जयमाहात्म्यातिशयं प्रतिपादितवान्। रमणीयतरं तन्माहात्म्यं श्रुत्वा प्राग्वटवंशीयो राणकनामा श्राद्धो शत्रुञ्जययात्रायै संघं निःसारितवान्। अस्मिंश्च संघे पंचसहस्रसंख्यकाः साधवः पञ्चलक्षपरिमिताश्च श्रावका मिलिताः। यात्रां च विधाय संघस्तु प्रतिनिवृत्तः। सूरीश्वरश्च कच्छसिन्धप्रान्तयोर्विहारं विधाय पञ्चनदप्रदेशे तक्षशिलामाजगाम। तत्र सूरीश्वरस्योपदेशं समाकर्ण्य मंत्री सम्मेतशिखरयात्रायै संघं निष्कासितवान्। यात्रां विधायाङ्गवङ्गकलिंगादिषु विहरणक्रमेणासौ मरुधरप्रान्ते वीरपुरमाययौ। तत्र च वाममार्गिणां महती संख्याऽसीत्। वीरधवलो नाम नगराधीशोऽपि तन्मार्गानुसरणशीलो येन तदनुयायिनो जना अपि तद्धर्मावलम्बिन आसन्। दीर्घदर्शिना तेन सूरिणा। धर्मरहस्यं प्रतिबोधितास्ते। सर्वतोगामि मर्मस्थलस्पृशं परमानन्दजनकं च व्याख्यानं श्रुत्वा राजकुमारो वीरसेनस्तु विरक्तो जातः। कतिपयैर्भव्यैर्भावुकैश्च सह दीक्षां जग्राह। अल्पसमयेनैव सर्वाणि शास्त्राण्यधिगमय्य सूरिणोपाध्यायपदं प्रापितः सोमकलश इत्यभिधानेन।

इतश्च कोरण्टकगच्छाधिपतिः सर्वदेवसूरिः स्वपट्टे कमपि मुनिमसंस्थाप्य स्वर्गमागमत्। ततः कोरण्टकगच्छीयाः सर्वे मिलित्वा रत्नप्रभसूरिपार्श्वमेत्यावदन्-भगवन् सर्वदेवसूरिर्दिवं यातः, अतः कस्मैचिद् योग्याय मुनये सूरिपदं देयं पट्टाभिषेकोऽपि भवतैव विधेयः। सूरीश्वरस्तत्र गत्वा तद्गच्छादेव योग्यं सोमहंसमुनिं सूरिपदालंकृतं कृत्वा पट्टे स्थापयामास।

व्यतीते हि कियति काले सर्वत्र स्वधर्मप्रचारं विधाय रत्नप्रभसूरिः स्वमृत्युकालं ज्ञानदृष्ट्या ज्ञात्वा सोमकलशं तत्पट्टे स्थापितवान्।

श्रीरत्नप्रभसूरिणा ६३ वर्षाणि जिनधर्मस्य जीवितनिरपेक्षं सेवा विहिता।

## वि० सं० ११५ तः] १७ श्रीयक्षदेवसूरिः (तृतीयः,) [वि० सं० १५७ प०

तत्पट्टे श्रीयक्षदेवसूरिः समायातः। असौ वीरपुरवास्तव्यः। पिताऽस्य वीरधवलो, माता च गुणसेनाऽसीत्। तयोश्च वीरसेननामा तनयोऽभवत्। षोडशवर्षवयस्कस्यास्य पाणिग्रहणमुपकेशपुराधीशस्य कन्यया सोनलदेव्या सहाऽभूत्। विज्ञातजीवाजीवादितत्वविस्तरा सोनलदेवी जिनधर्मोपासिका श्राविकाऽआसीत्। तया वीरसेनस्तत्कौटुम्बिकाश्च जिनधर्मपरायणाः कृताः।

अथ कदाचिद्विहरन् रत्नप्रभसूरिर्वीरपूरमागच्छत् । सूरीश्वरागमनञ्च विज्ञाय सर्वे ब्राह्मणा नृपसमीपं गत्वाऽवदन् राजन् ! जिनधर्मानुयायिनो नास्तिकाः साधवोऽत्र समागताः । ते च श्रुतिप्रतिपादितयज्ञादिकर्मकलापस्योत्थापनमेव कुर्वन्ति । अतो भवता तैः सार्द्धं वार्तालापोऽपि न विधेय "इति तेषां वचनमादृत्याह भूपतिः-भवद्भिः सर्वैः सत्यमेवोच्यते परन्त्वस्य निर्णयो वादविवादेनैव भवितुमर्हति । पश्चात्तत्र रत्नप्रभसूरिमाहूय वादविवादस्तैरारब्धः । सूरेः सर्वशास्त्रविचक्षणेन निधानमूर्तिनामकेन शिष्येण स्वधर्ममाहात्म्यं सिद्धान्तपूर्णं दर्शयित्वा सर्वे विप्राः पराजिताः । तत्र कैश्चित्कल्याणमभिलषद्भिः सूरिपदारविन्दमुपस्पृश्य सर्वकल्याणसाधिका दीक्षा गृहीता । वीरधवलो भूपोऽपि जिनधर्मे कृतादरोऽभूत् । चतुर्मासमसमाप्तौ किमपि कमनीयं व्याख्यानं श्रुत्वा वीरसेनो वीतरागो भूत्वा पितरावामंत्र्य पञ्चचत्वारिंशद्भावुकैः सह दीक्षामग्रहीत् । अधीतजिनधर्मतत्वोऽसौ व्यतीते कियति काले सूरिणा स्वपदे यक्षदेवनाम्नाऽधिष्ठापितः ।

अथैकस्मिन् काले द्वादशाब्दीयं दुर्भिक्षमभवत् । बहवश्च साधवोऽनशनं कृत्वा स्वर्गमगच्छन् । अतीते च दुर्भिक्षसमयेऽवशिष्टाः साधवः सौपारपतने संगताः । तैश्चैका महती सभा कृता । अतीते च दुर्भिक्षकाले श्रीवज्रसेनसूरिश्चन्द्र-नागेन्द्र-निर्वृत्ति-विद्याधरनामकान् श्रेष्ठिपुत्रान् दीक्षितान् कृत्वा तैः सह सौपारपत्तनमगमत् । यक्षदेवसूरिसमीपे ऽध्ययनं कुर्वत्सु तेषु सहसा वज्रसेनसूरिर्दिवं ययौ । सूरीश्वरस्तान् स्वधर्मशास्त्रमध्याप्य पदवीप्रदानञ्च चकार । पश्चादेव तत्तन्नामकानि तेषां चत्वारि कुलानि प्रसिद्धिमगमन् । यथा १ चन्द्रकुलम्, २ नागेन्द्रकुलम्, ३ निवृत्तिकुलम्, ४ विद्याधरकुलम् ॥ ततो विहरन् यक्षदेवसूरिर्मुग्धपुरमाययौ । तत्र म्लेच्छानां भाव्यागमनमश्रृणोत् । अतो म्लेच्छागमनवृत्तान्तं ज्ञातुमसौ शासनामरीं देवीं प्राहिणोत् । दैवयोगाच्च सा म्लेच्छदेवताभिर्गृहीता । ते च म्लेच्छदेवा अहर्निशं तत्रागत्य कथयामासुः—प्रभो ! जिनालये म्लेच्छाः सन्ति । तेषां वचसि विश्वस्य स सूरिस्तत्रागच्छत् । न च कोऽपि दृष्टिपथमायातः, तथापि शङ्कितमनाः सूरिः सर्वान् श्रावकानाहूयावदत्-अस्मिन् विषमे संकटे प्राणव्ययेनाऽपि प्रभोः प्रतिमाऽवश्यमेव रक्षणीयेति । अथ रात्रौ बहवः साधवः श्रावकाश्च प्रभुप्रतिमां शिरसि निधाय कस्मिंश्चित् स्थाने रक्षितुमगमन् । इतश्च म्लेच्छदेवविमुक्ता देवी सूरिसमीपमागत्य शीघ्रमवादीत् —भगवन् ! म्लेच्छाः समागताः । सत्वरमेव तत्प्रतीकारो विधेय इति श्रुत्वा सूरिस्तमाह-देवि ! तव विश्वासेनैव वयमत्र स्थिताः, त्वं तु चिरादागता । तया च प्रोक्तम्-किं करोम्यहं तत्र व्यन्तरैर्धृताऽसम् ।

ततश्च म्लेच्छागमनं जातं नवेति ज्ञातुं सूरिः शिष्यावप्रेरयत् । स च पञ्चशतसंख्यकैः साधुभिर्ध्यानमङ्गीचकार । समागता म्लेच्छाः आगत्य च प्रतिमामदृष्ट्वाऽपृच्छन् सूरिप्रभृतीन् मुनिवरान् किन्तु नोत्तरमासादितवन्तः । अतः केचन तैर्मारिता, धृताश्च केचित्, पलायिताश्च केऽपि । म्लेच्छैर्बन्दीकृतं सूरिं कश्चिद् भूतपूर्वः श्रावको बलात्कारेण म्लेच्छत्वं प्राप्तः कारावासद्वाररक्षकोऽमोचयत् । अन्यै रक्षकैश्च सार्द्धं खटकुम्पपुरमप्रेषयत् । यत्राऽन्येऽवशिष्टाः साधवः समागच्छन् । सूरिमेकाकिनमवस्थितं वीक्ष्य तन्नगरमधिवसन्तः श्रावकाः दीक्षार्थं पुत्रानर्पयामासुः । स च तानेकादश-

परिमितान् दीक्षयामास। पश्चात् स्थिता बहवः साधवोऽत्र संगता अभूवन्। तदनु सूरिराघाटपत्तनं ययौ। तत्रापि गच्छोद्धारहेतवे श्राद्धाः स्वपुत्रान् सूरिसमीपे दीक्षां ग्राहयामासुः। संसारासारतां समालोच्य केचित्तु स्वयमेव दीक्षां स्वीचक्रुः। ततः सपरिच्छदो विहरन् सः स्तम्भतीर्थमगमत्। तत्रत्येन संघेन श्रीपार्श्वनाथस्य पित्तलमयी प्रतिमा कृता। सर्वश्रावकनिवेदनमनुमान्य सूरिणा स्वहस्तेन तस्य प्रतिष्ठा कृता। एवं धर्मार्थमेव समयमतिवाह्य वीरनिर्वाणात् ६२७ वर्षे देवभद्रमुनिं स्वपट्टे प्रतिष्ठाप्य स्वर्गमगात्।

वि० सं० १५७ तः ] १८ श्रीकक्कसूरिः (तृतीयः) [ वि० सं० १७४ प०

अथ श्रीयक्षदेवसूरिपट्टे श्रीकक्कसूरिः समागतः असौ कोरण्टपुरवास्तव्यः। प्राग्वटवंशीयो लालाशाहोऽस्य जनको, माता च ललितललनाजनशेखरीभूता जिनधर्मानुरागिणी ललिता।

एकदा प्रभूतधनसंपन्नोलालाशाहस्य प्रियतमाया गर्भभरालसगतेश्चेतसीत्थं विचारः प्रादुर्भूतो यदहं शत्रुंजयतीर्थयात्रां कुर्याम्। सा च समुचितसमये पतिमवोचद्-दयित! भवानवश्यं मां शत्रुंजयतीर्थयात्रायै नयत्विति। श्रुत्वा च सोऽचिन्तयद्-इयं खलु पूर्णदौहृदा, कथं तत्र गन्तुं शक्नुयादिति विचार्येदं सुहृदे यशोदेवाय निवेदितम्। तेनोपायं चिन्तयित्वाऽपि न पारितम्। ततो मुनिसमीपमेत्य तौ निवेदयामासतुः। मुनिश्चावोचत्-कल्याणिन्! नगराद्बहिरेव त्वं शत्रुंजयतीर्थप्रतीकं रचयित्वा तीर्थयात्रां निर्वाहय, अयमेव सामयिक आचार इति तद्वाक्यं मनसि स्थिरीकृत्य स्वसंपदनुसारेण तथैव तेन कृत्रिमं तीर्थं निर्मापितम्। साऽपि तत् तीर्थरूपमेव मन्यमाना तत्र भगवन्तमादीश्वरं प्रणम्य सखीजनपरिवृता चाष्टाह्निकामहोत्सवं चकार। महतोपायनेन च सन्घमामन्त्रयामास श्रेष्ठी। संपूर्णां तीर्थयात्रां विधाय साऽत्मानं कृतार्थममन्यत। यतो गर्भस्थस्य जीवस्यापि महानानन्दो जातः। अस्मिन् कार्ये तेन श्रेष्ठिना लक्षत्रयपरिमितं धनं व्ययीकृतम्।

कदाचित् प्रतिक्रमणे "तियलोए चइय वन्दे" सूत्रमागतं स्मृत्वा तस्या "अहं त्रिलोकीस्थितानां चैत्यानां वन्दनं कुर्यामिति' भावना समुद्भूता। गर्भस्थेन केनचिन्महात्मना प्रेर्यमाण इवाऽसौ श्रेष्ठी तस्या दौहृदं पूर्ववदेव पूर्णमकरोत्। ईदृशी धार्मिकी भावना भविष्यतस्तनयस्यालौकिकं महिमानं सूचयन्ती न सर्वसाधारणस्त्रीणां भवति।

अथ संपूर्णदिवसा सा रात्रौ शुभे मुहूर्ते रमणीयमूर्तिं पुत्रं सुषुवे। सर्वे च नागरिका आनन्दमग्ना बभूवुः। परमसन्तुष्टेन श्रेष्ठिना जिनमंदिरेऽष्टाह्निकामहोत्सवो महता समारोहेण कृतः। क्रमशस्तेन त्रिभुवनपाल इति सार्थकमेव नाम कृतम्। अध्ययनकाले प्राप्ते कुशाग्रबुद्धिरसौ बालो व्यावहारिक-राजनैतिक-धार्मिकविषयकमसाधारणं ज्ञानं प्राप। राज्ञा च लालाशाहो मन्त्रिपदमारोपितः। एवं महता प्रमोदेन ते सर्वे कालमतिवाहयन्ति स्म धार्मिकव्रतनियमादिभिः।

कदाचिद् विहारं कुर्वन् यक्षदेवसूरिस्तन्नगरमगच्छत्। श्रेष्ठिना संघेन च समहोत्सवं तस्य नगरप्रवेशो विहितः, प्रवृत्तानि धर्मप्रचुराणि व्याख्यानानि। एकदा स सूरिर्ब्रह्मचर्यविषयमवलम्ब्यावोचत्-ब्रह्मचर्यं नाम सर्वेषां व्रतजपतपउपवासादीनां नियमानां परमं प्रधानम्। शरीरिणाश्चायुस्तेजो-

बलमेधावृद्धिकरम् । ब्रह्मचर्येणैव परिपुष्टं शरीरं सर्वार्थसाधनक्षमं दृढञ्चोपजायते । तत्प्रभावेण सर्वथाऽऽत्मानं समुद्धरन्तोऽपरानपि समुद्धर्तुमर्हन्ति महात्मानः । न च ब्रह्मचर्याद् ऋते स्वश्रेयसकरः सर्वश्रेष्ठः पन्था अवलोक्यतेऽत्र जगति, येनात्मकल्याणं साधयितुं शक्यते । प्रतिकूला अनुकूलाश्च सर्वे जन्तवो ब्रह्मचर्यनिष्ठं मनागपि धर्षयितुं नैव प्रभवन्ति कदाचिदिति । सभायामुपस्थितस्त्रिभुवनपाल इदं व्याख्यानं श्रुत्वा ब्रह्मचर्यपालनव्रतं स्वीचकार । एवंविधान्यन्यानि धर्मभावनापरिपूर्णानि व्याख्यानानि समाकर्ण्य चान्ते मात्रा पित्रा चानुमोदितः सूरेः सकाशाद् दीक्षामग्रहीत् । अनन्तरमस्य देवभद्रेति नाम परिवर्तितम् ।

अथ सशिष्यः सूरिर्लाटसौराष्ट्रकच्छदेशेषु विहरन् क्रमेण शिवनगरं जगाम । तत्र परमप्रीतान्तःकरणेन गोंदारावेण, श्रीसंघेन च समहोत्सवमस्य नगरप्रवेशः सम्पादितः । अत्र धर्मप्रीतिसंवर्धकानि व्याख्यानानि श्रावयित्वा जातवैराग्यान्-अष्टचत्वारिंशज्जनान् दीक्षयामास । चातुर्मासः सर्वभक्तजनमतमनुमान्य विहितः । सर्वेषामाग्रहेण, सच्चायिकापरामर्शेन, गोंदारावस्य सूचनाञ्च विचिन्त्य, स्वस्य वृद्धत्वमपि समालक्ष्य देवभद्रं सूरिपदे संस्थाप्य श्रीककसूरि-इति नाम कृतवान् यक्षदेवसूरिः । चातुर्माससमाप्तौ बहवो दीक्षार्थमुत्सुका अभूवन् । पञ्चषष्ठि ६५ संख्यकैर्जनैर्दीक्षा गृहीता । सूरेरनुज्ञया गोंदारावेण शत्रुंजयं प्रति संघो महता समारोहेण निष्कासितः । तत्र च श्रद्धाभक्तिसमन्वितेन नवलक्षपरिमिता मुद्राविनियुक्तास्तेन। तीर्थयात्रां विधाय सूरिः सशिष्यः प्रतिनिवृत्तः।

अथ विहरन्नसौ लवपुरं [ लोहाकोट ] नगरमेत्य धर्मदेवाग्रहात्तन्निर्मितनूतनमंदिरे श्रीपार्श्वनाथस्य प्रतिमायाः प्रतिष्ठामकरोत् । तदेव धर्मकार्यं विधाय तक्षशिलामागच्छत् । तत्र च चेतश्चमत्कारजनकेन व्याख्यानेन भक्तिप्रवणान् द्वादशपरिमितान् भिन्नभिन्नजातीयान् दीक्षितान् चकार ।

एवं महता समुत्साहेन सर्वत्र धर्मप्रचारं विदधदसौ सूरिरासन्नकालं योगदृष्ट्या ज्ञात्वाऽनशनपूर्वकं सप्तविंशतिदिनानि स्थित्वा समाधिना देहमसृजत् ।

अथ नभोमध्यमारूढस्तीक्ष्णमरीचिमाली सूर्य इव ज्ञानोपदेशेन सर्वान् धर्मतत्वं संबोधयन् ककसूरिर्विहारक्रमेण शिष्यमण्डलयुतः श्रीपुरपत्तनमगच्छत् । संघेन राजपालेन च स्वागतं विहितम् । अद्वितीयप्रभावपूर्णेन धार्मिकं प्रवचनमारब्धम् । सर्वे च स्वधर्मतत्वरहस्यं ज्ञात्वाऽश्चर्यनिमग्नमानसा अभूवन् । तत्र राजपालश्चतुर्विधं संघमामन्त्र्य सम्मेतशिखरं प्रति यात्रां कारयामास । महापरिमाणकं द्रव्यं धर्मकर्मणि व्ययीकृतं तेन ।

सम्मेतशिखरयात्रायाः प्रतिनिवृत्य विहरन्नसौ कलिंगदेशे खण्डगिरेरुदयगिरेश्च दर्शनं विधाय मथुरापुरीमलंचकार । तत्रोपकेशीयैःकृतं सद्भावभरितं स्वागतं स्वीकृत्य परमहृष्यत् । सर्वेषां धार्मिकाणामभिलाषां पूरयन् चातुर्मासव्रतं चकार । सूरिवदनकमलावस्थितोपदेशामृतास्वादलुब्धहृदयेन पद्माशाहेन श्रीभगवतीसूत्रवाचना कारिता । सपादलक्षपरिमिताभिर्मुद्राभिः श्रीभगवतीसूत्रवाचनामहोत्सवं सहर्षमकरोत् पद्माशाहः । तत्र कृतावस्थितिना सूरिणाऽधो लिखितानि धार्मिकाणि कार्याणि संपादितानि ।

१ श्रीमद्भगवतीसूत्रसमाप्तिमहोत्सवः । २ षष्टिपरिमितानां मुमुक्षूणां जिनधर्मदीक्षा । ३ सहस्रसंख्यकानां नूतनमूर्तीनामञ्जनशलाकाविधिः । ४ नूतननिर्मितानां पञ्चानां जिनालयानां प्रतिष्ठा । ५ विशालमूर्त्यादिभ्यः पञ्चभ्य उपाध्यायपदम् । ६ सोमतिलकप्रमुखाणां, साधूनां पण्डित-पदवीप्रदानम् । ७ धर्मशेखरादीनां सप्तानां वाचनाचार्योपाधिवितरणम् । ८ कुमारश्रमण-प्रभृतीना-मेकादशानां गणिपदप्रदानमिति ।

अपरश्च प्रायो दशसहस्रसंख्यकान् जैनेतरान् जनान् जिनधर्मदीक्षादीक्षितानकरोत् । स्वसमीपे साधूनां महतीं संख्यां विचार्य तान् धर्मप्रचारार्थमसौ यत्र तत्र प्रेषयामास ।

अथ स विहरन् मरुधरं ययौ । संघस्वागतं सत्कृत्य तत्र धर्मोपदेशं कृत्वा धर्मे दृढपरिकरान् व्यधात् सर्वान् । ततश्च विहारक्रमेण शाकम्भरी-मुग्धपुरादिषु स्थानेषु, पर्यटन् उपकेशपुरमाययौ । तत्र संघस्यानुज्ञां स्वीकृत्य चातुर्मासके स्थितः । सुचन्तिगोत्रीयेण आम्रशाहेन सानन्दं श्रीभगवती-सूत्रवाचना कारिता । सूरिणा व्याख्यानेषु तात्त्विक-दार्शनिकाध्यात्मिकैतिहासिकविषयाणां सुविशदं विवेचनं विवेचितम् । आत्मकल्याणाय विरक्तिमार्गोपदेशस्तु प्रथमं स्थानमाप्नोद् व्याख्याने । बहवस्तत्प्रभाववशीभूतमानसा दीक्षां जगृहुः। बहुसंख्याका गृहस्थाश्रमिणोऽपि जिनधर्मे दृढादरा बभूवुः। चातुर्माससमाप्तावेकादशभिर्भावुकैरपि दीक्षा गृहीता । नूतनानां जिनमन्दिराणां प्रतिष्ठाऽपि सूरेर्वरद-हस्तेन जाता ।

तस्मान्निर्गतो विहरन्नसौ सूरिर्नागपुरमगमत् । व्याख्यानादिना धार्मिकान् संतोषयामास । हंसावतीनगर्याः संघाधिपतेर्जसाशाहस्य सप्रश्रयां विनतिमादृत्य तत्र संघानुमत्या तेन सूरिः श्रीभग-वतीसूत्रवाचनां कारितः। तन्निर्मिते महावीरमन्दिरे मूर्तिप्रतिष्ठा महता समारोहेणाजनि ।

अथ स कोरण्टकपुरमागतः । तदधिपतिना श्रीसंघेन च भव्यसमारोहेण स्वागतेन संमाननं कृतम् । कोरण्टकगच्छीयो नन्नप्रभसूरिरपि समीपदेशे विहरन् कक्कसूरेरागमनं ज्ञात्वा तत्राजगाम सशिष्यः। महताऽनन्देन हर्षयुतमानसः सूरिः संघेन स्वागतसहितं नगरप्रवेशमस्य कारयामास । ततो व्याख्यानपीठमारूढौ प्रसन्नवदनपुण्डरीकौ तौ पूर्णिमायां नभस्थलस्थितौ शशिदिवाकराविव सभामण्डलसमुपस्थितानां सकलजनमनांसि मोदयामासतुः । अहो ! विविधगच्छीयानां सूरीश्वराणां पारस्परिकं सौमनस्यं दृष्ट्वा को नाम मुदं न प्राप्नुयात् । श्रीमतः कक्कसूरेरत्र प्राथमिकमेवागमन-मिति कृत्वा तत्रत्यः संघश्चतुर्मासाधिवासार्थं तस्मै प्रार्थयामास । सोऽपि तदीयां धर्मभावनां पोषयितुं तदङ्गीचकार । सकलजनमनोऽवस्थितगाढान्धतमसो विभेदकं रमणीयतरं व्याख्यानमाकर्ण्यानन्द-सागरनिमग्ना बभूवुः सर्वे ।

विहारक्रमेण भिन्नमालासत्यपुरीशिवगढादिषु ग्रामनगरेषु धार्मिकमनांसि व्याख्यानेन रञ्जयन्नसौ परमतीर्थभूतमर्बुदाचलमगमत् । तत्र तीर्थयात्रां विधाय पुनश्चतुर्मासस्थितये कोरण्टक-पुरमव्रजत् । तत्रोभौ सूरीश्वरौ जनानां हृदये जिनधर्मभावनायाः संवर्धनं स्यात्तथैव महान्तं प्रयत्नं कृत्वा स्वकर्तव्यपालनस्य चरमां सीमां प्रापतुः । ततश्च समाप्ते चतुर्मासे निर्गत्य मथुरानगरीं स्वप-

दार्पणेन भूषयाञ्चकार । तत्र हंसावतीनगरीसंघाधिपतिर्जसाशाहः सपुत्रो दर्शनार्थं सूरेश्चामन्त्रणार्थमागच्छत् । तद्वचोऽनुपाल्य सूरिस्तत्र ययौ । संघाधिपतेः पुत्रेण राणाशाहेन शत्रुञ्जयतीर्थयात्रायै संघायोजनं कृतम् । क्रमेण शत्रुञ्जययात्रां विधायाऽसौ तत्र सूरिहस्तेन दीक्षामग्रहीत् ।

आचार्यः कक्कसूरिः पुनः कोरण्टकपुरं प्रतिनिवृत्तः । रात्रौ देवी सचायिका अर्द्धनिद्रितं तं विबोध्य प्रणम्यावादीत् सूरे! मासावधिकमेव ते जीवितम् । अतः कंचिदुचितं शिष्यं स्वपट्टे स्थापय । विशालमूर्तिरेव सर्वथा योग्य इति सूरिणोक्ते साऽपि तमन्वमोदत पश्चात्सा तिरोदधे । सूरिरेतदर्थं संघं पप्रच्छ । संघेनापि सुरेरवस्थां समीक्ष्य तदीयं वचः प्रमाणीकृतम् । शुभे दिवसे श्रीविशालमूर्तिं स्वपट्टे नियोजयामास श्रीकक्कसूरिः । पश्चात् तत्रैकविंशतिदिनान्यनशनं विधाय स्वर्गपदवीं प्रतस्थे ।

वि॰सं॰ १७४तः ] १६—आचार्यः श्रीदेवगुप्तसूरिः (तृतीयः) [ वि॰सं॰ १७७ प॰

श्रीकक्कसूरिपट्टे श्रीदेवगुप्तसूरिः स्थानं प्राप । असौ नागपुरवास्तव्य आदित्यनागगोत्रीयश्चासीत् । अस्य पिता भेराशाहो माता च नन्दानाम्नी ।

अथ क्रमेण विहारं कुर्वन् यक्षदेवसूरिर्नागपुरमाययौ । तत्र व्याख्याने विभवे सति मनुष्यैस्त्रीणि कार्याणि जनहितार्थमवश्यं कर्तव्यानि यथा—(१) नूतनमन्दिराणि निर्माय तत्र मूर्तिप्रतिष्ठा, (२) तीर्थयात्रायै संघस्यायोजनम्, (३) श्रीभगवतीसूत्रवाचनेति । इदं श्रुत्वा सभायां संस्थितेन वैश्रवणोपमेन भेराशाहेन विचारितम्-इदं कार्यत्रयं सर्वजनहिताय कथमहं न विदध्याम्! द्रव्ये सति सन्निमित्ते व्ययः साधीयान् मत इति विचार्य सुरेराज्ञामधिगत्य कुशलान् शिल्पिनो जिनालयनिर्माणायादिदेश । स्वपुत्रो धनदेवश्च तन्निरीक्षणे नियुक्तः । पश्चात्सोऽचिन्तयत्-यदि सूरिरत्र चातुर्मासे वसतिं कुर्यात्तदाहं श्रीभगवतीसूत्रवाचनामहोत्सवमारभेय । समाप्ते च महोत्सवे संघायोजनमपि शक्येत । तावच्च मन्दिरमपि पूर्णं भवेदिति कृत्वा तं सूरिं नत्वा साञ्जलिबन्धमब्रवीत्-भगवन्! भवदुक्तं व्याख्याने सर्वमहं भवत्कृपया साधयितुमिच्छामि । सूरिस्तमभिनंद्य तथैव तत्र वसतिं चक्रे । शुभे मुहूर्ते श्रीभगवतीसूत्रवाचनायाः प्रारम्भो जातो महता समारोहेण । श्रद्धाभक्तिपुरःसरा जनास्तत्र समायाताः । क्रमेण स्वसंपदनुसारेण महोत्सवसमाप्तिः कृता । प्रतिप्रश्नं सुवर्णमुद्रिका अन्ते च मणिमौक्तिकप्रकरं समर्पयामास । संघेनाऽपि महोत्सवस्यालभ्यो लाभो लब्धः । एवमनेन सपादलक्षपरिमिता मुद्राः सत्कार्ये विनियुक्ताः । ततः सूरिमामन्त्र्य सम्मेतशिखरयात्रायै संघ आयोजितः । तीर्थयात्रां विधाय पुनर्नागपुरमाययौ सपरिवारो भेराशाहः । देवगृहे प्रभुप्रतिमां प्रतिष्ठापयितुमसौ सुरिं न्यवेदयत् । सूरिश्च तमवादीत्-श्रेष्ठिन्! सर्वजनहितानि त्रीणि कार्याणि साधितानि, परमात्मकल्याणसाधकं त्ववशिष्टं तच्च न द्रव्येण, किन्त्वात्मविचारणया परमवैराग्यलभ्यम् । सादरं समाकर्ण्याऽसौ तमाह-भवदुक्तं सर्वमेव संपादितं, कथमिदं भवदादिष्टं विफलीकुर्यामित्युक्त्वा स दीक्षायै समुत्सकोऽभूत् । प्रथमं सूरिहस्तेन जिनालये प्रभोः प्रतिमा प्रतिष्ठापिता । तदनु तेन दीक्षां ग्रहीष्यामीति निवेदिता सा पतिव्रतपरायणा नन्दाऽपि पत्या सहैव दीक्षां ग्रहीतुमुद्यता ।

इतश्च धनदेवो जनकस्य प्रव्रज्यानन्तरं दैववशाद् दारिद्र्यपीडितोऽभूत् । तस्मिन्नेवावसरे

श्रीककसूरिर्विहरन् तत्राजगाम। तदा तन्नगरस्थिता जनास्तमाहुः भगवन्! मेरामुनेस्तनयोऽयं कालप्रभावाद् दारिद्र्यमनुभवति। जनैरुक्तं वचः श्रुत्वा सूरिर्धनदेवमकथयत् "भो वत्स! कर्मणःप्रभावं ज्ञात्वा धर्मध्यानमेव समाश्रय, अशाश्वतानां पदार्थानां मध्ये धर्म एव शाश्वतः" इति सहर्षं सूरिवचनं श्रुत्वा धैर्यमास्थाय धर्माचरणे कृतप्रवृत्तिरभवत्। क्रमेण व्यतीते पापक्षये पुनर्वैश्रवणोपमो बभूव। ततश्चतुर्णां पुत्राणां विवाहादिकृत्यं सम्पाद्य व्यवहारभारं तेभ्यःसमर्प्य शुभावसरोऽयमिति कृत्वा चतुर्दशभिर्भावुकैःसह दीक्षामग्रहीत्सूरिसमीपे। पुत्रो धनदेवोऽपि तदर्थमुद्युक्तोऽभूत्। प्राक्तनादृष्टवशादेव माता पुत्रश्च दीक्षाया विरतौ बभूवतुः। जनकेन केवलं दीक्षा गृहीता।

आचार्यस्य शिष्या अपि विविधशास्त्रपारावारपारगामिनः स्वधर्मप्रचारायैव सर्वत्र जनान् धर्ममार्गं प्रापयन्तोऽलौकिकचमत्कारकारिण्या विद्यया आश्चर्यान्वितचेतसश्चक्रुः। पट्टावलीकारैःकेषांचित्परिचयः प्रदर्शितो यथा।

देवगुप्तसूरेः शासनसमये धर्ममूर्तिर्नाम वाचनाचार्यो महालब्धिसंपन्नोऽभूत्। प्राप्याऽसौ सूरेराज्ञां सिन्धप्रान्ते विहरन् वीरपुरमागच्छत्। तत्रैकः सन्यासी योगविद्याबलेन पृथ्वीतलस्पर्शमन्तरा स्थितः सर्वान् विस्मयान्वितानकार्षीत्। एवं चमत्कारेण धर्ममार्गाद् भ्रष्टानकरोत्। तस्मिन्नेव समये स वाचनाचार्यं उपस्थितः। श्रावकैःसत्कृत्यासौ निवेदितो मुने! महाप्रभावोऽयं परिव्राजको भूतलमस्पृश्यैव तिष्ठति। मुनिनोक्तम्-नायं चमत्कारो, योगविद्याबलमेतत्। किं नास्तीदृशी विद्याऽस्मच्छास्त्रे? स्याद्वा, तथापि या धर्मध्वंसकाल उपयुक्ता न स्यात्तर्हि किं तया? इत्याग्रहयुक्तं श्रावकवचः श्रुत्वाऽसौ तानकथयत्-श्वो व्याख्यानकाले यदाऽहं पीठमारुह्य व्याख्यानं कुर्यां तदा भवद्भिस्तत्पीठं दूरीकर्तव्यम्। तदा ज्ञातं भविष्यतीति। अन्येद्युः व्याख्याने तैश्च तथैव विहितम्। मुनिराधारं विनाऽपि स्थितः। जनाश्च विस्मयमापुः। अथेदं वृत्तमसौ परिव्राजकोऽशृणोत्। क्षमाञ्च ययाचे कथयामास च—भगवन्! इयमपि विद्या मया जैनाचार्यादेव सम्प्राप्ता। वीतरागविषयकचर्चायां जातायां स मुनिपार्श्वे दीक्षां जग्राह।

'अथापरो' ज्योतिर्विद्यानिपुणो राजसुन्दरो विहरन्नेकदा भृगुपुरमुपस्थितः। तदा तत्र विदुषामेका सभा मिलिता। आमन्त्रणं पण्डितेभ्यो दत्तम्। अस्मै राजसुन्दराय च नो दत्तम्। अनामंत्रितोऽप्यसौ तत्र ययौ। सर्वैरासनं दत्तम्। अथ विचारा आरब्धाः। भविष्यत्कालकं विविधमतविडम्बनमासीत्। राजसुन्दरं ते पप्रच्छुः। सोऽवादीत् अद्यैव रजन्यामष्टघटिकासु व्यतीतासु, पञ्चाष्टचत्वारिंशत्परिमितेषु पलेषु वृष्टिर्भविष्यत्येव। सर्वैः पण्डितैस्तत्कथनमुल्लेखितं पत्रे। नियतसमये प्रचुरधाराप्रवाहा वृष्टिः पपात। सर्वे ते तमुपहसन्तो म्लानवदना जाताः। सर्वे चाध्ययनार्थं तत्समीपे ययुः। राजसुन्दरस्य महान् प्रभावः सर्वत्र व्याप्तः। राज्ञा प्रजाभिश्च संमानितोऽभवत्।

पद्मकलशनामोपाध्यायः परकायप्रवेशविद्यानिपुणो बभूव। स तया विद्यया भूपतीन् रञ्जयन् जैनधर्मोपासकान् विदधाति स्म।

नागप्रभ आकाशगमनविद्यापारगस्तृतीयोपवासप्रान्ते शत्रुञ्जयोपकेशपुरयोर्यात्रां विधाय

पारणामकरोत् । अथ कदाचिद् व्योमविहारिणस्तस्य नभोमार्गे पादलेपप्रभावेणाकाशसंचारी परिव्राजको मिलितः । मिथो वार्तालापेन संचरन्तौ तौ शत्रुञ्जयमागच्छताम् ! नागप्रभचरणोपरि लेपद्रव्यमदृष्ट्वाऽसौ तमब्रवीत् । पादलेपाभावे कथमाकाशसञ्चरणं त्वया कर्तुं शक्यत इति कथितः स प्राह इदन्तु पारतन्त्र्यम्, कश्चित् लेपं प्रक्षालयेत्तदा गतिस्खलनं स्वस्याडम्बरश्च प्रतीयेत । अत आत्मप्रभावसम्पादिता सा सर्वत्राप्रतिहतप्रभावा स्यादिति । अवश्यमेव त्वं मां तां विद्यामध्यापय, न तवोपकारमहं कदापि विस्मरिष्यामीत्युक्तो नागप्रभस्तमवादीत्-न खलु दीक्षामन्तरेण साध्येतुं शक्यत इति । तेनाऽपि तद्वचनमङ्गीकृत्य दीक्षा गृहीत्वा संयममाश्रित्याकाशगामिनी विद्या सम्प्राप्ता । एवमनेन नागप्रभमुनिना बहवो भव्या आत्मकल्याणं प्रापिताः । स्वविद्याचमत्कारश्च दर्शित : ।

न्यायमुनिस्तु देवीवरप्रसादसमासादितविद्याप्रभावः सर्वथा सर्वदा सर्वत्र शास्त्रार्थविजयी बभूव । अनेकासु राजसभासु बौद्धान् वेदान्तिनश्चासौ समधिगतशास्त्ररहस्यवेत्ताऽनेकशः पराजयत । भृगुपुरशिवनगरोज्जयिन्यादिषु नगरेषु च धर्मप्रचारं विधायाऽन्यमतावलम्बिनां मानविमर्दनं कृतं न्यायमुनिना ।

ईदृशा विविधविद्यापारदृश्वानो मुनयोऽस्य सूरेः शासने विशेषतो जिनधर्मसमुन्नतिं चक्रुः ।

देवगुप्तसूरिरेकादश ११ वर्षाणि उपाध्यायपदे, त्रीणि ३ वर्षाणि सूरिपदे चैवं चतुर्दश १४ वर्षाणि जिनशासनस्य बहुविधां सेवामकरोत् । स्वनिधनकालमासन्नं विज्ञाय स्वपट्टे राजहंसं संस्थाप्य वीरनिर्वाणात् ६४७ वर्षव्यतिक्रमेऽनशनं १३ दिनपर्यन्तं विधाय समाधिना शरीरमुत्ससर्ज ।

## वि०सं० १७७ तः ] २० आचार्यः श्रीसिद्धसूरिः ( तृतीयः ) [ वि०सं० १९९ प०

श्री देवगुप्तसूरिपट्टे श्रेष्ठिगोत्रीयः श्रीसिद्धसूरिः समायातः । असौ माण्डव्यपुराधिपतेः सुरजनस्य प्रधानसचिवस्य नागदेवस्य तनयोऽस्य माता कमलवदना कमलादेवी ।

द्रव्ये वैश्रवणोपमस्य, बुद्धौ बृहस्पतिसदृशस्य नागदेवस्य रमानाम सुशीला भार्याऽनपत्याऽसीत् । अतो हरनारायणसिंहस्य देवलां नाम तनयामसौ परिणिनाय । कर्मयोगादियमपि तथैवापत्यलाभहीना बभूव । नागदेवेन कुलदेव्याःसच्चायिकाया आराधनं कृतम् । उपवासत्रयसमाप्तौ देवी प्रत्यक्षमब्रवीत्—मन्त्रिन् ! उपकेशपुरस्थस्य चिंचटगोत्रीयस्य रामाशाहस्य तनया कमला त्वया परिणेतव्या, तस्याः पुत्रप्रजालाभोऽवश्यं भविष्यति । असौ देवीवचने विश्वस्य तथैव कमलायाः पाणिग्रहणमकरोत् । व्यतीते च काले क्रमशः सप्त पुत्राः कमलायाः, केवलं न, रंभाया देवलाया अपि सप्त सप्त तनया अभूवन् । जिनधर्मोपासकस्याऽप्यस्य पुत्ररत्नप्राप्त्याऽतिमहती श्रद्धा वृद्धिमाप । स्वधर्मप्रचारार्थमसौ कोटिपरिमितद्रव्यव्ययेन सहयोगमदात् । आचार्यः श्रीसिद्धसूरिरस्य तेजसिंह इति नामकः सौभाग्यवत्याः कमलायाः सूनुः ।

पूर्वकृतपुण्यप्रभावादेकदा विहरन् श्रीककसूरिर्माण्डव्यपुरमलंचकार । सूरीश्वरस्य व्याख्याने मनुष्यजन्ममाहात्म्यं संसारासारताञ्च विज्ञाय तेजसिंहः परं वैराग्यमलभत । पिता नागदेवस्तस्य द्वे भार्येऽन्ये च सप्त पुत्रा दीक्षायै समुत्सुका अभूवन् । शुभे मुहूर्ते सप्तपञ्चाशत्परिमितजनैः सार्द्ध

तेजसिंहादयो दीक्षां लेभिरे । तेजसिंहस्य राजहंसेति नाम परिवर्तितम् । सूरिश्च सहैव नीत्वा तं न्याय-व्याकरणसाहित्यादीनि शास्त्राण्यल्पेनैव कालेनाध्यापयामास । जिनधर्मशास्त्राणि त्वेतदपेक्षया पूर्वमेवाध्यापितान्यासन् । एवमधिगतसकलशास्त्रार्थतत्वोऽप्यसौ गुरुचरणकमललग्नचञ्चरीकः शुश्रूषायामेव कृतमतिरभूत् । श्रीककसूरेर्वर्षत्रयानन्तरमेव श्रीदेवगुप्तसूरिर्दिवमगात् । अतस्तत्पट्टे राजहंसस्य श्रीसिद्धसूरिरिति नाम विधाय प्रतिष्ठापयामास तं शुभेऽहनि श्रीदेवगुप्तसूरिः ।

अथ क्रमेण विहरणं कुर्वन्नसौ वल्लभीपुरमाजगाम । श्रीसंघेन सत्कृतश्चासीत् । तस्मिन्नेव काले बुद्धमतप्रचारको बुद्धाचार्यः सशिष्यो बुद्धमतोपदेशनार्थं तत्रागतोऽभूत् । सूरे शिष्येण वादिचक्रवर्तिपदवीकेन विमलकलशमूर्तिना राज्ञः शिलादित्यस्य सभायामसौ पराजयं प्रापितः । पश्चात् शिलादित्यः सूरेरुपदेशादेकां श्रमणसभामकारयत् । बहवो मुनयस्तत्र समागता अभूवन् । तत्र जिनधर्मस्याभ्युन्नतये विविधा उपायाश्चिन्तिताः । सर्वत्र स्वधर्मप्रचाराय साधून् प्रेषयामास सूरिः । स्वयं च दक्षिणस्यां दिशि मदुरामगच्छत् । शिष्यमण्डलमण्डनायमानोऽसौ तत्र चातुर्मास्यं विधाय धर्मव्याख्यानमदात् ।

सूरीश्वरस्याल्पवयस्कोऽपि वीरशेखरमुनिर्विद्याचमत्कारचिन्तामणिरासीत् । एकदा तस्याध्वनि योगकलाकलापकोविदोऽवधूतः कश्चित् संगतोऽभूत् । स तं पप्रच्छ-मुने ! किमपि चमत्कारकरणं भवान् जानाति न वा ? मुनिस्तमुवाच-किमाश्चर्यं बाह्यविद्यायामात्मश्रेयस्करी विद्याऽनल्पाय श्रेयसे कल्पत इति । गर्वपूर्णमिदं वचो निशम्य परीक्षार्थमसौ योगी योगविद्यया सर्पानाविश्चकार । मुनिरपि तदवलेपपरिहाराय मयूरानुत्पादयामास । ततो रुष्टः स गजान् दर्शयामास । मुनिनाऽपि तदङ्कुशधारिणो हस्तिपका निर्मिताः । ओषधिबलेन सोऽवधूत आकाशगमनमकरोत् । सोऽपि तदभावेऽपि व्योमविहारं कृतवान् । एवं सर्वातिशायिविद्यापारावारपारगमिनं मुनिं ज्ञात्वा लज्जाभारातिक्रान्तवदनोऽवधूतो मुनिं प्रणम्य दीक्षामग्रहीत् ।

अथ विहारक्रमेण सूरीश्वर आघाटपत्तनमाययौ । तत्र श्रीसंघस्यादरातिशयमालक्ष्य चतुर्मासो विहितः । अनन्तरं सूरेरुपदेशात्-श्रेष्ठिगोत्रीयो मुकुंदश्रेष्ठी संघं निष्कासयामासोपकेशपुरयात्रार्थै । विक्रमाद् १६४ वर्षव्यतिक्रमे दुर्भाग्यवशात् दुष्कालोऽभवत् । तस्मिन् भीषणे काले सूरेरुपदेशात् तत्पुरवासिभिर्मिलित्वा कोटिसंख्याकाः मुद्रा व्ययिताः । द्वितीये वर्षेऽपि तथैव प्रबन्धो विहितः । ततः सुभिक्षसमये कोरण्टकपुर-सत्यपुर-भिन्नमालादिषु पत्तनेषु धर्मप्रचारं कृतवान् सूरिः शाकंभरीनगरीमात्मना भूषयामास । तत्र नृपो नागभट्टः सूरेः स्वागतमकरोत् । प्रभावपूर्णोपदेशेनाऽसौ गार्हस्थ्यदीक्षादीक्षितोऽभूत् । प्रजा अपि "यथा राजा तथा प्रजा" इति न्यायेन जिनधर्माभिरुचिर्बभूव । नागभट्टः सूरीश्वरं प्रार्थयामास-भगवन् ! भवतो वृद्धावस्था विद्यतेऽतः कमपि समुचितं शिष्यं स्वपदे स्थापयतु । सोऽपि तद्वचोऽनुमान्य सच्चायिकानुमोदनञ्चासाद्य श्रीरत्नभूषणोपाध्याय सूरिपदमदात् । रत्नप्रभसूरीति नाम तस्य चकार । तत आचार्य उपकेशपुरमेत्य २७ दिनान्यनशनं विधाय समाधिना देहमुत्ससर्ज ।

## वि॰ सं॰ १६६ तः ] २१ आचार्यः श्रीरत्नप्रभसूरिः (चतुर्थः) [ वि॰ सं॰ २१८ प०

श्रीसिद्धसूरिपदमाचार्यः श्रीरत्नप्रभसूरिरलञ्चकार । असौ श्रेष्ठिगोत्रीयो हंसावलीनगरीवास्तव्यश्चासीत् । पिताऽस्य जसाशाहो माता च पातोलीनाम्नी । तयोः सूनुः-राणानामा । पिता तु निर्धनोऽपि धर्मप्रियोऽभूत् । यदाऽसौ पुत्रो गर्भावस्थायामासीत्तदा प्राक्तनजन्मसुकृतप्रभावेण जसाशाहः पारसमणिं प्राप्नोत् । तत्प्रभावाच्च संप्राप्तं सुवर्णं प्रभूतम् । ततः स जिनमन्दिरमकारयत् । षण्णवत्यङ्गुलपरिमिता श्रीमहावीरस्य प्रतिमा निर्मापिता । प्रतिष्ठामहोत्सवाय कोटिमुद्राणां संकल्पः स्वमनसि निर्धारितः ।

अथ नागपुरमलंकुर्वाणं श्रीकक्कसूरिं श्रीसंघद्वारेणामन्त्रयामास । सूरिरपि भक्तजनस्य प्रणतिततिपुरःसरां विनतिं स्वीकृत्य शिष्यगणगीयमानयशोऽवतंसको हंसावलीमियाय । श्रीसंघसहितोऽसौ जसाशाहोऽपूर्वस्वागतेन सूरेर्नगरप्रवेशमकारयत् । स्वधनस्य सद्व्ययार्थं सर्वेषामात्मनश्च कृतार्थतामासादयितुं तेन श्रीभगवतीसूत्रवाचनामहोत्सवः प्रारब्धः । श्रीमती देवी पातोली षट्त्रिंशत्सहस्र ३६००० परिमितानां प्रश्नानां तावतीभिरेव सुवर्णमुद्रिकाभिः पूजनमकरोत् । ताभिरेवाऽसौ श्रेष्ठी जिनागमग्रन्थान् लेखयित्वा ज्ञानकोशेऽस्थापयत् । अहो ! येन पारसमणिः प्राप्तः सः किं किं कर्तुं न शक्नुयात् । तत्रापि धर्ममयैकजीवनः कथं नाम धर्माद् धनमधिकं कुर्यात् । अस्तु । आचार्यस्य चतुर्मासस्थितावेव सर्वग्रहानुकूले शुभे मुहूर्ते पातोली शारदशीतांशुसदृशवदनकान्ति सुतं सुषुवे । महतोत्सवेन तस्य राणाशाहेति नामकरणं स चकार । क्रमेणाऽसौ सूनुः शुक्लपक्षे शशीव वृद्धिमवाप । आचार्यस्तस्य हस्तरेखामाकलय्य तां देवीं पातोलीमवादीत्-तवायं तनयो जिनधर्मे महाप्रभावशाली स्मरणीययशा भविष्यति । तया सहर्षमादृतं सूरिवचनम् ।

एकदा जसाशाहः सविनयं सूरिमुवाच-भगवन् ! नूतनमन्दिरे प्रतिष्ठा यदा स्यात् ततः प्रागेकामाद्याचार्यश्रीरत्नप्रभसूरेः प्रतिमां स्थापयितुमभिलषामि भवदाज्ञां संप्राप्य । आचार्येणोक्तम्-श्रीतीर्थङ्करप्रतिमास्थापनमात्मकल्याणसाधनाय गुरुमूर्तिस्थापनमनतिप्रयोजनं, गुरुचरणसरोजयोश्चेतसि दैनंदिनं भक्तिभावेन चिन्तनमेव परमार्थतत्वसाधकं "प्रधानाप्रधानयोर्मध्ये प्रधाने संप्रत्ययः" इति न्यायेन त्वमेव तावत् सूक्ष्मदृष्ट्या विचारयेति । अन्ते चाज्ञा गुरुणामविचारणीयेति स तत्प्रस्तावं स्वमनस्येव स्थापयामास । ततस्तेनमन्दिरसमीप एवौषधालयं ज्ञानकोशालयश्च निर्मापयितुमादेशो दत्तः शिल्पिभ्यः ।

अथ क्रमेण संप्राप्ते प्रतिष्ठामहोत्सवे तदामन्त्रिता विविधदेशस्था जना अनेकसंख्यकाः साधवः साध्व्यश्च श्रीसंघाश्च समाजग्मुः । न केवलं साधारणा मनुष्याः, बहवो राजानोऽपि तदादरं संमानयितुमत्राययुः । आचार्यस्य वरदहस्तेन मूर्तिप्रतिष्ठा विहिता । जसाशाहेन तत्रत्याः सर्वे सुवर्णमालाभिः सुवर्णकङ्कणैर्याचकाश्च यथेष्टं वस्त्रान्नादिभिरितरे च सुवर्णमुद्रिकाभिश्च सत्कृताः ।

अहो! सर्वस्वं ददताऽनेन श्रेष्ठिना शाश्वतं यश एव क्रयीकृतमित्येव तत्वम् ।

आचार्येणाप्यस्मिन्नवसरे बहवो योग्यतां प्राप्ताः मुनयः पदवीप्रदानेनाधिकयोग्यतां लम्भिताः ।

इदमेव केवलं न, अपितु तन्नगराधिपतिर्नृपतिरसौ रामदेवोऽपि मांसमदिराद्यभक्ष्यपरिहारपूर्वकं "न हि केनापि राज्येऽस्मिन् जीवहिंसाऽप्रमादेनापि कर्तव्येति सर्वत्रादिदेश। अयमेव वन्दनीयचरणस्य सूरीश्वरस्यालौकिकः कोऽपि विलक्षणः प्रभावविशेषः। परश्च किं वक्तव्यम्-यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन-इति।

संक्षेपतः सूरेरुपदेशतः श्रेष्टिना "सन्निमित्ते वरं त्यागश्चश्वले विभवे सति" न्यायप्राप्तमिदं सार्थकतामापादितम्।

अथ सर्वकार्यसमाप्तौ सूरिः क्रमेण लाट-सौराष्ट्र-सिन्ध-पञ्जाबशौरसेन-प्रभृतिषु देशेषु धर्मप्रचारं कुर्वन् मथुरायामाजगाम। अपरत्र राणाशाहोऽधीतनित्यक्रियो जिनागमकृतप्रवेशस्तत्वजिज्ञासु धर्मभावनाभावितहृदयश्चतुर्मासाधिवासार्थं सूरिं निमन्त्रयामास। सूरिश्च तद्विज्ञापनमङ्गीकृत्य तत्राजगाम। अपूर्वस्वागतविधिना नगरप्रवेशमकारयदसौ श्रेष्ठिपुत्रः। तत्र क्रमशो धर्मरतिसंवर्धनानि व्याख्यानानि जातानि। पश्चाद् राणाशाहस्य संघपतित्वे महान् संघः शत्रुञ्जययात्रायै शुभेऽहनि संपादितप्रस्थानमङ्गलः प्रतस्थे। यस्य कमलाधिवासभूते गृहे पूर्वमपि धर्मकार्याण्यभूवन् तदेवावालोच्य संघे कियती जनसंख्येति कथनमनावश्यकम्। एवं क्रमेण शत्रुञ्जयं गत्वा तीर्थयात्रां सम्पाद्य राणाशाहः सूरीश्वरचरणसमीपे दीक्षामगृह्णात्। सूरिणा च रत्नभूषणमुनिरिति तन्नाम कृतम्।
निसर्गत एव तीक्ष्णबुद्धिं सरस्वतीलब्धवरप्रसादं रत्नभूषणमुनिमसौ व्याकरणतर्कसाहित्यादीनि शास्त्राण्यध्यापयत्। अल्पेनैव कालेन स्वप्रतिभातिशयात् सूरेश्च कृपया स एकादशाङ्गपूर्वकं पूर्वाध्ययनं कण्ठेऽकरोत्। एवं सकलशास्त्रकलाकलापकलापिनमसौ श्रीसिद्धसूरिर्वाचनाचार्यपदेन भूषयामास। शास्त्रार्थतत्ववेत्तारश्च तं शाकम्भरीनगर्यधिपतिर्नागभट्टोऽपि वादिचक्रवर्ती-इति पदवीप्रदानेन संमानयामास।

आचार्यः श्रीककसूरिः स्वनिधनकालं ज्ञात्वा स्वपट्टे उपाध्यायपदविभूषितं विशालमूर्तिं संस्थाप्य तस्य देवगुप्तसूरीति नाम कृत्वा तदनु एकविंशतिदिनान्यनशनं कृत्वा समाधिना स्वर्गमगमदिति पूर्वमुक्तम्। श्रीदेवगुप्तसूरिस्तु —स्वपट्टं वर्षत्रयमेवाधिष्ठितः। तदनन्तरं श्रीसिद्धसूरिस्तत्पट्टमलंचकार। तस्यैवाल्पवयस्के रत्नभूषणमुनावतिमहतो कृपाऽऽसीदिति सुधीभिर्विभाव्यम्।

अथ श्रीसिद्धसूरिरासन्नमृत्युसमयं योगदृष्टया विज्ञाय रत्नभूषणवाचनाचार्यस्य रत्नप्रभसूरिरिति नामपरिवर्तनं विधाय पट्टे प्रतिष्ठाप्य दिवमगमत्।

आचार्य श्रीरत्नप्रभसूरिरपि गुरोः पद्धतिमनुसरन् क्रमेण धर्माभ्युदयाय विहरन् सत्यपुरमाययौ। चतुर्मासा नन्तरमष्टादश भावुकान् दीक्षयामास। तत्र लक्ष्मणशाहस्य तनुजस्य धर्मसिंहस्य धर्ममयैकजीवनत्वाद् धर्ममूर्तिरिति नामाकरोत्। तत उपकेशपुरं गत्वा श्रीमहावीरदर्शनं विधाय सूरिर्नागपुरमाययौ। तत्रादित्यनागगोत्रीयस्य सहजपालस्याग्रहातिशयाच्चतुर्मासार्थं स्थितिं चकार। सहजपालेन च श्रीभगवतीसूत्रवाचना सपादलक्षव्ययेन कारिता। भद्रगोत्रीयेण देवाशाहेन सुरेरनुमोदनं प्राप्य महान् संघः शत्रुञ्जययात्रार्थं निष्कासितः। यत्र सहस्राधिकाः साधवो लक्षपरिमिताश्च भावुका

आसन् । आचार्यस्य दक्षिणापथे विहारेच्छां ज्ञात्वा संघस्तीर्थयात्रां सम्पाद्य प्रतिनिवृत्तः । देवाशाहेन च संघस्थितेभ्यो जनेभ्यो बहुमानपुरःसरं प्रतिजनं पञ्च मुद्रा उपहारीकृताः । संघश्च विसर्जितः ।

अथाचार्यस्तु महाराष्ट्रदेशे विहरन् सशिष्यो नन्दपुर-पिष्टपुर-गुडतुरादिषु नगरेषु जिनधर्मप्रचारं कुर्वन् श्रीसंघस्यामन्त्रणमनुमान्य मानखेटनगरे चतुर्मासमकरोत् । महाराष्ट्रप्रान्ते बहवो जैनधर्मस्य दीक्षां प्रापिताः । इतरे च धर्मरहस्यं बोधिताः । अत्र सूरेराज्ञां प्राप्य पूर्वमेवागताभ्यां देवभद्र-वीरभद्राभ्यां बौद्धमतानुयायिनो वेदान्तिनश्चाद्वितीयशास्त्रार्थबलेन पराजिता आसन् । आचार्यस्यागमने हेम्नः परमामोद एव । लोहित्याचार्येणाऽत्र पुरा जिनधर्मलताबीजं निक्षिप्तमासीत् । ततो विहरद्भिरन्यैराचार्यैस्तद्बीजं धर्मप्रचुरव्याख्यानैः सिञ्चितमाचार्येण रत्नप्रभसूरिणा च वर्षद्वय पर्यन्तमत्र विहरणेन समुद्भूतपत्रशाखाप्रशाखं विकासितम् । परिपूर्णविकासाय तत्र शिष्यान् संस्थाप्य स ततो विहारमकरोत् ।

अथ क्रमेण पर्यटन्नवन्तिकामागच्छदाचार्यः तत्र श्रेष्ठिगोत्रीयेणामात्येन रघुवीरेण सूरीश्वरस्य नगरप्रवेशमहोत्सवे सपादलक्षं व्ययितमासीत् । तत्रैव श्रीसंघश्चतुर्मासार्थं प्रार्थयत । भद्रगोत्रीयेण मालाशाहेन श्रीभगवतीसूत्रवाचना कारिता । प्रतिप्रश्नं सुवर्णमुद्रिकया, समाप्तौ च हीरकनीलपद्मरागादिभी रत्नैश्च पूजा विहिता । बप्पनागगोत्रीयो मेघाशाहः स्वनिर्मितजिनालये श्रीपार्श्वनाथप्रतिमायाः प्रतिष्ठापनं सूरिहस्तेन कारयामास । तस्मिन्नवसर एकविंशतिपरिमितैर्भावुकैर्दीक्षा गृहीता ।

एवमवन्तिप्रान्ते विहरन्तं तमाचार्यं मथुरानगरीसंघाधिपतिरागत्य प्रणम्यावादीद्-भगवन् बौद्धाचार्यो बुद्धकीर्तिर्मन्त्रबलेनास्मान् पीडयति । बहव उपद्रवास्तेन कृताश्चरमा सीमा वर्तते एवं निशम्यासौ मथुरापुरीं सशिष्यः प्रतस्थे । सभायां शिष्येण धर्ममूर्तिना प्रतिज्ञा कृता-यःकोऽपि धर्मवाद-विद्यावाद-मन्त्रवादेषु शास्त्रार्थं कुर्यात्तदर्थमहं दृढपरिकरोऽस्मीति । श्रावकाश्च पुनरुज्जीवित इवानन्दमग्ना बभूवुः । ततो रात्रौ बुद्धकीर्तिः सूरेर्निवासस्थलेऽभिमन्त्रितां शक्तिं प्रेषयामास ध्यानादिक्रियासक्तास्ते शिष्या नाजानन् । किन्तु सर्वविद्यापारगो धर्ममूर्तिर्बुद्धकीर्तिप्रेषिता शक्ति रियमिति ज्ञात्वा स्वविद्याबलेन तस्या अवष्टम्भनमकार्षीत् । तदवष्टम्भेन सहैव स बुद्धकीर्तिरप्य वष्टब्धः । प्रातर्जनास्तं तदवस्थं ददृशुः । असौ तु दिवाभीत उलूक इव मुखमपि दर्शयितुं न शशाक । अन्ते च सूरेः सकाशं क्षमामयाचत । बन्धनाच्च मोचितः । एवं तत्र तं पराजित्य पंजाब सिन्धकच्छसौराष्ट्रादिषु विहरणक्रमेण सूरीश्वरः कोरण्टकपुरमगमत् । तत्रावस्थितेन कोरण्टकगच्छीयेन कनकप्रभसूरिणा श्रीसंघेन चास्य नगरप्रवेशो विहितः । श्रीसंघस्यादरातिशयात्तत्रैव चतुर्मासो विहितः । सूरेरुपदेशश्रवणायागतः प्राग्वटवंशीयश्चन्द्रावतीनगरीमन्त्री कर्णः सविनयमवद आचार्य ! चन्द्रावतीमलंकर्तुमर्हति भवान्, भगवतीं दीक्षां ग्रहीतुमिच्छामि । सूरिरपि तदङ्गीचकार चतुर्माससमाप्तौ तत्र विहारमकरोत् । शुभागमनसंफुल्लवदनकमलो मन्त्री भव्यसमारोहेण नगरप्रवेशमकारयत् । जिनमन्दिरेष्वष्टाह्निकामहोत्सवश्च विहितः । तत्र सपादलक्षमुद्रिका विनियुक्ताः

अन्ते चाष्टादशभिर्भावुकैरसौ कर्णो दीक्षामग्रहीत् । ततो बहुषु ग्रामनगरेषु विहरन्सूरीश्वर उपकेशपुरमाजगाम । सूरेरुपदेशमासाद्य तत्रत्यो राजा मूलदेवः श्रमणसभायोजनमकरोत् । तत्र पञ्चसहस्राधिकाः श्रमणा लक्षाधिकाश्च श्रावकाः समागच्छन् । सर्वत्र धर्मप्रचार एव युष्माकं कल्याणसाधकः पन्थाः स एवाश्रयणीय इति सर्वानुपदिदेश । तत्रैव धर्ममूर्तिं स्वपदे सर्वानुमत्याऽस्थापयत् । यक्षदेवसूरिरिति नाम चकार ।

ततः सच्चायिकावचनानुसारेण पट्टाभिषेककालेऽष्टमासाधिकसप्तविंशतिदिवसमध्ये केवलमेकविंशतिदिनान्यवशिष्टानीति मत्वा समीपस्थं लुणाद्रिं गत्वाऽनशनेन समाधिना च देहमत्यजत् ।

अनेन सूरिणा जिनशासनस्यैकोनविंशतिवर्षाणि महती प्रभावना विहिता ।

वि० सं० २१८ तः ] २२ आचार्यः श्रीयक्षदेवसूरिः (चतुर्थः) [ वि० सं० २३५ प०

श्रीरत्नप्रभसूरिपट्टे श्रीयक्षदेवसूरिः समायातः । असौ सत्यपुरवास्तव्यः सुचन्तिगोत्रीयश्चासीत् । अस्य पिता लक्ष्मणसिंहः, सुशीला मांगीनामिका च माता । अस्य बाल्योचिता क्रीडा प्रतापगुणसंपन्नपुरुषसदृशी, विनयादिगुणा धार्मिकाः संस्काराश्च कुलपरम्पराप्राप्ता आसन् । अस्य जनको व्यापारेऽपरिमितं द्रव्यमवाप । ततो धर्मभावनासमन्वितमानस उपाध्यायपदवीकेन पद्महंसेन प्रेरितः सत्यपुरे जिनालयं विशालं निर्माय तत्रैकचत्वारिंशदंगुलप्रमाणां भगवतः श्रीपार्श्वनाथस्य प्रतिमां कारयित्वा प्रतिष्ठापयामास । शत्रुञ्जययात्रार्थं संघनिष्कासनमपि व्यधात् । संघस्थितेभ्यः तीर्थयात्राप्रतिनिवृत्तोऽसौ रजतस्थालीं सुवर्णचषकसहितां पंचमुद्रासंयुक्तां प्रतिजनं ददौ । एवं कोटिप्रमाणं द्रव्यं धर्मकर्मणि विनियुज्य प्रभूतपुण्यमाससाद । अतस्तस्य सूनुरपि यथा पिता तथा पुत्रः स्यादेव ।

एकदा सत्यपुरे कश्चिद् योगी समागच्छत् । असौ स्वविद्याबलेन विविधान् पशुपक्ष्यादीनुत्पाद्य, गगनगामिन्या च विद्यया सर्वान् विस्मयतामापाद्य समतोषयत् । स धर्मसिंहोऽपि तत्र गत्वा तं पप्रच्छ-प्रभो ! आत्मकल्याणमार्गं जानाति भवान् ! । तेनोपदिष्टं ब्रह्मचर्यव्रतपालनम् । यथा =

नैष्ठिकं ब्रह्मचर्यन्तु ये चरन्ति सुनिश्चिताः । देवानामपि ते पूज्याः पवित्रं मंगलं तथा ।
शीलानामुत्तमं शीलं व्रतानामुत्तमं व्रतम् । ध्यानानामुत्तमं ध्यानं ब्रह्मचर्यं सुरक्षितम् ॥
मैथुनं ये न सेवन्ते ब्रह्मचर्यदृढव्रताः ते संसारसमुद्रस्य पारं गच्छन्ति सुव्रताः ।
एकरात्र्युषितस्याऽपि या गतिर्ब्रह्मचारिणः । न सा शक्रसहस्रेण वक्तुं शक्या युधिष्ठिर ॥

इत्याकर्ण्य ब्रह्मचर्यव्रतमसौ जिनमुनिपार्श्वमाययौ । ततोऽपि जं विवित्तमणाइन्नं रहिअंथीजणेण य । बंभचेरस्सरक्खट्ठा आलयं तु निसेवए ॥ इत्यादिभिर्जिनागमप्रतिपादितनियमैर्ब्रह्मचर्यं जग्राह । इतश्च सद्भाग्यवशाद् रत्नप्रभसूरिः समाजगाम सत्यपुरम् । तत्र सूरेर्व्याख्यानं श्रुत्वा जातवैराग्यो जनकमापृच्छ्याष्टादशभिः श्रावकैर्दीक्षां स्वीचकार । ततश्च धर्ममूर्तिरित्यभिधानं प्राप । कालान्तरेऽधीत्य सर्वविद्याप्रपञ्चोऽद्वितीयपाण्डित्यपञ्चाननः सूरिपदमासाद्य यक्षदेवसूरिरिति नाम्ना जगतीतलविश्रुतो बभूव ।

अथासौ यक्षदेवसूरिर्विहारक्रमेण भिन्नमालनगरं भूषयामास । तत्र महामहिमशालि व्याख्यानमभवत् । अत्र वेदधर्मानुयायिनो विप्रास्तेषां जिनधर्मानुरागिणामुत्कर्षमसहमाना एवं मिथोऽब्रुवन्-महतीमपि योग्यतां दधाना जैनाचार्या गौरवेणास्मानुल्लङ्घयितुं कदापि न शक्ताः, "वर्णानां ब्राह्मणो गुरुः, "ब्राह्मणश्च जगद्गुरुः" इत्यनेन गुरुपदभाजामस्माकं तु ते शिष्यभूता एवेति ब्राह्मणानां परमार्थतस्तदानीन्तने समये भ्रष्टचारित्र्यादहंभावयुक्तानि वचांसि श्रुत्वा श्रावकास्तथैवा-चार्यं निवेदयामासुः । सूरिस्तानाह सभायां सप्रमाणम्-"सत्यं ब्रह्म तपो ब्रह्म ब्रह्म चेन्द्रियनिग्रहः । सर्वभूतदया ब्रह्म एतद् ब्राह्मणलक्षणम्" क्षमा दमो दया दानं सत्यं शीलं धृतिर्घृणा । विद्या विज्ञान-मास्तिक्यमेतद् ब्राह्मणलक्षणम् । इति तद्धर्मशास्त्रोक्तानि लक्षणानि स्युस्तेषां तर्ह्यवश्यमेव ते जगद्गुरुत्वेन संमाननीया एव सर्वैः । किन्त्विदानीं ये हि दृश्यन्ते ते तु नाममात्रधारका ब्राह्मण-मात्मानं मन्यमाना ब्राह्मणब्रुवा एव । न खलु ब्राह्मणत्वेन ब्राह्मणोऽसौ कथ्यते, शास्त्रप्रतिपादिता-चारानुष्ठानेनैव स तथैव तत्वतो ब्राह्मणपदवाच्यो भवति । अन्यथा-सत्यं नास्ति तपो नास्ति नास्ति चेन्द्रियनिग्रहः । सर्वभूतदया नास्ति एतच्चाण्डाललक्षणम् ॥ चतुर्वेदोऽपि यो भूत्वा चण्डं कर्म समाचरेत् । चण्डालः स तु विज्ञेयो न वेदास्तत्र कारणम् ॥ इत्यादिभिः प्रमाणैर्ज्ञायते यद् वेदाध्यन-शीलोऽपि तपःसत्यदयादिगुणैर्हीनश्चाण्डाल इत्युच्यते शास्त्रेष्वपि । अस्मदीयशास्त्रेष्वपीदं मतमेवं प्रतिपादितम्-नवि मुंडिएण समणो-न ऊंकारेण बंभणो, न मुवणीरण्ण वासेणं कुस चिरेण तावसो । समयाए समणो होइ बंभचेरण बंभणो, नाणेण मुणी होई तवेण होई तावसो । कम्मुणा बंभणो होई कम्मुणा होई खत्तिओ, वइस्सो कम्मुणा होइ सुद्दोहोइउ कम्मुणा ॥ इत्येवं प्रचुरप्रमाणपूर्णं वस्तुतो ब्राह्मणधर्मनिरूपणरूपं व्याख्यानमाकर्ण्य ते ब्राह्मणा स्वस्वरूपं बुबुधिरे । अन्यान्यपि स्वमताक्षेप-परिहाराय दृढतरप्रमाणपुरं व्याख्यानान्यदात्सूरिः सभायाम् । अन्ते ते ब्राह्मणाः पञ्चदशशत-परिमिता जिनधर्मं स्वीचक्रुः ।

एवं सर्वत्र परमार्थतो धर्मप्रचारेण विहारं कुर्वन् चक्रवर्तीव चतुर्दिक्षु दुन्दुभिनादमिव जिन-धर्मव्याख्याननादं कुर्वन् क्रमशश्च स्तम्भतीर्थमाययौ । तस्मिन्नेव समये बौद्धाचार्यो जयकेतुरपि बुद्धमतप्रचारार्थं तत्रागतोऽभूत् । अपरेद्युः शौचादिक्रियायै बहिर्गच्छद्भिः सूरेः शिष्यैः सह मतमतान्तर-विषयको वार्तालापोऽभूद् बौद्धभिक्षुकाणाम् । तत्र जिनधर्मरहस्यावेदकानि वचनान्याकर्ण्य तैरनुमितं यन्नात्र वयं सफलप्रयत्ना भविष्याम इति विचिन्त्य तेऽपरेऽहनि पलायिताः । ततः श्री-संघस्य प्रार्थनां स्वीकृत्य तत्रैव चतुर्मासमकरोदाचार्यः । चतुर्मासमाप्तौ प्राग्वटवंशीयस्य धरण-शाहस्य संघपतित्वे शत्रुञ्जययात्रार्थं संघः प्रस्थितः । महताऽनुकूल्येन तत्र तीर्थयात्रां कृत्वा संघः प्रतिनिवृत्तः ।

अथ शिष्यमण्डलयुत आचार्यस्तु सौराष्ट्रदेशमगच्छत् । तत्र धर्मव्याख्यानादिना महती धर्मवृद्धिः सम्पादिता । पूर्वमेव धर्माभ्युदयार्थं विहरद्भिः सूरिशिष्यैः सप्रश्रयं सेवा विहिता । ततः कच्छदेशे रहीड-नडिया-कोमनपुरादिषु ग्रामनगरेषु धर्मतत्वं बोधयन्नसौ तत्प्रान्ते सर्वत्र धर्मजागृति-

मकार्षीत् । तदनु सिन्धप्रान्तमेत्य केषांचिन्नूतनमन्दिराणां प्रतिष्ठां बहुसंख्यकानां धार्मिकाणां दीक्षाप्रदानमप्यकरोत् । ततोऽसौ पञ्जाबदेशे विहरन् लवपुरं [लोहाकोटं] जगाम । तत्रैव चतुर्मासो विहितः । सूरिकृतज्ञानोपदेशेन मंत्री नागसेनः पञ्चदशपरिमितैर्भावुकैर्दीक्षामग्रहीत् । तस्य निधानकलशेति नाम चकार । पश्चात् तक्षशिलायां यात्रां विधाय हस्तिनापुरे सिंहपुरे च धर्मोपदेशं कृत्वा क्रमेण मथुरामात्मना भूषयाञ्चकार । तत्र बौद्धाचार्यो जयकेतुरपि स्वशिष्यमण्डलीयुतः समाजगाम । तेन स्तम्भतीर्थेऽपमानस्य प्रतीकारार्थमाह्वानं दत्तम् । ततो बलभद्रमहीपालस्य सभायां शास्त्रार्थो निश्चितोऽभवत् । तत्रापि सूरीश्वरशिष्यौ वीरभद्र-देवभद्रौ तं पराजयं प्रापयामासतुः । मथुरायामेव चतुर्मासं विधाय भावुकान् दीक्षयामास, अभिनवजिनालयानां प्रतिष्ठां च संपादयामास । ततो विहरन् सूरीश्वरोऽवन्तिदेशमलंचकार । धर्मोपदेशमदात् भावुकेभ्यः । भक्तजनवचनमाकर्ण्याऽसौ चित्रकूटमगात् । श्रीसंघेनादरातिशयान्नगरप्रवेशः कृत आचार्यस्य । असाधारणचमत्कारजनकं धर्मभावनाभावितं व्याख्यानं श्रुत्वा श्रेष्ठिगोत्रीयः सादामन्त्री श्रीभगवतीसूत्रवाचनां कारयामास । सपादलक्षव्ययेनासौ शाश्वतं कल्याणमाससाद । तदनन्तरमेकविंशतिसंख्यकैर्जनैः सूरीश्वरपार्श्वे दीक्षा गृहीता । पश्चादसौ सूरिराघाटपत्तनमाययौ । तत्र समुचितयोग्यतां प्राप्तेभ्यो मुनिभ्य उचितपदार्पणविधिमकरोत् । अध्यापितसकलागमतत्वं सर्वगुणसंपन्नं निधानकलशं मुनिं कुमटगोत्रीयेण मन्त्रिणा रणदेवेन सम्पादिते महामहोत्सवे उपाध्यायपदेन भूषयामास । ततश्च मरुधरमाजगाम । तत्र व्याख्यानदानेन सर्वे भक्तजना आदृताः कृताः । पश्चादुपकेशपुरं सशिष्यः सूरीश्वरोऽगमत् । श्रीसंघो भव्यमहोत्सवेन नगरप्रवेशमकारयत् । तत्रोपाध्यायं निधानकलशं सूरिपदे संस्थाप्याऽनशनेन समाधिना च स्वर्गमगमत् ।

पट्टावलीकारैः श्रीयक्षदेवसूरिशासनकाले बह्व्यो धर्मोपदेशादिभिः परिपूर्णा घटना उल्लिखिताः किन्तु तत्र दिक्प्रदर्शनमात्रमत्र प्रदर्श्यते ।

आभानगर्यां बप्पनागगोत्रीयस्य देशलशाहस्य पुत्रो जगाशाहः, पितुरिव परमधार्मिको दानवीरश्चासीत् । देशलशाहस्य व्यापारकाले महद् दुर्भिक्षमभूत् तदा कोटिद्रव्येणाऽसौ प्राणिनां प्राणत्राणमकार्षीत् । तथैवाऽस्य जगाशाहस्य समयेऽपि तादृश एव भयंकरो दुष्कालोऽभवत् । दानवीरो परमकारुणिकः स महता द्रव्येण सर्वान् प्राणिनः पोषयामास । अन्नादिकमपि तदालभ्यं जातम् । तथापि समुद्रयानद्वारा तदानेतुं प्रयत्नमकरोत् । दुर्भाग्यवशात्तान्येव समुद्रयानानि मध्य एवामज्जन् । ततः परमदुःखितो जीवानामुद्धाराय स्वदयिताया मणिमौक्तिकसुवर्णमयान्याभूषणानि भूम्यादिकमपि च विक्रीय कर्तव्यपालनोत्सुकोऽभवत् । तथापि दुष्कालोऽसौ न पूर्णतां प्राप । याचका गृहमायाता निष्फला प्रतिनिवृत्ताः । असौ श्रेष्ठिपुत्रः स्वप्राणानुद्दिश्येदमस्मरत्-व्रजत व्रजत प्राणा अर्थिनि व्यर्थतां गते । पश्चादपि हि गन्तव्यं पुरस्ताद् गमनं वरम् । अन्ते देवीं सच्चायिकां मनसा चिन्तयामास । देव्या च तस्मै द्रव्यकोशोऽक्षयो दर्शितः । ततः सर्वानन्नादिभिः परिपोष्य दुष्कालमतिवाहयाञ्चकार ।

व्यतीते हि कियति काल उपकेशपुरमुद्दिश्य स संघं निष्कासितवान्। प्रभूतं धनं तेन तत्र व्ययितम्। पश्चाद् रैवताचलं शत्रुंजयगिरिं च गन्तुमियेष। किन्तु निदाघकालस्यासन्नत्वात्तत्र यात्रार्थं यातुं नाशक्नोत्। अतः कोटिपरिमितं द्रव्यं तत्र प्रेषितम्। तावदेवोपकेशपुरे याचकेभ्यो ददौ। तस्मिन् समये २२२ विक्रमसंवत्सरोऽभूत्। अतो याचकैरेव जगाशाहस्य स्मरणीयकीर्तये ओसवालजातीयानां प्रादुर्भावसमयः संस्थापितः। इदं वस्तुतो भ्रममूलकमेव। यतस्तस्मिन् काले ओसवालेति शब्दोऽपि जन्म न लेभे।

वि० सं० २३५ तः ] २३ आचार्यः श्रीकक्कसूरिः। चतुर्थः [ वि० सं० २६० पं०

श्रीयक्षदेवसूरिपट्टे श्रीकक्कसूरिः स्थानमवाप। असावादित्यनागगोत्रीयो लवपुरनगरवास्तव्यश्चासीत्। कनकसेनोऽस्य पिता, माता च शीलसौजन्यादिप्रभाववती प्रभावती। तयोरसौ नागसेनो नाम सूनुः।

प्रभावती पूर्णदौहृदाऽसन्नप्रसवाऽसीत्तदा सा स्वप्ने नागेन्द्रं ददर्श। ततः समाप्ते दशमे मासे शुभे मुहूर्ते सा तेजःपुंजप्रभावपूर्णं सुतमसूत। स्वप्नदर्शनानुकूलं तस्य नागसेनेति नामकरणमकरोत्। क्रमशः पाठशालायां विद्याध्ययनं कुर्वाणोऽसौ प्राक्तनजन्मसंस्कारेण सकलशिष्यमण्डलीमण्डनायमानो गुरुप्रसादसमासादितविद्यामृतप्रवाहः सकलकौटुम्बिकानां मनांसि रंजयामास विद्याकृतविनयादिभिर्गुणैः। अथ युवावस्थायामेवास्योद्वाहविधिः खेमाश्रावकस्य कन्यया प्रशस्तकुलवत्या नन्दया सहाऽभूत्। अतीते काले राजनैतिकचातुर्येण स्वपितुरेव मन्त्रिपदं राज्ञा लम्भितः। स्वकर्तव्ये दत्तादरो बभूव।

अथ तस्मिन् समये पंचनद (पंजाब) प्रान्ते विहरन् श्रीयक्षदेवसूरिर्लवपुरमाययौ। परमानन्दसंभृतान्तरंगस्तत्रत्यः श्रीसंघो भव्यसमारोहेण सूरेः स्वागतविधिना नगरप्रवेशं व्यधात्। मन्त्री नागसेनोऽपि धर्मरुचिरधिकप्रमोदमोदमानमानसो बभूव। सूरेर्दार्शनिकतात्त्विकविषयकं, संसारे कुटुम्बिनां स्वार्थसाधकताप्रतिपादकं, लक्ष्म्याश्चञ्चलतासूचकं, जीवितस्य क्षणभंगुरतानिवेदकं च व्याख्यानमेकमना अशृणोत्।

तत एकदा पर्वदिनेऽनेन पोषितव्रतमनुष्ठितम्। अवकाशसमये वैराग्यरागरंजितस्वान्तोऽसौ सूरिमभ्येत्य सविनयमिदमवादीत् भगवन्! कथमहमात्मकल्याणं साधयामि, कथं च पंकमग्नानां पशूनामिव पामराणामस्मत्सदृशानामसारसंसारादुद्धारो भवेदिति। सम्पादितसर्वकर्मणस्ते निवृत्तिमार्गाश्रयणादृते नान्यः कश्चन क्षेमङ्करः पन्था इति तमेवानुसरेति सूरिकथितमुपदेशामृतं पीत्वा पूर्णहृदयोऽसौ नमस्कृत्य गुरुं पोषितशालामाजगाम। शयनकाले च पौरषीं पठन्—एगोऽहं नत्थि मे कोइ नाहमन्नस्स कस्सइ। एवं अदोणमणसो अप्पाण मणु सासई।१। एगो मे सासओ अप्पा नाण दंसण संजुओ। सेसामें बाहिरा भावा सब्बे संजोग लक्खणा।२। संजोग मूला जीवेण पत्ता दुःख परम्परा। तम्हा संजोगसंबंधं सव्वं तिविहेण वोसिरिअं।३। एतासां गाथानामुपरि सूक्ष्मदृष्ट्या विचारमकरोत्। ततः सुप्तोऽसौ स्वप्ने सूरेर्वरदहस्तेन न केवलं दीक्षितमपित्वाचार्यपदारूढमात्मा-

नमपश्यत् । राज्ञा निवारितोऽन्ते चानुज्ञातः शुभेऽहनि प्रव्रज्यामङ्गीचकार सूरिकरकमलेन । पश्चान्निधानकलशेत्यभिधानकोऽभूत् । क्रमेण काव्यव्याकरणतर्कशास्त्रकुशलो जिनागमधर्ममर्मावेदनकर्मपारगो गुरुकृपाप्राप्तपूर्णप्रसादोऽसौ श्रीककसूरिरितिनाम्ना विश्रुतयशोनिधिराचार्यो बभूव ।

अथोपकेशपुराद् विहरन् मरुधरप्रान्ते धर्मोपदेशं कृत्वा सर्वान् सत्पथमार्गानुगामिनश्चकार श्रीककसूरिः । तस्मिन्नेव कर्मणि स सफलयत्नो बभूव । शुभोज्ज्वलभावनानुष्ठितं कर्मावश्यमेव सफलं भवति ।

एकदाटवीं गच्छन्नसौ देव्यै बलिकरणायोद्यतान् बहून् जनान् विलोक्य दयार्द्रचेतास्तान् सद्धर्ममुपदिश्य सन्मार्गेऽस्थापयत् ।

ततश्चन्द्रावतीं भूषयामास । श्रीसंघस्याग्रहातिशयं दृष्ट्वा तत्रैव चतुर्मासावस्थितिं व्यधात् । तत्र सूरीश्वरस्यालौकिकप्रभावपूर्णं व्याख्यानमाकर्ण्य डाबराशाहस्यात्मजैः कल्याणादिभिर्दीक्षा गृहीता । डाबराशाहोऽपि शत्रुञ्जययात्रायै संघं निष्कासितवान् । एवं तीर्थयात्रां कृत्वा सूरिः सौराष्ट्रदेशं ययौ । तत्र वर्धमानपुरे देदाशाहेन श्रावकेण महावीरमन्दिरं निर्मापितमासीत्तस्य प्रतिमास्थापनपुरःसरां प्रतिष्ठामकरोद् वरदहस्तेनाचार्यः । ततो विहरन्नसौ कच्छप्रान्ते माण्डव्यपुरमाजगाम । तत्र चतुर्मासो विहितः । धर्मतत्त्वं च बोधिताः सर्वे ।

एकदा व्याख्याने कश्चिद् एवमवादीत् जिनधर्मः केन कदा प्रचारितः ? सूरिस्तमाह अनादिकालादेव प्रवृत्तो जिनधर्मः । सृष्टेरनादित्वेन तत्सहकृतसंबन्धेन धर्मोऽयमप्यनादिरेव । तत्र का ते शङ्का वर्तते ? । अस्तु, तर्हि कथमेवमुच्यतेऽत्र प्रथमस्तीर्थङ्करः ऋषभदेव इति । सूरिरुवाच कालापेक्षामाश्रित्यैवमुच्यते । जिनागमे द्विविधः कालो वर्णितः—उत्सर्पिणीकालः, अवसर्पिणीकालश्चेति । अवसर्पिणीकाल एव २४ तीर्थङ्कराः प्रादुर्भूताः । व्यतीता एवमनन्ता उत्सर्पिणीकालावसर्पिणीकालाः । व्यतीतेषु तेषु चतुर्विंशतिपरम्परास्तीर्थङ्कराणामपि व्यतीताः । एवं सुविशदीकरणेन व्याख्यानेन तत्र सर्वे सूरेरसाधारणागमकौशलं ज्ञात्वा विस्मयान्विता बभूवुः । अत्र प्रान्ते विहारकाले बहूनां नूतनमन्दिराणां प्रतिष्ठा, भावुकानाञ्च दीक्षाप्रदानमुपदेशेन च धर्मप्रचारश्च सूरिणा कृतोऽभूत् ।

अथैवं धर्माभ्युदयाय दृढप्रयत्नः सूरिः सिन्धदेशमलंचकार । डमरेलपुरे चातुर्मासी निर्धारिता । महादेवनामा श्रावकः संपत्तिशीलस्तत्राऽसीत् । एकदा सूरिं प्रणम्यावदद् भगवन् ! यक्षदेवसूरिपार्श्वे मया परिग्रहव्रतं स्वीकृतमासीत् । अत एतावत्कालावशिष्टं प्रभूतं द्रव्यं सञ्चितं कस्मिंश्चित्सत्कर्मणि विनियोक्तव्यमास्ते । तद् भवानेवादिशतु । तीर्थङ्करनिर्वाणभूमिभूतश्रीसम्मेतशिखरयात्रायै संघायोजनमेवातिश्रेयस्करं कार्यमिति सूरिस्तमाह । एवमाचार्यवचनमादृत्योपस्थितं चतुर्विधं संघमामन्त्य च सूरीश्वराधिष्ठातृत्वे संघो शुभेऽहनि निष्कासितः । प्राप्य च सम्मेतशिखरं विधाय च तीर्थयात्रामाचार्यः संघपतिं महादेवमाहूयाब्रवीत् । विचार्यमाणे सत्ययमेव तेऽभिप्रेतकल्याणसाधको दीक्षाकालः । सूरिवचः समधिकश्रद्धयाऽनुमान्य पुत्रानापृच्छ्य भार्यासहितोऽसौ ज्येष्ठं पुत्रं संघपतित्वे

नियुज्य चतुर्दशसंख्यकैर्भावुकैः सह दीक्षामग्रहीत् ।

एकदा रात्रौ निद्रामुक्तमाचार्यमुपेत्य देवी सच्चायिका तत्र वन्दनं विधायाब्रवीत्-सूरे ! कल्याणकलशं मुनिमाचार्यपदे संस्थाप्य भवांस्तु पूर्वदेशे विहारं करोत्विति । ततः साऽन्तर्दधे । आचार्योऽपि संघमेकत्र कृत्वा कल्याणकलशं स्वपट्टे स्थापयामास । देवगुप्तसूरिरिति तदभिधानमकरोत् । पञ्चशतसंख्यकैः शिष्यैः सह श्रीकक्कसूरिस्तत्र स्थितः । देवगुप्तसूरिरवशिष्टान् शिष्यानादाय संघेन सह प्रतिनिवृतः महादेवस्य ज्येष्ठपुत्रो लाखाशाहो डमरेलपुरमागत्य स्वामिवात्सल्यं विधाय प्रतिजनं पञ्चसुवर्णमुद्राप्रभावनां कृत्वा संघं विससर्ज ।

अथाचार्यः पूर्वदेशे बौद्धधर्मस्य प्राधान्यमासीदतः पूर्वप्रान्तीयग्रामनगरेषु योग्यान् शिष्यान् प्रेषियत्वा स्वधर्मप्रचारं कारयामास । स्वयमपि तत्र तत्र विहरन् राजगृह-चम्पा-वैशाला-कपिलवस्तु-वाणिज्यपुरादिषु जिनधर्माभिवृद्धिकराणि व्याख्यानानि दत्वा स्वकर्तव्यपालनं यथार्थमकरोत् । योगबलेन स्वमृत्युसमयं विचिन्त्य सम्मेतशिखरमेत्यानशनेन समाधिना च दिवमगमत् ।

आचार्यस्य शासनकाले वंशावल्यामेका रमणीया घटनोट्टङ्किता-यथा

सिन्धदेशे वीरपुरनगरे वाममार्गानुयायिनां सोमरुद्रनामाऽग्रेसरः समागच्छत् । स मन्त्रविद्याबलेन चमत्कारं दर्शयितुमेकदा सायंकाले जिनमन्दिरात् प्रतिमां तडागे नीत्वा पश्चान्मन्दिरमानयति स्म । जनांश्चावादीत्-जैना जिनालयस्थं देवं जलमेव न पाययन्ति तत एव प्रतिमा स्वयं जलं पातुं तडागमागच्छति । एवं हि दिनान्यष्टौ व्यतीतानि । जैनाश्च परमदुःखिताः कमपि विद्याविचक्षणं जिनमुनिमानेतुमितस्ततः प्रयतमाना विफलप्रयत्ना बभूवुः । अथ कदाचित्तैः कर्णपरम्परया श्रुतं यद् डमरेलपुरे सर्वागमनिपुण आनन्दनामा मुनिः सर्वातिशायिविद्याबली वर्तत इति । ते च संघस्याग्रेसरं प्रेषयित्वा तमानाययामासुः । कृतश्च समारोहपूर्वकं तस्य स्वागतम् । असौ सोमरुद्रो दैनंदिनक्रमेणाद्यापि तां प्रतिमां तडागं प्रति नेतुं कृतमन्त्रबलो बभूव । प्रतिमा तु मन्दिरान्निर्गत्यापण एव स्थिरीभूता प्रयत्नेनाप्यग्रे नेतुमशक्याऽसीत् । अपरत्र आनन्दो मुनिर्नगरे स्थितानि यावन्ति शिवलिंगानि देवा देव्यश्चा सन्तानि सर्वाण्येव स्वविद्याबलेन नीत्वा तत्रैवास्थापयत् यत्र जिनप्रतिमा स्थिताऽभूत् । उभयत्र चोभौ स्थितौ । जनाश्च दर्शनाय बहव उपस्थिताः । जिनमुनिः सोमरुद्रमब्रवीत्-महात्मन् ! सर्वा इमाः प्रतिमा भवान् तडागं स्वमन्त्रबलेन नेष्यति तर्हि भवदीयः शिष्योऽहं भविष्यामि । अहं यदि ता जिनालये मदीयविद्याबलेन नयेयं तर्हि भवता मदीयं शिष्यत्वमङ्गीकर्तव्यम् । लोकनिन्दया यद्यपि स्वीकृतमिदं सोमरुद्रेण किन्तु किमपि कर्तुं नासौ समर्थोऽभूत् । अथ मुनिरानन्दः सर्वान् देवीन् देवीश्चादिदेश-भो देवताः! यूयं सर्वे प्रतिमामेतां जिनालयं प्रापयत । एवमुक्ते सर्वे ते जिनालयं प्रस्थिताः । मन्दिरमागत्य प्रतिमा स्वस्थाने स्थापिता । असौ दीनवदनः सोमरुद्रोऽपि मुनेः शिष्योऽभवत् । अनेन चमत्कारेणातिमहती जिनधर्मप्रभावना जाता । वंशावलीकारो लिखति यदधुनापि जिनमन्दिरे देवा देव्यश्च विद्यन्त एव ।

वि. सं. २६० तः] २४ आचार्यः श्रीदेवगुप्तसूरिः— (चतुर्थः) [वि. सं:२८२ प०

श्रीककसूरिपट्टे कुमटगोत्रोद्भवः काव्यकलाविचक्षणः श्रीदेवगुप्तसूरिः। चन्द्रावतीनगरीवास्तव्यः। अस्य जनको वाणिज्यकलानिष्णातो डाबराशाहो माता च धर्मपरायणा पन्नानामिकाऽसीत्। तयोः पुत्रः कल्याणनामा प्राक्तनादृष्टवशादधिकप्रभावपूर्णमानसोऽभूत्।

एकदा ग्रामानुग्रामं विहरन् सूरीश्वरश्चन्द्रावतीमाययौ। अन्येद्युर्व्याख्यानसमये सूरिणा सामुद्रिकशास्त्रप्रतिपादितानि शुभाशुभचिह्नानि वर्णितानि। आचार्यस्य सारगर्भितां देशनां निशम्य कल्याणः सूरेः समीपमुपेत्य सविधवन्दनां विधाय स्वहस्तं दर्शयामास। सूरिश्च हस्तस्थितानि शुभसूचकानि चिन्हानि दृष्ट्वा तमवदत्-यदि त्वं दीक्षितः स्यास्तदा महान् जिनशासनप्रभावक एवेति। भव्य!

जाजावच्चइ रयणी तसा पडिनियत्तइ।
अधम्मं कुणमाणस्स अफला जन्ति राइओ॥
जाजा वच्चइ रयणी न सा पडिनियत्तइ।
धम्मं कुणमाणस्स सफला जन्ति राइओ॥

इति गाथां विज्ञायात्मनः कल्याणमार्गमाश्रयस्व कल्याणिन्! एवं परमवैराग्यपूर्णं सूरेरूपदेशं निशम्य विरक्तहृदयोऽभूत् कल्याणः। पितरौ चामन्त्र्य द्वाविंशतिपरिमितैर्जनैः सार्द्धं दीक्षामगृह्णात्। सूरिश्च तं जिनागमसिद्धान्तरहस्यावेदकानि शास्त्राणि, न्यायव्याकरणसाहित्यादीनि चाध्यापयामास। प्रकृत्या कुशाग्रबुद्धिरसावल्पसमयेन सर्वागममर्मपारगो व्याख्यानाख्यानेतिहासादिषु पण्डितप्रकाण्डो बभूव। कालान्तरे सूरिश्च स्वपट्टे प्रतिष्ठापयामास श्रीदेवगुप्तसूरिनाम्ना।

असावपि पूर्वाचार्यपरम्परागतविहरणप्रवृत्त्या धर्मप्रचारं कुर्वन् क्रमेण चन्द्रावतीं प्राप। अस्य नगरप्रवेशमहोत्सवे डाबराशाहेन सपादलक्षरूप्यका व्ययीकृताः। श्रीसंघप्रार्थनामादृत्यात्रैव चतुर्मासावस्थानमकरोत् स आचार्यः।

अथ तस्मिन्नेव काले कश्चिदेकोऽवधूतस्तत्रैव नगर्यां चतुर्मासार्थमाजगाम। स च स्वकीयव्याख्याने सप्त द्वीपान्, सप्त सागरान्, पञ्च देवलोकान् विहायान्यत् किमपि नास्तीति न्यरूपयत्। योगिकृतविवरणमुद्दिश्याचार्योऽसंख्यातद्वीपसमुद्रदेवलोकानां निरूपणमकरोत्। सूरिप्रतिपादितप्ररूपणामाकर्ण्य संदिग्धमना असौ योगी समुद्रद्वीपादिविषये,पश्चादीश्वरकर्तृत्वविषये चापृच्छत् सूरेः पार्श्वे गत्वा। ततः समुचितप्रत्युत्तरमासाद्य सन्यासिवेशं विहाय दीक्षामग्रहीत्।

चतुर्मासानन्तरं ३२ श्रावकैः श्राविकाभिश्च सह डाबराशाहेनापि दीक्षा गृहीता। डाबराशाहस्य ज्येष्ठात्मजेन कानडेन दीक्षामहोत्सवे प्रभूतं द्रव्यं व्ययीकृतम्। ततो विहरन् सूरिः कान्यकुब्जमगमत्। एकदा तदधिपतिरश्वारूढः सन् किमपि स्थानं प्रति गच्छन् सूरेर्व्याख्यानस्थानसमीपमार्गान्निःसृत्य तस्मै मनसैव प्रणाममकरोत्। सूरिरपि ज्ञानदृष्ट्या तदीयनमस्कारं ज्ञात्वा महता स्वरेण तं धर्मलाभेन संभावयामास। राजा तु महामहिममहनीयकीर्तिरलौकिकज्ञानप्रभावोऽयमाचार्य इति निश्चित्य प्रासादमाययौ। सूरीश्वरस्यास्य व्याख्यानं राजसभायामेव भवितुमर्हति सर्वथाऽदर-

यीयोऽसावस्माभिरिति मन्त्रिणं राहुलमाहूयावदत् । मन्त्री राजसभायामागत्य व्याख्यानेन राजानं संभावयितुमर्हति भवान्-इत्याह सूरीश्वरम् । महान् कोऽपि धर्मलाभातिशयोऽयमिति विचिन्त्य तत्र व्याख्यानमदादाचार्यः सशिष्यः । द्वितीयेऽह्नि सभायां देव-गुरु-धर्म-स्वरूपं व्याख्याने निरूपितम् । यथा-१ देवः-तदीयं लीलाकौतुहलरागद्वेषादिरहितं चरित्रमालोच्य जनानां जीवनं तथैवाचरणेन दोषरहितं पवित्रमुपजायते । विश्वोपकारप्रयोजनिकां तदीयजीवनयात्रां विचार्य च स्वस्यापि सर्वोपकारकरणात्मिका पारमार्थिकी सर्वप्राणिहितकारिणी बुद्धिर्भवति । शान्तमुद्रां ध्यानावस्थितां देवप्रतिमामाराध्य बाह्याभ्यान्तरशुद्धिः देवसायुज्यप्रापिका समुत्पद्यत इत्येव देवोपासनाप्रयोजनम् ।

२ गुरुः—कनककामिनीपरित्यागी ब्रह्मचर्यव्रतपालकस्त्यक्तपरिग्रहः संसारान्मुक्तः कषायचतुष्टये पञ्चस्विन्द्रियेषु प्राप्तसंयमो गुरुः स्वपरकार्येषु कृतप्रयत्नश्च सर्वथाऽऽत्मकल्याणमार्गदर्शनाय भव्यालम्बनत्वेनोपकल्प्यते ।

३ यत्राहिंसा, स्याद्वादो, जिनाज्ञा च प्राथम्यं प्राप्ताः, सत्यास्तेयब्रह्मचर्यपरोपकाराद्योऽपि सहचारिणः स्युः, स धर्मोऽपि जीवनोन्नतये तृतीयो हेतुरुच्यते । एवं जनजीवनहितकरमार्गोपदेशकं सूरिवचः श्रुत्वा चित्राङ्गदो राजाऽऽचार्यस्य जिनधर्मस्य च परमोपासको बभूव । आचार्योपदेशान्नूतनो जिनालयः, सुवर्णमयी भगवतो महावीरस्य प्रतिमा च निर्मापिता । प्रतिमानेत्रस्थले सपादलक्षरूप्यकाणां द्वौ मणी निवेशितौ यौ रात्रावपि दिनकर इव तेजःपुञ्जप्रकाशकावभूताम् । सूरेर्वरदहस्तेन स राजा प्रतिष्ठामकारयत् । एवं धर्मकार्यं सम्पाद्य पश्चाल्ललाटकच्छादिषु देशेषु परिभ्रमन्नसौ क्रमेणोपकेशपुरमागच्छत् । तत्र परमवैराग्योद्बोधकं व्याख्यानमाकर्ण्य जैत्रशाहस्य कुमटगोत्रीयः सारङ्गकुमारो दीक्षामग्रहीत् सूरिसमीपे । तदनन्तरमसौ सौभाग्यकीर्तिरित्यभिधानं लेभे ।

अथ स अवन्तिकामेत्य श्रमणानामतीमहतीं सभामकरोत् । तत्र
१ सौभाग्यकीर्तिप्रभृतिभ्य उपाध्यायपदं दत्तम् ।
२ राजहंसाद्येकादशमुनिभ्यो वाचनाचार्यपदं वितीर्णम् ।
३ दयामूर्तिप्रभृतिभ्यः पञ्चभ्यः पण्डितपदवी समर्पिता ।
४ चारित्रसुन्दरादिभ्यः पञ्चभ्यो गणिपदमुपहारीकृतम् ।
५ मङ्गलकलशादिभ्यः पञ्चभ्यः प्रवर्तकपददानं कृतम् ।

एकदा-अम्बा-पद्मा-अच्छुप्ता-विजया देव्यः श्रीतीर्थङ्करस्य सीमन्धरस्य व्याख्यानश्रवणाय विदेहेषु गताः । व्याख्याने च सीमन्धरेण भगवता प्रोक्तम्-अस्मिन् हि भारते क्षेत्रे ब्रह्मचर्यव्रतसमासादितसर्वसिद्धिसमायुतं व्याख्यानपञ्चाननः श्रीदेवगुप्तसूरिं विहाय नान्यः कश्चनोपलभ्यते साधुः । एवं समाकर्ण्य ता । महाप्रभावं देवगुप्तसूरिं द्रष्टुमागच्छन् । असौ तदा अर्बुदाचले ध्याननिमग्न आसीत् । तत्रागतास्ता अनुकूलान् प्रतिकूलांश्च बहूनुपसर्गान् चक्रुः । सूरिस्तु प्रचण्डमलयार्णवबृहत्तरङ्गास्फालितो मेरुरिव मनागपि न चकम्पे । ततः पराभवं प्राप्ता देव्यस्तस्य क्षमां ययाचिरे । सूरिरपि देवकर्तव्यविषये सारगर्भितानि शास्त्रवचनानि श्रावयामास ।

स्वकर्तव्यविषयं ज्ञात्वा ताश्च प्रसन्नमुखकमला यथागतं प्रतस्थिरे।

एवमद्वितीयब्रह्मचर्यबलेन रविरिव दुःसहप्रतापः सूरिरयं द्वाविंशतिपरिमितवर्षाणि जिनधर्माभ्युदयकर्मण्यतिवाह्य पवित्रे शत्रुञ्जयतीर्थे निखिलागमपारदृश्वानं सकलगुणगणगणनीयप्रभावसमुपार्जितकीर्तिमुपाध्यायपदविभूषितं सौभाग्यकीर्तिं स्वपदे प्रतिष्ठाप्यानशनसमाधिभ्यां शरीरमुत्ससर्ज।

अहो ! महनीयगुणावतंसानां महाभागधेयानामीदृशानामाचार्यचरणानां किमप्यलौकिकं चरित्रं, यत्र स्वहस्तेनैव मातुः पितुश्च दीक्षादानम्। अतः सुष्ठूक्तं केनचित्-सजातो येन जातेन याति वंशः समुन्नतिमिति।

वि० सं० २८२ तः] २५ आचार्यः श्रीसिद्धसूरिः ( चतुर्थः ) [वि० सं० २९८ प०

श्रीदेवगुप्तसूरिपट्टं श्रीसिद्धसूरिरलंचकार। असौ श्रेष्ठिगोत्रीय उपकेशपुरवास्तव्यश्चासीत्। अस्य पिता जेताशाहो माता च चम्पकावलीव शीलसौरभरमणीया चम्पादेवी। तयोरयं सारङ्गनामा सूनुरासीत्। महाकुटुम्बोऽसौ जेताशाहो दारिद्र्यदुःखपीडितमानसोऽभूत्।

अथैकदा तद्भाग्यवशादेव देवगुप्तसूरिरुपकेशपुरमगमत्। ततः स श्रेष्ठी स्वीयां दारिद्र्यदरिद्रितां सकलां परिस्थितिं सूरये साञ्जलिबन्धं न्यवेदयत्। अस्मिन् जन्मनि नरः पूर्वकृतानां कर्मणामेव फलं सुखदुःखादिकमश्नुते इति हेतोर्धर्मध्यानमेव ते निःश्रेयसकरमिति दृढं विश्वस्य तमेवानुतिष्ठ। धर्म ए शाश्वतसौख्यनिरतिशयानन्ददायकोऽसारे संसारे स एव सर्वासां सम्पदां परमं निधानमिति सूरिस्तमुपादिशत्। तस्मिन्नेव समये तत्पुत्रः सारङ्ग उपस्थितः। विलोक्यैव च तं महाभाग्यवानयं तनय इति सूरिवचः समाकर्ण्य जेताशाहः प्रसन्नाननो बभूव। मासकल्पं तत्र स्थित्वा सूरिरन्यत्र विहारमकरोत्। सारङ्गोऽपि गार्हस्थ्यक्लेशक्लिष्टचेता नगराद्बहिर्निरगच्छत्। पन्थानं प्रतिपन्नं तं कोऽपि सिद्धपुरुषः संगतोऽभूत्। दुर्दैवादसौ सिद्धो मार्ग एव दुःसहज्वरनिपीडितो बभूव। करुणार्द्रान्तरङ्गसारङ्गस्तस्य महता प्रयत्नेन शुश्रूषामकरोत्। येनाऽल्पसमये स सम्प्राप्तस्वास्थ्यो जातः। ततः प्रसन्नहृदयः सिद्धपुरुषः सारङ्गाय सुवर्णसिद्धिनाम्नीं विद्यां ददौ। यत्प्रभावेणाऽसौ प्रभूतं सुवर्णमुत्पाद्य मध्य एव दरिद्रान् दुःखेभ्यो मोचयामास। तेषामाशीर्वादपरम्परामलभत। एवमसौ गच्छन् सौपारपत्तनमासाद्य तत्रैव वसतिमकरोत्। अपरिचितोऽप्यसौ सुवर्णसिद्धिप्रभावेण परोपकारवृत्त्या च सर्वजनविदित आदरणीयशासनो बभूव। उक्तं च "यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतिमान् गुणज्ञः, स एव वक्ता स च दर्शनीयः। सर्वेगुणाः काञ्चनमाश्रयन्त" इति। असौ तु "दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य। यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवतीति" विचार्य दीनेभ्यो बहु धनं दत्वा तदीयाश्रुप्रमार्जनेनाक्षयं पुण्यमाससाद। परमधार्मिकश्च सविनयं जनानामन्त्र्य शुभे दिने संघं मुनिजनसंयुतं निष्कास्योपकेशपुरयात्रायै जगाम। तत्रागतं तं सारङ्गं संघाधिपतित्वे स्थितं दृष्ट्वोपकेशपुरवास्तव्याः सर्वे जना आश्चर्यान्विताश्चित्रचित्रिता इवाभूवन्। जेताशाहः पुत्रमागतं ज्ञात्वा तद्दर्शनसंगमोत्सुकस्तत्राजगाम। तथाविधं संघपतिं पुत्रमसौ वीक्ष्य सन्तुष्टा-

न्तरङ्गः प्रमोदपीयूषबृहत्तरङ्गः सूरीश्वरवचनस्मरणमकार्षीत् ततश्च समधिकाचार्यचरणसरोजभक्तिरासीत्। सारङ्गः संघं यात्रां कारयित्वा सुवर्णमुद्रादिभिः सन्मानं कृत्वा तं प्रस्थापयामास सौपारपत्तनम्।

अथ गृहमागत्य सर्वान् कुटुम्बजनान् सविनयं संभावयामास। तत्रत्या धनाढ्याः श्रेष्ठिनः स्वतनयाविवाहार्थं जेताशाहमामन्त्रयामास। स पितरमाह-पूर्वसुकृतापेक्षया सुवर्णसिद्ध्यधिगमः पुण्यक्षये तु नश्यत्येव। यतो येनोपयोगेनात्मनः कल्याणाधिगमः कर्तुं शक्यते तदेवाऽस्माकं परमं कर्तव्यम्। अहन्त्विदं मन्ये यत्तदेव नाम परमात्मकल्याणमार्गो दैवेन मदर्थं पूर्वमेव निश्चितः, सूरिणा च भविष्यद्रूपेण भवत उक्तप्राय आसीत्। अतो न मे संसारसुखोपभोग आत्मश्रेयःसाधनप्रवृत्तौ प्रतिरोद्धुं शक्ष्यति कदाचित्। भवताऽपि धनेनानेन जिनालयप्रतिमा संघायोजनमाचार्यचरणोपदेशामृतरसास्वादश्च सर्वथा संसेव्य एवेति। एवं न कोऽपि स्थिरनिश्चयाद्दारयितुं शशाक। सत्यमेवोच्यते "क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्। न च धीरप्रकृतिं तं सौन्दर्यसौजन्यादिगुणवत्याः कुलसुगया अभ्यर्थनमपि निश्चयात् खिलीकर्तुमशक्नोत्। "विकारहेतौ सति विक्रीयन्ते येषां न चेतांसि त एव धीरा इति धीरपुरुषाणामियमेव प्रकृतिर्न कदाचिदपि विकृतिमाप्नोति।

एवं पुत्रकथितं वचः सादरं श्रुत्वा जन्मनः साफल्यमिच्छन्नसौ जेताशाहः शत्रुञ्जययात्रायै संघं निष्कासितवान्। उपकेशपुरे जिनालयनिर्माणमारेभे। चतुरधिकशताङ्गुलप्रमाणा भगवतो महावीरस्य प्रतिमाऽपि चतुरैः शिल्पिभिर्निर्मापिता। अथ तदीयभाग्यवशात् श्रीदेवगुप्तसूरिस्तत्र विहारक्रमेणाययौ। जेताशाहोऽपि महता स्वागतविधिना सूरीश्वरस्य नगरप्रवेशमकारयत्। प्रणिपत्य सविनयमेनमाचार्यमवदत्-भवदीया संभावना संपूर्णा फलिता किं किं न मया साधितं किं नानुभूतम्। अपि तु सर्वमेव सांसारिकमात्रमेव कर्म भवदीयकृपाकटाक्षकटाक्षित एव कर्तुं शक्तोऽभवमिति। अत्र मदपेक्षया सारङ्गस्तु सारङ्ग इव संसारे सारभुग् जात इति किमत्र वक्तव्यं महात्मनामुदारवचसामेषः कोऽप्यनिर्वचनीयो महिमा कारणत्वेन कल्प्यते मया। धर्मलाभेन संभाव्य तं सूरिः सारङ्गमुवाच—सारङ्ग! प्रवृत्तिपथे प्रवृत्तिं विधाय कृतान्येवाखिलानि कर्माणि ततो निवृत्तिमार्गानुसरणं ते न्यायप्राप्तम्। स च सूरिवचः सादरं श्रुत्वा दीक्षायै तत्परो बभूव। तदा जेताशाहेनोक्तम्-भगवन्! क्षणं प्रतीक्षस्व, वयं सर्वेऽपि दीक्षामभिलषामः। पूर्वं तावज्जिनेश्वराञ्जनशलाकाप्रतिष्ठामहोत्सवश्चावशिष्टः, स च भवदीयकरकमलेन सम्पादनीय एवेति।

अथ शुभे दिवसे प्रतिष्ठाविधिं समाहृत्य सारङ्गकुमारादयः षट्पञ्चाशत्परिमिता दीक्षादीक्षिता बभूवुः। सौभाग्यकीर्तिरित्यभिधानेन प्रसिद्धिमाप सारङ्गः। असौ यथार्थनामा सारङ्गो निसर्गत एव सर्वशास्त्रसारसंग्रहणोत्सुकः सूरीश्वरपार्श्वे साङ्गानि जिनागमगूढरहस्यानि, दार्शनिकतात्त्विकविषयकाणि शास्त्राणि चाधीत्य शाणोल्लिखितो मणिरिवानवद्यविद्याविद्योतितयशोनिधिर्बभूव। तत उपाध्यायपदवीप्रदानेनाचार्येण सम्मानितोऽभूत्। काले च व्यतीते सूरीश्वरस्तं स्वपट्टे संस्थाप्य सिद्धसूरिरिति नाम चकार। अन्ते च दिवमगमत्।

इतश्चावगतं सिद्धपुरुषेण सारङ्गस्य दीक्षावृत्तं तदा स तस्य पार्श्वमेत्यात्मकल्याणभावनया तद्विषये शास्त्रचर्चां विदधाति स्म। सूरेः सकाशात् सत्स्वरूपं विज्ञाय सिद्धपुरुषोऽपि सिद्धसूरिपार्श्वे सिद्धाचले दीक्षामग्रहीत्। तदनन्तरमसौ तपोमूर्तिनाम्ना जगति विश्रुतो बभूव। स आचार्यसमीप एवाध्ययनं विधाय विद्याध्ययनाद् ज्ञानबलाच्च जिनशासनोन्नत दृढ़प्रयत्नोऽभवत्।

अथ सिद्धाचलयात्रां विधाय तपोमूर्तिमुनिसहितः सूरिः सौपारपत्तनमाजगाम। तत्र व्याख्यानकाले सूरिः कपिलदृष्टान्तमुपावर्णयत्—

कौशाम्बीनगराधिपतेः पुरोहितस्य काश्यपस्य कपिलो नाम पुत्रो बभूव। नानेन बाल्ये किञ्चिदधीतम्। पिता च दैववशाद्दिवमगच्छत्। अतो राजाऽन्यं ब्राह्मणं पुरोहितपदे न्ययुंक्त। स्वगृहसमीपमार्गादेव तदुत्सवसंगतं जनसमूहं दृष्ट्वा सा ब्राह्मणी म्लानमुखी जाता। तां च तथाविधां दृष्ट्वाऽसौ कपिलो हेतुमपृच्छत्। पितुस्तव पुरोहितपदं त्वद्‌योग्यताभावेऽन्यस्मै ब्राह्मणायार्पितं तदर्थमेवायं समारोहस्त्वं च मूर्ख एवासि येन दुःखावेगान्म्लानवदनाहमासम्। अहमपि तथाविधो भविष्यामीति कृत्वा कुत्रचिदध्ययनार्थं गच्छामीत्युक्त्वा तूष्णीं बभूव। मात्रा चादिष्टं सावत्थ्यां तव पितुः सखा पंडित इन्द्रदत्तो वर्तते तत्र गच्छाध्येतुम्। असौ तत्र गत्वा दरिद्रोऽस्मीति भवता सर्वप्रकारेणानुग्राह्योऽहमित्युवाच। गुरुणा कस्यचित् श्रेष्ठिनो गृहे भोजनप्रबन्धः कृतः। तदर्थमादिष्टा दासी। असौ नियतसमयेऽधीत्य भोजनास्वादलुब्धमानसो दास्या सह संभाषणादिप्रसंगेन विषयाभिमुखस्तस्यामासक्तमना आसीत्। व्यतीतः कालः। श्रेष्ठिना ज्ञातं यदेषा स च मिथः समासक्तचेतसौ विशेषतश्चेयं दासी प्राप्तगर्भा वर्तत इति कृत्वा तौ निष्कासितौ। स्वसमीपस्थितं सर्वं मार्गे व्ययीकृतम्। निर्धनौ तौ कस्मिंश्चिन्नगरे रात्रावायातौ। दास्या तस्मै निवेदितं मूर्ख! न ते देशकालादिज्ञानमहमासन्नप्रसवा धनञ्च नास्ति कथं व्यवहारो विधेयः? अत्रत्यो राजाऽहर्निशं द्विमासप्रमाणं सुवर्णं ब्राह्मणाय ददाति तद् गच्छ येन सामयिको व्ययः क्रियेत। असौ तु गतोऽपि ब्राह्मणागमनात्पश्चादुपस्थितत्वान्न तदलभत। एकदा रात्रावुत्थितो बहिर्गच्छन् राजसेवकैर्धृतो राजसमीपमुपस्थापितः। राजा तमब्रवीत्-अयि ब्राह्मण! एवमर्द्धरात्रसमये परिभ्रमणं तव किं हेतुकम्? तेन सर्व एव दासीसंगमनादिको वृत्तान्तः शुद्धभावेन राज्ञे निवेदितः। राज्ञा च विचारितमहो! अस्मिन् कालेऽपीदृशाः सत्यप्रियाः जनाः सन्ति किम्! परमसंतुष्टो राजा तमाह-यथेच्छं यद्रोचते तद् याचस्व। ततस्तेन मनसि चिन्तितम्-किं याचे! मासद्वयप्रमितं सुवर्णं कियदुपयुक्तं स्याद् व्यवहारविषये। नैवं रूप्यकपरिमितम्। तदपि नामोत्पन्नस्य बालस्य संरक्षणवस्त्राभरणाध्यापनादिकार्ये किमुकारकं भवेत्। एवं क्रमशो विचारक्रमेण राज्ञो राज्ययाचनेच्छामकरोत्। तस्मिन्नेव क्षणे पूर्वादृष्टसंस्कारवशात्तेन सिंहावलोकनेन-किं पूर्वमासीत्, कोऽहं, कुत्र समायातः, किं मया विहितम्। तदपि क्षुद्रजीवनजीवनार्थमुपभोगलिप्सयैवेति मां धिक्। द्विमासमात्रके सुवर्णेऽलभ्येऽद्य मया राज्योपभोगेच्छा क्रियते। अहो! सत्यमिदं जिनागमे प्रोक्तम्—

जहालाहो तहालोहो लाहालोहो पवड्ढइ। दोमासा कणयं कज्जं कोडिए विन निट्ठइ॥

एवं विचार्यमाणस्यास्य जिनदेवताचिन्तने जाते कैवल्यं ज्ञानं प्रकटितम्। सद्य एव साधुभूतस्ततोऽष्टादशयोजनपरिमितात्स्थानाद् दूरेऽटव्यां बलभद्रादयः पञ्चशतसंख्यकाश्चौराः सन्तीत्युपश्रुत्य तदुद्धारार्थं तत्रागमत्। ते चौरास्तु तं गानार्थं न्यवेदयन्। तेन च जिनधर्मागमानुरागिणा ज्ञानिना—

अधुवे असासयम्मी संसारम्मीदुक्ख पउराए। किं नाम होज्जतं कम्मयं जेणाहंदोग्ग इंनगच्छेजा ॥

इयं प्रतिबोधिका गाथा गीता। चौराश्च क्रूरकर्माद्यभिग्रहेण मुक्ताः सन्मार्गबोधिता दीक्षामगृह्णन्।

एवं धर्मरतिप्रवर्धनक्षमामाख्यायिकां समाकर्ण्य विरक्ताः पञ्चाशत्परिमिताः श्रावकाःश्राविकाश्च दीक्षोद्यता बभूवुः। तान् दीक्षितान् कृत्वा स आचार्यो मरुधरप्रांते विहरन् क्रमेण नागपुरमयात्। तत्रादित्यनागगोत्रीयेण कानडशाहेन निर्मापिताया भगवतः पार्श्वनाथस्य प्रतिमायाः प्रतिष्ठा कृता। व्याख्यानादिना सर्वे पौरा धर्माचरणेऽधिकां रुचिमापादिताः। ततोऽसौ सूरिर्लाट-सौराष्ट्र-कच्छ-सिन्ध-पाञ्चाल-शौरसेनादीन् पूर्वस्यां दिशि च अङ्ग-बंग-मगध-कलिंगादिदेशान् विहरणेन व्याख्यानेन धर्मप्रचारपरिपूर्णामृतोपमोपदेशेन च जिनधर्माधिकोत्सुकान् सत्पथानुसरणशीलांश्चकार।

तत आचार्यो मथुरामाससाद। तत्र समारोहपुरःसरं नगरं प्रवेशितः। कुलभद्रगोत्रीयेण कोट्यधिपेन ढड्ढरशाहेन स्फटिकरत्नमयी पार्श्वनाथस्य प्रतिमा, अन्याश्च शतत्रयप्रमिता धातुमय्यः पाषाणमय्यश्च मूर्तयो निर्मापिता आसन्। सूरीश्वरस्य वरदहस्तेन तासां प्रतिष्ठापनविधिं महता समारोहेण स श्रेष्ठी कारयाञ्चक्रे। नवलक्षप्रमिता रूप्यका अत्र श्रेष्ठिना धर्मकार्ये उपयुक्ताः।

ततः सच्चायिकादेवीवचनानुसारेण सर्वशास्त्रसंपन्नं निखिलव्याख्यानकलाकोविदं गुणतिलकं सूरिः स्वपट्टेऽस्थापयत्। श्रीरत्नप्रभसूरिरिति नामधेयेन तं भूषयामास। अन्ते मथुरायामेवानशनं विधाय पञ्चपरमेष्ठिमहामन्त्रस्मरणपूर्वकं शरीरमुत्ससर्ज।

## वि० सं० २९८ तः] २६ आचार्यः श्रीरत्नप्रभसूरिः (पञ्चमः) [वि० सं० ३२० प०

श्रीसिद्धसूरिपट्टे चारुचरित्रचित्रीकृतमनुजमानसो विद्वज्जनमण्डलीमण्डनीभूतः श्रीरत्नप्रभसूरिः समायातः। असौ सौपारपुरवास्तव्यो भद्रगोत्रीयश्चासीत्।

सौपारपुरे धनाढ्यवर्यस्य देदाशाहस्य राणा-साहरण-लुम्बाशाहाख्यास्त्रयः पुत्रा बभूवुः। तत्र राणाशाहेन सप्तवारं सम्मेतशिखरपर्यन्तानां तीर्थानां संघायोजनं कृत्वा यात्रा विहिता। द्वितीयेन च साहरणेन शत्रुञ्जयपर्वते चतुरशीतिसख्याकोपमंदिरयुक्तो भव्यो भगवतो महावीरस्य देवालयो निर्मापितः। तृतीयेन लुम्बाशाहेन च सौपारपत्तने चतुरशीत्युपमन्दिरयुक्तो भगवत आदीश्वरस्य रमणीयो जिनालयश्च निर्मापितः। सजातीयाश्च सुवर्णमुद्रिकास्वर्णपात्रप्रदानेन, तथैव श्रीसंघश्च सत्कृतः।

एवं सर्वथा धर्ममयैकजीवनमिदं देदाशाहस्यकुलं विख्यातयशश्चासीत् सर्वत्र।

असौ लुम्बाशाहः क्रयविक्रयादिवाणिज्यकलाकुशलोऽभूत् न केवलमत्र भारते, पाश्चात्यदेशेष्वपि वाणिज्यप्रचार आसीत्। सदैव धर्मरतेरस्य पञ्च पुत्रा आसन्। तत्र खेमानामकः सूनुः सर्वगुणसम्पन्नः परममेधावी बभूव। अध्यात्मज्ञाने त्वस्य नैसर्गिको वृत्तिर्योगाभ्यासार्थमसौ शनैः शनैः कृतप्रयत्नोऽभूत्। नगरेऽत्र समागतानां साधूनां शुश्रूषा त्वस्य परमं कर्तव्यमेवेति सर्वे जानन्ति स्म। येन धार्मिकसंस्काराणां प्रोत्साहनं विशेषतः प्राप्तम्।

एकदा प्रबलतरपुण्योदयबलात् श्रीसिद्धसूरिः सौपारपत्तनमाययौ। श्रीसंघेन समाहृतो नगरप्रवेशमहोत्सवेनालङ्कृतश्च स आचार्यः। तत्र नियमानुसारेण धार्मिकव्याख्यानानि प्रारब्धानि, एकदा व्याख्याने सूरिरिह दृष्टान्तमुपवर्णयामास।

कश्चिदेकः श्रेष्ठी त्रीन् पुत्रानाहूय तेभ्यः सहस्रपरिमितान् रूप्यकान् प्रतिपुत्रं दत्वा विदेशं प्रेषयामास। एकेन संसारसुखोपभोगलिप्सुनाऽहारविहारभोगविलासैश्च मूलधनं व्ययितमपरमपि तत्र-ऋणं कृतम्। द्वितीयेन साधारणतो वाणिज्यं कृतं तेनैव स्वकुटुम्बपोषणमकरोत्। तृतीयेन सूक्ष्मदर्शिना क्रमशो व्यापारे कृते मूलापेक्षया प्रभूतं धनमासादितम्। काले गते पिता तान् स्वदेशमाह्वयत्। तेऽत्रागताः। पूर्वदत्तं धनं जनकेन तेभ्यो याचितम्। प्रथमेनोक्तं व्ययीकृतमपरमपि मेऽन्येभ्यो देयमास्ते। द्वितीयेन सहस्ररूप्यका दत्ताः। तृतीयेन व्यापारेण लब्धा लक्षाधिका जनकाय दत्ताः। एवमेवेदं दृष्टान्तमात्मविषये दृश्यताम्! सहस्रसंख्यकधनसदृशोऽयं मानवो देहो लब्धः। तत्र एको भोगविलासेन व्यर्थमेव तं देहं प्राप्य मुधैव जीवनमतिवाहयति। द्वितीयस्तु शरीरं प्राप्य न पुण्यं न च पापमाचरति। ततोऽसावप्यात्मकल्याणं नासादयति। तृतीयश्च महता पुण्येन लब्धो दुर्लभोऽयं मानषो देह इति मत्वा दानेन पुण्येन सेवया तीर्थयात्रया मन्दिराणां मूर्तीनां च प्रतिष्ठापनेन सार्थकं करोति। ततः कुटुम्बपोषणं भोगविलासानुभवमन्ते च संसारस्यानुभवेन हेयतां ज्ञात्वा परमात्मकल्याणार्थैव दृढतरवैराग्यभावनाभावितहृदयो दीक्षां च गृहीत्वा त्वधिकमात्मल्याणसाधको भवति। एवमसारसंसारसमुद्रनिमग्नानां प्राणिनामिह वैराग्यभावनासेवनं विहाय न कोऽपि परमसुखसंपादकः पन्था इति स्पष्टमेवोच्यते यथा—

जहा य तिन्नि वणिया मूलं घित्तूण निग्गया। एकोऽत्थ लहइ लाभं एगो मूलेन आगओ॥
एगो मूलं पि हारित्ता आगओ तत्थ वाणिओ। ववहारे उवमा एसा एवं धम्मे वियाणह।

एवं मनुष्यदेहपरमकल्याणायुरस्थैर्यत्वादिविषयकमाचार्यस्य परमरमणीयं व्याख्यानमाकर्ण्य तत्र स्थितः खेमाशाहः संसारादुद्विविजे। सूरेश्चरणयोः प्रणम्य दीक्षाञ्च ययाचे सूरिणानुमतः पितरावामन्त्र्य दीक्षामगृह्णात्। ततो गुणतिलकेति नाम प्राप। सूरिपार्श्वे क्रमेण न्यायव्याकरणसाहित्यागमलक्षणादीनि शास्त्राण्यधीत्याकरोद्भवः कृतसंस्कारो मणिरिवाबभौ। तपश्चर्यायां योगाभ्यासे च परमप्रयत्नशीलो लब्धसिद्धिर्बभूव येन महामहिमानो भूमिपतयोऽप्यस्य चरणसरोजानतमस्तका आत्मानं धन्यं मेनिरे। श्रीसिद्धसूरिरेनं गुणतिलकं रत्नप्रभसूरीति नाम्ना स्वपट्टे प्रतिष्ठापयामास। स्वयं च समाधिना स्वर्गभागभवत्।

अथैवमाचार्यपदारूढः श्रीरत्नप्रभसूरिः विहरणक्रमेण भिन्नमालनगरमुपागमत् । तत्र स्वव्याख्यानश्रवणाख्यातधर्मप्रभावः श्रीभिन्नमालाधिपोऽजितदेवो, महिषी रत्नादेवी तथा चान्ये नागरिका जिनधर्मोपासका अभूवन् । नृपात्मजो गंगदेवोऽपि विप्राणां संसर्गप्रभावेण मधुमांसा-द्यभक्ष्यभोक्ता निशाहारी चासीत् । एकदा पाचकस्यासावधानत्वात्पाके कश्चिद्विषमिश्रो जन्तुः पतितः पाकेन सह पक्वोऽभवत् । पाकश्च विषावलीढो जातः । रात्रौ कृताहारोऽसौ विषमविषदुःसहवे-गावलीढसर्वावयवो बभूव ।

अथ प्रातःकाले ब्राह्मणा मन्त्रतन्त्रादीनुपायान् बहून् कृत्वा विफलजीवनाशा मृत एव कालदष्टोऽसौ गंगदेव इत्युच्चैरवादिषुः । ततस्तत्पितरौ सूरिसमीपमाजग्मतुः । सर्वमेव तस्य दुराचरणादिकं ब्राह्मणसंसर्गत एवेति सर्वमुदन्तजातमाख्याय कथमपि जीवेदयं ततः कुशलं भवेदित्यूचतुस्तमाचार्यम् । आत्मयोगबलमास्थाय सूरिस्तं लब्धसंज्ञं व्यधात् । सर्वे ते प्रणम्योपकारं स्मरन्तो राजगृहमाययुः ।

अथापरस्मिन् दिने रात्रिभोजननिषेधविषयकं व्याख्यानमारब्धं सभायाम् । अहो ! तीर्थङ्करा अपि रात्रिभोजनं निषेधन्ति न केवलं वयम् । स्वास्थ्यरक्षणेनापि तन्निषेधो रागप्राप्तः । शास्त्रेष्वप्य-स्य विषये सुविशदं निरूपणं विद्यते । दिङ्मात्रन्तु-चत्वारो नरकद्वाराः प्रथमं रात्रिभोजनम् । परस्त्रीगमनं चैव सन्धानानन्तकायके । मृते स्वजनमात्रेऽपि सुतकं जायते किल । अस्तं गते दिवानाथे भोजनं क्रियते कथम् । एवं शास्त्रयुक्तिपुरःसरं सुस्पष्टमिदं व्याख्यानं श्रुत्वा न केवलमसौ गंगदत्तोऽपरे च रात्रिभोजनं तत्यजुः ।

एवं धर्मरहस्यं सर्वेभ्यः श्रावयित्वा सूरिर्जाबलीपुरमगमत् । तत्र झालाश्रावकेण भगवतीसूत्र-श्रवणेच्छा सूरये प्रदर्शिता ॥ अतः सूरीश्वरस्य तत्रैव चतुर्मासो जातः । पूर्वं तावत्तेन ज्ञानपूजा कृता । कोटिसंख्यका मुद्रास्तत्र विनियुक्ताः । आरब्ध उत्सवः । प्रारंभो भगवतीसूत्रवाचनाया जातः । सर्वे तत्र श्रवणार्थमुत्सुका बभूवुः । श्रीसंघोऽप्यत्र संयुक्तोऽभूत् । अन्ते च श्रेष्ठी नीलहीरकपद्मरागा-दिभिः प्रभूतै रत्नैः पूजामकरोत् । सर्वे समारोहसमागता वस्त्राभरणादिभिः संमानिताः । मिलितेन द्रव्येणागमपुस्तकानि लेखयित्वा स श्रेष्ठी ज्ञानकोशेऽस्थापयत् । एवं महताऽनन्देनोत्सवः समापितः । ततः परं प्राग्वटवंशीयेन पोमाशाहेन निर्मापितस्य श्रीविमलनाथदेवस्य मन्दिरे प्रतिष्ठाविधिः सूरेरेव पवित्रकरकमलेन विहितः ।

अथ सूरेः पद्महंस-मङ्गलकलशनामानौ द्वौ मुनी लब्धिसंपन्नावास्ताम् । एकदा शौचादि-निर्वाहार्थं दूरं जग्मतुः । तत्राखेटरमणाः पशुघातकाः क्षत्रियाः समागच्छन् । सम्मुखमागतान् मुनी तावूचतुः—भोः क्षत्रियाः ! विचिन्तयन्तु भवन्तो यद्:—

यावन्ति पशुरोमाणि पशुगात्रेषु भारत ! ।
तावद् वर्षसहस्राणि पच्यन्ते पशुघातकाः ॥

एवमादिकानुपदेशयुतान् श्लोकान् तदर्थांश्चाकर्ण्य ते सर्वे मुनिचरणयोः शिरो निवेश्य पूर्वकृतानां पापानां प्रायश्चितमकार्षुः। ततो जिनधर्मस्वरूपं ज्ञात्वा मनोऽनुकूलानि श्रावकव्रतानि स्वीचक्रुः। मुनीभ्यां सहैव तत्रागत्य सूरये स्वमुखेनैव सर्वं वृत्तान्तं ते निवेदयामासुः। सूरिणा च धर्मोपदेशस्तेभ्यः कृतः। एवं धर्माचरणानुरूपं जिनालये तेऽष्टाह्निकामहोत्सवमारेभिरे। सन्तुष्टेनाचार्येण ताभ्यां पद्महंस-मङ्गलकलशाभ्यां मुनिभ्यां पण्डितपदवी श्रीसंघसमक्षमर्पिता।

एवं सत्यवती-पद्मावती-चन्द्रावत्यादिनगरेषु धर्मप्रचारं विधाय सिन्धप्राते विहारं कुर्वन् सूरिर्वीरपुरमाययौ तत्र बप्पनागगोत्रीयः श्रेष्ठी गोशलनामाऽऽसीत्। राहुली नाम्नी पतिव्रतपरायणा भार्या परमधर्मानुरागिणी। धरणो नाम तयोः पुत्रो निखिलगुणगणालंकारभूतश्चासीत्। तस्मै दीक्षामाचार्यो ददौ। तं च निखिलागमतत्वानि क्रमेणाध्यापयत्। परमप्रतिभोपपन्नोऽसौ गुरुपदेशशिक्षाग्रहणपटुरल्पकालेन विद्वदग्रेसरो बभूव। शास्त्रार्थविजयी भविष्यतीति हेतोर्जयानन्देति नाम कृतं सूरिणा। ततश्च विहरन् नागपुरमगमत्। सर्वे श्रावका भव्यं स्वागतं व्यदधुः। तत्र धर्मसंवर्धनप्रचुरा उपदेशा अनेकशो विहिता आसन्।

सूरिरसौ व्यतीते काले निजनिधनकालमागतं वीक्ष्य सच्चायिकाकथनानुसारेण श्रीसंघानुमत्या जिनानन्दं श्रीयक्षदेवसूरीति नाम परिवर्त्य स्वपट्टे शुभेऽहनि स्थापयामास। अस्मिन् भव्ये महोत्सवे सहर्षमादित्यनागगोत्रीयेण मेराशाहेन लक्षत्रयपरिमितं धनमुपयुक्तमासीत्।

सूरीश्वरस्ततः परं २७ दिनान्यनशनं कृत्वा नश्वरमिमं देहमुत्ससर्ज।

## [ वि० सं ३१० तः २७ आचार्यः श्रीयक्षदेवसूरिः। ( पञ्चमः ) ३२६ प० ]

श्रीरत्नप्रभसूरिपट्टपदं श्रीयक्षदेवसूरिर्भूषयामास। असौ वीरपुरवास्तव्यो भूरिगोत्रीयश्चासीत्। अस्य पिता बुद्धौ बृहस्पतिरिव सूक्ष्मेक्षणीयकार्यविचक्षणः श्रीकोकरावस्य राज्ञः प्रधानसचिवो गोशलशाहनामा। माता च क्षत्रियवंशोद्भवा सतीशिरोमणीभूता राहुलीदेवी। तयोरङ्गजो धरणनामा धरणोधरणक्षमोऽभिनवेन्दुनिभाननश्चासीत्।

असौ सूनुर्धरणो बाल्यकालादेवाननुभूतसंसारसुखो मुनिरिव वीतरागो बभूव। एकदा स मात्रा सह कमप्युद्वाहादिप्रसंगमुद्दिश्य स्वमातुलगृहमगमत्। तत्रोपस्थिताः क्षत्रिया मांसाद्यभक्ष्यभोजनमकार्षुर्मिलिताः। ते च तमवादिषुः वत्स! गृहाणैतद् भोजनम्। अथ तदनु ते तमाग्रहं व्यदधुः। असौ करुणार्द्रचेताः सर्वानज्ञानोपहतहृदयान् बोधयामास। भो! मान्याः किमिदं जगतीतले भगवता भवतां कृते निर्मितं भोजनं येन अन्यस्य क्षणिका तृप्तिरन्यः प्राणैर्वियुज्यत इति भवदाहारार्थे के नाम कृपणा दीनहीना मूकाः प्राणिनः कामवस्थामनुभूताः। अहह भगवता जगदीश्वरेण नाम्ना तु क्षत्रिया रक्षणार्थे स्थापिताः। किन्तु शब्दस्य प्रवृत्तिनिमित्तं किं तेनैव परिवर्तितं वा स्वच्छन्दचारिभिस्तैरेव क्षत्रियैः? क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः इति दुःखे निमग्नानामुद्धरणेनैव क्षत्रियः सार्थकः क्षत्रियशब्दवाच्यो भवति। न केवलं नाममात्रधारणेन। जीवदया तु क्षत्रियाणामेव मुख्यो धर्मस्तदर्थमेव सर्वेषां संरक्षणभारस्तेषामुपरि स्थापितः

शास्त्रे । यच्चोदरदरीपूरणार्थमेव क्रियत इदं भोजनमगणितपापपांशुलं किं तेनैव यावज्जीवं भविष्यति तृप्तिः ।! साञ्जलिबन्धमहं! भवद्भ्यो भूयो भूयः प्रार्थये—शृण्वन्तु सार्वजनीनमिदं शास्त्रवचनम् ।

न हिंसा सदृशं पापं त्रैलोक्ये सचराचरे ।
हिंसको नरकं गच्छेत् स्वर्गं गच्छेदहिंसकः ॥

तत्किं निरयमात्रफलकमिदं मांसभोजनं कुर्वन्ति भवन्तः । नायं मनुष्याणामाहारः । राक्षसानामेष रुधिरप्रियाणामाहारः । यस्मिन् परमपवित्रचरित्रचित्रीकृते कुले महावीररामचन्द्रादयो महावीराः समुत्पन्नास्तत्रैव सर्वाभयप्रदानदीक्षिते ह्यस्मिन् कुले रक्षका एव भक्षका भवन्तीति किं नाम महत्कष्टं सर्वजनोद्वेगकरं न स्यात् । अनवरतमदमदिरोन्नतास्ते तं भृशमुपहसन्तोऽब्रुवन्—भो धर्मप्रिय ! आपणं गत्वा गान्धिकस्तैलिको वा भवितुमर्हसि, न क्षत्रियोचितं समराङ्गणे वीरोचितं क्षत्रधर्ममाचरितुं ते शक्तिः । एवं स्वार्थकलुषितचेतसां मदोद्धतानां तेषामपमानजनकं वचनमाकर्ण्यासौ भूयस्तानगादीत्—किं मांसभोजिनामेव क्षत्रियाणां राज्यप्राप्तिर्जगतीतले दृष्टचरा ? पूर्वस्मिन् काले बहवोऽलौकिकपुरुषार्थप्रभावेण दिगन्तविश्रुतकीर्तयो भव्यभावनोपपन्नमानसाः क्षत्रियवंशोद्भवा राजानः प्रबलतरान् शत्रूनपि पराजयन्त, ये शत्रवस्तेषां नामश्रवणमात्रेण बिभ्यमाना यत्र कुत्रापि पलायनं चक्रुः । अपरञ्च नाहं चक्रवर्तित्वमभिलषामि । तत्र खलु सम्पदामुपभोग एव प्रधानं फलम् । उक्तं च केनापि सुकृतिना—लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युत्समं जीवितम्—इति विनश्वरं वस्तु विहाय शाश्वते वस्तुनि रुचिरुचिता सर्वार्थसाधनक्षमा कथंकारं न विधेया ? यत्र चात्मदृष्टान्तेनावगम्यते—प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।

आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ।

इदमेव सूक्ष्मेक्षिकया क्षणं विचिन्त्य सार्वजनीनसुखसम्पादनक्षमः—अहिंसा परमो धर्म इति प्रधानभूतं तमेव सर्वभावेन भावयन्तु भव्या अत्रभवन्तो भवन्तः स्वान्ते स्वकीये ।

एवं मननीयं विचारचारु धरणेनोक्तं सर्वमेव विचार्य ते स्वकर्तव्यं प्रतिपन्ना बभूवुः ।

अथासौ धरणो मातुलगृहात्स्वगृहमाजगाम । तस्य चेतसि नवराज्यस्थापनेच्छा सर्वतोभावेन जागृता पूर्वकृतापमानप्रसंगेनेन । कदाचिद् वीरपुरं नगरं केनापि बलवता शत्रुणा सहसाऽऽक्रान्तम् । धरणस्य पिताऽमात्यो गोशलशाहः समरोद्यतो बभूव । ततो धरणोऽसौ सेनापतिपदे कार्यं कर्तुं सज्जीबभूव । राजाऽत्र विषये संदिग्धमानसोऽभूत् किन्तु तेनैव वचनबलाद् विश्वस्तः कृतः ।

अथ प्रवृत्ते भीषणे समरभूमौ संग्रामे दुःसहविक्रमबलेन धरणेन शत्रुः पराजितः शीघ्रं पलायितो, येन मुदितमनसा राज्ञा सप्त ग्रामाः धरणाय पुरस्काररूपेण प्रदत्ताः ।

एकदा प्राक्तनपुण्यबलप्रभावाद् भवार्णवपारङ्गमनौवाहकः करुणावलयः श्रीरत्नप्रभसूरिराचार्यः क्रमेण विहरन् पादारविन्दचंक्रमणेन वीरपुरं पावयामास । सूरीश्वरस्यागमनं विज्ञाय पौराः प्रमुदितमानसा अलौकिकसमारोहेण नगरप्रवेशमकारयन् । अथ धर्मागममर्मपारगः सूरिरेकदा "दुर्लभं

मानुषं जन्म" एतद्विषयोपरि हृदयंगमं व्याख्यानमदात्। सर्वजनचेतश्चमत्कारजनकं सूरिवचः श्रुत्वा, सविनयं तं प्रणम्य सर्वे स्वस्थानमाययुः। कोकरावो राजा धरणं सहैव नीत्वा राजभवनं विवेश। एकान्ते च तौ मिथो वार्तालापे समासक्तौ बभूवतुः। राजा तमाह-सखे अद्य सूरिणा यदुक्तं तत्तत्वतस्तथैव मां भाति। धरणः प्राह-ममाऽपि सैव भावना प्रबलतरा यदात्मश्रेयोऽनुसंधानम्। ततो राज्ञा प्रोक्तम्-किं विचारेण। शीघ्रमेव कर्तव्यमनुचिन्तय। श्रुत्वैवं स धरणोऽवादीत्-किन्त्वेका तृष्णा मां भृशमेव परिबाधते। सम्यगवधारिततदीयमानसो राजा तमगादीत्-भो गृहाणेदं राज्यम्। ततस्तेनोक्तम्-राजन्! जानाम्यहं राज्यं नाम विविधानां नरकाणां द्वारं तत्कथमहमङ्गीकुर्याम्। अस्तु सायमेवावां सूरिसमीपं गमिष्याव इति निश्चित्य धरणः स्वगेहमव्रजत्। अथ राजाऽचिन्तयत् अहो सत्यमुक्तं राज्य नाम नरकद्वारमिति धरणेन, अहं कदाचिद्राज्यं त्यक्ष्यामि, कदाचित्तदपि मां त्यक्ष्यतीति निश्चितमेव किमर्थमेवं चञ्चले तस्मिन्निमग्नः? एवं बहुविधं विचार्यासौ वैराग्ये दृढमना बभूव। ततः सायमुभौ मिलितौ कृतनिश्चयौ सूरिसमीपमेत्य मनोगतं निवेदयामासतुः। सूरिश्च राजानमुद्दिश्याह-राजन् तव तु राज्याधिपतित्वं किन्तु सर्वऽस्मिन् विश्वस्मिन् चारित्रापेक्षया न किमप्यतिरिच्यते। भूरिप्रभावैश्चक्रवर्तिभी राजभिश्चारित्रग्रहणोद्यतैः क्षणेनैव राज्यसमृद्धिः सुदूर-मुत्क्षिप्ताऽभूत्। न चायुषो विश्वासः, अत एव शुभस्य शीघ्रत्वमेव न्याय्यम्। ततस्तौ सूरिं नत्वा गृहमा-गच्छताम्। राजा कोकरावो ज्येष्ठं पुत्रं राहुपं राज्येऽभ्यषेचयत्। तदनन्तरं तावुभौ सूरिपार्श्वे दीक्षामगृ-ह्णीताम्। गोसलशाहेन मन्त्रिणाऽत्र दीक्षामहोत्सवः कृतः। सिन्धप्रान्ते राज्ञो रुद्राटस्यानन्तरं द्वितीयं दीक्षाग्रहणमनेनैव सम्पादितमिति द्रष्टव्यम्। तस्मिन् दीक्षाकाले पञ्चत्रिंशत्परिमिता जना अपि दीक्षां प्रापिताः सूरिणा। दीक्षानन्तरमसौ धरणो जयानन्दनाम्ना, कोकरावश्च कल्याणभूतिनाम्ना विश्रुतौ। जयानन्दमसौ सूरिः निखिलागमतत्वानि क्रमेणाध्यापयत्। परमप्रतिभोपपन्नोऽसौ गुरु-प्रतिपादितोपदेशशिक्षाग्रहणमननधारणापटुरल्पेनैव कालेन विद्वज्जनमण्डलालङ्कारचूडामणिर्बभूव।

अथ क्रमेण विहरन्नसावाचार्यो नागपुरमागच्छत्। तत्र क्रमशो विचार्यमाणे स्वनिधनकालं समीक्ष्य देवी सच्चायिकाकथनानुरूपं जयानन्दं सर्वलक्षणलक्षण्यं यक्षदेवसूरीति नाम विधाय शुभे मुहूर्ते स्वपट्टेऽस्थापयत्। श्रीसंघेनात्र महामहोत्सवः संमानितः। अस्मिंश्च भव्ये समारंभे प्रमोद-मोदमानमानसेनादित्यनागगोत्रीयेण भेराशाहेन लक्षत्रयपरिमितं द्रव्यं विनियुक्तमभूत्।

आचार्यः श्रीरत्नप्रभसूरिः सप्तविंशतिदिनान्यनशनं विधाय समाधिसंस्थोऽनश्वरं देहमुत्ससर्ज।

अथ श्रीयक्षदेवसूरिराचार्यः स्वकर्तव्यानुपालनमुद्दिश्य नागपुरान्निर्गत्य क्रमेण मेदिनीपुर-मुग्धपुरादिषु ग्रामनगरेषु धर्मभावनामुपदेशेन संवर्धयन् तत उपकेशपुरमाययौ। नवोद्यतं चन्द्रमण्डलमिव नूतनमाचार्यमवलोकयितुं समुत्सुकमानसाः सहर्षं तं जना महता स्वागतेन संमानयामासुः। आचार्य-चरणशुश्रूषणशुद्धहृदयास्तेऽलभ्यं व्याख्यानामृतोपदेशं सुधालाभमिव मन्यमानास्तृप्तिं नाध्यगच्छन्। अत एवोक्तं श्रेयसि केन तृप्यते। ततः सर्वेभ्यो धर्मलाभाशिषा संभाष्य विहरन् माण्डव्यपुरमलंकृत्य धार्मिकीं भावनां श्रावकाणां प्रबलयन् ततः पाल्हिकानगरीमाजगाम। अनतिप्राप्ताचार्यचरणशुश्रूषणा

इव जनाः प्रत्युद्व्रजन्तः सभाजनेन विधिना नगरीमानयाञ्चक्रिरे। तत्र श्रीसंघस्यादरातिशयमनुमान्य चातुर्मासिकी स्थितिः स्वीकृता। ततो दैनन्दिनक्रमेण व्याख्यानानि प्रारब्धानि। प्रथमन्तु तान् धर्माचरणे प्रायुङ्क्त—श्रावकाः! आलस्यादिमहादोषान् दूरीकृत्य स्वधर्माचरणरूपं वीरव्रतमनुपालयध्वम्। भगवतो महावीरस्य यूयं धर्मवीरा बालका वीरप्रचारितधर्ममार्गे सदैव सञ्चरणेनात्मकल्याणरूपं परमतत्वं प्राप्तुं सर्वथा दृढ़परिकरा भवतेति प्रोत्साहनपूर्णं विविधागमप्रमाणपूर्णं दृष्टान्तादिभिः सयुक्तिकं रमणीयतरं व्याख्यानं धर्मभावनायै दत्तम्।

अथैकदा भगवताऽचार्येण दानधर्मविषयकं व्याख्यानं कृतम्। यथा

व्याजे स्याद्द्विगुणं वित्तं व्यवसाये चतुर्गुणम्
क्षेत्रे शतगुणं प्रोक्तं पात्रेऽनन्तफलं भवेत्।

एवं दानं पात्रविषयकमेव प्रशस्यते शास्त्रे। पात्रमपि द्विविधं दर्शितम् यथा—

स्थावरं जङ्गमं चेति सत्पात्रं द्विविधं मतम्।
स्थावरं पत्रपुष्पादि प्रासादं प्रतिमादिकम्॥
ज्ञानाधिकं तपः क्षान्तिर्निर्ममं निरहङ्कृतिम्।
स्वाध्यायब्रह्मचर्यादियुक्तं पात्रञ्च जङ्गमम्॥
पात्रे दत्वा दानं प्रयाण्युक्त्वा च भारत।
अहिंसाविरतः स्वर्गं गच्छेदिति मतिर्मम॥

ततः स्थावरतीर्थरूपस्य शत्रुञ्जयतीर्थाधिराजस्य यात्रापुण्यफलं वर्णयामास। येन बलाहगोत्रीयः केसाशाहो यात्रार्थं संघस्यायोजनं चकार। ततश्चतुर्विधसंघस्यादेशमासाद्य केसाश्रावकस्य संघपतित्वे संघः शत्रुञ्जयमभिप्रतस्थे। पञ्चलक्षमुद्रिका असौ पुण्यमार्गे व्ययीचकार। तत्र सर्वेषां तीर्थानां सुखेन यात्रा विहिता। अस्यां तीर्थयात्रायां पञ्चसहस्रसंख्याकाः साधवो साध्व्यश्च लक्षपरिमिताः श्रावकाः संगता आसन्। तीर्थयात्रां विधाय संघस्ततः प्रतिनिवृत्तः क्रमेण स्वस्थानमाययौ।

आचार्योऽसौ परमज्ञानवान् तपश्चर्यानिरतश्चासीत्। तत्र विचारमकरोत् न खलु तीव्रतपस आश्रयणं विना कर्मक्षयः कर्तुं शक्यः। तदभावे कथमात्मोन्नतिः सुलभा स्यात्।अतः पुनरपि तपस आश्रयणमेव वरमिति कृत्वा तत्रैवात्मरतिर्बभूव। ततः तपःप्रभावसमासादितालौकिकप्रभावः क्रमेण सौराष्ट्रप्रान्ते विहारमकरोत्। बहवो बौद्धाः शास्त्रार्थचर्चायां पराजिताः। सर्वथा ते नतमस्तका यावदुषितं तावदेव तथैव स्थितिमकुर्वन्। सौराष्ट्रदेशे श्रावकैर्निर्मापितानां मन्दिराणां मूर्तीनां च बह्वीनां प्रतिष्ठापनं, मुमुक्षूणां दीक्षादानं, जैनेतराणां जिनधर्माभिरुचिश्चोत्पादिता सूरिणा। पश्चात्ततो विहारानुक्रमेण कच्छदेशमलंचकाराचार्यः। अत्र साधवस्तु तेन पूर्वमेव सम्प्रेषिता आसन्। तैस्तु विद्याविचक्षणैः सूरेः कार्यभारो लघूकृतः। सूरेरागमनं ज्ञात्वा श्रावकाणामुत्साहोऽधिकतरं ववृधे। शिष्यैः सम्पादितं कार्यं ज्ञात्वा सूरिः सहर्षं योग्यपदवीदानेन तान् प्रोत्साहयाञ्चकार। यदा सूरिः कच्छ-

प्रान्तमात्मना भूषयत्यधुनेतिवृत्तं सिन्धप्रान्तीयैः संप्राप्तं तदातैस्तत्रागत्य निवेदितम् । भगवन् ! एकवारं जन्मभूमिमागत्य सर्वेषां धर्मतत्त्वामृतोपदेशेन वर्धयतु धर्मभावनाम् । लोकश्रादरता अपि वयमेवं जानीमो यत्-जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ! ततः परं कल्याणभूति ( राजाकोकरावः ) रपि विज्ञापितः- पूज्यवर ! किमुच्यतेऽस्माभिः । सिन्धदेशस्तु भवदीय एव । राजत्वे सर्वसन्मानपात्रं भवानधुना तु सविशेषत इति । परमतपःक्षपितमनोमलो ज्ञानध्यानमात्रनिरतो मुनिराह-अत्रैव गुरुकृपापूर्णमानसो मानसन्माननिःस्पृहोऽहं–प्रतिजन्म जिनधर्म एव भूयो भूयः शाश्वतं शरणमित्यभिलषामि ।संसारार्णवतारकस्तीरप्रापकः सर्वश्रेष्ठसाधनभूतः सर्वधर्ममार्गशेखरीभूतः स एव एको विजयतामित्येव मामकीनं हृदयम् । एवं जिनधर्मभावनारञ्जितहृदयं प्रणम्य, सूरिं च पुनः पुनरभ्यर्थ्य यथागतं जग्मुः । आगमनस्वीकरणेनानन्दमग्नास्ते गतमप्यध्वानं न बुबुधिरे ।

एवं कच्छदेशं स्वावस्थानेन पावयित्वा सूरिः सिन्धप्रान्ते ग्रामनगरेषु विहरन् वीरपुरमाससाद । सूरेरागमनं विज्ञाय राजा राहूपो, मन्त्री गोशलशाहः सपरिवारः, श्रीसंघश्च नगरप्रवेशमहोत्सवाय सप्रवृत्तिका बभूवुः । इदमेवात्र विशेषप्रवृत्तौ निमित्तं यदेकतस्तु नगरीनाथो राजा पश्चाच्च धर्मराजोऽसौ मुनिर्नगरीमिमामलङ्करिष्यतीति । माता राहूली पुत्रमागतं दृष्ट्वा परमप्रमोदमुदितान्तरङ्गा बभूव । सर्वैर्नगरवास्तव्यैः स्नेहभरितं भव्यं स्वागतं सम्पादितम् । ततः क्रमशो भिन्नविषयमवलम्ब्य व्याख्यानमदात् । इदमेव सर्वतोऽधिकं वैशिष्ट्यमासीत् तत्र यदा सूरिरसौ संसारस्य निःसारताप्रतिपादकं तादृशं व्याख्यानमकरोत्तदा तद्विचार्य जना हृदयमर्मप्रत्याघातेन सञ्जातरोमाञ्चा अभूवन् । इदमसारताबोधकं व्याख्यानं श्रुत्वैव तत्र चत्वारो भावुका दीक्षोद्यता बभूवुः । अतो दीक्षाव्रतमुण्डनाय पञ्च नापिताः समाहूताः । दीक्षागृहीतारश्च चत्वार आसन् । अतोऽवशिष्टो नापितः खिन्नमानसो बभूव । तदा समीपस्थेन श्रेष्ठिना केनचित्तस्य दैन्यकारणं पृष्टम् । नापितश्चाह-लाभाशया समागतोऽहं निराशोऽस्मि ततः खेदमुपागतः । श्रेष्ठिना तद्दैन्यापहरणार्थं दीक्षाव्रतग्रहणार्थञ्च तत्सकाश एव मुण्डनं कारितम् । ईदृशा अपि कारुणिकास्तदानीन्तने कालेऽभूवन् । एवं पञ्चभिर्भावुकैः सूरीश्वरसमीपे दीक्षा गृहीता । ततः प्रणतिततिपुरःसरं विज्ञापितो जनानामभिलाषां पूरयितुमसावाचार्यस्तत्रैव चातुर्मासिकीं स्थितिं चक्रे ।

परमधर्माचरणशीला राहूलीदेवी स्वसम्पदनुसारेण श्रीभगवतीसूत्रवाचनामहोत्सवमारभत । मन्त्री गोशलशाहोऽत्रोत्सवे नवलक्षसंख्यकान् रूप्यकान् विन्ययुंक्त, प्रतिप्रश्नं तत्र सुवर्णमुद्राप्रदानं तु किं वक्तव्यम् । नागरिकैरयं पुण्यप्रदायकमहोत्सवस्यालभ्यो लाभो लब्धः किन्त्वामन्त्रितैः समीपग्रामनगरवासिभिरपि स धन्यमात्मानं मन्यमानैरपि लब्धः । एवं सूरिणा श्रीभगवतीसूत्रवाचनानिमित्तेन समग्रः सिंधदेशोऽनुगृहीतः ।

समाप्ते चतुर्मासे देवी सच्चायिका सविनयमुपकेशपुरागमनप्रार्थनामकरोत् महानलभ्यो लाभो भविष्यति, तत्राहमपि सहयोगार्थं सदा सन्निहिताऽस्मीति । ततः पञ्चालदेशे पूर्वस्यां दिशि च विहारस्येच्छां दूरीकृत्य तत्रैव मरुधरप्रांते विहारं व्यधात् । मार्गागतानि ग्रामनगराणि हृदयङ्गमेन

धर्मोपदेशेनालंकार्य क्रमेणोपकेशपुरसमीपमागच्छत् । उपकेशपुरे चाभानगरीस्थः कर्मशाहः संघेन सह महावीरयात्रार्थमागतोऽभूत् । अहो ! स्थावरतीर्थेन सह जङ्गमतीर्थभूतस्याचार्यचरणस्य परमालभ्यो लाभोऽलौकिकप्राक्तनपुण्यकर्मप्रभावेण मयाऽसादित इति विचारयन्नसौ श्रेष्ठी स्वागतविधिना नगरमलङ्कारयामास सूरीश्वरागमनेन । ततो वैराग्यापादकं प्रभावपूर्णं सयुक्तिकं शास्त्रप्रमाणप्रमाणितं व्याख्यानमकरोत् संघसमक्षमसावाचार्यः । येन तद्भावनाभावितमानसाः प्राप्तवैराग्या जना दीक्षोद्यता बभूवुः । कर्मशाहो ज्येष्ठपुत्राय व्यवहारभारं समर्प्य दीक्षोद्यतोऽभवत् । एवमस्य दृढीयसीं धर्मभावनामालक्ष्य त्रिंशत्संख्यका भावुका अपि दीक्षायै समुद्युक्ता जाताः । शुभेऽहनि सूरीश्वरस्तान् दीक्षितानकरोत् । कर्मशाहस्ततः परं धर्मविशालेति नाम्ना प्रथितो बभूव । क्रमेण स सूरिसमीपे शास्त्राध्ययनमकरोत् । आगमपथप्रदर्शकानि व्याकरणन्यायसाहित्यादीनि पूर्वमध्यैत । तत आगमशास्त्राणां क्रमशोऽध्ययनेन प्रकाण्डपण्डितो बभूव ।

एकदा व्याख्याने सूरिः श्रीशत्रुञ्जययात्रामाहात्म्यमुपावर्णयत् । ततः प्राग्वटवंशीयो रावलशाहः पुण्यतीर्थस्य यात्रायै संघायोजनमकरोत् । सर्वत्रामन्त्रणानि विधाय महता समारोहेण संघः सूरेरनुज्ञया निष्कासितः । संघे च सपादलक्षपरिमिताः यात्रिकाः प्रभूतसंख्यकाः साधवः साध्व्यश्चासन् । क्रमेण पुण्यस्थानं प्राप्य सकलां तीर्थयात्रां सम्पादयामास श्रेष्ठी । अस्मिन् धर्मकर्मणि नवलक्षं मुद्राणां व्ययितमासीत्तेन । अमितं च पुण्यमासादितम् । मार्गे यानि जीर्णानि जिनमन्दिराण्यागतानि तेषां जीर्णोद्धारं दीनेभ्यश्चान्नवस्त्रादिदानमकरोत् । एवं पर्यटन् संघः कतिपयैः साधुभिः सह प्रत्यागतः । सूरिस्तु कच्छसिन्धपञ्चालादिषु देशेषु विहारं कुर्वन् वर्धयंश्च धर्ममार्गाभिरुचिं लोकानां रञ्जयन् मानसान्युपदेशामृतप्रदानेन हस्तिनापुरमाययौ । तत्र तप्तभट्टगोत्रीयेण नन्दाशाहेन निष्कासितेन संघेन सह संगत आचार्यः सम्मेतशिखरयात्रया सह पूर्वदिगागतानां तीर्थस्थलानां संपूर्णां यात्रां चकार। पुनश्च हस्तिनापुरमागमनेन भूषयामास । तत्र धर्मस्य महती प्रभावना विहिता । तत्र भावुकानामाग्रहेण चतुर्मासो विहितो येन जनानां जीवने सूरिव्याख्यानस्याप्राप्यो लाभो मिलितः । ततः समाप्ते चतुर्मासे मथुरा-सोरीपुरादिषु परिभ्रमन् शाकम्भरीमगमत् । तत्र सूरीश्वरस्य शरीरेऽकस्मात्कापि वेदना प्रादुर्भूता । अतः शरीरस्यास्थैर्यं विचिन्त्य धर्मविशालं मुनिं स्वपट्टेऽस्थापयत् । कक्कसूरीत्यभिधेयं तस्य विहितम् । ततः पञ्च दिनानि समाधौ स्थित्वा दिवमगात् ।

॥ इति श्रीयक्षदेवसूरिचरितम् ॥

## [ वि० सं० ३३६ तः २८—आचार्यः श्रीकक्कसूरिः ( पञ्चमः ) २५७ प० ]

श्रीयक्षदेवसूरिपट्टे श्रीकक्कसूरिश्चारित्रचूडामणिरुत्कृष्टक्रियाकलाकलापकः समायातः । असौ श्रेष्ठिगोत्रीय आभापुरीवासी चासीत् । पिता धर्मणशाहो प्रचुरतरवाणिज्यक्रियाकुशलो, माता च सतीशिरोमणिर्जेतीदेवी । तयोः पुत्रः कर्मशाहो बभूव । धर्मासक्तचेता धर्मणशाहो वाणिज्यकर्मोत्पादितद्रव्येण वारत्रयं तीर्थयात्रायां संघनिष्कासनमकार्षीत् । आभापुर्यां भगवत आदीश्वरस्य विशालं मन्दिरं निर्माय श्रीसंघाय समर्पितम्, एवं लक्षाधिकं द्रव्यं धर्मकर्मण्येवोपयुक्तमासीत् ।

अन्ते च व्यवहारकार्यभारं कर्मशाहाय समर्प्य सम्मेतशिखर एवानशनपूर्वकं देहोत्सर्गमकरोत्। असौ कर्मशाहोऽपि पितुर्मार्गेणैव सर्वकार्याणि संपादयन् पितुरुज्वलां कीर्तिं सर्वत्र प्रसारयामास। स्वयमुदारस्वभावो धर्मकार्ये प्रधानत्वं प्राप्तः सर्वथा धर्माराधनतत्परोऽभूत्। व्यापारजालजटिलीकृतहृदयोऽपि नित्यनियमेन देवमन्दिरदर्शनादिकार्ये सदैव सप्रयत्नोऽभूत्। स्वबुद्धिचातुर्येण व्यापारक्षेत्रमधिकं विस्तारितमनेन। व्यापारोऽपि पाश्चात्यदेशेषु विशेषतः प्रसृतोऽभवत्। एवमपि नगर्यामागतानां साधूनां शुश्रूषणं तु तदीयमेव मुख्यं कर्तव्यमासीत्। तत्संसर्गतस्तस्य धर्माराधने प्रतिदिनं रुचिरधिकां वृद्धिमवाप।

एकदाऽर्धनिद्रितं देवी सच्चायिका तमगादीत्-वत्स! उपकेशपुरस्थितस्य भगवतो महावीरस्य त्वं तीर्थयात्रां कुरु येन ते महान् लाभो भविष्यतीत्युक्त्वा साऽन्तर्दधे। तत उत्थाय स्वचेतसि निश्चयं कृत्वा प्रातरीयं धर्मकर्म समाप्य स्वस्य भार्यां सुतांश्च स्वप्नवृत्तान्तं न्यवेदयत्। तैरपि शुभकर्मणि प्रोत्साहनं दत्तम्। अन्यैरपि कौटुम्बिकैरनुमोदितम्-कर्मशाह! भाग्यवानसि त्वं, तव पूर्वजा जन्मभूमौ गन्तव्यं गमिष्याम इति विचारयन्त एव दिवं याताः। स एव लाभोऽद्य कुलदेव्या दत्तः। प्रथमं तु यात्रालाभः परं जन्मभूमिदर्शनम्। ततो भगवतो महावीरस्य दर्शनलाभो देवीसच्चायिकायाश्च वन्दनम्। एवं सर्वपुण्यसाधके कर्मणि न ते विलम्बो योग्य इति। अथ कर्मशाहः शुभे दिने संघं निष्कास्य विहारक्रमागतस्य देवप्रभवाचनाचार्यस्याधिष्ठायकत्वे स्वस्य च संघपतित्वे प्रतस्थे।

क्रमेणासौ उपकेशपुरमेत्य चिरकालेप्सितां तीर्थयात्रां महता द्रव्यव्ययेन समपादयत्। दैववशात्तस्य कर्मशाहेन श्रीयक्षदेवसूरीश्वरस्यापि दर्शनलाभः प्राप्तः। इदमेव देव्याः सच्चायिकायाः प्रेरणमासीत्। तत्र सः परमानन्दमग्नान्तरङ्गः सूरीश्वरस्य परमविरक्तिजनकं संसारस्य सर्वथैव हेयत्वप्रतिपादकं व्याख्यानमाकर्ण्य दीक्षामग्रहीत्। तस्य विशालमूर्तिरिति नाम जातम्। पश्चादसौ योग्यतां गतः सूरिपदे प्रतिष्ठापित इत्युक्तं प्राक्।

अथ कक्कसूरिर्ग्रामानुग्रामं सशिष्यो विहरन्नागपुरमलंचकार। तत्र बप्पनागगोत्रीयः पुनडशाहो भव्यसमारोहेण नगरप्रवेशविधिमकरोत् तत्र च सपादलक्षं धनं व्ययीकृतम्। अहो पूर्वकाले जनानामाचार्यचरणयोः कीदृशी भावनाऽसीत् यत्तेषामागमनस्वागतविधावेतादृशो धनव्ययः सहसा कर्तुं शक्य आसीत्। सूरिस्तत्र धर्मसंभावनां कृत्वा व्याख्यानेनापदेशं सर्वेभ्यो विधाय धर्मेऽधिकतरां रुचिमभिवर्धयाञ्चक्रे। ततश्चरडगोत्रीयः कपर्दीशाह उपकेशपुरयात्रार्थं सूरेरनुमत्या संघं निष्कासयामास। पन्थानं प्रस्थितः संघो मुग्धपुर-मेदिनीपुर-माण्डव्यपुरादिषु ग्रामनगरेषु गच्छन्नुपकेशपुरं प्राप। तत्रत्यः श्रीसंघः श्रीसूरीश्वरस्यागमनं जानन् शीघ्रं नगरप्रवेशव्यवसाये जनानादिदेश। ध्वजतोरणादिभिः सर्वं महोत्सवोचितं कर्म कृत्वा महासमारोहेणाचार्यचरणस्पर्शेन पुरमलंकारयामास। तदनन्तरं स कपर्दी सर्वविधां यात्रां विधायाष्टाह्निकामहोत्सवध्वजारोपणादिकार्ये प्रभूतं द्रव्यं विनियुज्यापरिमितं पुण्योपार्जनमकरोत्।

उपकेशपुरे सूरीश्वरस्य व्याख्यानं प्रत्यहमेवाभवत्। एकदासूरिर्व्याख्याने सर्वानुद्दिश्यावदत्-भोः श्रावकाः! मोक्षमार्गाराधकानि सन्ति यद्यपि बहूनि कारणानि तथापि तत्र सजातीयेषु समभावो, मिथो वात्सल्यं साहाय्यकरणं शुश्रूषणं चापि कारणत्वेन गण्यते। शास्त्रेऽपि दृश्यते यत्—

एगत्थ सव्व धम्मा साहिम्मिअ वच्छलं तु एगत्थ।
बुद्धि तुलाए तुलिया देवि अतुल्लाइं भणिआइं॥

अपरञ्च तावद् वात्सल्यभावेनैव श्रीसंघेऽद्य लक्षादारभ्य कोटिपरिमिता जनसंख्याऽवलोक्यते। एवं संख्याबलाधिके संघे या सर्वार्थसाधनिका शक्तिरत्र दृश्यते तादृशी नान्यत्र दृष्टचरा। अत एवोक्तम्-संघे शक्तिः कलौ युगे। संघबलेनैव साधारणा अपि भावुका अलभ्यं यात्रादिलाभं सौकर्येण प्राप्य पुण्योपार्जनं

कुर्वन्ति। ततश्च सर्वे धर्मरुचयश्च भवन्ति। एवं सजातीयवात्सल्यादिविषयकं मननीयं व्याख्यानं श्रुत्वा ते मिथ: समभावनोपेतमानसा बभूवुः।

एवं धर्मप्रचारकार्यं विधाय श्रीकक्कसूरिः शिष्यमंडलसहितः कोरण्टकपुरमगात्। तत्र परस्परं विक्षुब्धचेतसो भावुका उदासीना इवास्य स्वागतविधौ शिथिलादरा आसन्। ततश्च तत्र स्थितः कोरण्टकगच्छीयः श्रीमेरुशिखरमुनिः सर्वानेकीकृत्याह-भावुकाः! महानयं खेदस्य विषयो यद्भवन्तः सर्वेऽद्य पारस्परिकवैमनस्यमासाद्याचार्यस्य स्वागतविधावुदासत इति किमधिकमतः परं लज्जास्पदम्। यश्च मिथो विवादविषयः स तु सूरीश्वर एव शमयिष्यति, किन्त्वधुना प्राप्तकालं स्वागतं शीघ्रमेव सम्पादयन्तु। ते चोपाध्यायवचनमाकर्ण्य संमिलिता महान्तं स्वागतविधिं विधाय नगरप्रवेशमकारयन्। आचार्यश्च धर्मलाभाशिषा तान् सर्वान् संभावयामास। अथापरस्मिन् दिने विवादनिर्णयायाचार्यं व्यज्ञापयन्। भगवन्! अत्रैकेनोपकेशवंशीयेन कस्यचित् क्षत्रियस्य कन्यया सह पाणिग्रहणं कृतमेतदर्थमस्माकं मिथो वैमनस्यमस्ति श्रुत्वैतत् सूरिस्तान् सयुक्तिकं बोधयामास-उपासकाः! अत्र भवतां का विप्रतिपत्तिः? एका क्षत्रियकन्या भवत्संप्रदाये समागता जिनधर्माचरणं विधास्यति, पुण्यं च प्राप्स्यति। अपरञ्च भवन्तोऽपि क्षत्रिया एवासन्। किञ्च व्यावहारिकं क्षेत्रं यावद्विशालं तावदेवानुकूल्यं वर्तते। तस्य संकोचकरणेनैव महती हानिर्भवति। अतः क्षत्रियकन्या जिनधर्मस्य वासःक्षेपं गृह्णीयात् शिक्षां दीक्षां च स्वीकृत्य भगवतो महावीरस्य स्नात्रमहोत्सवं करिष्यति तदा संघस्थेन केनापि दुराग्रहो नैव विधेयः। शास्त्रे नीतिविषयेऽपि—

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्।

अतः सर्वे मिथो वात्सल्येन व्यवहरन्तु। ततः सर्वैरेव गुरुवचः शिरसाऽभिनन्दितम्। विरोधश्च विश्रान्तिमगात्।

अपरोऽपि वरदत्तस्य विषये जातः कलहः सूरिणा दूरीकृतः। वरदत्तोऽपि गुरुप्रभावप्रभावितो दीक्षामग्रहीत्। अयं सूरेः कार्यदक्षतायाः समवर्तित्वस्यैव शुभः परिणाम आसीत्।

अथैकदा सूरिवर्यो व्याख्याने कर्मव्यासक्त्या मोहं गतो जीवोऽनादिनि संसारे चक्रवत् परिभ्रमन्नुत्पद्यते म्रियते च। मोहनीयकर्मण उत्कृष्टा स्थितिस्तु सप्ततिकोटिकोटिसागरोपमा विद्यते, तत्रोनसप्ततिपरिमितां मिथ्यात्वदशायां जीवः क्षपयति। यदा धर्मप्राप्तियोग्यानां द्रव्यक्षेत्रकालभावानां निमित्तकारणानां तस्य लाभो भवति तदा मिथ्यात्वमोहनीय–मिश्रमोहनीय–सम्यक्त्वमोहनीया–नन्तानुबंन्धिक्रोधा–नन्तानुबंधिमाना नन्तानुबन्धिमाया–नन्तानुबन्धिलोभरूपाणां सप्तानां प्रकृतीनां क्षयं करोति। एवं सप्तविधप्रकृतिक्षयवशादस्य जीवेन दर्शनगुणः (सम्यक्त्वम्) प्राप्यते। यदाऽस्य क्षायकगुणप्राप्तिस्तदात्र संसारेनोत्पद्यते न च म्रियते। दर्शनेन सह ज्ञानचारित्रयोरप्यावश्यकत्वं श्रीभगवतीसूत्रस्याष्टमे शतके दशमोद्देशे विस्तरतो वर्णितम्। ईदृशं तात्त्विकज्ञानमस्माकमागमेषु बहुशो निरुपितम्। अतः संसारनिःसारतां विचिन्त्यात्मकल्याणसाधकः पन्थाः समाश्रयणीय इति।

एवं परमतत्त्वविषयकाणि बहूनि व्याख्यानानि दत्त्वा ततश्चन्द्रावतीसंघस्याग्रहातिशयेन तत्राययौ। तत्र च श्रीमालगोत्रीयेण दुर्गाश्रावकेण निमार्पितस्य श्रीशान्तिनाथस्य प्रतिमायाः प्रतिष्ठामकरोत्। सर्वेषां च विज्ञप्तिमनुमान्य चातुर्मासिकमवस्थानमपि चकार येन धर्मप्रचारकार्यं सविशेषतः सम्पादितम्। समाप्ते च चतुर्मासे तेनाचार्यानुमत्या शत्रुञ्जययात्रार्थं संघो निष्कासितः। क्रमेण तत्र तीर्थयात्रां समाप्य सूरेः संसर्गसंसेवनेन प्राप्तसंस्कारः संसारस्य हेयतां च ज्ञानोपदेशेन ज्ञात्वा शुभे दिवसे एकादशसंख्यकैर्भावुकैः सहार्हतीं दीक्षां जग्राह।

संघपतिश्च तदीयो ज्येष्ठपुत्रः कुम्भाशाहः संघेन सह चन्द्रावतीं प्रतस्थे। दीक्षामहोत्सवे सूरिरधोलिखितेभ्यः पदवीप्रदानं चक्रे।

१ पूर्णानंदादिभ्यः पञ्चभ्यो मुनिभ्य उपाध्यायपदम्।

२ राजसुन्दरादिभ्यः ,, मुनिभ्यो महत्तरपदम्

३ कुमारहंसादिभ्यः ,, मुनिभ्यः पण्डितपदवीम्।

एवं पदवीप्रदानेन मुनीन् संतोष्य तेषां चेतसि धर्मप्रचारकार्यप्रोत्साहनं विधाय सूरिः सौराष्ट्रदेशे विहारमकरोत्। तत्रापि ग्रामनगरेषु धर्मस्य जागृतिं प्रचारञ्च विधाय मांसाहारिणां मांसत्यागव्रतमहिंसापालनञ्चादिशदुपदेशदानेन। मौलिकग्रन्थानां निर्माणमत्र सावकाशेन सम्पादितं सूरिणा। बहूनां नूतनमन्दिराणां मूर्तीनाञ्च प्रतिष्ठापनमाचार्यस्य परम्पराप्राप्तमिति नोच्यत एव। एवमेव कच्छसिन्धदेशयोर्धर्मप्रचारं विधाय पञ्जाबप्रान्तमाजगाम। कियन्तं कालं तत्र विहृत्य धर्मामृतपानप्राप्तसंस्कारान् जनान् धर्ममयैकजीवनान् कृत्वा हस्तिनापुरे मथुरापुर्य्याञ्च तीर्थयात्रामचीकरत्। ततश्च बुदेलखण्डावन्तिमेदपाटादिषु विहृत्य मरुधरदेशमात्मना विभूषयामास। आचार्यस्यालौकिकव्याख्यानप्रभावेण दीक्षितानां साधूनां महती संख्या बभूव। ततः सर्वत्र देशे धर्मप्रचारार्थं तान् प्राहिणोत्। विहरणक्रमेणोपकेशपुरमागच्छदाचार्यस्तत्र कुमटगोत्रीयेण लाधाशाहेन प्रारब्धे महामहोत्सवे सूरीश्वरो देवीसच्चायिकासंसूचनमनुमान्य शुभे मुहूर्ते पूर्णानन्दमुपाध्यायमाचार्यगुणभूयिष्ठं देवगुप्तसूरिनाम्नाऽलंकृतं पट्टे प्रतिष्ठाप्य षोडशदिनानन्तरं योगबलेन स्वर्गमगच्छत्।

## वि० सं० ३५७ तः ] २९ आचार्यः श्रीदेवगुप्तसूरिः ( पञ्चमः ) वि० सं० ३७९ प० ]

श्रीकक्कसूरिपट्टे परमसौभाग्यशाली जिनागमगदितयमनियमतपोनिष्ठो मुनिपुङ्गवः श्रीदेवगुप्तसूरिः प्रतिष्ठापितोऽभूत्

असौ श्रीमालवंशीयः कोरण्टकपुरवास्तव्यश्चासीदस्य पिता लुम्बाशाहो माता च संफुल्लवदनपुण्डरीका पतिभक्तिपरायणा फुल्लादेवी। ततोः पुत्रो वरदत्तनामा।

बाल्यादेवासौ वरदत्तो धर्मप्रियो भगवतो महावीरस्य मन्दिरे स्नात्रपूजां नियमेनान्वतिष्ठत्। दुर्दैववशादस्य शरीरे रक्तविकृतिको रोगः प्रादुर्बभूव। किन्तु नित्यनियम एवासीदतः—अङ्गीकृतं सुकृतिनः परिपालयन्तीति वचनादसौ जिनालये भक्तिप्रवणमानसः पूजां विदधाति स्म। यदास्य रोगस्य प्रबलतरा वृद्धिर्जाता तदा कोरण्टकपुरवासिनः श्रावका भगवत आशातनाभयात्तं न्यवारयन्। केचिदस्मै प्रोत्साहनमपि ददुर्यत्—श्रीपालेन कुष्टरोगे सत्यपि भगवतोऽर्चना कृताऽस्योदतो नात्र कोऽपि दोषकलङ्कलेशोऽपि, ततः करोतु नामाऽसौ स्नात्रविधिं सुखेनेति तत्र पक्षद्वयं स्थितम्। महांश्च पारस्परिको विरोधो दैनंदिनं प्रावर्धत। वरदत्तोऽपि प्रभोः पूजनरूपां प्रतिज्ञामविहाय श्रीसंघस्य मिथः कलहप्रशमनार्थमनशनं चकार।

एवं प्रभोरर्चनामकुर्वतस्तस्य नव दिनान्यतिक्रान्तानि। तथापि स्वां प्रतिज्ञामनुपालयन्नसौ नवदिवसपर्यन्तमन्नजलादिकमपि नाग्रहीत्। अथ भगवता महावीरेणास्यानुग्रहार्थं प्रेरित इव श्रीकक्कसूरिरत्र समाययौ। सर्वैरपि श्रावकैः सूरेः शुभागमनरूपः समुचितावसरो निर्णयार्थं प्राप्तः। समारोहपूर्वकं विधाय च पुरप्रवेशमस्य पुरस्तादिममेव वृत्तान्तं मूलतो निवेदयामासुः। उभयतो विचारं कुर्वन्नाचार्योऽत्र कमपि निर्णयं सहसा दातुमशक्नोत्। ततो देवीं सच्चायिकां सस्मार। साऽपि सर्वाभिलषितसंपूरणकल्पलतिकेव तत्र समागता। तमाचार्यञ्च ज्ञापितवती भगवन्! अस्य वरदत्तस्य रोगोपद्रवप्रशमनकालः समापन्नप्राय एव। अत आगामिनि दिवसेऽस्मै वासःक्षेपो देयो भवतेति कथयित्वा वन्दनं विधाय वरदत्तपार्श्वमेत्य तं जगाद-भो वत्स! श्वः सूरिसमीपं गत्वा त्वया वासःक्षेपोऽवश्यं ग्रहीतव्य इत्युक्त्वाऽदर्शनमयासीत्। सोऽपि देवीकथितवचनमनुस्मरन्

सूरीश्वरपार्श्वे गत्वा गृहीत्वा च वासःक्षेपं मन्दिरे स्नात्रपूजार्थमगच्छत् । असौ पूजायै मन्दिरं गत इत्युपलभ्य प्रतिकूलपक्षीया आचार्यसन्निधिं प्राप्यावोचन् भगवन्! वरदत्तोऽस्यं प्रबलतररक्तविकृतिकरोगावस्थायामपि स्नात्रपूजायै गच्छतीति महदनुचितमेतदिति सर्वांस्तानाश्वास्य शनैरवादीत्—मा त्वरयत, मया सर्वमेतच्चिन्तितम् । अस्य व्याधिशमनसमयः समाप्त एवेति कृत्वा मयाऽनुगृहीतः स तत्र गत इति नासौ तस्यापराधः । सर्वे प्रकृतिं प्राप्ताः । अतः परं वरदत्तोऽप्युपस्थितः । एवं गुरुकृपाकटाक्षकटाक्षितं दृष्ट्वा सर्वे ते परस्परं क्षमामयाचन्त गृहं च प्रत्यागच्छन् ।

अथान्येद्युः सूरिर्व्याख्याने कषायस्वरूपमित्थमवर्णयत्

"कषायस्वरूपवर्णनम्"

अस्मिन् जगति सर्वेषां प्राणिनामात्मोन्नतिपथप्रबलविरोधकाः क्रोधमानमायालोभाख्याश्चत्वारः सन्ति कषायाः । ते हि प्रकृतिवैषम्यं विधाय कर्तव्यज्ञानशून्यतामापादयन्ति देहिनाम् । तत्र क्रोधमानौ द्वेषमूलौ रागमूलौ च मायालोभौ । अतश्चतुर्णां कषायाणां प्रेरकरूपेण स्थितावेतौ संसरणशीलस्य संसारस्य बीजमित्युच्यते ।

१ अनतानुबधिनश्चैते कषाया मौलिकं सम्यक्त्वमुच्छेदयन्ति ।

२ अप्रत्याख्यानिनश्चत्वार एते देशव्रतिगुणं प्रतिबध्नन्ति ।

३ प्रत्याख्यानिनश्चत्वारः सर्वव्रतिगुणस्य प्रतिबन्धका भवन्ति ।

४ संजलस्यैते कषाया वीतरागिगुणमवरोधयन्ति ।

एवं सर्वज्ञानविरोधका एवे स्वस्वरूपज्ञाने महतीमेव विप्रतिपत्तिमातन्वते । संसारे प्राणिन एत एव परिभ्रामयन्ति । सर्वमिदं श्रीभगवतीसूत्रस्य द्वादशे शतके प्रथमोद्देशे भगवतो महावीरस्य शंखश्रावकस्य च संवादे सुस्पष्टं प्रतिपादितम् । सर्वे च भवन्तः सदस्या नैव जानन्ति यत् कषायचतुष्टयावेशयुतानां कीदृशी दुःखदावस्था भवतीत्यत्रोदाहरणेन विशदीकरोमि । यथा—ढेलीग्रामे चंडानाम्नी स्थविराऽहर्निशमेत्रोष्णभोजिनं पुत्रमादरणमुपलालयन्ती निर्धनत्वात् पौराणां धनिकानां गृहे कर्मकरी बभूव । एकदा कस्यचिच्छ्रेष्ठिनो गृहादाह्वानमागतं दृष्ट्वा दारिद्र्यपीडिता ततः पुत्रस्नेहमपि दूरीकृत्य झटिति पाकं निर्माय नागदन्ते संस्थाय श्रेष्ठिनो गृहमगच्छत् । इयं पुत्रं चण्डप्रकृतिं ज्ञात्वाऽपि बहिर्गतं तं प्रतीक्षमाणाऽत्रागतासीत् । अथासौ पुत्रो गृहमेत्य तत्रासंनिहितां दृष्ट्वा क्रोधपूर्णहृदयो यावत्सा कार्यं समाप्यागता तावत् तां भर्त्सयन् जगाद-आः! पापिनि! मामपि दूरीकृत्य कुत्र गताऽसीः? अद्य शूल एवारोपयामि किम्? बुभूक्षापीडितं मां न पश्यसीति पुत्रवचनं श्रुत्वा साऽपि क्रुद्धा तमाह-मूर्ख! किं तव हस्तौ छिन्नौ? येन नागदन्तावस्थितमपि नीत्वा न भक्षितम्! एवं कलहं कृत्वाऽन्ते तौ विरतौ बभूवतुः । कालान्तरे तौ निधनमगच्छताम् । ततः परमसौ कस्यचित् श्रेष्ठिनः, सा चापि तथैव धनिकस्य गृहे जन्म लेभे । व्यतीते च काले दुर्भाग्यवशात्तयोरेव वाग्दानमभूत् । स च प्राप्तवयस्को देशान्तरं गत्वा प्रभूतोपार्जितधनस्तस्यै कङ्कणद्वयं प्राहिणोत् । स्वदेशमागन्तुमसौ केनचिन्मित्रेण सह निर्गतस्तस्या एव कन्याया ग्राममागतोऽपि नाजानादयं श्वसुरग्राम इति । बहिरुद्याने स्थितः । अथ सा च सायं शौचार्थं गता केनापि तस्करेणाक्रान्ता भृशं चुक्रोश । ततश्चौरो तस्या हस्तौ छित्वा कंकणद्वयं गृहीत्वा मध्य एव राजसेवकानां समापततामागमनं ज्ञात्वा तस्मिन्नेवोद्याने समागतो यत्राऽसौ श्रेष्ठिपुत्रः सुप्तः । भयादनेन तत्समीप एव मुषितं कंकणद्वयं स्थापितम् । आगता राजसेवकास्तमेव चौरं मन्यमाना राजसमीपमनयन् । शूले च स आरोपितो राज्ञा । सुहृदसौ परं पीडितः श्रेष्ठिपुत्रस्य श्वसुरालयं गत्वाऽसौ स्वजामाता एव शूलारूढः कृतो राज्ञेति सर्वं तस्मै न्यवेदयत् । तेनाप्युक्तमेषा मे तनया छिन्नहस्ता, किं करोमि! अहो महत्कष्टं खलुभयतः प्राप्तं मयेति! अनेन स्पष्टं ज्ञायते क्रोधेन कीदृशी परम्परामनर्थानामवाप्नोति जनः । अतः सर्वथा विचार्य

कषायचतुष्टयाधीनमनस्कैर्न कदापि भवितव्यम्। प्राप्तेष्वपि संयमनेन तद्विनोदनोपायः कर्तव्यः। एवमेव शनैः शास्त्राणां श्रवणेन गुरूणामुपदेशेन, धर्मकर्माचरणेन च शाश्वती कल्याणसाधिका, आत्मोन्नतिर्भवति,।

अथ वरदत्तो गृहं गतोऽचिन्तयत्-अहो मदर्थमेव महानयं संघे कलहो जातः। अस्तु। तथापि किं नामात्र मया प्राप्तम्, यच्च प्राप्तव्यं तत्तु नैवात्मकल्याणमासादितमतो धर्मदीक्षयैवात्मन उद्धारं करोमीति निश्चित्य स्वकीयं दृढं निश्चयं सूरिसमीपे स्फुटमवोचत्। सूरिरपि कल्याणसाधकमेव निश्चयमनुमान्य सप्तभिः श्रावकैः सहितं दीक्षयामास। ततः पूर्णानन्देत्यभिधानं प्राप्य क्रमेण गुरुकृपासमासादितशास्त्रवैदग्ध्यः तपःप्रभावोत्पन्नज्ञानचक्षुः शास्त्रार्थचातुरीविरसीकृतविद्वज्जननिकरो योग्योऽयमिति सूरिणा विचार्य देवगुप्तसूरीति नाम्ना स्वपट्टे प्रतिष्ठापितः।

पट्टपदमलंकृत्यैव पूर्वाचार्यपरम्पराप्राप्तधर्मप्रचारकर्तव्यैकमानसः सूरिरसौ विहरणक्रमेण महदेव विहारस्य क्षेत्रं सर्वतोभावेन पूर्णविकसितं व्यधात्। शिष्यमण्डलं सम्यग् विभज्य सर्वत्र धर्मप्रचाराय प्रेषयामास, स्वयमपि तथैव विहारपरिपाटीमुररीचकार।

यस्य शिष्यमण्डलमेव कार्यक्षममासीत् तस्य कार्यभारे सौकर्यन्तु स्वाभाविकमेव, शिष्यसमुदाये देवप्रभनामामुनिराकाशगामिविद्यापारगामी, योनिप्रभृतशास्त्रनिपुणश्चासीत्। स च प्रत्यहं शत्रुञ्जयतीर्थयात्रां विधायान्नं जलं चागृह्णात्। एकदा शत्रुञ्जययात्रार्थं गच्छतः संघस्य म्लेच्छैः सहाक्रमणप्रसङ्गो जातः। तेन देवप्रभमुनिनेदमवगतं तदा स्वविद्याबलेनासंख्यकान् योधानुद्भाव्य यवनान् पराजयत, पराजितास्ते शत्रुञ्जयतीर्थेऽपि संघं त्रासयामासुः। सुष्ठूक्तं खलु—शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः। एवं रक्षितजीवना मध्य एव त्यक्ताः, पुनरुपद्रवायोद्यताः, ततोऽसौ मुनिर्व्याघ्ररूपं, निर्माय कांश्चित्पातयामास, कांश्चन प्रजहार, अपरान् विदारयामास। संघश्च दुःखादुन्मोचितः। प्राप्ताया विद्यायाः परोपकारेणैव कृतार्थता भवति। या तदर्थमेवाधिगता सैव प्रभूत—पुण्यसंचयमासादयति। अत एवोच्यते—

> विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।
> खलस्यसाधोर्विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय॥

द्वितीयः सोमकलशनामा सरस्वतीप्रदत्तवचनसिद्धिरूपवरप्रदानयुक्तः तृतीयश्च गुणनिधानो वचनलब्धिसमन्वितश्चाभूत्।

सूरेश्चतुर्थः शिष्यः पुरन्धरहंसो नाम वाचनाचार्यः। असौ वाचनाकार्ये परं प्रावीण्यमुपागतः स्वगच्छीयान्न केवलम्, अपि तु भिन्नगच्छीयानपि साधूनागमवाचनां कारयामास केवलमागमवाचनां प्रदाय ज्ञानप्रचार एवास्य मुख्य उद्देशोऽभूत्।

एवमादयो बहवः शिष्याः परममेधाविनः शास्त्रचर्चाविद्योतितदिग्विभागा आचार्यस्यैव महतीं कीर्तिं दिगन्तगामिनीमकार्षुः। शिष्योत्कर्षेणाचार्यस्यैवोत्कर्षः सर्वत्रैव दृष्टचरः। कविकुलगुरुणा कालिदासेनेदं स्फुटमुक्तम्।

> सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः, संभावनागुणमवेहि तमीश्वराणाम्।
> किं प्राभविष्यदरुणस्तमसां विभेत्ता, तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्॥

अथ सूरीश्वरो मरुधर-लाट-सौराष्ट्र-कच्छ-सिन्ध-पञ्चालादिषु देशेषु धर्मप्रचारं कुर्वन् चित्रकूटमाजगाम। श्रीसंघेन साञ्जलिबन्धमभ्यर्थितस्तत्रैव चतुर्मासमकरोत्। सर्वागमसाररूपाणि दार्शनिक-तात्त्विकादिविषयकाणि व्याख्यानानि विधाय जिनधर्मे दृढामास्थामभिवर्धयाञ्चकार। तत्र मेदपाटप्रान्तीया अन्ये च भूमिपतयः सूरीश्वरस्य व्याख्यानैः संप्राप्तधर्मसंस्काराः ठाकरशीश्रावकेण सूरेरुपदेशादामन्त्रितायाः श्रमणसभायाः कार्यभारनिर्वाहका

बभूवुः। नानादेशेभ्य आगतानां श्रमणानां महत्या संख्यया सर्व एव समूह एकत्रैव संनिहित एकनगरीवास्तव्य इवादृश्यन्त जनैः। सभायां पञ्चसहस्राधिकाः साधवो लक्षाधिकाश्च श्रावका, अपरे च महीपाला अन्यधर्मावलम्बिनश्च धनिकशिरोमणयः श्रेष्ठिनः सभायाः परमरामणीयकमधिकं विस्तारयामासुः। सभावेद्यामसौ सूरीश्वरः श्रीदेवगुप्त-सूरिर्व्याख्यानपीठमारुरोह तदा सदस्याः सर्वे महता जयशब्देन तमभिननन्दुः। आचार्येण प्रशान्तगम्भीरेण स्वरेण हृदयङ्गमं व्याख्यानमारब्धम्-सदस्याः! सुदुःसहेऽस्मिन् कलिकाले धर्मस्य ह्रास उपासकानां शैथिल्येन सर्वत्र विहरता मया प्रायो दृष्ट एव । धर्म एव। सर्वस्य जगतः प्रतिष्ठा। सर्वप्राणिनामपेक्षया ज्ञानत एव मानवानां प्रधानत्वम्। अन्यथाऽऽहारनिद्रादिषु पशुपक्ष्यादिभिः समानतैव। अत एवोच्यते-

आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेभ्योऽभ्यधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।
अपि च न जातुकामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः।
धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः।

अतो धर्माचरणं विना नैव मनुजजन्मनः साफल्यं लोके। स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादिति यथाकथञ्चिदप्याचरितो धर्मांशः सर्वथैव क्षेमङ्करो भवतीति धार्मिकानुद्दिश्य पश्चात्प्रचारकानुद्दिश्याह-श्रावकाणामपेक्षया धर्मप्रचारकाणां भवतां समेषां साधूनां साध्वीनाञ्चावश्यकत्वेन प्रधानं खलु कर्तव्यमास्ते यत्सर्वत्र जिनागमगदितसिद्धान्तसरणीमनुसृत्यैव धर्मप्रचारः समधिकतया कर्तव्यः। कर्तव्यपालनार्थमेव साधवोऽत्र स्थापिताः। ते च सर्वत्र व्याख्यानोपदेशादिभिः सर्वान् धर्माचरणासक्तान् कुर्युः। अधुना यत्र कुत्रचित्प्रान्तेषु बौद्धानां प्रचारो वर्तते तदर्थमस्माभिः सावधानैर्भवितव्यम्। एवमनेन धर्मपथेन विहरतां भवतां भगवान् महावीर एवानुकूल्यं विधास्यतीति सर्वान् कर्तव्यपरायणान् व्यधात्। ते सर्वे च सामयिकं सूरिवच आदृत्य धर्मरक्षा-प्रचारपालनादिषु दत्तमनस्का बभूवुः। सूरिश्च तत्रागतानां साधूनां मध्ये ये योग्या आसन् तान् पदवीसमर्पणेन विशेषोत्साहोत्साहितानकरोत्। यथा

१—योगीन्द्रमूर्त्यादिभ्यः सप्तभ्यः पण्डितपदम्।
२—महेन्द्रविमलादिभ्यो द्वादशभ्यो गणिपदम्।
३—निधानकलशादिभ्यः पञ्चदशभ्यो गणिपदम्।
४—शान्तिशेखरादिभ्यः पञ्चभ्य उपाध्यायपदम्।

एवं महता समारोहेण समाप्य सभाकार्यं तत्रागतानां स्वस्वग्रामनगरागमनप्रार्थनामङ्गीकृत्य, सर्वस्मिन् प्रान्ते विहृत्य धर्मप्रचारप्रवृत्तिं वेगबहुलामकरोत्। ततः क्रमेणाघाटपत्तनमाजगाम। तत्र श्रेष्ठिगोत्रीयो मन्त्री श्रीनाहडः पार्श्वनाथमन्दिरं निर्मापितवानासीत् तत्र प्रतिमाप्रतिष्ठापनं विहितम्। सूरेरुपदेशेन विज्ञातधर्मतत्त्वा अष्टौ भावुका दीक्षामग्रहीषुः। ततो मरुधरप्रान्ते विहरन् शाकम्भरी-हंसावती-मुग्धपुरादीनि ग्रामनगराणि स्वागमनधर्मतत्त्वोप-देशादिभिरलङ्कृत्य माण्डव्यपुरमगमत्। तत्र डिड्डुगोत्रीयेण ठाकरशीशाहेन विहिते महामहोत्सवेऽशोकचन्द्रं श्रीसिद्धसूरिनाम्ना प्रव्राज्य तं स्वपट्टे प्रतिष्ठाप्य सप्तदिनान्यनशनेनातिवाह्य योगचर्यया शरीरमत्याक्षीत्।

## वि० सं० ३७० तः ] ३० आचार्यः श्रीसिद्धसूरिः (पञ्चमः) वि० सं० ४०० पं० ]

श्रीदेवगुप्तसूरिपट्टे जिनधर्मप्रचारको मन्त्रतन्त्रादिविविधविद्याविशारदः श्रीसिद्धसूरिः समायातः अस्य जावलीपुरं निवासस्थानम्। पिता मोरक्षगोत्रीयो जगाशाहो माता च पतिव्रतानामग्रेसरीभूता धर्म-प्रिया जेतीनामिका।

एकदा जेतीदेवी निद्रिताऽर्धरात्रे रत्नागमस्वप्नं विलोक्य पतिपार्श्वमेत्य तं तदीयस्वप्नवृत्तान्तमगादीत् । ततस्तेन कोऽप्यलौकिकप्रभावो रत्नोपमो जीवस्त्वद्गर्भमागत इति कथयित्वा समादृता। सर्वथा धर्ममार्गानुसरणशीला चतुर्थे मासे शत्रुञ्जययात्रायै गन्तुमियेष, तदर्थञ्च स्वामिनं व्यज्ञापयत्। असौ श्रेष्ठी धनं धर्मसात् कर्तुं तदीयं वचोऽभिननन्द। शुभे मुहूर्ते विवेकविधानमुनेरध्यक्षत्वे संघं निःसारितवान्। क्रमेण तत्र गत्वाऽष्टान्हिकामहोत्सवध्वजारोपणार्चनादिकानि तीर्थकार्याणि कृत्वा परममानन्दं संघस्था सर्वेऽवापुः । एवं तीर्थयात्रयाऽक्षयं पुण्यमासाद्य मध्ये दीनेभ्योऽन्नवस्त्रादिकं, मन्दिराणां जीर्णोद्धारकादीनि च कुर्वन्नसौ श्रेष्ठी स्वनगरं प्रत्यागच्छत्। संघश्च समुचितसत्कारेण संमानितः।

अथैवं प्राप्ते दशमे मासे प्राची रमणीयबिम्बं सर्वजगत्कल्याणकरं तेजोनिधानं रविमिव साऽलौकिकतेजःपुञ्जपुञ्जितावासस्थानं, सौम्यमूर्तिं सुकुमारं कुमारं सुषुवे। क्रमेणासौ सिते दले रुचिरमूर्तिश्चन्द्र इव ववृधे। एवमष्टमेऽब्देऽध्ययनार्थं विद्यालयमगच्छत्। पूर्वजन्मकृतसुकृतपुण्यप्रभावेणाल्पेन कालेन व्यवहारोपयुक्तं ज्ञानं प्राप्य धर्मसंस्कारभावितहृदयो जिनागमतत्त्वजिज्ञासुरभव । तदपि धर्मज्ञानं शनैः शनैः सामयिकमासादितम्। प्रत्यहं जिनालये गमनं, स्नात्रपूजाविधिः, देवगुरुमुनीनाञ्च वंदनमस्य दैनंदिनीयः क्रमो जातः। एवमस्य धर्मप्रीतिं विचिन्त्य तस्य माता तत्पितरं संबोध्य ठाकुरसिंहस्य बलाहगोत्रोद्भवस्य चतुरश्रावकस्य शीलरूपगुणसमन्वितया जिनदासीनामिकया कन्यया सह पाणिपीडनमकारयत्। येन संसारसुखासक्तोऽपि निसर्गतो दृढतरधर्मसंस्कारविशुद्धमानसो, न मनागपि धर्मक्रियाभिर्बहिर्मुखो बभूव।

व्यतीतेषु षट्सु मासेषु श्रीदेवगुप्तसूरिरात्मना जावलीपुरमभूषयत्। जगाशाहस्तत्पुत्रः ठाकरसिंहश्च श्रीसंघेन सहितस्तस्य पुरप्रवेशे महामहोत्सवं चकार, ततो व्याख्यानकाले कृतं मङ्गलाचरणमात्रमेव श्रुत्वा सर्वे श्रावका आनन्दाप्लावितचेतसो बभूवुः। सूरीश्वरस्य व्याख्याने त्यागवैराग्यात्मकल्याणभावनानां विशेषतः प्राधान्यमासीत्। अत्र संसारस्यासारत्वमुद्दिश्य सौम्यगंभीरया वाचाऽवोचत्-अयि धर्मतत्त्वश्रवणसमेधितमानसाः श्रावकाः! अयं संसार एव सर्वेषां दुःखानां मूलनिवासोऽस्तीति भगवद्भिस्तीर्थङ्करैरेवं सर्वेभ्य उपदिष्टम्—

जम्मं दुक्खं जरा दुक्खं रोगा य मरणाणि य।
अहो! दुक्खो हु संसारो जत्थ किस्सं तिजंतुणो।
जरामरण कंतारे चाउरन्ते भयागरे।
मये सोढानि भीमाणि जम्माणि मरणाणि य॥

इमानीह जन्मजरामरणादीनि सर्वाण्येव दुःखानीन्द्रियेभ्य एव प्रभवन्ति। इन्द्रियविषयभूतौ कामश्च भोगश्च। आभ्यां कामभोगाभ्यां जीवोऽज्ञानवशंगतः संसारेऽस्मिन् परिभ्रमति। भ्रान्तिभ्रमणयुतचेता असौ मूढो दुःखेऽपि सुखं मत्वा प्रवृत्तो भवति। अर्थात् हालाहलं विषमप्यमृतं मत्वा पिबति। यथा—

जहां किंपाकफलाणं परिणामो ण सुन्दरो।
एवं भुत्ताण भोगाणं परिणामो ण सुन्दरो॥
सल्लं कामा विसं कामा कामा आसीविसोवमा।
कामेय पत्थेमाणा अकामा जेति दुग्गई॥

किञ्च यथाकथंचित्कामभोगाभ्यां प्राप्तवैराग्योऽपि जीवो मातृपितृभार्यापुत्रादिषु स्नेहबद्धः कर्मबन्धमवाप्नोति,। यथा—

माया पिया पहुसा भाया भज्जा पुत्ता य ओरसा ।
नालं ते मम ताणाय लुप्पंतितस्स सकम्मुणा ॥

अहो ! महत्कष्टं खलु ! न जानात्यसौ मूर्खो यदा प्राप्ते हि कर्मोदये नैते मे संरक्षका भविष्यन्तीति । अन्तेत्वहमेक एव गमिष्यामि । अत एव, सुस्पष्टमुक्तम् ।

तृणानि भूमौ पशवश्च गोष्ठे भार्या गृहद्वारि जनः श्मशाने ।
देहश्चितायां पतितस्तदानीं कर्मानुगो गच्छति जीव एकः ॥

ततः कृतं कर्मतु तेनैवोपभोक्तव्यं भवति । तत्रोदाहरणं यथा—कश्चिदेको मिष्टान्नकोपाचराजकर्मचारिभिरादिष्टोघृतपोलिका निर्ममे । सर्वाश्च निर्माय तोलयित्वा स्थापिताः । ततोलुब्धमना असौ ततश्चतस्त्रो निष्कास्य गृहं प्रेषयामास । तत्रत्यैर्विचारितं वयं चत्वार एता अपि तावत्संख्याका, अतः प्रतिजनमेकेति कृत्वा तिस्रः समापिताः । ततो दैववशादागतं जाल्मातरं वीक्ष्य पाचकार्थं स्थापितां घृतपोलिकां तस्मै सा गृहिणी ददौ । अपरत्र राजसेवकैर्नीत्वा ताःपोलिकाः पुनस्तत्रतोलिताश्चतस्रो न्यूना जाताः । ते च तद्गृहं गत्वा बहु भर्त्सयन्तस्तं ताडयामासुः । तेनोक्तं मान्या यद्यपि मुषिता मया किन्तु न खादिताः । गृहिण्यादिभिरेवखादिताः । ततस्ते ताडनोद्यतास्तावदुक्तं भार्यया—अस्माभिः सर्वैरेवंनोक्तं यच्चोरयित्वाप्यानयेति । पश्चादसावेव तैः शिक्षां प्रापितः । एवं ये । शुभाशुभं कर्मकेति स एवोपभोक्ता तस्य फलस्य भवति । एकस्यैवापराधस्य महान् दण्डोऽनुभूयते लोके का कथा यावज्जीवं कृतानाम् ।

अपरश्च तृष्णावशीभूतचेतसः, कियन्तो धनार्जनवर्धनरक्षणोत्सुका हिताहितं नैवालोचयन्ति । प्राप्तेऽपि द्रव्ये सैव भगवती धनाशा चिरं जागर्ति तेषां मानसे । यथा—

सुवन्नरूप्पस्यउपव्या भावे सियाहु कैलास समा असंखाय ।
नरस्स लुद्धस्स न ते हि किंचि इच्छाहु आगाससमा अणन्ताय ॥

न सहस्राद् भवेत् तुष्टिर्न लक्षान्न च कोटिना ।
न राज्यान्न च देवत्वान्नेंद्रत्वादपि देहिनाम् ॥

अतः संयम्येन्द्रियप्रचारमात्मकल्याणप्राप्तये विचारो विधेयः । तदर्थं च न वयोऽपेक्षितम् । बाल्ये कौमारेऽपि सैव कल्याणभावना साधीयसी । शास्त्रकारैरत्रोक्तमेव । यथा—

परिजूरइ ते सरीर यं केसा ! पडुरायहवन्ति ते । से सव्व बलेय हावई समयं गोयमा ! मा पमाय ऐं । जरा जाव न पीडेइ वाही जाव न बड्ढइ । जाविं दिया न हावन्ति तावधम्मँ समायरे ॥

महानुभावाः । आत्मकल्याणप्राप्तये शोभनोऽवसरो न मुधा क्षपणीयः । शुभस्य शीघ्रं कर्तव्यम् । कालस्य कुटिला गतिः । न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतमिति विषयेऽस्मिन् श्रीतीर्थङ्करैर्गणधरैः पूर्वाचार्यैश्चेदमेवोपदिष्टम् । तथाहि—अरइ गंडं विसुइया अयंके विविहा फुसंतिते । विहडइ विद्धंसइ ते सरीरं यं समय गोयमा । मा पमायए ॥

वोच्छिंद सिणेहमप्पणो कुमुदं सारयियं च पाणियं से सव्वं सिणेहवज्जिए समयं गोयमा । मा पमायए ॥

किमधिकं वक्तव्यमवशिष्यते ! भवतामात्मोन्नतिर्येन स्यात्तदर्थमेवागमपरिशीलनसाधुसेवनात्मचिन्तनाद्युपायानाश्रयन्तु । अन्यथाऽन्ते पश्चात्तापादृते नान्या गतिरित्युक्तमत्र ।

अवले जह भारवाहए मामग्गे विसमेऽवगाहिया ।
पच्छा पच्छाणुतावए समयं गोयमा । मापमायए ॥ इति ॥

एवं वस्तुतत्त्वविवेचनक्षमं व्याख्यानमाकर्ण्य को नाम मुदं न प्राप्नुयात्। अस्यैव प्रभावेण वैराग्यरागरञ्जितान्तरङ्गः ठाकरसिंहो मात्रा पित्रा भार्ययाऽन्यैस्त्रयोदशभिः श्रावकैश्च सह दीक्षामग्रहीत। ततश्चासौ अशोकचन्द्रमुनिरिति प्रसिद्धिमगात्। सूरीश्वरश्चैनं सर्वागमतत्त्वसंग्रहणक्षममाचार्यगुणगणैरुपशोभितं सिद्धसूरीति नाम्ना पट्टेऽस्थापयत्।

श्रीसिद्धसूरिः देव्याः सच्चायिकाया अनुमतिं प्राप्य दक्षिणस्यां दिशि धर्मप्रचाराय जगाम। तत्र ग्रामनगरेषु विहारक्रमेण सर्वेभ्यः श्रावकेभ्यो धर्मोपदेशं कुर्वन् मानखेटनगरमाससाद। सर्वोपासकानामादरातिशयवशात्तत्रैव चतुर्मासावस्थानमङ्गीचकार। सर्वागमरहस्यपूर्णानि व्याख्यानानि तावदवधिकं कृतानि। येनात्राष्टभिर्जनैर्दीक्षा गृहीता। ततश्च विहृत्य क्रमशो मदुरामागच्छत्। यशोदेवश्रेष्ठी भगवतो महावीरस्य मन्दिरं निर्मापितवान्। तस्य प्रतिष्ठामहोत्सवः सूरेरेवाध्यक्षत्वे जातः। प्रतिमा च शुभे मुहूर्ते वरदहस्तेन स्थापिता। ततश्च महती श्रमणसभा कारिता। तत्र कर्तव्यज्ञानमुपदिश्य, समुचितेभ्यः पदवीप्रदानमपि कृतम्। विरक्तिजनकव्याख्यानेनात्रापि द्वादश भावुका दीक्षां स्वीचक्रुः। ततो विहरन् सोपारपत्तनमेत्य चतुर्मासं समाप्य दीक्षितानकार्षीदष्ट भावुकान्। एवं दक्षिणस्यां दिशि सर्वत्र ग्रामनगरेषु विहारं कृत्वा सर्वतोभावेन धर्मप्रचारमाधाय शिष्यमण्डलसहितः सूरीश्वरो रैवताचलं विहारक्रमेणाजगाम। तत्र श्रीमद्भगवतो नेमिनाथस्य यात्रां चकार।

अथैकदा तत्र योगिनां महान् संघः समागतः। तत्रैकस्तरुणवयास्तापसोऽधिगतविद्योऽपि सर्वथाऽऽत्मानं पण्डितं मन्यमान आसीत्। कदाचित्सूरीश्वरस्य साधारणः कश्चित् शिष्योऽन्यैः साधुभिः सार्द्धं बहिः शौचादि निवर्तयितुमगमत्। भाग्यवशादसावपि मध्ये संगतः। ततो विद्वदग्रेसरस्तापसो मुनिमवादीत्-मुने! भवदीयधर्मस्य कस्तावन्मुख्यः सिद्धान्तः?

मुनिः—अस्मदीयधर्मस्य स्याद्वादो नाम प्रथमः सिद्धान्तः। अपरमपि तस्य नामानेकान्तवादः।

तापसः—प्रथमं तस्य स्वरूपं विवेचयतु।

मुनिः—वस्तुन्यनन्ताः धर्माः, यत्रैकमेव धर्ममुद्दिश्य कथनमसौ स्याद्वाद इत्युच्यते।

तापसः—सोपपत्तिकमुदाहरणमपेक्षितमत्र।

मुनिः—यथा एकस्यामेव वनितायां मातृत्वस्वसृत्वपुत्रीत्वभार्यात्वादयोऽनेके स्वभावाः। तत्र मातेयमिति मातृत्वज्ञाने पुत्रस्यापेक्षाऽपेक्षितैव। अपरञ्च तत्र मातृत्वे निर्धारितेऽपि स्वसृत्वादयो धर्मा नैवापलपितुं शक्याः अन्येषामपेक्षया तत्र स्वसृत्वादीनां विद्यमानत्वात्। एवं यस्मिन् वस्तुनि वर्ण्यमानेऽन्येऽपि तत्रान्यापेक्षया विद्यन्त एव धर्माः। यथा-आत्मा ज्ञानवानित्युक्ते ज्ञानस्य विद्यमानत्वेऽपि दर्शनादीनामन्येषां सत्ताऽस्त्येव।

१—तापसः—भवन्मते को नामात्मा? किमस्य स्वरूपम्?

२—मुनिः—आत्मा तावन्नित्योऽक्षयः सच्चिदानन्दोऽसंख्यातः प्रदेशी शाश्वतो नित्यं द्रव्यम्।

३—तापसः—यद्ययमात्मा नित्यः शाश्वतं द्रव्यमित्युच्यते तर्हि जीवस्य जन्म मरणञ्च कथमुपपद्यते

४—मुनिः—न जायते म्रियते वा कदाचिन्न हन्यते हन्यमाने शरीरे।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

तापसः—कथमत्र निश्चीयते? प्रत्यक्षन्तु तथैवोपलभ्यतेऽयं जायते म्रियते। लोकव्यवहारेऽप्येवं व्यवह्रियतेऽयं मृतः अयमुत्पन्न इति।

मुनिः—अस्तु। व्यहरन्ति सर्वे तथैव। किन्त्वेतत् स्थूलशरीरापेक्षयैवाभिधीयते। कर्मण उदयादस्य शरीरप्राप्तिः। ततश्चायुषा सह संबन्धोऽपि। तस्य स्थितौ समाप्तायां पूर्वशरीरं विहायान्यदाश्रयति शरीरमेवमस्य

शरीरग्रहणपरम्परा प्रवर्तते।

तापसः—पञ्चभिस्तत्वैः पञ्चभिर्भूतैश्च शरीरमुत्पद्यत इति किं नाम सत्यमिदम् ?

मुनिः—सत्यम्। अत्राप्यपेक्षाऽस्त्येव। सूक्ष्मेक्षिकया भवत्कथनानुसारेणैव विचार्यताम्। यदि पञ्चभिस्तत्वैः शरीरमुत्पन्नं तदा तत्वनाशे शरीरस्य नाशः स्वाभाविक एव। तथापि शाश्वतोऽनादिर्जीवोऽवशिष्ट एव। तत्ववादिभिश्च शरीरस्थितान्यस्थिमांसादिरूपाणि तत्वानि मतानि। तेषां च नाशे शरीरनाश एवायातः। निमित्तापाये नैमित्तिकस्याप्यपायः स्वत एव।

तापसः—स्थूलशरीरमित्युक्तेऽपरमपि किमस्ति शरीरम् ?

मुनिः—एवम्। शरीराणि च पंचविधानि। औदारिकम्, वैक्रियम्, आहारकम्, तैजसम्, कार्मणञ्चेति। तत्राद्यानि त्रीणि स्थलशरीराणि। अवशिष्टे चतुर्थपञ्चमे सूक्ष्मशरीरे। आहारकं च शरीरं लब्धिपात्राणां मुनीनाम्। शेषाणि च सर्वेषां जीवानां भवन्ति। तत्रौदारिकवैक्रिययोः शरीरयोरुत्पत्तिविनाशौ। लोकाश्च जन्म मरणञ्चेति व्यवहरन्ति। तैजसकार्मणे शरीरे च सदैव जीवेन सह वर्तेते। यस्मिन् काले जीवात्ते पृथक्त्वमाप्नुते तदा ते शरीरे रिक्ते भवतः। तदा जीवस्य मोक्षो भवति, अर्थाज्जीवोऽशरीरो भवति। यं च जीवं निरञ्जनं निराकारं चाहुः शरीरविषयकमिदं तत्वार्थसूत्रे द्वितीयाध्याये-औदारिकवैक्रियाऽऽहारकतैजसकार्मणानि पञ्च विधानीत्युपक्रम्य शुभं विशुद्धमव्याघाति चाहारकं चतुर्दशपूर्वधरस्यैवेत्यन्तेन स्फुटीकृतम्।

तापसः—जीवात् शरीरं भिन्नं तदा शरीरस्य सुखदुःखयोः सद्भावे जीवस्य ते कथमनुभूयेते ?

मुनिः—जीवात्मना सह कर्मणः संबन्धः संयोगाख्यः। शरीरञ्च कर्मणः प्रकृतिः। भ्रान्तश्च जीवात्मा ममेदं शरीरमिति मन्यते। तेनैवाहं सुखी दुःखीत्यादि भ्रान्त्यात्मकं ज्ञानमुपपद्यते।

तापसः—शरीरेऽस्मिन् जीवात्मा कुत्र कथं स्थितः ?

मुनिः—यथा तिलेषु तैलम्, पयसि घृतम्, पुष्पे च सौरभमिव सार्वत्रिकी शरीरेऽस्य नीरक्षीरन्यायेन स्थितिः प्रसिद्धा।

तापसः—जीवात्मनः शरीरस्य चोभयोः कुत आरभ्य संयोगः ?

मुनिः—नानयोर्नूतनः संयोगः, अनादिकालादेवोभयोः संयोगः।

तापसः—संयोगो हि वियोगपूर्वकः। तत्र यदि संयोगाभावस्तदा वियोगाभावे कथमस्य जीवस्य मोक्षप्राप्तिः संगच्छते ?

मुनिः—यद्यपि जीवास्यानादिः संयोगस्तथापि वियोगस्तु सम्भाव्यत एव। यथा तिलेषु तैलस्य कदा संयोगः ? अर्थात्तत्र तैलं केन निक्षिप्तम् ? न केनापि। तथापि यन्त्रादिना संपेषणेनोभयोः पृथक्करणरूपो वियोगस्तु भवत्येव। एवं जीवात्मनः शरीरस्य च संयोगस्यानादित्वेऽपि सम्यग्दर्शनज्ञानचारित्ररूपाणां मेलनेन वियोगो भवति। अत एवोक्तमस्मच्छास्त्रे—सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः। तत्वार्थसूत्रप्रथमाध्याये १ सूत्रम्।

तापसः—तर्हि सर्वेषामेव जीवानां मोक्षप्राप्तिर्भविष्यति ?

मुनिः—ये हि सम्यग्दर्शनज्ञानचारित्राणामाराधनं कुर्वन्ति त एव मोक्षप्रापका भवन्ति। संसारासक्तचेतसां तत्रैव परिभ्रमतां जनानां पूर्वोक्तसाधनत्रयाराधनं प्राक्तनजन्मशुभसंस्कारप्राबल्यं कथङ्कारं सर्वेषां संभवेद् येन मोक्षः स्यात्। जीवाश्चात्र चतुर्विधाः—१ निकटभावी २ दुर्भावी, ३ जातिभव्यः, ४ अभव्यः। तत्र जातिभव्याभव्ययोर्ज्ञानादीनामाराधने संयोग एव दुर्घटः। ततश्च मोक्षप्राप्तेः का कथा। जीवस्याष्टसंख्यकानां कर्मणां मध्ये मोहनीयकर्मण एव प्रभावेण ते संसरणशीला ज्ञानादीनामाराधने नैव शक्ता भवन्ति।

एवमादिकेन शास्त्रतत्त्वावबोधनेनात्मकल्याणमार्गोऽस्मै उपदिष्टप्रायः ।

द्वितीयश्चास्माकं सिद्धान्तः—अहिंसा परमो धर्मः ।

ज्ञानस्येदमेव मुख्यं प्रयोजनम् । अतो जिनागमपरायणाः साधवः सजीवमनुष्णीकृतं जलमग्निं वनस्पतिञ्च नैव स्पृशन्ति । आत्मकल्याणसाधकस्यायमेव प्रधानतमो मार्ग इति । येन च धर्माश्रयणेन तदात्मकल्याणं शक्यं साधयितुं स एव निष्पक्षपातेनादरणीयः । अत एव जिनागमे सुव्यक्तमेवावगम्यते ।

सुच्चा जाणइ कल्लाणं सुच्चा जाणइ पावयं । उभयंपि जाणइ सोच्चाजं सवं तं समायरे ॥

स एव धर्मः सत्यदयादानक्षमादिभिरुत्पद्यते, वर्धतेऽवस्थाप्यते च । यथा—

सत्येनोत्पद्यते धर्मो दयादानेन वर्धते ।
क्षमयाऽवस्थाप्यते धर्मः लोभक्रोधाद्विनश्यति ॥

एवं मुनिनिरूपितं जिनागमतत्त्वं निरूप्याऽसौ तापसस्तेन सहैव गुरुसमीपमगच्छत् । अन्येऽपि तापसास्तत्र तेन सहैव समायाताः । अयमेव श्रेयसः पन्था इति निश्चित्याचार्यसमीपे शुभे मुहूर्ते एकादशभिस्तापसैर्दीक्षा गृहीता तेन तापसेन । अत्र भगवतः सूरेरेव प्रधानः प्रभावः । तस्य तापसस्य शान्तिमूर्तिनाम परिवर्तितं सूरिणा । पूर्वमेव कृतशास्त्रपरिश्रमोऽल्पेनैव समयन जिनागमशास्त्राण्यधीत्य सर्वशास्त्रार्थपारगो बभूव स मुनिः ।

अथ सूरिरसौ सौराष्ट्रदेशादारभ्य सर्वत्र विहारेण धर्मसंवर्धनप्रयोजकानि कर्माणि सम्पादयन् क्रमेण माण्डव्यपुरमाससाद । तत्र श्रेष्ठिगोत्रीयः पारसशाहो महामहोत्सवं विधाय सूरेः स्वागतं चकार । अन्तिमश्चतुर्मासस्तत्रैव कृतः । स्वायुषोऽस्थैर्यं परिलक्ष्य शान्तिसागरमुनिं रत्नप्रभसूरीति नाम विधाय स्वपट्टे स्थापयामास । स्वयमेकोनविंशतिदिनान्यनशनं कृत्वा समाधियोगेन महाप्रस्थानमकरोत् । देव्याः सच्चायिकायाः परामर्शेनावगतं संघेन यदसौ सूरीश्वरः पञ्चमं स्वर्गमारूढः । महाविदेहक्षेत्रे च मनुष्यजन्मोपभुज्याऽसौ मुक्तिमेष्यतीति ।

सूरिरयं स्वस्य शासनकाले सर्वतोमुखप्रयत्नेन धर्माभ्युदयाय दृढपरिकर आसीत् । परितो धर्मप्रचारेण जिनधर्मस्य पूर्णतया मूलदार्ढ्यं कृतवान् । पट्टावलीकारेण विस्तरतो वर्णितमस्य चरित्रमतो ग्रन्थगौरवभिया विरम्यतेऽत्र । संक्षेपतः अयं ह्याचार्यो महान् युगप्रवर्तको बभूवेत्यलं पल्लवितेन ।

## [वि० सं० ४०० तः] ३१ आचार्यः श्रीरत्नप्रभसूरिः । (षष्ठः) [वि० सं० ४२४ प०]

श्रीसिद्धसूरिपट्टे तप्तभट्टगोत्रोद्भवो रत्नसन्निभतेजोमूर्तिः काव्यकलाकोविदः श्रीरत्नप्रभसूरिः शंखपुरवास्तव्यः समायातः । अस्य पिता महावैक्रयिक आगमप्रदर्शिताचारनिपुणो धन्नाशाहः पूर्वजन्मकृतपुण्यप्रभावान्नानावस्तुजातव्यापारेणापरो धनाधिप इव सर्वत्र कीर्तिमवाप । माताऽस्य धर्मपरायणा फंफादेवी । तयोरयं सूनुर्भीमदेवः ।

एकदा सवयोभिः सुहृद्भिः पर्यटनसमये दीर्घकायं महाभुजङ्गं स ददर्श । मिथो वार्तालापनिमग्नाः सर्वे मार्गमध्यपतितं तमदृष्ट्वाऽग्रे गताः । यदा भीमदेवेनेदं ज्ञातं तदा विचारितम्—अहो ! अद्य करालकाल इव व्यालो दृष्टः । भाग्यादेव जीवनं रक्षितम् । एवं चञ्चलेऽस्मिन् जीवने को नाम विश्वासः । अत आत्मश्रेय एव विधातव्यम् । येन निरुपद्रवा शाश्वती शान्तिः स्यादिति विमृशन्नसौ गृहमागत्य मातापित्रोरग्रे सर्पवृत्तान्तं न्यवेदयत् । ताभ्यामसौ सावधानत्वेनोपदिष्टः । किन्तु विगतसंसाराभिलाषोऽयं सर्वथाऽऽत्मचिन्तनेन दिनान्यत्यवाहयत् ।

इतश्च तस्यैव सद्भाग्यवशादाचार्यः श्रीसिद्धसूरिः शंखपुरमाययौ । सर्वश्रावकसम्पादितस्वागतसत्कारोऽसौ संसारसंसरणभञ्जिकां देशनां ददौ—

यथा- असंखयं जीवियमापमायये जरोवणीयस्सहु णत्थि ताणं ।
एवं वियाणाणि जणे पमत्ते कण्णु विहिंसां अजय गहिति ॥

तेणे जहा सप्पं मुहे गहिए सकम्मुणा किच्चइ पाव कारी।
एवं पया पेच्चइहंच लोय, कडाण कम्माय नमोक्खअत्थि ॥

एवं सूरीश्वरस्य, वैराग्यापादकं व्याख्यानमाकर्ण्य वैराग्यरागसमेधितमानसो भीमदेवो मातरं पितरञ्च प्रबोध्यैकत्रिंशत्परिमितैः श्रावकैः श्राविकाभिश्च सह भगवतीं दीक्षां जग्राह । श्रीधन्नाशाहस्य ज्येष्ठः पुत्रो रामदेवो दीक्षामहोत्सवमन्वतिष्ठत् । सूरीश्वरोऽस्य शांतिसागरेति नामप्रसिद्धिमकरोत् । आचार्यसमीपं शुश्रूषणपुरःसरमसौ लक्षणादिनानाशास्त्राभ्यासाद् विद्वज्जनमण्डलीमण्डायमानकीर्तिराशिर्बभूव ।

अथैवं विहारक्रमेण श्रीसिद्धसूरिर्डमरेलपुरमाजगाम । तत्रैको रसायनविद्यापारगो जिनधर्मनिन्दकस्त्व- दीयपूर्वाचार्याणामवगुणवादी योगी प्रतिवसति स्म । स एकदा शौचनिवृत्त्यर्थं बहिः प्रयान्तं शान्तिसागरं मुनिं मिलितः प्रत्युवाच-रे परमेश्वरकर्तृत्वनिषेधक ! मुने ! स्नानादिना शुद्धयभावे कथं त्वमीश्वरस्तवनं करोषि ? कथञ्चेश्वरस्य कर्तृत्वं न स्वीकरोषि ? अतोऽहं दृढं विश्वसिमि जिनधर्मानुयायिनो भवन्तः खलु नास्तिका एवेति तदीयं वचः समाकर्ण्य तमीश्वरात्मस्वर्गापवर्गाणां जिनागमप्रतिपादितान् सिद्धान्तानवेदयत् ।

ततश्च तापसोऽसौ सूक्ष्मतो जिनधर्मरहस्यं निशम्य सूरिपार्श्वमेत्य स्वशिष्यैः सह दीक्षितो बभूव । पश्चादानन्दमूर्तिरिति नाम्ना प्रथितः । काले व्यतीते श्रीसिद्धसूरिः सकलगुणगणगीयमानचरित्रं शान्तिसागर- मुनिं श्रीरत्नप्रभसूरिनाम्ना स्वपट्टे प्रतिष्ठाप्य ।

१—सोमप्रभादिभ्यः पञ्चभ्यो मुनिभ्यः उपाध्यायपदम् ।
२—राजसुन्दरादिभ्य एकादशभ्यो „ पण्डितपदम् ।
३—कल्याणकलशादिभ्यः सप्तभ्यो „ वाचनाचार्यपदम् ।
४—रत्नशेखरादिभ्यो नवभ्यो „ गणिपदम्

एवं पदवीप्रदानेन मुनीन् धर्मप्रचारप्रोत्साहितान् विधाय समाधिना देहमुत्ससर्ज ।

ततः श्रीरत्नप्रभसूरिः पञ्चालदेशस्थां श्रावस्तीनगरीमगमत् । तत्रैकदा व्याख्याने क्षणिकवादिना सौगतेनोक्तम्-सूरे ! तव व्याख्यानश्रवणाज्जनाः स्वर्गलोभान्नरकभयाच्च मौलिकोन्नतिमार्गान्निवर्तन्ते अतस्तव व्याख्यानं निश्चितमेवोत्कर्षं प्रतिरुणद्धि । एवं सौगतस्य मुनेर्वचनमाकर्ण्य क्षणिकवादस्य व्यर्थत्वं, जिनधर्मस्य च वैशिष्ट्यं शास्त्रसिद्धान्तसरणीमनुसृत्य प्रतिपादितम् । येन सोऽपि सद्धर्मप्रभावप्रभावितो भूत्वा सूरिपार्श्वे दीक्षि- तोऽभवत् । ततः स आचार्यो विहरन्ननुक्रमेण तक्षशिलां भूषयामास । सर्वेषामुपासकानामाग्रहं विचिन्त्य तत्रैव चतुर्मासमकरोत् । समुचितोऽयं पुण्यार्जनसमय इति मत्वा भद्रगोत्रीयो चाचङ्गश्रावकः श्रीभगवतीसूत्रवाचना- महोत्सवमन्वतिष्ठत् । चतुर्मासानन्तरं श्रेष्ठिगोत्रीयेण हाप्पाशाहेन सम्मेतशिखरयात्रार्थैः संघो निष्कासितः ।

श्रीसम्मेतशिखरयात्रां विधाय तत्र परमपावने तीर्थे सूरेरुपदेशाज्ज्येष्ठपुत्राय कुम्भाशाहाय संघपतित्व- मर्पयित्वा स श्रेष्ठी हाप्पाशाह एकादशभिर्भावुकैः सह दीक्षामग्रहीत् । ततो विहरन्सूरिश्चन्द्रेरीनगरीमाजगाम । तत्र महामारीरोगस्य प्रबलतरोपद्रव आसीत्, जनाश्च सर्वथा महत्कष्टमन्वभूवन् । परमकारुणिकचेताः सूरि र्बृहच्छान्तिस्नात्रपूजनमकरोद्रोगोपशमनार्थम् । ततश्च रोगः शान्तिमगात् । सर्वे चाज्जीविताः कृताः । ततो निर्गतः विहरणक्रमेण जन्मस्थानं शंखपुरमगमत् । तदीयमागमनमाकर्ण्य शंखपुरवासिभिर्जनैर्नगरप्रवेशोत्सवः कृतः । सर्वे च तत्रत्या नूनमनेन सर्वजगद्विदितं कुलमधिकमुज्ज्वलीकृतमिति प्रशशंसुः । तेषामादराधिक्यात्तत्रैव चतु- र्मासं विधाय जिनधर्मविषयकव्याख्यानेन मनांसि रञ्जयामास श्रोतॄणाम् । चतुर्मासान्ते सूरेर्धार्मिकव्याख्यानप्रभा- वेण शंखपुरे एकादशपरिमितैर्भावुकैर्दीक्षा स्वीकृता ।

एकदा देवी सच्चायिका वन्दनार्थमागता तमुद्दिश्याबादीत्-भगवन् ! अधुनोपकेशपुरविहारे महानेव

धर्मलाभः स्यात्ततस्तत्रैव विहारं करोस्विति देवीकथनमादृत्य सूरिरपि क्षेत्रस्पर्शनाभावनया ततो निर्गत्योपकेशपुरमाययौ। तस्मिन् समये तस्याधिपतिः—आल्हणरावः आसीत्। स च जिनधर्मस्य परमोपासको दृढश्रद्धावान् संघेन सह स्वागतविधिं महासमारोहेण समपादयत्। तदीयाञ्च प्रार्थनामङ्गीकृत्य चतुर्मासव्रतं तत्रैव चकार सूरीश्वरस्य चतुर्मासावसरमासाद्योपकेशनगराधिपतिरसौ राजा आल्हणः श्रीभगवतीसूत्रवाचनामहोत्सवं राजसंपदनुसारेण सूरिहस्तेनाकारयत्। अष्टाह्निकाद्युत्सवानुष्ठानेन धर्मभावनां जनानां समवर्धयच्च।

चतुर्मासानन्तरमाचार्यवर्यस्योपदेशमहिम्ना श्रमणसभाकार्यमारब्धम्। आमन्त्रणं प्राप्य, चरमतीर्थङ्करस्य भगवतो महावीरस्य यात्रामप्युद्दिश्य, गुरुवर्यदर्शनलाभञ्चानुषङ्गिकं विचिन्त्य च सहस्रत्रयपरिमिताः स्वगच्छीयाः कोरण्टकगच्छीयाः सौधर्मगच्छीयाश्च साधवः साध्व्यश्चोपस्थिता आसन्। तत्र स्वधर्माभ्युदयप्रवृत्तिमुद्दिश्य सर्वेभ्यो धर्मप्रचारकरणं मुख्यतोऽस्मदीयमेव कर्तव्यमित्यादिश्य सभां विससर्ज सूरीश्वरः।

तत्रैव श्रीसंघानुमोदनानुसारेण स्वपट्टे प्रमोदरत्नमुनिं यक्षदेवसूरीति नाम विधाय स्थापयामास। स्वयञ्च लुणाद्रिकाननेऽनशनेन समाधिपूर्वकं शरीरमत्यजत्।

## वि० सं० ४२४ तः] ३२—आचार्यः श्रीयक्षदेवसूरिः (षष्ठः) वि० सं० ४४० प०]

श्रीरत्नप्रभसूरिपट्टे जिनशासनसद्मप्रधानस्तम्भो यक्षार्चितचरणकमलयुगलो जिनगदितागमधर्मकर्ममर्मज्ञः श्रीयक्षदेवसूरिः। असौ करणावतीनगरनिवासी कन्नोजगोत्रीयश्चासीत्। अस्य जनकोऽपरो निधिपतिरिव सर्वेषां धनिकानां मूर्धाभिषिक्तो बभूव। तस्य दानजन्या कीर्तिकन्या दिगङ्गणे रिङ्गन्ती ततोऽपि पारं गन्तुमियेष। एवं नासौ केवलं धनिकः, अपि तु परमधार्मिकः पञ्चवारं तीर्थयात्रासु संघायोजनेन द्रव्यस्य सदुपयोगमप्यकरोत्। सुवर्णमुद्रिकोपायनं प्रतिजनं संघस्थेभ्य इति धनिकस्येदृशस्य किं वक्तव्यम्। कोऽपि याचकः कल्पद्रुमादिव तस्य सकाशाद्विफलमनोरथो न न्यवर्तत। सत्यमुच्यते—

> शतेषु जायते शूरः, सहस्रेषु च पण्डितः।
> वक्ता दशसहस्रेषु, दाता भवति वा न वा ॥

महामोहलुब्धानां जनानामियं वराकी धनाशा सर्वथा कदर्थीकरोति। एवं सत्पात्रे त्यागस्तु सत्यपि विभवे न सर्वेषां दृष्टचरः। अस्य सतीधर्मानुरक्ता धर्मप्रिया रोहणीनाम्नी सर्वदा पतिमार्गानुसारिणी सरलोदारस्वभावाऽसीत्। तस्याः पाताशाहनामा सूनुरभवत्। तया च धर्मरतया भगवतो वासुपूज्यस्याराधनार्थमेकं विशालं मन्दिरं निर्माप्य तत्र भगवतो वासुपूज्यतीर्थङ्करस्य प्रतिमा प्रतिष्ठापिताऽसीत्।

असौ पाताशाहोऽपि प्राप्तधार्मिकसंस्कारसंस्कृतमतिः पितुरिव वदान्यतमोऽभूत्। मातापित्रोर्देहावसानानन्तरं, व्यवहारभारो बलादपि तस्यैव शिरसि समापतितः। देव्याः सच्चायिकायाः प्रसादादसावपि व्यापारकार्ये कोटिपरिमितं द्रव्यमवाप। धर्मकार्याणि च सम्पादयामास।

अथाऽतीते काले दुर्दैवाद्विक्रमस्य ४२९ तमे वर्षे भयंकरः क्षयङ्करो दुष्कालोऽभवत्। सर्वत्र प्राणिनां करुणाक्रन्दनं दुर्भेद्यहृदयविदारकं विहाय न किंचिदश्रूयत। अस्मिन् समये पाताशाहेन करणावत्यामन्नस्य तृणघासादीनां मुक्तहस्तेन दानं विहितम्। आपणे दीनेभ्यो देयवस्तूनि सर्वत्र संस्थापितानि येन जनसंमर्दो न भवेत् तद्ग्रहणार्थम्। नात्र जातीयानामाग्रह आसीत्। व्यापारे यद् यदुपार्जितं, येच गृहिण्या मणिमयरत्नखचिताः सुवर्णालंकारास्ते सर्वेऽपि दुःखितानामुद्धरणे समर्पिताः। एवं कृतेऽपि प्रबन्धेऽसौ दुर्विपाकः करालकालो दुष्कालो न शान्तिमगमत्। ततः पाताशाहः कुलदेवतां सच्चायिकामस्मरत्—भगवति! स्वमीदृशमेव पौरुषं मे देहि, येनाहं दुर्भिक्षशमनं विदध्यामिति। ततः सा प्रत्यक्षदर्शना प्रसन्नवदना वरम्

धनभस्त्रिकामदात् । यथेप्सितं द्रव्यं त्वयाऽस्याः प्रभावेण लप्स्यत इत्युक्त्वा साऽदर्शनमगात् । सोऽपि सच्चायिका-प्रदत्ताक्षयद्रव्यनिधिप्रभावाच्चतुर्दिक्षु सहायप्रदानमकरोत् । ततः सुभिक्षमप्यभवत् । पाताशाहोऽपि देवीं ध्यात्वाऽहूय च धनभस्त्रिकां प्रत्यार्पयत । तदीयपरोपकारमुदितान्तरंगा सा यथेच्छमुपभुंक्ष्वेति तस्मै प्रसादरूपेणायच्छद् येनाऽसौ विगतद्रव्याभिलाषः ।

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परिवाह इवाम्भसाम् ॥

इति मत्वा त्याग एव कृतप्रवृत्तिर्बभूव ।

इतश्च श्रीरत्नप्रभसूरिः पञ्चशतसंख्यकैः शिष्यैः सह करणावतीमलंचकार । श्रीसंघेनातीवोत्साहपूर्वकं पुरप्रवेशोत्सवः कृतः । अन्येद्युर्व्याख्याने चक्रवर्तिनामपि भूमिपतीनां सा सम्पत्तिरत्रैव स्थिताऽन्यैर्भुक्ता भवति । न च कुटुम्बिनोऽन्ते सहायकाः, आपाततः परिदृश्यमानमिदं परिणामे तु नास्त्येव । सूक्तमुच्यते यत्—

चेतोहरा युवतयः सुहृदोऽनुकूलाः ।
सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ॥
गर्जन्ति दन्तिनिवहास्तरलास्तुरङ्गाः ।
सम्मीलने नयनयोर्नहि किंचिदत्र ॥

अतः परमकल्याणप्राप्तये यत्नोऽहर्निशं विधेयः । एवमित्यादिकं सुरेर्व्याख्यानमाकर्ण्य प्रथमत एव जातवैराग्यः पाताशाहः समधिकविरक्तिभावनाभावितहृदयो बभूव । अन्यैर्द्विसप्ततिसंख्यकैर्भावुकैः सहाऽसौ दीक्षादीक्षितो जातः । तस्य चाभिधानं प्रमोदरत्नमुनिरिति विहितं सूरिणा । परमधर्मतत्त्वजिज्ञासुः क्रमेणाध्य-यनं विधाय जिनशास्त्रसम्पादितसिद्धान्तरहस्यज्ञानपारगो बभूव । सम्पूर्णयोग्यताञ्च ज्ञात्वा रत्नप्रभसूरिणा स्वपट्टे प्रतिष्ठापितः ।

आचार्यः श्रीयक्षदेवसूरिर्विहरणक्रमेणोपकेशपुरं सम्भाव्य मरुधरप्रान्ते ग्रामनगरोपनगरेषूपदेशादि-भिर्धर्मप्रचारं कुर्वन्नर्बुदाचलमाससाद । कियन्ति दिनानि तत्र निवृत्तिः सेविता । एकस्मिन् दिनेऽसौ सूरिर्मध्यान्हे ध्यानस्थितस्तदाऽर्बुदाचलाधिष्ठात्री चक्रेश्वरी सच्चायिका च देव्यौ तत्रागत्य प्रणेमतुः । सूरिश्च धर्मलाभाशिषा संभावयामास । ततो देव्यावूचतुः—भगवन्! एतावत्कालपर्यन्तं धर्मशासनं सर्वथाऽत्रैकनेतृत्वेनाचार्यस्या-विच्छिन्नपरम्परातः प्रचलति । चतुर्विधसंघोऽप्येकस्य नेतृत्वेन धर्मसंरक्षको वर्तते, किन्त्वतः परमस्मिन् विषमे समये सा मर्यादाऽविच्छिन्नपरम्पराया अग्रे स्थिरा भवेन्नवेति सन्देहः । तथापि भवद्विधा असाधारणमहिममह-नीययशोवतंसा आचार्यवर्या विद्यन्ते तावत्तु वयमपि दृढं विश्वसिमोऽत्र विषये । पूर्वाचार्यपरम्परासरणीतरणी-कृतधर्मप्रचारकार्याभिनिविष्टचेतसो मे दृढं खलु विश्वासो यदत्रैव मार्गेऽहमपि ध्रुवं शीघ्रं च प्रयत्नमाचरिष्य इति सूरेर्वचनमादृत्य वंदनं विधाय च स्वस्थानं ते देव्यौ ययतुः ।

सूरीश्वरस्यार्बुदाचले स्थितिं ज्ञात्वा सौराष्ट्रदेशे धर्मप्रचारार्थं विहरन्तो देवभद्राद्या मुनयस्तस्य दर्शनार्थं समाययुः । भगवत आदीश्वरस्य दर्शनं विधाय, तमाचार्यं प्राप्य, प्रणामक्रमेण सम्भाव्य च धर्मरक्षार्थमेव भवन्तः प्रयतन्त इत्यत्र वयमपि हृदयानन्दनिर्भराः किं ब्रूमहे । एवमाभाष्य सूरिस्तान्, भवन्तोऽप्यत्र सह-योगमवाप्य विविधदेशे विहरन्तो धर्मप्रचाराय प्रयतन्तां सफलतां च प्राप्नुवन्तु तदेतत्कर्तव्यमस्माकीनमिति संसूचनं विधाय तेषां गोचर्यादिप्रबन्धाय प्रेषयामास शिष्यान् ।

अथ आचार्यवर्यस्ततः शिवपुरीं सह शिष्यमण्डलेनात्मना भूषयामास । तत्र परमधार्मिकेण बप्पनाग-गोत्रीयेण शोभनशाहेन भगवतः पार्श्वनाथस्य मन्दिरं निर्मापितमासीत् । तस्य प्रतिमाप्रतिष्ठामहोत्सवः श्रीसूरी-

श्वरस्य परमपवित्रकरकमलेन जातः। तत्र भावुकेभ्यो धर्मोपदेशो विहितो, येन स शोभनशाहो भगवतीमार्हतीं, दीक्षामग्रहीत्।

अपरतो मेदपाटदेशे बौद्धधर्मानुयायिनो बौद्धा बुद्धधर्मप्रचाराय समागतास्ते च जिनधर्मस्यावहेलनां विधाय स्वधर्मस्योत्कर्षमवर्धयन्त। तत आघाटनगरस्थः श्रीसंघः सूरेः पार्श्वमेत्य सर्वमेव तेषामुदन्तजातमावेद्याघाटपत्तनं पावयित्वा धर्मप्रचारायाचार्यं व्यजिज्ञपत्। धर्ममयैकजीवनः सूरीश्वरः सत्वरमेवाङ्गीकृत्य तदीयामभ्यर्थनामाघाटपत्तनं सशिष्योऽभिप्रतस्थे। रात्रौ प्राप्तावकाशाः सूर्योदये तस्करा इव ते बौद्धा मुखमप्याचार्याय दर्शयितुं लज्जमानाः क्वापि पलायन्ताचार्यगमनात्प्रागेव। तत्र भावुकानां धर्माचरणे स्थैर्यापादनं विधाय स मथुरापुरीमगच्छत्। तत्र कापालिकनामा वेदाचार्योऽन्तेवासिभिः सह न्यवात्सीत्। एकदाऽसौ कापालिकः स्वव्याख्याने जिनधर्मं महता स्फटाटोपेन निनिन्द। येनाचार्यस्तेन सह शास्त्रार्थाय सज्जीबभूव। प्रबलतरैः शास्त्रीयैः प्रमाणैरहिंसाधर्मस्य सर्वधर्मश्रेष्ठत्वमदर्शयत्। तेनापि प्राधान्यमङ्गीकृतमतः श्रोतॄणां तु वक्तव्यमेव नावशिष्यते। वैदिकी हिंसा न दोषायेति मतमपि खण्डितम्। जिनधर्ममर्मभावनामाचार्योद्विज्ञाय पञ्चशतसंख्यकैः शिष्यैः सह दीक्षितोऽभवत्सूरिपार्श्वे कापालिकः। कुकुन्दमुनिरित्यभिधेयेन विश्रुतो बभूव। अपरञ्च सूरेरलौकिकज्ञानप्रभावेण तत्र द्वात्रिंशत्परिमितैर्बौद्धैरपि दीक्षा गृहीता। एवं प्राथमिकं धर्मसंभावनाकार्यं समाप्य श्रीसंघेन निर्मापितानां नूतनानां जिनालयानां प्रतिष्ठाविधिर्विहितः। ततः पूर्वप्रान्तीययात्रार्थं सरवणशाहेन संघो निष्कासितः। तत्र प्राचीननूतनशिष्यगणपरिवृत आचार्यः कलिङ्गदेशस्थशत्रुञ्जयरैवतकावताररूपस्य खण्डगिर्युदयगिरितीर्थस्य यात्रां विधाय बंगप्रान्ते यात्रार्थमगमत्। तत्र हिमाचलयात्रां, व्याख्यानेन भावुकानां धर्मजागृतिश्चापाद्य, विहारदेशे राजगृहस्थपञ्चपर्वततीर्थस्य, पावापुरीचम्पापुर्योश्च यात्रामकरोत्। श्रीतीर्थङ्करनिवार्णभूमिश्रीसम्मेतशिखरस्य दर्शनस्पर्शनादिकं कृत्वा भगवतः पार्श्वनाथस्य कल्याणभूमौ वाराणस्यां यात्रां विधाय परमानन्दपूर्णमानसो बभूव श्रीसंघः। सर्वां यात्रां विधाय कतिपयैः शिष्यैः सह संघः प्रतिनिवृत्य मथुरामागच्छत्।

सूरीश्वरस्तु हस्तिनापुरं धर्मोपदेशेनालंकृत्य पञ्जाव-सिन्ध-कच्छदेशेषु विहारेण धर्मप्रोत्साहनं कृत्वा सौराष्ट्रदेशे शत्रुञ्जययात्रां निर्वर्तयामास। एवं विहारसमयेऽध्ययनं कुर्वाणोऽसौ कुकुन्दमुनिर्जिनागमविचक्षणोऽभवत्। येनाऽसौ पञ्जाबप्रान्तेऽहिंसाधर्मप्रचारं कृतवानासीत्। अतः सूरिणा पञ्चशतसंख्यकैः शिष्यैः सह कोकणप्रदेशे प्रचारार्थं प्रेषितः।

अथ शत्रुञ्जययात्रां विधाय ततो लाटदेशे विहारं कुर्वन्नर्बुदाचले प्रभावतीचन्द्रावत्यादिषु श्रावकाणां चेतःसु बलवत्तरां धर्मरुचिमापादयन् पाल्हिकानगरीमाजगाम। श्रीसंघस्याभ्यर्थनामनुमान्य चातुर्मासीं तत्रैव चकार। विविधविषयकव्याख्यानानां परमेण लाभेन धर्मभावनाविशुद्धमानसा उपासकाः स्वकीयं महद्भाग्यममन्यन्त। संघेन च तत्रैका श्रमणानां सभा समाहूता। समीपस्था दूरस्थाश्च सर्वे तत्र श्रमणाः समयाताः। किन्तु किंचित्समीपस्थे सौपारपत्तने चातुर्मासीस्थितोऽसौ कुकुन्दस्तु न समागतः। सूरिरप्यत्र न किंचिद् विचारयामास। यतो ज्ञातं यत्तदीया पृथक् सूरिपदग्रहणाभिलाषासीदिति। तत्र धर्मस्वरुपसंरक्षणवर्धनप्रयत्नविषयक उपदेशः श्रमणेभ्यो दत्तः। सोमप्रभादयो मुनय उपाध्यायपदेन संमानिताः। ततो मरुधरप्रान्ते विहरन्सूरीश्वर उपकेशपुरमागच्छत्। श्रीसंघाभ्यर्थनया तत्र चतुर्मासो विहितः।

इतश्च कुकुन्दमुनिरपि सहस्रशिष्यसमन्वितो मरुधरेषु विहरन् भिन्नमालमागतः। श्रीसंघेन समादृतः। सोऽपि तत्र चतुर्मासमकरोत्। श्रीमालवंशीयो देशलशाहः श्रीभगवतीसूत्रवाचनामहोत्सवमकारयत्। कुकुन्दमुनिः श्रीभगवतीसूत्रवाचनामकरोत्। अस्यैवं खलु मनस्यभूत्-यदहं पूर्वं वेदान्ताचार्यो जिनधर्मेऽप्याचार्यत्वं

प्राप्नुयाम् । येनान्येऽपि मदीययोग्यतां जानीयुः । गुणी जनो यत्र गच्छति तत्रासाववश्यं सन्मानमश्नुत इति वेदिका अप्यवगच्छेयुः । इयं दुराशा तस्य चेतः कुटिलीचकार । अस्य मुनेर्भगवतीसूत्रवाचनाविषयको वृत्तान्तः सूरिणाऽवगतस्तदा तस्यार्बुदाचले कथितं सच्चायिकावचनं स्मृतिपथमारूढम् ।

आचार्यो यक्षदेवसूरिः श्रीस्थानायांगसूत्रस्योपरि व्याख्यानमदात् । तत्राचार्यस्य तदीयाष्टसंख्याकस्य सम्प्रदायस्य च विस्तरशो वर्णनं कृतम् । सर्वमेतच्छ्रुत्वोपासकाः श्रद्धयावनतहृदया बभूवुः ।

अथैकदा देवी सच्चायिका वन्दनार्थमाजगाम । सूरिश्च तामवोचत् । देवि ! ममायुषोऽस्थैर्यं येन कञ्चिद् योग्यमाचार्यपदे स्थापयितुमिच्छामि । विचार्यमाणे सोमप्रभोपाध्याय एवोचितो मे प्रतिभाति । एवमाचार्यवचनमाहृत्य देवी तं प्राह भगवन् ! एवमस्तु । इदमप्यधिकं मे निवेदनं यत् श्रीरत्नप्रभसूरिणात्र स्वकीयपूर्वश्रुतज्ञानेन भविष्यत्कालिकीं परिस्थितिं सर्वतोभावेन विचार्य श्रीसंघस्य स्थापनां विधाय तद्वारेण जिनधर्मश्चिरस्थायी कृतः । अतोऽत्रोपकेशपुरे तदीयगौरवपरिरक्षणार्थं, धर्मस्य च दृढतायै आचार्योऽप्युपकेशवंशीय एव भवितुमर्हति । यश्चात्मत्यागवैराग्यजातिकुलमर्यादाभिराचार्यत्वं निर्वोढुं सर्वथा शक्तो भवेद् । सूरिरपि तद्वचनमंगीचकार सा च वन्दनं विधायादृश्यतामयासीत् ।

प्रातराचार्यः श्रीसंघं न्यवेदयत्—श्रावकाः ! भगवत्याः सच्चायिकाया अनुमोदनेनोपाध्यायपदभूषितं सोमप्रभमुनिमाचार्यपदे स्थापयितुमिच्छामि । अपरं च विशेषतो वक्तव्यं यदत्राचार्यश्रीरत्नप्रभसूरिपट्टपरम्परायामुपकेशवंशीय एव योग्यो मुनिराचार्यपदे प्रतिष्ठापयितव्य आगामिकाले जिनधर्मस्य संरक्षणार्थम् । अत्र प्राग्वटवंशीयस्य श्रीमालवंशीयस्याप्यन्तर्भावो भवितुमर्हति । सर्वैश्च शासनाभ्युदयार्थमवश्यं प्रयत्नो विधेयः ।

सर्वे संघस्थिताः सहर्षं सूरीश्वरस्य वचनमनुमोदयांचक्रिरे । ततश्चादित्यनागगोत्रीयो वरदत्तशाह आचार्यपदार्पणमहोत्सवमारभत । दूरदेशस्थाः संघास्तेनामन्त्रिताः । जिनमन्दिरेष्वष्टाह्निकामहोत्सवः प्रारब्धः । सर्वत्रानन्दबहुलेऽस्मिन् शुभे समये भगवतो महावीरस्य मन्दिरे चतुर्विधसंघसमक्षं सर्वागमसिद्धान्तकुशलं निखिलगुणगणालङ्कृतमुपाध्यायं सोमप्रभमुनिं श्रीकक्कसूरिरित्यभिधानेन प्रख्याप्य सूरीश्वरो यक्षदेवसूरिराचार्यपदे प्रतिष्ठापयामास । वरदत्तशाहेन पूजाप्रभावनादिकं कृतम् । परमधार्मिकेण तेनात्र महोत्सवे नवलक्षपरिमिता मुद्रा विनियुक्ताः ।

सूरीश्वरस्तु लुणाद्रौ त्रिंशद्दिनानि समाधौ स्थित्वा पञ्चपरमेष्ठिमन्त्रस्मरणपूर्वकं विनश्वरं शरीरमत्याक्षीत् ! श्रीसंघश्च शोकाकुलितचेता बभूव । ततोऽग्निसंस्कारो विहितः । चितायां प्रज्वलितायां कुंकुमपुष्पाणां वृष्टिराकाशात्पपात । अतः परं भारते क्षेत्रे श्रीरत्नप्रभश्रीयक्षदेवसूरिसदृशो नाऽन्य आचार्यो भविष्यतीति व्योमवाणी कथयामास । अहो नु खलु कष्टम् ? ईदृशानां महाभागधेयानां पुनरसंभवेन जिनधर्मः कथमुन्नतिपथमुपेयात् ?

## [ वि० सं० ४४० तः ] ३३ आचार्यः श्रीकक्कसूरिः ( षष्ठः ) [ वि० सं० ४८० प०

श्रीयक्षदेवसूरिपट्टे आदित्यनागगोत्रीयो विद्वज्जनचक्रचूडामणिः काव्यकलाकलानिधिः श्रीकक्कसूरिः । असौ शिवपुरीवास्तव्यः । अस्य पिता शिवपुर्यधिपस्यामात्यो न्यायनीतिनिपुणो यशोदत्तः । माता च परमरमणीयस्वभावा मेनादेवी ।

मातापित्रोर्गृहेऽक्षयद्रव्यसद्भावेऽपि सन्तत्यभावान्महत्कष्टमासीत् । अतोऽपत्याभावेन न्यायोपार्जितद्रव्यस्य सदुपयोगार्थं जिनागमग्रन्थलेखनादीनि धर्मकार्याण्याचरत् सचिवः ।

अथ पूर्वजन्मपुण्यप्रभावादर्धनिशायां सा पतिव्रता मेनादेवी स्वप्ने सिंहदर्शनं प्राप्य स्वपतिपार्श्वमेत्य स्वप्नवृत्तं न्यवेदयत् । तदाकर्ण्य मन्त्रिणोक्तम्-सुभगे ! समाधीयतां धर्मे मनः । तव कुक्षावलौकिकप्रभावः

कश्चिज्जीवः प्रवेशं प्राप्तः। पत्युर्वचः श्रुत्वा सा प्रसन्नमुखपङ्कजा सन्तुष्टान्तरङ्गा चाभवत्। ततः पूर्णे समये प्रभाकरकिरणकान्तिरमणीयं तनयमसूत सा। तस्य च शोभनेति नामकरणं कृतम्। शैशवेऽपि प्राप्तधर्म-संस्कारो बालोऽसौ शनैः शैशवमतिक्रम्य यौवनं प्राप। इतश्च भव्यजिनालयनिर्माणप्रभावान्मेनायाः क्रमेण सप्त पुत्रा जाताः। पूर्णे च जिनमन्दिरे प्रतिमाप्रतिष्ठापनां कारयितुं सूरीश्वरस्याह्वानायार्बुदाचलमसौ मंत्रिपुत्रो ययौ। सूरिश्च तस्य प्रारब्धदृश्यं दृष्ट्वाऽऽश्चर्यान्वितः सन् तस्मै संसारासारतामुपदिदेश। ततो भाविलाभकारणमुद्दिश्य शोभनस्य प्रार्थनां स्वीचकार। क्रमेण च शिवपुरीं प्रति विहरणमकरोत्। तत्र च तन्नगरमधिवसन्तो जना अतीवोत्साहेन सूरेर्नगरप्रवेशमकारयन्। अन्येद्युश्च सूरिर्वैराग्यरतिवर्धिकां देशनामदात्। आकर्ण्य देशनां शोभनस्तु तत्क्षणादेव वैराग्यान्वितो बभूव। गृहमागत्य महता प्रयत्नेन पितरौ संबोध्य तदीयामनुज्ञाञ्च प्राप्य दीक्षोद्यतो जातः। अक्षयतृतीयायां दीक्षाप्रतिष्ठाकार्यं निर्धारितम्। शुभे मुहूर्ते विरक्तिरागरञ्जितस्वान्तोऽसौ शोभनो द्विचत्वारिंशत्परिमितैः श्रावकैः सह दीक्षां लेभे। सूरिः सोमप्रभेति नाम्ना तं ख्यापयामास। ततश्च प्रतिमाञ्जनशलाकाप्रतिमाप्रतिष्ठादीनि शुभानि कार्याणि निर्विघ्नेन सम्पादितानि। व्यतीते च काले सोमप्रभ-मुनिरपि स्वबुद्धितैक्ष्ण्यादङ्गोपाङ्गलक्षणादिषु शास्त्रेषु परमं प्रावीण्यमुपाससाद। नेदमेव केवलमपि तु युवाव-स्थोऽप्यसौ सर्वयमनियमासनादिसंयमसंरक्षणशीलोऽद्वितीयेन ब्रह्मचर्यप्रभावेण रविरिव दुःसहप्रभावो बभूव। क्रमेण चोपकेशपुरे सूरिपदमवाप।

इतश्च यक्षदेवसूरिनिधनानन्तरं कुकुन्दमुनिरपि भिन्नमालसंघेन सूरिपदे प्रतिष्ठापितः। यदा श्रीकक्कसूरि-रिदमजानात् तदा सूक्ष्मदृष्ट्या विचारमकरोत्—ये हि पूर्वाचार्यास्त एव महाभाग्यवन्तः। एकच्छत्रं शासनं कृत्वा संघबलेन सर्वत्र धर्माभ्युदयो विहितस्तैः। मदीयमेव दुर्भाग्यमद्य वर्तते यत्रैकस्मिन्नेव गच्छे आचार्य-द्वयस्य नाम शृणोमि! अस्तु। भवितव्यतां को नाम निवारयितुं शक्नोति। तथाप्यत्र किमपि विवेक्तव्यं येनेदृशा-स्यानिष्टस्य फलमनुभवनीयं न स्याद् गच्छस्य च कापि क्षतिर्न भवेदिति विचारणीयमेव। यद्यहं तत्र गत्वा कुकुन्दविरुद्धं किंचित्कुर्यां तदपि नाम शासनस्यैव लघुता प्रतीयेत। अन्ते चाचार्यश्रीरत्नप्रभसूरेः कोरण्टक-गच्छस्य, श्रीकनकसूरेश्चोदाहरणं स्मृतिपथमारूढम्। ततस्तत्रैत्य व्यवस्थाविधानार्थमवश्यमेव यातव्यमिति कृत्वा देवीं सच्चायिकां सस्मार। सा चागत्य सर्वं सूरिनिवेदितं हृदये कृत्वा तमाह-भगवन्! विषमः समयः शासनस्य समायातः। सर्वकर्मविचक्षणो भवान् तत्र भिन्नमालनगरे गच्छतु। मानापमानौ च दूरीकृत्य शासनसंरक्षणार्थं त्वदीया प्रवृत्तिरवश्यमेव सफला भविष्यतीत्यनुमोदनं दत्त्वा तिरोदधे।

अथ स आचार्यो विलम्बेन विना शिष्यैः सह भिन्नमालमुद्दिश्य प्रतस्थे। तस्मिन्काले तत्र कोरण्टकगच्छीय आचार्यः श्रीनन्नप्रभसूरिः समागतः। तस्यागमनेन कुकुन्दाचार्यस्य स्वपक्षसमर्थनेच्छाऽपि किं न भवेत्! नन्नप्रभ-सूरिणा सूरीश्वरस्यागमनं ज्ञा॰ तदा सर्वेभ्यो निवेदितम्। मुण्डे मुण्डे मतिर्भिन्नेति कृत्वा किमर्थमत्रागमनं जायते! किमुभयोर्महान् कलहो भविष्यति! कुकुन्दाचार्येण पूर्वाचार्याणां मर्यादोल्लंघितेत्येदर्थमाचार्य आगत इति त्रिविधान् विकल्पान् सर्वे स्वचेतसि विदधिरे। सर्वमि॰ व्यवहारस्वरूपेण विचार्य नन्नप्रभसूरिः संघमुवाच-श्रावकाः! आचार्यः श्रीकक्कसूरिर्नगरमिदं पावयितुमागच्छति, तदर्थं च सर्वैर्युष्माभिः कुकुन्दाचार्यसहितैः सत्कारपूर्वकं स्वागतमवश्यमेव कर्तव्यम्। दीर्घदृष्ट्या विचारिते तत्रत्यैः संघस्थैः श्रावकैः सूरेर्वचनमङ्गीकृतं ततो नन्नप्रभसूरिः कुकुन्दाचार्यः श्रीसंघश्च सर्वे मिलित्वा भव्यसमारोहेण सूरीश्वरस्य नगरप्रवेशविधिमकार्षुः। सम्पादिते च नगरप्रवेशे सूरीश्वरो भगवतो महावीरस्य यात्रां विधाय धर्मशालामागच्छत्। एकस्मिन्नेव व्याख्यानपीठे विराजमाना ह्येते मूर्तिमन्ति ज्ञानदर्शनचारित्राणीव सकलजनमनांसि नितरां रञ्जयामासुः। ततश्च विनयादिगुणगणालंकृत आचार्यो वयोवृद्धं नन्नप्रभसूरिमनन्तरञ्च कुकुन्दाचार्यं देशनायै सविनयं न्यवेदयत्।

ताभ्यं च सूरिरेव देशनार्थं साग्रहं निवेदत: । एवंविधमाचार्यस्य कक्कसूरेर्विनयव्यहारं दृष्ट्वा प्रथमं हृदयविनिवेशितकल्पनां कल्पनेयं खल्विति मत्वा तां निष्कासयामासुरुपासका: ।

एवं तदीयं साग्रहं निवेदनमनुमान्याचार्यवर्य: श्रीकक्कसूरि: प्रौढनिर्भरया गिरा मङ्गलाचरणपूर्विकां देशनां ददौ—अयि धर्मतत्त्वजिज्ञासव: श्रावका: !

भगवत: श्रीमहावीरस्य शासनं खल्वेकविंशतिसहस्रवर्षपर्यन्तं प्रचलिष्यति । अस्मिन् शासने च महामहिमशालिनो बहव आचार्यवर्या जाता अग्रे च तथाविधा भविष्यन्ति । आचार्यत्वेन निर्धारणन्तु संघस्याधीनम् । शासनकार्यभारधुरंधरमेकमाचार्यपदे स्थापयितुं स एव समर्थ: । सर्वमिदं व्यवस्थाप्रकरणं व्यवहारादिसूत्रेषु विस्तरेण विवेचितम् । अनेनेदं न कल्पनीयं यत्—कस्यचित् नगरस्य ग्रामस्य वा संघो यं कमपि मुनिमाचार्यपदे संस्थाप्य शासनस्य सामूहिकं संघट्टनं शिथिलीकर्तुं शक्नुयात् । पूर्वाचार्यैर्महाजनसंघद्वारेण संघट्टनकरणे या सफलता प्राप्ताऽसीद्या च संघसंख्याभिवृद्धि: कृता तस्या इदमेव प्रयोजनं यच्छासनस्य सार्वत्रिकं प्रभुत्वं संरक्षितं स्यादिति । रक्षिते च शासने सर्वे धर्माचरणेनात्मन: कल्याणमासादयितुं समर्था भवेयु: । इयमेवोदारात्मनां कल्याणभावना ।

संघट्टनविश्लेषे महत्यनर्थपरम्परा समुत्पद्यते । यथैकस्य चत्वार: पुत्रा भिन्नमतयो भवन्ति तदा तस्य कुलं स्वस्योत्कर्षं साधयितुं न शक्नोत्यध:पतनं च विन्दत एवमस्माकं संघट्टनविषयेऽपि सर्वै: सावधानमनस्कैर्निष्पक्षपातेन विचारणीयम् ।

एकस्मिन समये पार्श्वनाथपरम्परायां तत्रभवति, वन्दनीयपादकमलयुगले श्रीरत्नप्रभसूरौ विद्यमानेऽपि सहसा कोरण्टकसंघेन श्रीकनकप्रभसूरये आचार्यपदं समर्पितम् । परन्तु दीर्घदर्शी शासनशुभचिन्तक: श्रीरत्नप्रभसूरि: शीघ्रमेव तत्र प्रतस्थे । कोरण्टकसंघेन कनकप्रभसूरिणा चाचार्यस्य भावभव्यं स्वागतं कृतम् । श्रीकनकप्रभसूरि: निखिलगुणनिधि: शासनगौरववर्धकश्चासीत्तेन कोरण्टकसंघेन दत्तमाचार्यपदं सूरीश्वरचरणकमलयोरेव सहर्षं तेन समर्पितम् । आचार्य: श्रीरत्नप्रभसूरिरपि सर्वेषां सद्भावं विचिन्त्य स्वहस्तेनैव संघसमक्षमस्मै कनकप्रभसूरये समारोहपुर:सरमाचार्यपदं ददौ । एवं परस्परविनयविनिमयस्य मधुरो रमणीयश्च परिणाम: सर्वेषां धार्मिकाणां सुखसम्पादनाय शक्तो भवति । केवलमत्रोपकेशगच्छकोरण्टकगच्छेति नाममात्रेण भेद: । उभयोरीदृशो मिथ: सौजन्यपूर्णो व्यवहारोऽवर्तत यस्य वर्णनमप्यशक्यम् । अहो ! शासनस्याभ्युदयाय त एव स्वनामधन्या आचार्यवर्या: कीदृशेन सरलव्यवहारेण दीर्घविचारेण च कर्तव्ये प्रावर्तन्त । तदा शासनगौरवमपि सुमहदासीत् । सर्वजनहृदयंगमं स्नेहभरभरितं शासनाभ्युदयचिन्तकं विचारचारु वचश्च श्रुत्वा तस्मिन्नेव देशनासमाप्तिसमये सहसैव पीठादुत्तीर्याचार्यचरणसमीपस्थित: कुकुन्दाचार्य: कृतानुशयोऽब्रवीत्-भगवन् ! मर्षयतु मर्षयतु ममापराधम् । पूर्वाचार्यसरणीमुल्लंघ्य मया महत्यपराधे पातित आत्मा । संघाधिरोपितमाचार्यपदं भवदीयचरणसरोजयोरेव तिष्ठतु ! नैवाज्ञासिषमहम्-भवान् शासनहितायैवं दृढपरिकरो वर्तत इति । किमत्र बहुना ! भवानेवास्माकं पूज्य आचार्यवर्यो गच्छाधिपतिश्चेत्यलम् । तत: श्रीसंघेनापि—भगवन्नस्माकमेष महानपराधो, येन स्वच्छन्दतयाऽचार्यपदप्रदानं कृतम् । अतोऽत्र भवान् मूढमतीनज्ञानस्मान् क्षमताम् । शासनलाघवमस्माभिरेव सम्पादितम् । अत: परं वयं येन शासनस्य गौरवं रक्षितं स्यात्, संघबलं चाधिकं विचारशीलं भवेत्तथैव व्यवहरिष्याम: । सूरीश्वर: प्रसन्नगम्भीर: परमोदारप्रकृति: सर्वान् तानवादीत्—कुकुन्दाचार्यो निखिलागमवेत्ता सर्वथाऽचार्यपदाय योग्य एव वर्तते । श्रीसंघेन च यदाचरितं तदपि सुसंगतमेव प्रतिभाति मे । गुणगणगणनीयकीर्तीनां माननीयानां गौरवसंरक्षणमेव श्रीसंघस्यावश्यकं कर्तव्यं, तच्च सम्यगनुष्ठितं तत्र न कोऽप्युपालम्भमर्हति । इदमेव कार्यं गुरुवर्यस्य श्रीयक्षदेवसूरीश्वरस्य, श्रीनन्नप्रभाचार्यवर्यस्यानुमत्या

चानुष्ठितं भवेत्तदधिकतरं सुसमंजसं स्यात्। अस्तु। दुर्विषह्येऽस्मिन्कलौ सत्ययुगमाचरणेन सम्पादयते कुकुन्दाचार्याय मे कोटिशो धन्यवादाः। संघाय मे शुभाशंसनमेवं धन्यवादश्च, यत आत्मकृतापराधस्याङ्गीकारः सर्वथा दुःशक एव दृश्यते। ततः सूरीश्वरो नन्नप्रभसूरिमवोचत्—मान्यवर! वयोवृद्धो ज्ञानवृद्धश्च भवान् स्वकीयकरकमलेन कुकुन्दाचार्यायाचार्यपदं समर्प्य मे कार्यभारं लघूकर्तुमर्हति। कुकुन्दाचार्यस्तु सप्रश्रयमगादीद् भगवन्! आचार्यपदापेक्षयाऽचार्यचरणयोरुपासक एव भवितुमिच्छामि, अत्रैव मे महद्गौरवमिति मन्ये। तदीयं प्रश्रयोपेतं वचनमाकर्ण्याचार्यौ नन्नप्रभसूरिणा चतुर्विधसंघेन चाभ्यर्थित उभयोः सूरीश्वरयोर्वासःक्षेपपूर्वकं कुकुन्दाचार्यमाचार्यपदे स्थापयामास। सर्वत्र च भगवतो महावीरस्य जयध्वनिना सर्वे संघस्था जना आचार्यं तं सम्भावयामासुः।

अथैवमाचार्यपदमहोत्सवं समाप्य श्रीसंघमाचार्यः श्रीकक्कसूरिरवदत्-स्वनामधन्याः सर्वे सदस्याः! श्रीसंघश्च पञ्चविंशतितमस्तीर्थङ्कर इति साभिमानं सप्रश्रयमहं मन्ये। येनात्र सर्वेषां श्रावकाणां पुरतो यत् किंचित् प्रतिकूलं वच उक्तमपि तत् सर्वैः क्षन्तव्यम्। अस्मिन् विषये साफल्यं न प्राप्स्यामीति मे सन्देहः परिहृतो महानलौकिकश्चानन्दोऽनुभूत इति विनयमाहात्म्यप्रचुरमिदं वचः समाकर्ण्य श्रीसंघः कुकुन्दाचार्यश्च सूरीश्वरमूचतुः—अहो! धन्या वयमद्याचार्येणानुगृहीताः स्वकर्तव्यज्ञानं च लम्भिताः किमधिकं ब्रूमहे—

गुरवो बहवः सन्ति शिष्यवित्तापहारकाः।
गुरवो विरलाः सन्ति शिष्यसंतापहारकाः॥

यतो नगरमिदं स्वयमेवालङ्कृत्योपदेशेन वयमज्ञानात्स्वस्वरूपं बोधिताः। एवं नन्नप्रभसूरिमपि विनयप्रणत्यादिभिः सम्भाव्य सभा विसर्जिता बभूव।

कतिपयदिवसानन्तरं श्रीसंघ आचार्यत्रयस्य चतुर्मासार्थमभ्यर्थनामकरोत्। भाविलाभकारणं विज्ञाय तैराचार्यैरपि स्वीकृतम्। तत्र श्रीमालवंशीयो दुर्गाशाहः श्रीभगवतीसूत्रवाचनामहोत्सवमारभत। सपादलक्षं द्रव्यमस्मिन् धर्मकार्ये विनियुक्तम्। श्रीभगवतीसूत्रं हस्तिन उपरि संस्थाप्य नगरयात्रामकारयत्। नीलमरकतपद्मरागाद्यैर्मणिभिः पूजाप्रभावनादिकं चकार। दूरदेशस्था जैनेतरा अपि लोकाः सूरीश्वरस्य तात्त्विकदार्शनिकादिविषयकं व्याख्यानमाकर्ण्य परमसन्तुष्टान्तरङ्गाः। संसारस्य मिथ्यात्वं मन्यमाना आत्मश्रेयोऽनुसन्धाने मतिमादधुः। सर्वेषां भिन्नरुचीनां जनानां मनोरञ्जनं नाम दुःशकम्।

तथाहि—स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः॥

तथापि महामहिमशालिनां विपश्चितां तदेव वैशिष्ट्यं यत्सर्वचेतोऽनुकूलतापादनम्। अत एवोच्यते—

भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम्॥

मधुरकोमलं वीणाशब्दं हरिणा इव सरसरमणीयं भावानुबन्धि विरक्तिरतिसंवर्धकं व्याख्यानमाकर्ण्य बहवो जना दीक्षायता बभूवुः। सर्वे धर्माचरणसंसक्तहृदया अभूवन्।

अथैकदा सूरीश्वरस्य मनस्येवमभूत्- यदहमाचाम्लसहितं षष्ठं तपो विदध्याम्। कर्मपुञ्जक्षयार्थं तपःसमाराधनमेव श्रेयः। एवं विचारयति सा सच्चायिका प्रणतये समागता। सूरिश्च तां तपोऽनुष्ठानार्थं पप्रच्छ। भगवन्! तपोऽनुष्ठानेन व्याख्यानादिना धर्मभावनाभिवर्धनमवरुद्धं भविष्यति। गच्छस्य सर्वव्यवहारभारश्च भवदधीनोऽतोऽधुनाऽनावश्यकं तदिति देवीवचनमाकर्ण्य यथाकथंचित् तां प्रबोध्य तयानुमोदितस्तद्व्रतमन्वतिष्ठत्।

यदा नन्नप्रभसूरिराचार्यः तपोऽनुष्ठानमज्ञासीत्तदा तं न्यषेधीत् । तथापि सूरीश्वरेण कक्कसूरिणोक्तम्-यावन्मदीयविहारव्याख्यानादिकर्मस्वन्तरायो न भविष्यति तावदहं तपो विधास्यामि । एवं संयमव्रती सूरीश्वरो दृढनिश्चय आसीत् । तपसा सहाचार्या योगासनसमाधिस्वरोदयादिविषयाणामपि पारदृश्वाऽभूद्येन गच्छीया अन्यधर्मस्था अपि जनाश्च योगज्ञानाय स्वरोदयस्याध्ययनाय च सूरीश्वरसमीपमागच्छन् ।

एवं चतुर्माससमाप्तावष्टादश भावुका भगवतीं दीक्षां जगृहुः । तदनन्तरं नन्नप्रभाचार्यः कोरण्टकं, कुकुन्दाचार्य उपकेशपुरमाचार्यः श्रीकक्कसूरिश्च विहरणक्रमेण शिवपुरीमाययौ । आचार्यागमनं विज्ञाय जनकेन यशोदित्येन नगरप्रवेशमहोत्सवो विहितः । अन्येद्युराचार्यस्य संसाराद्विरत्युद्बोधकं व्याख्यानमाकर्ण्य पौरा आश्चर्यान्वितमानसा बभूवुः । एकस्मिन् दिवसे मन्त्री यशोदित्यो भार्यया मेनादेव्या कुटुम्बेन च सह वन्दनार्थमगच्छत् । वन्दनादिकं विधाय जननी मेनादेवी तमगादीत्-भगवन् ! अस्मान् विहाय गच्छता वयं विस्मृताः किम् ? ग्रामनगरोपनगरेषु यस्य बहवः संख्यातीताः शिष्या भक्ताश्च विद्यन्त एवम्भूतस्य भवतोऽग्रे के नाम वयम् । अस्तु । अस्मभ्यमप्यात्मनः श्रेयस्करमुपदेशं ददातु, येनात्माभ्युदयः कर्तुं शक्येत । सूरिश्च तामाश्वासयन्नाह-मातः ! सर्वमिदं प्रत्यासन्ने हि मृत्याविहैव स्थास्यति । एकाकिगमनमेव दृश्यते संसारेऽतो वृद्धावस्थायां यथा स्वकल्याणं स्यात्तथैव पूजनधर्माचरणोपदेशश्रवणादीनि धार्मिकाणि कृत्यानि सम्पादयतु भवती । अन्येऽपि कौटुम्बिका धर्मलाभाशिषा संभावितास्तथैवोपदिष्टा वन्दनं विधाय स्वसदनमगमन् ।

ततो निर्गत्य चन्द्रावतीमाययौ सूरिः । तत्रत्येन संघेनार्बुदाचलयात्रायै प्रार्थना कृता । सूरिरपि तदभ्यर्थनां स्वीचकार । अथ निदाघकाले सूरीश्वरेण सह सहस्रसंख्यकाः श्रावका अर्बुदाचलं प्रति प्रस्थिताः । मार्गे जलाभावात् पिपासापीडिता यमकवलतां प्राप्ता इवादृश्यन्त । अतस्ते जलप्राप्तये-सूरीश्वरसमीपमेत्य दुःखनिवारणार्थं प्रार्थयामासुः—भगवन् ! पिपासापीडिता वयं सर्वे विषीदामः, अतस्तन्निवारणं करोतु । कृपया पूर्वस्मिन् काले श्रीवज्रस्वामिना दुर्भिक्षदुःखिता जनाः संरक्षिता आसन् । एवमत्र भवानेवास्माकमुद्धारको भविष्यति । सूरिरपि तान् समाश्वास्य स्वयमेकाग्रमना बभूव । अतस्तत्क्षणमेव श्वेतपक्षः कश्चिद् विहगो दृष्टः । तत्सूचितेङ्गितस्थानं प्राप्य यावत्खनितुमारब्धं तावत्प्रभूतं जलं प्राप्तम् । गुरुचरणसरोजप्रसादात्ते प्रत्युज्जीविताः । सहस्रपरिमितैर्जनैः पीयमानमपि तज्जलं तथैव परिपूर्णमासीत् । संघेनापि तत्स्मरणार्थमेकः कुण्डः, एकश्च जिनमन्दिरं तत्र निर्मापितम् । ततोऽर्बुदाचलं प्राप्य भगवत आदीश्वरस्य यात्रा सम्पादिता । पूजाप्रभावनादिकं कृत्वाऽक्षयं पुण्यं प्राप्तम् ।

अथ विधाय यात्रां संघश्चन्द्रावतीं प्रति निवृत्तः । सूरीश्वरश्च लाटदेशे विहरन् क्रमेण भृगुपुर (भरुच)-माजगाम । श्रीसंघेन कृतसम्मानो व्याख्यानेन धर्मभावनामभिवर्धयामास ।

इतश्च मारोटकोटनगरे सोमशाहनामा जिनधर्मकर्मनिरतो दृढश्रद्धावान् श्रावकः प्रतिवसति स्म । स च जिनदेवं विहायान्येभ्यो देवेभ्यो जिनमुनिञ्च विहायान्यसाधुभ्यो न प्राणंसीत् । आपत्काले दर्शननियमार्थमनेन मुद्रिकायामाचार्यवर्यस्य श्रीकक्कसूरेश्चित्रं संस्थापितमासीदतस्तद्दर्शनेनात्मानं कृतकृत्यमसावमन्यत । एकदा तन्नगराधिपते राज्ञो गृहे पुत्रप्रसवोऽभवत् । ततस्तदभिनन्दनार्थं सर्वे जना राजानं नमस्कर्तुं राजप्रासादमगच्छन् । सोऽपि व्यवहाररक्षणार्थं तत्र गत्वा कक्कसूरेर्मुद्रास्थितं चित्रं युक्त्या पुरो निधाय प्रणनाम । प्रणामव्यवहारं विधाय तस्मिन् गृह गते तद्विरोधिभिः पिशुनवृत्तिभी राज्ञे निवेदितम्-राजन् ! परमधार्मिकः सोमदेवः श्रावकः कस्मैचिदपि न प्रणमति । राजा च तेषां वचः श्रुत्वोवाच-अधुनैवासौ गतः कथमेवमुच्यते ? । तेऽवादिषुः—प्रभो ! नैवमसौ तु गुरोश्चित्रं पुरो निधाय तस्मै नमस्कारमकरोत् । ततो रोषारुणनेत्रः स राजा सत्वरं सोमशाहमाह्वयत् । आगतञ्च तं पप्रच्छ । भोः श्रेष्ठिन् ! पूर्वमागतस्त्वं कस्मै प्रणामं विहितवानसि ? । तेन च

प्रोक्तं मम गुरव एवं मया प्रणामो विहितः। स्वापमानेन संक्रुद्धो राजा सप्तसंख्यकैरयोमयैर्बन्धनैरेनं दृढं बद्ध्वा गाढान्धतमसावृते कारागृहे स्थापयन्त्विति सेवकानादिशत्। सेवकैरपि तथैव कृतम्। ततः स सोमशाहोऽप्येक-चेतसा ध्यानेन चाचाम्लान्वितं गुरुं श्रीकक्कसूरिं प्राणमत्। गुरुचरणसरोजानुध्यानेन मारोटकोटनगरे कारागृहे नियन्त्रितस्य सोमश्रावकस्यायोमयाः शृङ्खलाः शीघ्रं त्रुटिता अभवन्। अहो! गुरोः परमकृपयैव दृढमपि मे बन्धनं छिन्नमतः साक्षाद्दर्शनमहं करोमीति निश्चित्य कारागृहान्निर्गत्य नृपसमीपमुपस्थितः। विस्मयापन्नचेता राजा राजसभा च तस्मै सहर्षमभिनन्दनं ददुः। सन्तुष्टो राजा सोमशाहाय लक्षरूप्यकान् पारितोषिकरूपे-णादात्। राजगृहान्निर्गतोऽसौ गुरुचरणकमलवन्दनार्थं भृगुपुर ( भरुच ) मयासीत्।

अथ क्रमेण स गुरुसामीप्यमवाप। तस्मिन्नेव क्षणे देवी सच्चायिका वन्दनायागताऽसीत्। शिष्याश्च गोचरचर्यायै गता इति हेतोर्द्वारमावृतमासीत्। अत्रत्यमिदं वस्तुजातं दृष्ट्वा स्वचेतसि सोमशाहो व्यचिन्तयत्-अहो! खलु कष्टं यद् गुरुरपि स्त्रीणां वशंगतो दृश्यते!। अतः कथमप्यसौ वन्दितुमर्हो नास्तीति मत्वा तस्मात्-स्थानाद् यावन्न्यवर्तत तावदेव झटित्युर्व्यां पपात। मुखाच्च तस्य रुधिरमस्रुस्रुवत्।

व्यतीते कियति काले मुनयो यदा समायातास्तदा तं द्वारपतितं स्रवद्रुधिरवदनं दृष्ट्वा वृद्धगणेशो नाम मुनिर्गुरुमुवाच-भगवन्! द्वारे सोमश्रेष्ठी शोणितशोणमुखः पतितो वर्तते। सूरिश्च देव्याः कोपेनास्येदृशी स्थितिरित्युक्त्वा तामाहूय भवत्या किमिदं कृतमिति तामगादीत्। सा चाह—भगवन्! कलुषितचेता असा-वुचितं दण्डं प्राप्तवान्। यस्य नामस्मरणमात्रेणैव तस्य निगडबन्धनानि छिन्नानि, राजसम्मानमपि लब्धं तस्यैव गुरोर्विषये दोषारोपणं कथं सोढव्यं स्यादस्य। अतोऽसावात्मकृतापराधस्येदं फलमनुभवितुमर्हत्येव। देव्या वच श्रुत्वा-भगवति! कोपं विहायास्य शांतिं विधेहीति सूरीस्तामवादीत्। यद्यस्य शान्तिरभिप्रेता तर्ह्यतः परं मे प्रत्यक्षमागमनं नैव भविष्यतीति देवी सूरीश्वरमुवाच। एवं विषमां परिस्थितिं विचार्यान्ते यथा तथा भवतु तथाप्येनमुज्जीवयेति सूरिकथितं वचनमादृत्य देव्याऽसौ लब्धसंज्ञः कृतः सोमशाहो लज्जाभरनताननः सखेद-माह-गुरो! क्षमस्व ममापराधम्। नैव ज्ञातमीदृशः प्रभाव आचार्यवर्यस्येति। गुरुश्च तं समाश्वासयत्। ततः परं सच्चायिका प्रत्यक्षरूपेण नागता। इदमप्युक्तमासीदतः परं श्रीरत्नप्रभ-यक्षदेवसूरीश्वरसदृशा आचार्याः प्रायो दुर्लभा एव ततस्तयोर्नामनी कोश एव संस्थापनीये। अर्थात् कस्यचिदाचार्यस्य नाम श्रीरत्नप्रभ—यक्षदेव-सूरीति न कर्तव्यम्। अपरच्चोपकेशवंशीय एवाचार्यो भवितुमर्हतीति। अतः कक्कसूरिणा श्रीरत्नप्रभ-श्रीयक्षदेव-सूरीति शब्दौ कोशे स्थापितौ। संघायापि निवेदितं यदुपकेशवंशीयो योग्यतां प्राप्त आचार्यपदे प्रतिष्ठापयितव्य इति। स सोमशाहोऽपि मारोटकोटनगरं प्रत्याजगाम।

आचार्यो भृगुकच्छाद् विहारं विधाय सोपारपत्तने चातुर्मासीमकरोत्। तत्र देवी सच्चायिका परोक्षं वन्दनायागता तं न्यगादीद् भगवन्! भवता दक्षिणप्रान्ते महाराष्ट्रे च विहारो विधेयो येन महान् लाभो भवि-ष्यतीत्युक्त्वा साऽदृश्यतामयात्। सूरीश्वरश्च देवीवचनमादृत्य शासनस्योत्तरदायित्वं कुकुन्दाचार्यस्योपरि निक्षिप्य पञ्चशतपरिमितैः शिष्यैः सह धर्मप्रचाराय दक्षिणस्यां दिशि विहारमारभत। क्रमेण ग्रामनगरोपनगरेषु विहारं कृत्वा व्याख्यानोपदेशादिना वर्षत्रयपर्यन्तं सर्वतोभावेन धर्मजागृतिमकरोत्। येन पूर्वं तत्र विहरतां साधूनां धर्मप्रचारे। द्विगुणीभूतो वेगः धर्मस्य समधिकप्रचारार्थं च पुनस्तानादिश्य क्रमेणोज्जयिनीं भूष-यामास श्रीसंघकृतसमुचितसत्कारस्तत्रैव चतुर्मासमकरोत्। ततः खटकुंपनगराद् राजसीश्रावकस्तत्पुत्रो धवलश्च जिनप्रतिमाप्रतिष्ठायै प्रार्थयामासतुः तत्र लाभकारणं विचिन्त्य सूरीश्वरः खटकुम्पपत्तनमगमत्। कुकुन्दाचार्योऽपि सशिष्य आचार्यस्य खटकुम्पनगर आगमनं विज्ञाय वन्दनायाजगाम। ततोर्द्वयोराचार्ययोरागमन-महोत्सवोऽतीव सोत्साहेन पौरैः सम्पादितः। सूरीश्वरस्यासाधारणं वैराग्यभावनापरिपुष्टं व्याख्यानमाकर्ण्य

राजसीश्रावकस्य पुत्रो धवलो विरक्तः सन् पितरौ सम्भाष्य भगवतीं दीक्षामगृह्णात्। ततश्च राजहंसमुनीति प्रसिद्धिमवाप। जिनमन्दिरे चाञ्जनशलाकां प्रतिष्ठाविधिञ्च समाप्याचार्य उपकेशपुरमगमत्। सुरेरनुज्ञामवाप्य भिन्नमालसंघेना-भ्यर्थितः कुकुन्दाचार्यो भिन्नमालनगरे, सूरीश्वरश्चोपकेशे चतुर्मासावस्थानमकरोत्। ततः समाप्ते चतुर्मासे श्रीसंघः कुकुन्दाचार्यं न्यवेदयद्-भगवन्! भवतो वृद्धावस्था वर्ततेऽतः कमपि योग्यं मुनिमाचार्यपदे प्रतिष्ठापयितुमर्हति, एवमाकर्ण्याचार्योऽब्रवीत्। एकस्यैवाचार्यस्य विद्यमानत्वे द्वितीयस्य योजनाऽनुचितेति श्रीसंघस्तूष्णीं स्थितः। कुकुन्दाचार्यस्तु संलेखनातत्परोऽभवत्। व्यतीते काले कुकुन्दाचार्यः स्वर्गमगमत्। संघश्च दुराग्रहदूषितः सूरिवचमनादृत्य तदीयशिष्येषुकल्याणसुन्दरं मुनि देवगुप्तसूरिनाम्नाऽहूय पट्टे प्रतिष्ठापयामास।

आचार्यः कक्कसूरिस्तु चतुर्मासानन्तरं पूर्वदेशे धर्मप्रचारार्थं गतः पञ्चालादिषु प्रान्तेषु विहरन् यदा सिन्धप्रान्तमाजगाम तदा ज्ञातं यत् कुकुन्दाचार्यस्तु स्वर्गं गतस्तत्स्थाने तदनुमत्यभावेऽपि श्रीसंघेन देवगुप्तसूरिराचार्यपदे स्थापित इति। भवितव्यं भवत्येवेति मत्वा सूरिणा शान्तिमन्त्राराधना विहिता। ततः शत्रुञ्जययात्रां विधाय विहारक्रमेण मरुधरप्रान्तस्थां चन्द्रावतीमाययौ। तत्र समाप्ते चतुर्मासे सूरेरुपदेशादेका श्रमणानां सभा मिलिता। अत्र देवगुप्तसूरिं विहाय सर्वे साधवः साध्व्यश्च समागताः। सभाध्यक्षपदमलङ्कुर्वता श्रीमता सूरिणा यथा समये धर्मप्रचारसंरक्षणानुपालनादीनां प्रभावपूर्णा देशना दत्ता। शासनोन्नतये विचारा अपि चिन्तिताः। योग्यतां प्राप्तेभ्यो मुनिभ्यः पदवीप्रदानं कृत्वा, सर्वेभ्यो धर्मप्रचाराय विहारस्याज्ञां दत्वा च सभाकार्यं समापितम्।

ततो विहरन्सूरिरुपकेशपुरमाययौ। तत्र श्रेष्ठिगोत्रीयो मंगलशाहः शत्रुञ्जययात्रार्थं संघं निःसारितवान्। परोक्षदर्शनायाः सच्चायिकायाः कथनेन निजनिधनसमयं ज्ञात्वोपाध्यायपदभूषितं राजहंसमुनिं देवगुप्तसूरीति नाम्ना संबोध्य स्वपट्टे संघसमक्षं प्रतिष्ठापयामास। स्वयञ्च सप्तविंशतिदिनान्यनशनेन समाधिना चातिवाह्य दिवं ययौ।

## वि० सं० ४८० तः] ३४ आचार्यः श्रीदेवगुप्तसूरिः (षष्ठः)। [वि० सं० ५२० प०]

श्रीकक्कसूरिपट्टे पण्डितप्रकाण्डोऽमरगणसंभावनीयकीर्तिः श्रमणार्चितः सुविहितशिरोमणिः श्रीदेवगुप्तसूरिः समाजगाम। असौ च खटकुम्पनगरनिवासी करणाटकगोत्रीयः। पितास्य तु क्रयविक्रयादिव्यापारकुशलो धार्मिकधुरन्धरो राजसीशाहो, माता च वनिताजनललामभूता सकलगुणगणनीययशा रुक्मिणीदेवी। तयोरयं परममेधावी विनयावर्जितसकलमनोमोहको धवलनामा।

धवलोऽसौ पित्रा सह घृततैलादिव्यापारे दत्तचित्त आसीत्। एकदा काचिद् वृद्धा घृतपूरितं घटमधस्तादारिका (आरीति भाषायाम) युतमस्मिन् श्रेष्ठिनि विश्वस्य श्रेष्ठिन्! घृतमिदं तोलयित्वा स्थापयतु यावदहमागच्छामीत्युक्त्वा संस्थाप्य च घटं ततोऽन्यत्रागात्। राजसी च यावदिदं घृतं पात्रान्तरे निष्कास्य तोलयति तावदस्माद् घृतं रिक्तं नाभूत्। किमत्र कारणमिति विचारयन्नसौ ज्ञातुमत्र कारणं नाशक्नोत्। तदा धवलो घटस्याधस्ताच्चित्रावलीनिर्मितां तामारिकां दृष्ट्वा पितरमुवाच-पितः! अधः स्थापिताया अस्या एवायं प्रभावः। पूर्वं सूरेर्व्याख्यानेऽन्यत्र च बहुशः श्रुतं यदस्याः प्रभाव ईदृश इति। परमसन्तुष्टो राजसीश्रावकः पश्चादागतां तां नियतपरिमाणकस्य घटस्थघृतस्य मूल्यमिदं गृहाणेति तामगादीत्। सा च तथेत्युक्त्वा घटं गृहीतुमैच्छत्तदा तां नावलोक्यारिकां तदर्थमवदत् वृद्धा। तेन च बहुनुनीता किंचिद् गुडं मे देहीत्युक्ते पञ्चसेरकप्रमाणकेन गुडेन संतोषिताऽन्यां मत्कृतेऽहमानेष्यामीति मनसि विचार्य यथागतमयासीत्। गतायाञ्च तस्यामसौ स्वकीये धनागारे तामारिकां निचिक्षेप, यतो धननिधिरस्याक्षयो बभूव। येनोभौ जनकतनयौ समधिकां धर्मभावनामभिवर्धयामासतुः।

व्यतीते च काले कियति परमधर्ममर्मज्ञः श्रीकुकुन्दाचार्य उपकेशपुरात् खटकुम्पनगरमात्मना भूषयामास। कृतमस्य च भव्यं स्वागतमनेन राजसीश्रावकेण, नवलक्षपरिमिताभिर्मुद्राभिश्च महान् व्ययः कृतः। ततः सूरेराज्ञामधिगम्य भगवतः श्रीतीर्थंकरस्य भव्यो जिनालय आरब्धः। अपरञ्च सम्मेतशिखरयात्रायै कुकुन्दाचार्यस्याध्यक्षत्वे महान्तं संघं निष्कासमास। समाप्य च तीर्थयात्रां प्रतिनिवृत्तः पथि च बहूविधान् जीर्णोद्धारान् दीनेभ्यश्चान्नवस्त्रादीनि दत्वा गृहश्चागस्य पुरुषेभ्यः स्वर्णमालाः स्त्रीभ्यश्च सुवर्णकंकणानि पारितोषिकरूपेण दत्वा विसर्जयामास।

अथ जिनालयमूर्तिप्रतिष्ठापनकार्ये कुकुन्दाचार्यं स व्यज्ञापयत्। तेन च सूरिणा अस्मद्गच्छाधिपतिः श्रीकक्कसूरिरेव तन्मङ्गलकार्यं निर्वोढुं सर्वथा समुचितः महामहनीयकीर्तिः स एवात्राभ्यर्थितो वरमिति स निजगदे। तदीयं वचनमनुमान्यावन्तीदेशस्थामुज्जयिनीमलंकुर्वाणं तमाह्वातुं दूतान् प्राहिणोत्। ते च तत्संदिष्टं सविनयमब्रुवन्। स च सूरीश्वरः प्रार्थनामनुमान्य खटकुम्पमभिप्रतस्थे। नागपुरोपसमीपं विहरन्नवगतसूरीश्वरागमनः सः कुकुन्दाचार्योऽपि खटकुम्पमागच्छत्। तस्यापि पूर्ववत्पुरप्रवेशः सम्पादितः। सभामण्डपे नभोमार्गे स्थितौ शशिदिवाकराविव सकलसमुपासकजनानां मनांसि रञ्जयामासतुर्दर्शनानन्देन। सम्भाव्य च धर्मलाभादिना पाथयित्वा चोपदेशामृतं सर्वान् चादिदेश सूरिः श्रीकक्कसूरिर्गृहगमनाय।

अथापरे द्युराजसीश्रावकः सप्रश्रयमाचार्यसमीपमुपेत्य षण्णवत्यंगुल (९६) परिमितां महावीरप्रतिमां निर्मापयितुमिच्छां प्रकटीचकार। सूरिणा चोक्तम्-विपरीते ह्यस्मिन् समये लुब्धवृत्तयो जनाः सुवर्णमयीं मूर्तिमपि हतबुद्धयो विक्रेतुमभिलषेयुर्धनस्य च बहून्यपराणि विनियोगस्थानानीति पाषाणमय्येवाऽनल्पकल्याणप्राप्तये त्वया विधेया सा। भवदीयमेव वचोऽत्र प्रमाणमिति समादृत्य स विंशत्यधिकशताङ्गुल (१२०) परिमितामश्ममयीं प्रतिमां निर्मातुं शिल्पिन आदिशत्।

एवं व्यतीते कियति समये श्रुत्वा च निःसारतामात्रैकफलं संसारसंसरणस्य स धवलो व्याख्यानत एव जातवैराग्यो जननीं जनकं च कथं कथमपि सम्बोध्य चतुर्दशसंख्यकैर्भावुकैः सह शुभे मुहूर्तेऽग्रहीदार्हतीं भगवतीं दीक्षाम्। परिवर्तितं चास्य राजहंसमुनिरित्यभिधानम्।

ततः समभीष्टदीक्षालाभसन्तुष्टान्तरंगो राजहंसो मुनिः क्रमेण सूरेः समीपे क्षणोऽपि दुर्लभ इति मन्वानोऽल्पेनानेहसा काव्यनाटकादीनि पयः प्रदर्शकानि व्याकरणकोशादीनि चाधीत्य जिनागममर्मवेदनदक्षः शास्त्राटवीसंचरणपञ्चाननो रमणीयाननोऽखिलविद्वज्जनचूडामणिर्बभूव। मध्ये च प्रतिष्ठाविलम्बवशादुपकेशपुरं गत्वा भगवतो महावीरस्य श्रीरत्नप्रभसूरीश्वरस्य च पुण्यं लोकैकमंगलं व्यधाद्दर्शनम्।

सम्पूर्णे च महति जिनालये रचितायाञ्च प्रतिमायां सबहुमानमसौ राजसीश्रावको नागपुरं प्रति समार्पितविहारकार्यं कुकुन्दाचार्यमाचार्यवर्यञ्च श्रीकक्कसूरिमामन्त्रयामास। प्रारब्धे च महोत्सवे पुण्ये दिने श्रीकक्कसूरिरञ्जनशलाकां प्रतिष्ठाविधिञ्च महता शास्त्रीयेण विधानेनाचीकरत्। प्रभूतञ्च द्रव्यमत्र तेन श्रेष्ठिना धर्मकर्मणि व्ययीकृत्य शाश्वतं समासादितं पुण्यम्। व्यापारव्यवहारकुशलो वणिक् किं न प्राप्नुयादशाश्वतेनापि चित्रावलीप्रसादलब्धधनेन शाश्वतं निःश्रेयसम्!।

श्रीकुकुन्दाचार्यः सूरेरनुज्ञां प्राप्य नागपुरं सशिष्यो ययौ। आचार्यश्च तत्रैव चातुर्मासिकीं स्थितिं चकार। वाचयामास श्रीस्थानायांगसूत्रम्। तीर्थयात्राप्रसंगवर्णनेनोद्भूततीर्थयात्राभिलाषः स समाप्ते चतुर्मासव्रते सूरेरध्यक्षत्वे आत्मनश्च संघपतित्वे शत्रुञ्जययात्रायै महासंघायोजनमकार्षीत्। बहवोऽत्र संघे भावुकाः समागताः। शनैः शनैर्गत्वा तत्र विधाय पूजाप्रभावनादिकं कृतार्थतामासादयितुं चात्मनः समर्प्य च संघपतिमालां पुत्राय खेतसीश्रावकाय शुभे च दिवसे पुण्यक्षेत्रेऽगृह्णात् सपत्नीकोऽष्टाविंशतिपरिमितैर्भावुकैः भगवतीं दीक्षां सूरीश्वर-

समीपम् । संघश्च क्रमेण खटकुम्पं प्रति निवृत्ते । सूरीश्वरश्च धर्मप्रचारार्थं सौराष्ट्र-सिन्धादिषु देशेषु विहरन् पुनराजगाम शत्रुञ्जयतीर्थम् । सम्पूर्णसमापितस्वधर्मप्रचारसंवर्धनप्रभावनकार्यः शाहदेवराजेन प्रारब्धे महामहोत्सवे परमधर्मरुचिं सकलशास्त्रविचारचारुचरितं राजहंसं स्वपट्टे स्थापयामास । परम्पराप्राप्तक्रमेणास्य श्रीदेवगुप्तसूरिरिति नाम चकार ।

अथ नवोदितानवद्यप्रकाशविद्योदितजगन्मण्डलो भगवान् दिवसकर इव ज्ञानप्रकाशविद्योतकः सर्वत्राप्रतिहतगतिः समरे सुभट इवासौ सूरीश्वरः पञ्चशतसंख्याकैर्मुनिभिः सह विहारं कुर्वन् बहुषु प्रान्तेषु क्रमशः धर्मप्रचारं सर्वतोभावेनाभिवर्धयन् खटकुम्पमाजगाम । अस्यैव नगरस्य सुपुत्रत्वात्सर्वसम्प्रदायमर्मकुशलत्वादाचार्यपदाधिरूढत्वाच्च सर्वे नागरिका अधिकप्रमोदमोदमाना अलौकिकमस्य स्वागतमकार्षुः । तदीयं च गभीरभावपूर्णं श्रेयःसाधकं व्याख्यानमास्वाद्य सुधामपि मुधाऽमन्यत । पौराश्चात्मानं कृतार्थं मेनिरे । प्रशशंसुश्च तन्मातापितरौ धन्यमेव तयोर्जीवनमनेनेति ।

एवं सर्वान्सम्भाव्य ज्ञानामृतेन मरुधरप्रान्ते ग्रामनगरेषु विहरन्नाचार्योऽसौ स्वकीयज्ञानप्रभावेणात्मसाच्चकार । तदाज्ञां देवाज्ञां मन्यमाना नूतनानि जिनायतनानि निर्मापयाञ्चक्रुः । मुमुक्षवश्च बहवो जगृहुर्दीक्षाम् । इतरानपि जिनधर्मानुरागिणः कृत्वा महाजनसंघस्यातिशयमभ्युदयमकरोत् । अपरञ्च पद्मावतीनगर्यां (पुष्करे) चतुर्मासस्थितो शतत्रयपरिमितान् समागतान् सन्यासिनः शास्त्रे विजित्य श्रमणसंघस्यापि वृद्धिमकरोद्दीक्षादानेन । ततश्च वैदिकी हिंसा सर्वत्र सूरीश्वरप्रभावान्नामशेषतामाप । एकदाऽचार्यवर्यः सभायां यात्रामाहात्म्यमलौकिपुण्यपुञ्जप्रचुरं वर्णितवान् येन श्रेष्ठिगोत्रीयोऽर्जुननामा मन्त्रिप्रवरः परमश्रद्धालुः समाप्ते व्याख्याने सप्रश्रयं तीर्थयात्रायै सूरिमभ्यर्थयामास । भगवन् ! भगवतो महावीरस्य निर्वाणभूमीभूतस्य श्रीसम्मेतशिखरस्य यात्रामहं भवदीयाज्ञामनुसृत्य कर्तुमिच्छामि । कः खलु श्रेयःसंपादने प्रतिबन्धकः स्यात्, शुभस्य शीघ्रमित्येव वरमिति तं तदर्थमन्वमन्यत । सर्वत्रामन्त्रणानि कृत्वा महान् संघो मार्गशीर्षशुक्लत्रयोदश्यां शुभे मुहूर्ते यात्राभिमुखं प्रयाणमकरोत् सूरेरध्यक्षत्वे । क्रमेण तत्र गत्वा ध्वजारोपणाष्टाह्निकामहोत्सवपूजाप्रभावनादिभिः पुण्यैः कर्मभिः प्रक्षालितानि पातकानि । अनन्तरं चम्पापुरीपावापुरीराजगृहादीनां तीर्थस्थानानां यात्राञ्च विधाय संघः पद्मावतीमाजगाम । प्रजिजनं पञ्चमिर्मुद्रिकाभिः सुवर्णमयीभिः संमानं कृत्वा दत्वा च दीनेभ्यो बहु दानं यात्राकार्यं सुखेन सम्पादितमनेनार्जुनेन मन्त्रिणा ।

आचार्यवर्यो देवगुप्तसूरिस्तु पञ्चशतसंख्यकैः शिष्यैः सह सम्मेतशिखरसमीपस्थेषु ग्रामनगरेषु धर्मप्रचारमकार्षीत् । जिनधर्मानुरागिणां श्रावकाणामहती संख्या सम्पादिता । ते चाधुना सराकजातीया उच्यन्ते । ततश्च बङ्गदेशे विहृत्य हिमा लजिनालयानां दर्शनं विधाय कलिङ्गदेशेऽकरोद्विहारम् । तत्र चोदयगिरिखण्डगिर्योर्दर्शनं व्यधाद्यत्र भगवतः श्रीपार्श्वनाथस्य परम्परायां समागताः सर्वे एवाचार्या मुहुर्मुहुः समागत्य धर्मप्रचारमकार्षुः । ततो विहरन्नसौ श्रीपार्श्वनाथस्य कल्याणभूमिमात्मनाऽलंञ्चकार, । स्पर्शनादीनि चात्र कृत्वा. कुरुपञ्चालकुनालदेशेषु धर्मप्रचारार्थं विजहार । तत्रोपकेशगच्छीयाः साधवो धर्मप्रचाराय पूर्वं संस्थितास्ते सूरिणा प्रोत्साहिताः स्वकार्ये । नूतनानि मन्दिराणि, प्रतिष्ठाः, अन्यमतानुयायिनामपि जिनधर्मेऽधिका रुचिश्च सम्पादिता । ततः सिन्धदेशमाययौ सशिष्यः सम्मानितश्च स्वागतादिभिः । प्रथमन्तु मांसभक्षकाणां मांसाहारोऽहिंसाधर्मस्वरूपज्ञापनेन दूरीकृतः । परितश्च साधुभिरीदृशी धर्मभावना समुत्तेजिता यतो बह्वी संख्या जिनधर्मावलम्बिनां समपद्यत । सिन्धदेशोपवनं धर्मोपदेशामृतसिञ्चितं सदाचारफलं परं रामणीयकमवापेत्यत्राऽसौ सूरीश्वर एव मुख्यं निदानम् । सम्पाद्य च धर्मरुचिं लोकानां कच्छदेशमगात् । तत्रापि धर्मोपदेशेनाभिनवां धर्मभावनामुद्बोध्य सौराष्ट्रदेशमयासीत् । तत्र सर्वत्र विहरन्नसौ क्रमेण श्रीशत्रुञ्जयतीर्थमाजगाम । दर्शनयात्रादिकं विधायाक्षय्यो लाभः समासादितः ।

अस्याचार्यस्य शासनसमये विहायैकादशाङ्गं पूर्वाध्ययनस्याभाव एवासीत्। स्वयं च पूर्वद्वयाध्ययनस्तदीयमर्मज्ञश्चाभवत्। येन स्वपरगच्छीया बहवो मुनयोऽध्येतुमागच्छन्। पठताञ्च तेषां मध्ये आर्यो देववाचकः परममेधावी विनयरुचिर्यस्मिन्नाचार्यो भृशमस्निह्यत्। सूरेश्चेदृशी भावना यदसौ पूर्वद्वयाध्ययनं संपूर्णतया विदध्यात्। परं दैवमत्र प्रतिकूलम्। यतोऽनेन सार्धपूर्वमध्ययनं कृतमतः परं प्रमादो विहितः। आचार्येण मुहुर्मुहुर्दत्तोत्साहोऽसौ धृतिं न दधार। सूरिश्च चेतसि दुःखेनाशोचत्—महत्कष्टमिदं यद् दृष्टिवादश्चतुर्दशपूर्वाणां ज्ञानं च पात्राभावेनाचार्यचरणैः सहैवाभावं गतम्। अवशिष्टं च पूर्वद्वयज्ञानम्। ग्राहकश्चैको देववाचकः सोऽप्यद्य प्रमादग्रस्तः, किमत्र विधेयमिति। मुनिर्मंगलकुम्भो नाम तदासीद्येन पूर्वमेकं मूलतोऽधीतम्। आचार्यश्च तमध्यापयामास तदर्थान्। यतोऽस्य देववाचकस्याभिरुचिरवर्धत। ततोऽनेन सार्धपूर्वं सार्थमर्धञ्च मूलतोऽधीतम्, एवमपि कृत्वा स्वधर्मशास्त्रं संरक्षितम्। अद्य तु धर्मग्रन्थानां दाहो, ज्ञानं तु दुरापास्तमित्यहो साहसम्!

विहरणक्रमेणाससाद भरुचनगरमसौ सूरीश्वरः। तत्रत्येन चतुर्विधेन संघेन च महता समारोहेण स्वागतं विहितम्। सकलजनमनोमोदकं धर्मरुचिसंवर्धकं सुविशदविचारचारु समुपासकानां परमसुखकरं व्याख्यानं दत्तमाचार्यवर्येण। ततः परं संघसमक्षमेव निम्नलिखितेभ्यः पदवीप्रदानेन द्विगुणितधर्मप्रचारप्रोत्साहनमकार्षीत्। यथा

मंगलकुम्भादिभ्य एकादशभ्य उपाध्यायपदम्।<br>
देववाचकादिभ्यस्त्रिभ्यो गणिपदं क्षमाश्रमणपदम्।<br>
देवसुन्दरादिभ्यः पञ्चदशभ्योः पण्डितपदम्।<br>
आनन्दकलसादिभ्यः पञ्चदशभ्योः गणावच्छेदकपदम्।<br>
सुमतितिलकादिभ्यः पञ्चदशभ्यो वाचनाचार्यपदम्।

एवं पदवीप्रदानं समहोत्सवं समाप्य सर्वान् तान् सर्वत्र धर्मप्रचाराय प्राहिणोत्। अन्ते च तत्रैव चतुर्मासो निर्धारितः। अन्येभ्यश्च समीपग्रामनगरेषु चतुर्मासार्थं प्रबन्धो विहितः। व्याख्याने दार्शनिकतात्त्विकयोगसमाधिप्रभृतीन् विषयानवलम्ब्य धर्मोपदेशो दत्तः, राजा तथा प्रजाश्च सोत्साहं श्रुत्वाऽत्मानं धन्यं मेनिरे। अन्यमतानुयायिनश्च जिनधर्ममङ्गीचक्रुः। तत्र विद्यमाना बौद्धधर्मानुयायिनोऽपि निमिलितनयना शिथिलितधर्मप्रचाराश्चाभूवन्। तत आवन्तीदेशे विहरणक्रमेणोज्जयिनी—माण्डवगढ़—महेन्द्रपुर—दशपुरादिषु धर्मव्याख्यानादीनि कृत्वा मेदपाटप्रान्ते चित्रकोटाघाटपत्तनादिषु च विहरन्नसौ उपकेशपुरमगमत्। तत्र भगवतो महावीरस्य सूरीश्वरस्य श्रीरत्नप्रभसूरेर्देव्याः सच्चायिकायाश्च दर्शनं विधाय श्रीसंघमुपदेशनादिभिः संमानयामास। अनुमान्य च प्रार्थनां तत्रैवावात्सीद् वर्षाणां चतुरो मासान् येन धार्मिकाणां महानलभ्यो धर्मलाभो जातः।

एकदा भगवतीं सच्चायिकामपरोक्षरूपिणीमवादीदायुषो ज्ञाने। सा च भगवन्! त्रयोदशदिनाधिकैः पञ्चभिर्मासैरेव पूर्णं भवदीयमायुरतो भवान् मंगलकुम्भायोपाध्यायपदविभूषितायाचार्यपदे स्थापयतु संघसमक्षमिति। श्रीसंघानुमत्या कुमटगोत्रीयेण वधाशाहेन समनुष्ठिते महोत्सवे सूरीश्वरस्तं सकलसमुचितगुणमङ्गलायतनं मंगलकलशमुपाध्यायमाचार्यपदे स्थापयामास। अभिधानमस्य श्रीसिद्धसूरीति परिवर्तितम्।

समाप्ते चतुर्मासव्रते ततो निर्गत्य खटकुम्पनगरमगच्छत्। कृतश्च सबहुमानमस्य सत्कारविधिः सर्वैः पौरैः। अवशिष्टानि च द्वात्रिंशद्दिनानि। आरब्धमनेनानशनं येन सर्वे महद्दुःखमनुबभूवुः। अन्ते पञ्चपरमेष्ठि-

महामंत्रस्मरणपूर्वकं नश्वरमिदं शरीरमसृजत् । सूरीश्वरवियोगदुःखदुखिता जनास्तदी ' शरीर ' कथं कथमपि वन्हिसाच्चक्रुः । आकाशात्केसरवर्णा वृष्टिः पपात शरीरोपरि सुरभीणि च पुष्पाणि । श्रीसंघं समाश्वासयन्ती देवी सचायिकाऽदृश्यरूपेणोवाच—आचार्यो देवगुप्तसूरिः परमप्रभावनोपेतः सौधर्मनामनि देवलोके गतः । एकमेव भवमासाद्य मोक्षमेष्यतीति । श्रीसंघोऽपि परमानन्दसन्दोहमग्न आचार्यवर्यस्य स्मरणचिह्नरूपमेकं बहुमूल्यं स्तम्भमारोपयामास तत्र संस्कारभूमौ । सत्यमेवोच्यते ।

कथमपि भुवनेऽस्मिन् तादृशाः संभवन्ति ।

## वि० सं० ५२० तः] ३५—आचार्यः श्रीसिद्धसूरिः (षष्ठः) वि० सं० ५५८ प०]

श्रीदेवगुप्तसूरिपट्टे सकलागमपारदृश्वा योगसमाधिस्वरोदयशास्त्रेष्वनन्यसाधारणशेमुखीचमत्कारचिंतामणिर्लब्धिसंपन्नः श्रीसिद्धसूरिः स्थानमवाप । असौ च चित्रकोटवास्तव्यो विरहटगोत्रीयश्चासीत् । पिताऽस्य परमधार्मिको वाणिज्यकलाकलापकोविदो धनाढ्यवर उमाशाहो, माता च सतीकुलशेखरमणी रमणीरत्नसमाख्याता श्रीमती नाथीदेवी । तयोरयमाचार्यवर्यः सारंगनामाऽन्वर्थनामा सकलसारदर्शी सूनुरभवत् । बाल्यादेवाऽसौ दृढसंकल्पः कार्यसूक्ष्मविचारविचक्षणः क्रमशः पितुः पथा वाणिज्यकर्मनिरतो बभूव । नास्य व्यापारो भारत एव केवलमपि तु विदेशेष्वप्यासीत् । प्लवमार्गेण मुहुर्मुहुरसौ गतागतमकरोत् ।

एकदा कोटिपरिमितमूल्यानि वस्तूनि प्लवमारोप्य स विदेशं जगाम दुर्दैववशात्समुद्रमध्ये प्रचलति प्लवे प्रबलतरपवनः प्लवमुभयतः कल्लोलावलीसमाच्छन्नमकरोत् । सर्वे च भयविह्वला दिङ्मूढतामवापुः । परमसौ सारंगः "जंजं भगवयादीहा तं तं पणमिसन्ति" अवश्यं भावि तु प्रयत्नशतेन प्रतिक्रियमाणमपि भवत्येवेति विचार्य सर्वान् समाश्वासयत् । तथापि न केवलमिदं निश्चित्यावस्थानं युक्तमित्यपरे तमवोचन् । सारंगस्तानवादीत्-निश्चयानन्तरमेवोद्योगो भवति न तु तत्प्राक् । अतोऽहं ब्रवीमि यद् भवति तत् श्रेयस एवेति दृढं विश्वसन्तु भवन्तः । अत्रैवैको दृष्टान्तो यथा—एकदा वसन्तपुराधिपस्य राज्ञो जयशत्रोरंगुलिश्छिन्नाऽभवत् । सभासद्भिः सर्वैरत्र महान् खेदो दर्शितः । किन्तु तदीयेन मन्त्रिणोक्तं यद् भवति तत् श्रेयस एव । पश्चात् कैश्चिद् दुर्जनै राजा मन्त्रिविषये विरुद्धमुक्तः । तथापि स न तस्मिन् भृशमखिद्यत् । अथैकदा वनविहारार्थमुभौ जग्मतुः । मध्ये च राजा पिपासयाऽधिकं पीडितः । मन्त्री च तदर्थं जलान्वेषणायायात् । ततो देवीप्रसादाय बलिमन्विषन्तः पुलिन्दा वृक्षतले स्थितं रमणीयमूर्तिं निर्भर्त्सितमारमूर्तिं राजानं दृष्ट्वा गृहीत्वा च देव्यायतनं निन्युः । मन्त्री च प्रत्यागतः स्वबुद्धिबलेन वनेचरव्यवहारादिकं विचार्य सुन्दरं चण्डिकामन्दिरमगात् किरातरूपमास्थायावोचत्सर्वान्-ननु सूक्ष्मेक्षिकया दृष्ट्याऽवलोकयन्तु सर्वे भवन्तः, एकेनापि शरीरावयववैकल्येनास्य क्रुद्धा देव्यस्मान् सर्वानेवैकपदे हनिष्यतीति । दृष्टं च तैः । उक्तश्च भोः छिन्नांगुलिरयम् । त्यज्यतामपरश्चानीयतां कोऽपीति तं विससृजिरे । मन्त्री च केनचिदपदेशेन निर्गत्याग्रे राजानममिलत् । राज्ञा चोक्तं मन्त्रिन् ! अद्य त्वयैव मे प्राणाः परिरक्षिताः । स च न्यगादीत्-स्मर्यते मदुक्तं यद् भवति तच्छ्रेयस इति ? । तेन चोक्तमोमिति । तदारभ्य मन्त्रिण्यसौ परमां प्रीतिमबन्धात् । अनन्तरं नगरं प्रत्याजग्मतुः । अत एव दृढं विश्वसनीयमस्माभिरवश्यमेव कल्याणोदर्को भविष्यतीति । एवं यथाकथंचिद् धृतिमवलम्ब्य सर्वे समयमतिवाहयन्ति स्म । परमयं प्रतिकूलतामुपगतः पवनः प्रलयकाल इव प्रबलतरं ववौ । दृष्टश्च कोऽपि देवरूपः । ते च तेनोक्ताः । नरबलिं भवन्त उपहरन्तु तदैव सर्वेषां कुशलं नान्यथा । सर्वे च ते सारंगं भयविह्वला बल्यर्थमवोचन् । स च तानवादीत्-मयैवेदं कदापि कर्तुमशक्यम् । स्वार्थलुब्धानां भवतां न परकीयशरीरे करुणापेक्षा ? । कोऽस्ति योऽसावात्मानमर्पयितुमस्माकं मध्ये समीहते ? । सर्वे च मूकीभूताः । एवं पुनरसौ तानगादीत्—

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः॥

तद्वचः श्रुत्वा सर्वे न किंचिदवादिषुः। स च देवरूपः सारंगमभ्येत्योवाच-भोः सर्वप्राणसंरक्षणार्थं त्वमेव मे बलिमुपनय नररूपम्। न चान्याद्वारगतिरत्र। अक्षुब्धान्तरङ्गः स सारंगस्तमवदत्—कतिवारं प्लवा अत्र गता आगता, न च बलिरुपहृतः, नचाधुना मे दातुमिच्छा। अनेकसुकृतलब्धोऽयं दिव्यो देहः किमनेनैव नरबलिना संतुष्टा भविष्यति? । सर्वदोषायतनमिदं च शरीरं देवप्रसादजनकं कथं स्यात्?। का च तेऽभीष्टा गतिः?। न च मया विचार्यमाणेनापि ज्ञातुं शक्यते कस्मै कर्मबन्धानुभवाय देवेनापादमिष्यत इति। सोऽपि लज्जाभरनताननः किमपि वक्तुमशक्नुवन् हारमकमुज्वलाकारं तस्मै समर्प्य नाहमद्यारभ्येदृशं क्रूरं कर्म करिष्यामीति कथयित्वा सप्रतिज्ञं यथागतमगात्। शान्तोऽभूच्चोपद्रवः। सर्वे च मुदितमानसा तं प्रशंसन्तः सुखेन यथाभिमतं स्थानमवापुः। एवमसौ दृढभावनोपरञ्जितस्वान्तः परमधर्मरुचिः स्वकार्यं सुखेन सम्पादयामास। पिताऽपि तस्मिन्नतीव स्निह्यति स्म।

व्यतीते च काले कदाचिदाचार्यः श्रीदेवगुप्तसूरिश्चित्रकोटमाजगाम। संघेन च सादरं सविनयमस्य भव्येन विधिना स्वागतं विहितम्। क्रमेण च प्रारब्धानि व्याख्यानानि। सूरिणा च संसारस्यास्थैर्य, लक्ष्म्याश्चंचलता, परिवारस्य स्वार्थैकरुचः, आयुश्च कालग्रस्तं, भोगा भवरोगबन्धनानि, सर्वमिदं दृश्यत आपाततो रमणीयमन्ते च हालाहलोपमम्। नश्वराय शरीराय धर्मोपेतं कः समाचरेत्" इति सारगर्भित उपदेशो दत्तः। श्रुत्वा जातवैराग्यः सारंगः श्रुतव्याख्यानं पितरं गृहं गत्वोवाच—आत्मश्रेयःसाधनादृते सर्वमिदं व्यर्थमेवेति मतिमनुमान्य दीक्षायै सर्वथा मामनुमन्यतां भवान्। उमाशाहस्तु त्वमेव कार्यभारं गृहाणाहमेव ग्रहीष्यामि दीक्षामिति तमवादीत्। एवमुभयाविवादे परिणामे च—उमाशाहस्तस्य चत्वारः पुत्रा अपि दीक्षोद्यता बभूवुः। प्राप्ते च शुभे मुहूर्ते सारंगादयो द्विचत्वारिंशत्संख्यका भावुका आर्हतीं दीक्षामगृह्णन्। सूरिणा सारंगस्य शेखरप्रभमुनिः, उमाशाहस्य च—उत्तमविजयेति नाम कृतम्।

यदा गृहस्थत्व आसीदुमाशाहस्तदा श्रीसम्मेतशिखरयात्राभिलाषा तस्य चेतसि दृढाऽभूत् ततः पुनडनामा पुत्रस्तदर्थमुक्तः। स चात्मानं धन्यं मन्वानः सूरीश्वरस्याज्ञां गृहीत्वा सर्वत्रामन्त्रणान्यकार्षीत्। किमत्रोच्यते? सार्धलक्षका यात्रिण एकविंशतिर्हस्तिनाम्, राजानस्त्रयः, सहस्रचतुष्टयं साधूनां साध्वीनाञ्च तत्र संघे समुपस्थितमासीत्। कोटिपरिमितद्रव्यव्ययेन संघं निष्कास्य, यात्राञ्च विधायात्मकल्याणमासादितं सर्वैरेव भावुकैः।

सूरीश्वरोऽपि यात्रां विधाय शिष्यैः सह बंगकलिंगदेशविहाररुचिस्तत्र धर्मप्रचारं कृत्वा बहुसंख्यकान् बौद्धान् जिनदीक्षादीक्षितान् चकार।

सूरीश्वरशुश्रूषायामेव दृढपरिकरः शेखरप्रभो मुनिर्वर्तमानसाहित्यस्यागाधतलस्पर्शनः सर्वगुणगणगणनीयकीर्तिरभूत्। योगाराधने च परमविचक्षणः सर्वत्राप्रतिहतगति पाण्डित्यमाससाद गुरुकृपाकटाक्षितः। भूभ्रमणं कुर्वन्नसावाचार्यो मथुरामागच्छत्। सच्चायिकावचनानुसारेण श्रीसंघस्यानुमत्या च 'सिद्धसूरीतिनाम्नालंकृतं स्वपट्टे स्थापयामास।

अथाचार्यः श्रीसिद्धसूरिराचार्यपदं प्राप्याज्ञावशवर्तिनो बहून् मुनीन् स्वधर्मप्रचारकार्ये समुचितामुपदिश्य बुद्धिं सर्वत्र व्यसृजत्। तदानीमिदं वैशिष्ट्यमासीद्यद् भिन्नगच्छीया अपि साधवः परस्परं संगता वादिविजये सह प्रवृत्तिमकार्षुः। येन विषमे समयेऽपि सर्वत्र धर्मभावना जनानां मानसाद् दूरं नातिगच्छति स्म। मरुधरलाट-सोराष्ट्र-कच्छ-सिन्ध-पञ्जाब-शूरसेन-पञ्चाल-मत्स्य-बुंदेलखण्डा-वन्ती-मेदपादपर्यन्तमुपकेशगच्छीयाः साधवो

धर्मप्रचाराय परिभ्रमणं चक्रुः । कदाचिन्महाराष्ट्र-तिलङ्ग-विदर्भादिष्वपि प्रचारार्थं ते विहरन्ति स्म । कोरण्टक-गच्छीयाः साधव आबु (अर्बुदाचल) समीपस्थानेषु कदाचिन्मथुरापर्यन्तञ्च विहरणेनोपासकानां धर्मभावनां संवर्धयामासुः । इदमेव सौमनस्यं यदेकका॑ मिथः संगतानां वैमनस्यं न ।

सूरीश्वरश्च विहरणक्रमेण चन्द्रावतीमगात् । श्रीसंघेन चासाधारणः स्वागतविधिः नगरप्रवेशाय सम्पादितः । ततो धर्मव्याख्यानानि क्रमेण जातान्यासन् । तस्मिन्नगरे कश्चित्सालगनामा वेदमार्गानुयायी श्रेष्ठी प्रतिवसति स्म । तस्मै च ब्राह्मणा जिनधर्मः पाखण्डपथावतारः, तदाचरणेन निरयफलमेवाप्यफलम् । अयं च धर्मः श्रुतिस्मृतिप्रतिपादितवैदिकधर्मस्य प्रबलतरः शत्रुः। अस्य नामोच्चारोऽपि महते पापाय कल्पते । हस्तिना ताड्यमानोऽपि न गच्छेज्जिनमन्दिरमित्युक्त्या तन्मन्दिरदर्शनगमनादिकमपि निषिद्धमिति बहुविधमुपदेशं ददुः । येनासौ जिनधर्मरतानां नाकरोदादरातिशयम् । सूरीश्वरव्याख्यानश्रवणार्थमेकदा सर्वैर्वणिग्भिरुक्तः श्रवणार्थमगच्छत् श्रमणसभाम् । व्याख्याने च भारतेऽस्मिन् क्षेत्रे धर्मतरिवाहको भगवान् ऋषभदेवः प्रथमो बभूव । तदीयां शिक्षां प्राप्य चक्रवर्तिना भरतेन चत्वारो वेदाः पृथक् निर्मिताः । तदधिकारश्च निःस्पृहाणां ब्राह्मणानां परहित-निरतानां निर्धारित एभिर्यूयं जनहितं साधयन्त्विति यावन्निःस्पृहत्वं परमोपकारकत्वं च स्थितं तेषां मानसे तावदेव तैः सर्वेषां कल्याणं साधितम् । परस्मिन् काले लोभोपहतचेतसो ब्राह्मणाः तदर्थपाठपरिवर्तनादिभिः छिन्नपरंपरांश्चक्रुर्वेदान् श्रेयःसाधकासमर्थान् । न खलु कदाचित् परमकारुणिकः सर्वहितनिरतः परमेश्वरो जीवहिंसया सन्तुष्टो भवतीति मुधैव चेष्टा यज्ञकर्मणि पशुमारणे, यत्र च सर्वेषां हितमभ्युदयश्च दृष्टचरः स एव श्रेयान् धर्म ईश्वरप्रणीत इति निश्चप्रचं विद्वद्धर्मेसराणाम् । न चात्रान्धपरम्परानुसरणं सौख्यहेतुः । न च लोकापवादाद्भेतव्यं परमपुरुषार्थविघातकात् । न चास्माकं धर्मोऽहिंसारूप एकदेशादृतः, अधीतवेदैरष्टादशपुराणपारदृश्वभिः पण्डितैरनेकैरपि भूपतिभिः सदा संसेव्यमानत्वात्सर्वसुखप्राप्तये । अतो गतानुगतिकां विहाय बाह्य-दृष्टिं शास्त्रैर्युक्तिभिश्च निर्णीतोऽहिंसारूपो धर्मो विश्वस्य जगतः प्रतिष्ठा सर्वश्रेयसामगम्यः पन्थाः समाश्रयणीय इति महता प्रभावेणाहिंसाधर्मस्याश्रयणं सिद्धान्तरूपेणाचार्येण सशास्त्रं सयुक्तिकं च प्रतिपादितम् । येन हिंसाधर्मे जनानां वृत्तिः समूलोच्छिन्ना । सभा च समाप्ता । सर्व स्वगृहं ययुः ।

अथ ब्राह्मणा भाविनि काले महान्तं यज्ञं कर्तुमिच्छुरयं श्रेष्ठी श्रमणसभां किमर्थं गतः ? नूनमस्य साऽभिलाषा मूलतश्छिन्ना ! इति बहुविधं विमृशन्तोऽस्य गृहमेत्याशीर्वादेन तं संभावयामासुः । ततो वार्तालाप-प्रसंगेन महदनुचितमेतद्भवतो यद् अद्य श्रमणसमायामुपस्थानम् । अज्ञानाचरित एषः स्वपितृपितामहादिभिरप्यनादृतः पन्था जिनधर्मस्य । स्वधर्म एवाभिरुचिः सर्वसंपदां परमं निधानम् । एवं बहुविधं बोधयन्तस्ते श्रेष्ठिनमवोचन् । परमविनीतोऽसौ तानवादीन् मान्याः ! विरमतानर्थकप्रलापात् । कोऽयं स्वधर्म इति तु सूक्ष्मदृष्ट्या विवेक्तव्यम् । यद् भावि तद् भवतु किन्तु धर्माचरणेऽन्तिमं निश्चयं कृत्वैवाहं श्रीमद्भ्यः समुचितं सिद्धान्त-रूपमुत्तरं दास्यामीत्याकर्ण्य ते विफलाशाः प्रतिन्यवर्तन्त ।

एकदा श्रेष्ठी सालगः समयं वीक्ष्य सूरीश्वरपार्श्वमुपेत्य तमवादीत्सविनयम्—भगवन् ! आत्मकल्याण-प्राप्तये धर्म एकोऽनेकविधो वा समाश्रयणीयः ? श्रुत्वा च तद्वचः समाधातुमाचार्यस्तमुवाच—श्रेष्ठिन् ! एक एवाचरितो धर्म आत्मकल्याणमासादयितुं शक्नोति, अस्तु नाम तदाचरणसाधनानां वैचित्र्यं, नात्र विप्रतिपत्तिः । अनेके च धर्माः प्रधानीभूतस्य धर्मस्य विस्तृताः शाखाः । स्वाभिप्रेतसिद्धये तत्तन्मार्गानुसारिभिः प्रारंभे मिथः कश्चिद् भेदविशेषं कृत्वा स्वस्वसंप्रदायाः पृथक् कृताः किन्तु परिणामे तत्र हिंसाप्रधानानि स्वार्थ-परायणानि कर्माणि यज्ञादौ च धर्मरूपेण परिगृहीतानि । एवं धर्माचरणविषये विविधमतानामुपस्थितिर्विवेच-कानां धर्मरत्नपरीक्षकाणाममे निकषोपलरूपा बुद्धिः साधुत्वमसाधुत्वं वा ज्ञापयति । तदर्थमेवोच्यते "बुद्धेः

फलं तत्त्वविचारणञ्चेति" अस्मद्धर्मसिद्धान्ततत्त्वं ते विदितप्रायमतः 'क्षिप्योच्यते यद्-सर्वधर्ममतानुयायिनामपेक्षया जिनधर्मे साधूनां विशेषतस्त्यागस्य विरक्तेश्च भावना। न चात्र कनककामिनीस्पर्शमात्रम्। स्वयमेव दुःखानामनुभवः। न हि स्वकृतेऽन्येषां कष्टोत्पादनम्। मनोवाक्कायकर्मभिश्चाहिंसासत्यास्तेयब्रह्मचर्यादीनां व्रतानामनुपालनं प्राधान्येन संदृश्यतेऽस्मिन् धर्मे। स्वधर्मानुचरणे ते साधवो वीतमानमोहा नाहंकृतिमातन्वते। धर्मोपदेशदाने सर्वे च समानमानार्हाः। अत्र तत्त्वज्ञानविषये स्याद्वाद-प्रमाणकर्मवादात्मवादक्रियावादसृष्टिवादपरमाणुवादा योगासनसमाधयश्च सर्वोत्कृष्टा विद्यन्ते। नायं साधारणेन केनचित् प्रचारितोऽनाद्यनन्तत्वात्। महानयं विश्वधर्म इति सार्थकतां गतः। महामहिमशालिनश्चास्य प्रवर्तका जगद्वन्दनीयचरणपंक्तयस्तीर्थङ्कराः। यत्रास्य धर्मस्य साधूनां विहारो न जातस्तत्रैव मुग्धमनसो जना अन्यैः प्रतारिता हिंसयैवात्मानमुद्धर्तुं चेष्टमाना अधः पातयन्तीति चेतश्चेखिद्यते। एवं सार्वजनीनभावनाभावितं धर्मसंक्षेपवर्णनं श्रुत्वाऽसौ श्रेष्ठी सालगो विज्ञातजिनधर्मतत्त्वः सूरेरनुज्ञां लब्ध्वा शुभेऽहनि सकुटुम्बको भगवतीं दीक्षामगृह्णात्। जनाश्च तस्यानुकरणतत्परा जिनधर्मरतयो बभूवुः। पट्टावलीकारैरत्र पञ्चसहस्रसंख्यका दीक्षिता इत्युक्तम्। ब्राह्मणा अन्याश्रयविरोधे का गतिरिति निराशोपहता तथैव तस्थुः। तृणानां च को विरोधोऽनलेन!। चन्द्रावतीसमीपवासिनो ज्ञात्वा सर्वमिदं जिनधर्मेऽधिकां रुचिमादधुः। अनेककोटिपरिमितस्य धनाढ्यस्य श्रेष्ठिनः को नामाऽनुकरणं न विदध्यादात्मकल्याणपरम्परामार्गानुसरणे।

एकस्मिन् समये परमविनयोपेतेन सालगेन श्रेष्ठिना सूरीश्वरोन्यगादि-भगवन्! दीक्षाग्रहणात् प्रागेव मया धर्मार्थं कोटिपरिमितं द्रव्यं पृथक्कृतमास्ते। भवदादेशानुसारेण तस्य सदुपयोगं कर्तुमभिलषामीति। श्रुत्वा चाचार्यस्तमभिनन्द्याह—श्रेष्ठिन्! लोकत्रयवन्दितस्य श्रीतीर्थङ्करस्य भगवतो मन्दिरनिर्माणं, तीर्थयात्रायै संघनिष्कासनं, शास्त्रग्रन्थलेखनादिभिर्ज्ञानप्रचारश्चेति त्रीणि प्रधानानि सत्कार्याणि। जिनधर्मप्रचारः सहयोगात्तबन्धूनां सहायताप्रदानादिकमन्यच्च। तदपि धर्माङ्गम्। अत्र यत्रोपयोगमिच्छसि तत्संपादय। सूरेः परोपकारमिश्रितं निर्लोभयुक्तं च वचः श्रुत्वा विचार्याऽसौ चतुर्मासस्थितये भूयो भूय आग्रहमकरोत्। येनेप्सितं पुण्योपार्जनं सकलं जिनधर्मज्ञानप्रचारश्च स्यात्। आचार्योऽपि धर्माभिवृद्धय तदभ्यर्थनामङ्गीचकार। जनाश्च परमसन्तुष्टमानसा बभूवुः। शिल्पकलाकोविदाः शिल्पिनः समाहूताः। आदिष्टं च भगवतः श्रीमहावीरस्य द्विपञ्चाशदालयोपबृंहितं मन्दिरनिर्माणम्। आगमलेखनाय लिपिकराश्च समादिष्टाः। सूरीश्वरद्वारेण श्रीभगवतीसूत्रवाचनामहोत्सवोऽपि समारब्धः। तात्त्विकदार्शनिकविषयकव्याख्यानं श्रुत्वा मधुगन्धलुब्धमधुप इव श्रेष्ठी सूरिचरणसरोजं क्षणमपि त्यक्तुं नैच्छत्। समाप्तश्च वाचनामहोत्सवः। जनाश्चालभ्यपुण्यपुञ्जेन संगता आत्मनः कृतार्थताममन्यन्त। सूरेरनुज्ञां लब्ध्वा श्रावकेभ्य आमन्त्रणानि श्रीसम्मेतशिखरयात्रार्थं प्रेषितानि। आगताश्च श्रद्धालवो बहवो जनाः। मार्गशीर्षशुक्लपञ्चम्यां श्रीसिद्धसूरेरध्यक्षत्वे विराट् संघः श्रीसम्मेतशिखरयात्रायै प्रतस्थे। संघे च पञ्चसहस्रपरिमिताः साधवः साध्व्यश्च, लक्षाधिका जनाः, चतुर्दश हस्तिनः, दिगम्बरीयसाधूनां त्रिशती, अन्यमतानुयायिनी साधूनां सप्तशती, चतुरशीतिसंख्यकानि देवायतनानि चासन्। गत्वा च तत्र विधाय पूजाष्टाह्निकामहोत्सवादीनि परमानन्दमवाप संघः। एकदा सूरिणोपदिश्यमानकल्याणमार्गः सालगः कृतनिखिलधर्मकार्य आत्मनि विचार्य पुत्रांश्चाभाष्य दीक्षोद्यतो बभूव। संघपतिमालां ज्येष्ठाय पुत्राय संगणाय समर्प्य पुण्ये तीर्थे भगवतीं दीक्षां जग्राह। संघश्च संगणाधिपतित्वे क्रमशश्चन्द्रावतीमगात्। सर्वे च पञ्चभिः सुवर्णमुद्रिकाभिः सम्मानिताः स्वगृहं प्रतिनिववृतिरे।

आचार्यः सिद्धसूरिर्नूतनेन मुनिना शेखरहंसेन सह पञ्चशतसंख्यकैः शिष्यैः समन्वितः पूर्वदेशे धर्मप्रचारार्थं परितो विजहार। लोकाश्च धर्मभावनाभावितहृदयाः परमया भक्त्या स्वागतादिभिः सन्मानं चक्रुः।

तत्र मुहुर्मुहुः संघनिष्कासनं, नूतनमन्दिरमूर्तिप्रतिष्ठापनं, धर्मज्ञानप्रचारश्च मुख्योद्देश्यतामगमन्। बौद्धानां धर्मप्रचारमालक्ष्य त्रीन् चतुरो मासान् ( वर्षत्रयमिति यावत् ) तत्र स्वधर्मे दृढा भावनोपासकानां विहिता। बौद्धा अपि क्षीणप्रभावाः कांदिशिकतां जग्मुः। ततः कलिंगदेशमेत्य कुमारकुमारीतीर्थयात्रां कृत्वा भगवतः श्रीपार्श्वनाथस्य कल्याणभूमौ वाराणस्यां गत्वा दर्शनस्पर्शनादिकं चकार। तत्रैव चातुर्मासिकी स्थितिः कृता। येन बह्वी धर्मप्रभावना जाता। तत्र च श्रेष्ठिगोत्रीयेण लक्ष्मणशाहेन समारब्धे महोत्सवे द्वौ ब्राह्मणौ पञ्च भावुकाश्च दीक्षां स्वीचक्रुः। ततश्च समवर्धत जनमनोरुचिर्जिनधर्मे शाश्वते। वाराणसीतो विहरन्नाचार्यः पञ्जाबप्रान्तमलंचकार। श्रीसंघस्य महातिशयं दृष्ट्वा लोहाकोटनगरे चतुर्मासमकरोत्। समाप्तौ चैका संघसभा कृता। उपदिष्टं च वीरभूमिर्वीरभोग्या, जिनधर्मभावना च भवतां मनसि क्षणमपि नापेता स्यात्। आचरन्तु विशेषतो धर्मव्याख्यानादिभिः सर्वे साधवो निजधर्मप्रचारकार्यम्। विधत्तां चात्रानुकूल्यं भगवान् जिनः। उपदिश्य च यथायोग्यपदवीप्रदानेन साधूनां प्रोत्साहनं सविशेषं कृतम्। सभा च विसर्जिता। वर्षद्वयं विहरता तत्र पूर्णतया धर्मप्रचारो विहितः। ततोऽसौ सूरीश्वरः सिन्धप्रान्तमगमत्। डामरेलनगरे एकश्चतुर्मासोऽङ्गीकृतः। सप्त भावुकास्तत्र दीक्षादीक्षिता बभूवुः। बहवोऽन्ये जिनधर्मे समधिकां रुचिमापादिताः। ततः कच्छदेशं विहारक्रमेण गत्वा भद्रेश्वरतीर्थयात्रां धर्मोपदेशं च भावुकेभ्यः कृत्वा सौराष्ट्रप्रान्तं समाययौ। श्रीशत्रुञ्जययात्रां विधाय क्रमशः सर्वत्र साधून् प्रेषयित्वा धर्मप्रचारं कुर्वन् भरुचनगरमेत्य श्रीसंघानुमत्या चतुर्मासमकरोत्। सर्वे च परमानन्दमग्नमानसा धर्मव्याख्यानैरानन्दिताः। समाप्ते च चतुर्मासेऽर्बुदाचल यात्रायै जगाम। चन्द्रावती-पद्मावतीशिवपुरीस्था भावुकाः सूरीश्वरस्यागमनमत्र परम्परया विदित्वा श्रद्धाभक्तिसमन्विता गुरुचरणवन्दनार्थमाजग्मुः सर्वे च धर्मलाभाशिषा सम्मानिताः। सर्वैश्च स्वस्वनगरमलंकर्तुमभ्यर्थना साग्रहं कृता। यत्राचार्येण कक्कसूरिणा पूर्वं तृषापीडितस्य संघस्य प्राणाः संरक्षितास्तत्रैकं सुमहत् सर्वजनोपयोगि गृहं निर्मापितम्। ततश्चन्द्रावतीं स ययौ। तत्र संगणशाहेन संघसहितेन सपादलक्षमुद्राणां व्ययेनास्य नगरप्रवेशमहोत्सवः कृतः। सूरीश्वरस्य वाग्धारावाहीनि सुधारसभरितानि दार्शनिकाध्यात्मिकविषयकाणि व्याख्यानानि जनानां कामप्यलौकिकमानन्दसन्दोहपरम्परां विस्तारयामास। पूर्वमारब्धं मन्दिरमत्र पूर्णप्रायम्। तत्प्रतिष्ठायै संगणेन निवेदितः सूरीश्वरो माघशुक्लपञ्चम्याः शुभं मुहूर्तं ददौ। प्रेषितानि दूरदूरमामन्त्रणानि। सूरेरध्यक्षत्वे प्रतिष्ठाविधिं ज्ञात्वा बहवो जनाश्चन्द्रावतीमागच्छन्।

मुनेः शेखरहंसस्योपदेशेन संगणशाहेनैकं गृहे जिनायतनं निर्मापितमासीत्तत्रमाणिक्यमयी मूर्तिः श्रीपार्श्वनाथस्य परिकल्पिता। बृहन्मन्दिरे चैकविंशत्यधिकशतांगुलपरिमिता सुवर्णमयी प्रतिमा, तन्नेत्रस्थाने महामूल्ये च रत्ने स्थापिते। अन्याश्च धातुमय्यः पाषाणमय्यश्च मूर्तयो निर्मापिता आसन्। कोटिद्रव्यव्ययेन महता समारोहेण सूरेरध्यक्षत्वे प्रतिष्ठाविधिः पूर्णतामगात्।

सूरीश्वरश्च चन्द्रावतीनगरान्निर्गत्य शिवपुर-कोरंटपुर-भिन्नमाल-सत्यपुर-शिवगढादिषु नगरेषु विहरन्नुपकेशपुरमाससाद। वृत्तान्तश्रवणसमनन्तरमेव तत्रत्यः श्रीसंघो महता हर्षेण सोत्साहं नगरप्रवेशविधिमकार्षीत्। परमश्रद्धालुना-आदित्यनागगोत्रीयेण गुलेच्छाशाखीयेन पुराशाहेन लक्षत्रयपरिमितेन द्रव्येण नगरप्रवेशविधिना प्रभूतं पुण्यं समुपार्जितम्।

आधुनिकाः श्रद्धाहीना नास्तिकशिरोमणयोऽत्र शंकन्ते-यन्नगरप्रवेशविधौ भूयानेष द्रव्यव्ययो मौर्ख्यमन्धश्रद्धां च प्रकटीकरोति जनानाम्। दीनानामुद्धरण उपयुक्तः कियान् उपकारकः स्यादिति। अत्र ब्रूमः-निर्धनताक्रान्तेऽस्मिन् कराले काले श्रेयानीदृशो विचारः। किन्तु यत्र पुरा भारते सर्वत्र संपत्तिसमन्विते का शंका दीनानामुद्धरणे ? । तत्तु स्वाभाविकमेव तदानीतनानाम्। सर्वत्रात्र ग्रन्थे दीनेभ्योऽन्नवस्त्रादीनि दत्तानीति भूयोऽवलोक्यते।

यत्र च लक्ष्म्या एव निवास आसीत्तत्र प्रभूतानि पुण्यप्रापकाणि सत्कर्माण्यनुष्ठितान्यासन् । येन दरिद्राणां दारिद्र्यदरिद्रता धनिकैरेव कृताऽभूत् । आत्मनोऽकरणे परेषामुपदेशने च दृढव्रताः सूक्ष्मेक्षिकया विलोकयन्तु स्वान्ते स्वकीय इत्यलं पल्लवितेन ।

आचार्यः श्रीसिद्धसूरिश्चतुर्विधेन संघेन सह भगवतो महामहिमशालिनः श्रीमहावीरस्याचार्यवर्यस्य श्रीरत्नप्रभसूरीश्वरस्य च यात्रां विधाय सारगर्भितामुपदेशनामदात् ।

अथैकदा नगरजनाः सूरीश्वरं सविनयमवोचन्-भगवन् ! इदानीमत्र राज्ञ उत्पलदेवस्य जिनधर्मानुरागिणः सन्तानपरंपरायां राजा रावहुल्लादेवो वर्तते । यस्य वंशे पूर्वं तत्पिता दाहडो जिनधर्मेऽधिकरुचिस्तत्संवर्धने च दत्तप्रोत्साहनोऽभूत् । किन्त्वद्य दुर्दैववशादसौ वाममार्गानुयायिभिर्दृढमाकृष्टः पाशबद्धो वनमृग इव स्वधर्ममुल्लंघ्य मांसमदिरारुचिर्व्यभिचारस्य चरमां कोटिमारूढः । बहुभिश्च नगरमुख्यैः संबोधितोऽपि यौवनदर्पाद्राज्यप्राप्तिमदाद् वाममार्गिणां सदा संसर्गवशाच्च शब्दमपि न शृणोति । अतः क्रमेण विचार्यमाणे जिनधर्मस्यावश्यं भविष्यत्यत्र महती क्षतिः । तदत्र किमपि प्रभुत्वं दर्शयतु, रक्षतु क्षतेर्जिनधर्मप्रचारम् । सूरीश्वरश्च तानाश्वास्यावादीत्-यदाऽसावत्रागमिष्यति तदाऽवश्यं तदर्थमुपदेक्ष्यामि । वाममार्गिणश्च सर्वदा लब्धप्रतिष्ठास्तं क्षणमपि न तत्यजुः । ते स्वजानन् यदि राजा सूरीश्वरपार्श्वं गतः सर्वथा गत एवास्मत्सकाशादिति । तदानीं सर्वसचिवशिरोमणिर्बप्पनागगोत्रीयो मालदेवशाह आसीदन्ये च राजकर्मचारिणो बहुधा वणिज एव । तेऽपि राज्ञोऽस्माद्दुर्जनसंसर्गाद्वारयितुं न शेकुः ।

कदाचिदत्र म्लेच्छानामाक्रमणं जातमिति श्रुत्वैव विह्वलो वाममार्गिणः पप्रच्छ किमत्र प्रतिविधेयमिति । ते चाब्रुवन्-शाकाहारमात्रपरायणानां वणिजां राजकर्मणि नियोगोऽस्यानर्थोत्पादको जातः । अतोऽत्र तेषां स्थाने मांसभोजनेन बलिष्ठा वीरा एव नियोक्तव्या । येन ते सर्वे म्लेच्छैः सह युध्येरन् । मन्दबुद्धिरसौ तथैव प्रत्यपद्यत । तत्स्थाने नियुक्ता वाममार्गिणः ।

अथ समीपमागतेषु म्लेच्छेषु त अयुध्यन्त, किन्तु शिक्षाया अभावात्संचालकस्य बुद्धिमतः सेनापतेश्चाभावात्कथमपि प्रथमो दिवसोऽतिवाहितस्तैः । द्वितीयेऽह्नि तान् क्षीणशक्तिकानालोक्य राजा परममुह्यदत्र किं विधेयमिति । अन्ते चताननादृत्य गुरून् वाममार्गिणश्चान्तःपुरं गत्वा सर्वमिदं वृत्तान्तमकथयत् । तदा जिनधर्मोपासिका काचित्तमुवाच-राजन् ! नन्वाय्यमिदमनुष्ठितं यन्महाजना भ्रष्टाधिकाराः कृताः । अत्रैतेषां बलमेव नास्तीति मिथ्या भ्रमो भवतः । तेऽपि मूलतो विचार्यमाणे क्षत्रिया एव । अतो विजयार्थिना भवता दुराग्रहं त्यक्त्वा त एव पुनः स्वाधिकारे नियोक्तव्याः । दृढमहं विश्वसिमि कार्यभारे तेभ्यो दत्तेऽवश्यं विजयस्ते भविष्यति । स्वीकृत्येदं तेनाहूताः संमानिताः । क्षमा च याचिता । ततस्तैः प्राणपणेनापि विजयप्राप्तिस्तवैवेति दृढीकृतम् । सर्वे ते युद्धस्थानसमीक्षणं कृत्वा यथाविभागमवस्थिताः । तैरादिष्टेन राज्ञा स्नात्रमहोत्सव आरब्धः । आरब्धानि रणवाद्यानि स्तुतिपाठकैर्वन्दिभिश्चारणैश्च कृतान्युत्तेजनानि । ते तु श्येनः पक्षिष्विव सवेगं शत्रुसेनायां सोद्दामं पतिताः क्षणेनाखिलं संजह्रुः । अवशिष्टाश्च मुखे तृणं गृहीत्वा जीवनं ययाचिरे । विजयदुन्दुभयश्च नेदुः । प्रसन्नश्च राजा प्रभूतानि ददौ तेभ्यः पारितोषिकाणि । सर्वोपद्रवश्च दावाग्निलंघितवृक्षस्योपरि वृष्टिपात इवाभूत् । जिनधर्मे च रुचिं चकार । गुरवश्च मुखमपि न दर्शयामासुः ।

एकदा सभायां नृपः समागतः । आचार्येण चावसरं वीक्ष्य पुरा राजभिर्मन्त्रिभिश्च कृता जिनधर्मस्यातिमहती सेवा वर्णिता व्याख्याने । राजा च पश्चात्तापमवाप । समाप्ते व्याख्याने सूरीश्वरसमीपं क्षमां ययाचे । सूरिणा च राजधर्मस्वरूपं विशदीकृत्य विवेचितम् । धर्ममन्तरा राज्यपालनं न सुकरमित्यपि प्रतिपादितम् । येनाऽसौ राजा सूरीश्वरस्यानन्यः सेवकोऽभवत् । चातुर्मासिकी स्थितिरत्रैव कर्तव्या भवतेति मुहुर्निवेदितम् ।

आचार्येणापि स्वस्य वार्द्धकमवेक्ष्य तथेत्यनुमोदितम् । ततश्च राज्ञः प्रजानां च सदुपदेशामृतश्रवणजन्य आनन्दवारिधिर्भूयोऽवर्धत चेतःसु । प्रवृत्तानि च धार्मिकाणि व्याख्यानानि ।

एवं व्यतीतेषु दिवसेषु देवी सच्चायिका परोक्षदर्शनाऽऽचार्यसमीपमेत्याह भगवन्-! बहूपकृतमत्र विशेषत उपकेशपुरस्य । राज्ञि धर्मिणि प्रजा अपि धर्माचरणपरायणा इति कृत्वा राजा च प्रकृतिमापादित इत्यतीवोपकारः समेषां नाविदितः । आयुश्च भवतो मासावधिकं त्रयोदशभिर्दिनैः सहितम् । अतः स्वपट्टे कमपि योग्यं मुनिं प्रतिष्ठापयतु । उपाध्यायो विनयसुन्दरः सकलागममर्मज्ञो निखिलगुणावर्जितजनमना योग्य इति सूरीश्वरोक्तमनुमान्य सा तिरोदधे ।

अन्ते च रावहुल्लादेवस्य श्रीसंघस्य च समक्षं महता समारोहेण श्रावणशुक्लपूर्णिमायां शुभे मुहूर्ते मुनिमुपाध्यायपदालंकृतमाचार्यपदे श्रीकक्कसूरीति नाम कृत्वा प्रतिष्ठापयामास । अन्ये चोपाध्यायगणिवाचकपण्डितादिभिः पदवीभिः सम्मानिताः । सूरीश्वरश्चान्तिमां संलेखनां विधाय भाद्रपदशुक्लैकादश्यां नश्वरं देहमुदत्सृजत् । उपकेशपुरं सर्वं धूमाच्छादितं रविमण्डलमिव न रराज । श्रीसंघेन राज्ञा च चन्दनादिभिः सुगन्धिभिः काष्ठैः शरीरस्याग्निसंस्कारः कृतः । पपात च चितायां पञ्चवर्णा पुष्पवृष्टिः । सर्वैश्च देव्याः सच्चायिकायाः सकाशादवगतं यदाचार्यवर्यः सौधर्मनाम्नि देवलोके सागरोपमां स्थितिमलभतेति शम् ।

## वि० सं० ४४८ ] ३६ आचार्यः श्रीकक्कसूरिः । ( सप्तमः ) [ वि० सं० ६०१ प०

श्रीसिद्धसूरिपट्टेऽनेकभूपतिप्रवरमुकुटमणिमरीचिमञ्जरीचर्चितचरणयुगलो जिनगदितागमप्रतिपादितयमनियमनिष्ठश्चारित्रचूडामणिरुत्कृष्टक्रियापालकः सहस्रांशुरिव प्रबलप्रतापश्चन्द्र इव रुचिरमूर्तिः श्रीकक्कसूरिः समायातः । स चोपवनवाटिकाकूपसरःपादपोपशोभिते मेदिनीपुरे व्यवात्सीत् । पिताऽस्य कर्मणशाहो माता च परमपतिव्रतशोभना शीलसौजन्यसौन्दर्याद्यनेकगुणगणालङ्कृता मेनादेवी । अनयोरेकादशस्वात्मजेषु विमलशाहो व्यापारकार्यकुशलः परमधर्मरुचिः रुचिरवदनपुण्डरीकः सकलपुरजनानां मनांसि मोदयामास । स एव गृहस्थाश्रमाधारस्तम्भरूपो बभव ।

अथासावेकदा केनचिदपि कारणेन नागपुरं ययौ । तत्र सुचन्तिगोत्रावतंसेन नोढाश्रावकेण श्रीसोमप्रभोपाध्यायस्य गुरोरुपदेशात् शत्रुञ्जययात्रार्थं संघस्यायोजनं कृतम् । तदीययात्राविषयकप्रार्थनां श्रुत्वाऽसौ बिमलशाहस्तमब्रवीत् । भवान् पंच वा षड् वा दिनानि प्रतीक्षतामहं तावद् गृहकार्यं संपाद्य सकुटुम्बो यात्रायां सम्मिलितो भविष्यामीति तस्य वचः समाकर्ण्य नोढाश्रावकस्यात्मजेनोक्तम्-यथा तथा वा भवतु किन्तु निर्धारितदिवसस्योल्लंघनं कथमप्यशक्यमेव । तीर्थयात्रायां प्रबलतरायामभिलाषायां भवानप्यपरं संघायोजनं कर्तुं प्रभवत्येव । ततः स्वापमानजनकं वाक्यं देवाशाहस्य ज्ञात्वाऽसौ विमलशाहस्तथैव विधातुमियेष ।

इतश्च प्रचुरतरपुण्यराशेरुदयात्सिद्धसूरिस्तत्र मेदिनीपुरे विहारक्रमेणाजगाम । सपादलक्षरूप्यकव्ययेन विमलशाहेन भव्यसमारंभपुरःसरमस्याचार्यवर्यस्य नगरप्रवेशमहोत्सवः सम्पादितः । आचार्यश्च श्रीसंघस्याग्रहातिशयमनुमान्य तत्रैव चातुर्मासिकीं वसतिमङ्गीचकार । ततः प्रवर्तमाने दैनंदिनक्रमेण व्याख्याने यात्रापुण्यफलं सम्यगवबुध्य तीर्थयात्राभिलाषी विमलमूर्तिरसौ विमलशाहः शत्रुञ्जयतीर्थयात्रामनोरथं सूरये न्यवेदीत् । अनुज्ञातश्च सः सर्वत्रामन्त्रणपत्रिकाः सम्प्रेष्य सविशेषं नोढाश्रावकं तदीयपुत्रं च देवाशाहमामन्त्रयितुं नागपुरमागच्छत् । सबहुमानं तस्मै यात्रार्थमाह्वानं कृतम् । पञ्च षड् वा दिनान्यतिवाह्यास्माकं तत्रागमनं सम्भाव्यत एवेत्युक्तोऽसौ तथैव प्रत्यपद्यत । अतः पूर्वकृतमपमानप्रसंगं स्मृत्वा देवाशाहो लज्जितः पश्चात्तापमवाप । तस्य चौदार्यमतीव प्रशशंस । सम्प्राप्ते शुभे दिने सूरीश्वरस्याध्यक्षत्वे तस्य च संघपतित्वे शत्रुञ्जयमभिप्रतस्थे संघः ।

अथ व्यतीते कियति मार्गे सूरिणा कश्चित् कृमिगणाकुलितो निर्गच्छद्दुहलरुधिरप्रवाहपूरितोऽचेतनत्वं प्राप्तो वृषभो दृष्टः। दृष्ट्वा च तं जातदयः स आचार्यवर्यो विमलशाहमवोचत्- अयि भव्य ! पश्यास्य वृषभस्य कर्मवैचित्र्यं येनाऽसौ परां कष्टां दशामापन्न आसन्नमरणो वर्तत इति। स च तस्य करुणाजनकं वाक्यं सूक्ष्मेक्षिकया क्षणं विचिन्त्य संसारिणां कष्टप्रायं जीवनञ्च दृष्ट्वा परमविरक्तमानसोऽभूत्। ततो निर्गत्य शत्रुञ्जययात्रां ध्वजारोपणपूजाप्रभावनादीनि कर्माण्यखिलानि सम्यगनुष्ठायाचार्यचरणकमलाभिवन्दनार्थं सूरेः समीपमाजगाम। विमल ! किमपि निश्चितं न वेत्याचार्येण पृष्टः प्रतिबुद्धोऽसौ स्वकौटुम्बिकानाहूय हृदयनिहितम-भिलाषं प्रकटीचकार। तैरनुमत एकादशभिः श्रावक-श्राविकाभिः सपत्नीकः शुभेऽहनि दीक्षामग्रहीत् संघपति-माला च तदीयात्मजेन श्रीपालशाहेन धारिता। ततो मार्गे नानाविधानि जीर्णोद्धारादीनि कर्माणि कृत्वा गृहमेत्य प्रतिजनं संभावनारूपेण पञ्च मुद्राः प्रत्यर्पयामास श्रीपालशाहः। दीनेभ्यश्चान्नवस्त्रादिकं दत्वा संतोषयामास। दीक्षानन्तरं विमलशाहस्य विनयसुन्दरेत्याख्या जाता। असौ च क्रमेण व्याकरणन्यायसाहित्यादीनि शास्त्रा-ण्यधीत्य जिनागमसिद्धान्तनिपुणो विद्वज्जनमण्डलीमण्डनायमानो बभूव। नागपुरे चतुर्मासकाले स्वनिधनसमयं ज्ञात्वा देवीसच्चायिकायाः प्रोत्साहनेन च भाद्रगोत्रीयेण गोल्हाश्रावकेनारब्धे महामहोत्सवसमारंभे श्रीसिद्ध-सूरिस्तं स्वपट्टे श्रीकक्कसूरीतिनाम्ना प्रतिष्ठापयामास।

इदमत्रावधेयम्-पुरा रत्नप्रभ-यक्षदेव-कक्कसूरि-देवगुप्त-सिद्धसूरीणां नामव्यवहारः परम्पराप्राप्त आसीत्। किन्तु कालदोषवशात्प्रथमतो नामद्वयं कोश एव स्थापितम्। अत एवास्य तृतीयं श्रीकक्कसूरीति नाम कृतमिति।

अथ क्रमेण विहरन् श्रीकक्कसूरिर्जावलीपुरमाययौ। तत्र चैत्यानिवासिनां सधूनां धर्माचारविचारादिषु शैथिल्यं विचार्य तन्निवारणार्थमेका श्रमणसभा कारिता। विविधदेशविहारिणः साधवः साध्व्यश्च तत्राजग्मुः। अधुना वाममार्गानुसारिणां साधूनां सर्वतः प्रचारकार्यं समालोच्य युष्माभिरपि सर्वैः स्वधर्मप्रचारार्थमेव दृढप-रिकरैरवश्यं भवितव्यम्। धर्मप्रचारकार्यस्य मुख्याधाररूपा यूयमेव शिथिलादरास्तदाऽन्येषां का कथा ? धर्मरक्षा-र्थमेव यूयं साधुत्वेन स्थिताः। यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इति न्यायेन युष्मदीयचरितानुयायिनो-ऽधुना श्रावका अपि सुतरां धर्माचरणे शिथिलादरा भवेयुस्ततः सर्व एवास्माकं संप्रदायः सर्वत्र निखिलजन-निन्दनीय उपहासपात्रं स्यात्तन्मा भूदिति विचार्य सर्वे दृढप्रयत्ना भवन्तु धर्मरक्षायै। एवं स्वधर्मसंरक्षणे तान् प्रेरयित्वा सर्वान् कर्तव्योत्सुकान् विदधे। ते च सर्वत्र धर्मप्रचारार्थं विहारं चक्रुः। श्रीसंघस्याग्रहवशात्तत्रैव चतुर्मासमकरोत्। व्याख्यानलाभेन सर्वे श्रावका धर्माचरणरता बभूवुः। समाप्ते च चतुर्मासेऽष्टादश भावुका भगवतीं दीक्षां जगृहुः। ततश्च विहरन्नाचार्यः कोरण्टकपुरमागच्छत्। भगवतो महावीरस्य यात्रां विधाय पालिकानगरीमात्मनाऽलञ्चकार। तत्रोपकेशपुरस्थः श्रीसंघः सूरीश्वरागमनप्रार्थनार्थं समागतः। सूरिरपि वैराटनगर-नागपुरादिषु ग्रामनगरेषु धर्मप्रचारं कुर्वन् संघप्रार्थनां स्वीकृत्योपकेशपुरमभिप्रतस्थे। तत्रागतस्या-चार्यस्य कुमटगोत्रीयेण भोजाशाहेन सपादलक्षव्ययेन भव्यं स्वागतं विहितम्। तत्रैव च चतुर्मासो निर्धारितः। अस्मिन्नगरे चोपकेशे चरडगोत्रोद्भवस्य कांकरीयाशाखीयस्य थेरुश्रावकस्य स्वसा वैधव्यपीडिताऽसीत् सा च सूरेर्व्याख्यानं 'सारनिःसारतोद्बोधकं समाकर्ण्य दीक्षोद्यता सूरिपार्श्वं तदर्थमाजगाम। तं चावोचत्-भगवन् ! संसारोद्विग्नाऽहं प्रव्रज्यां स्वीकरिष्यामि, मम कोटिपरिमितं द्रव्यं वर्ततेऽतस्तद् कथं धर्मकर्मणि विनियोक्तव्यमिति भवानेवादिशतु। सूरिस्तु तद्वचः श्रुत्वा शास्त्रोक्तानि धर्मकार्यसमुचितानि सप्त क्षेत्राणि पुण्योपार्जकानि वर्णयामास। वर्णयित्वा च तामाह-श्राविके ? संघस्याग्रेसरानाहूय पुण्यकर्मविनियोगार्थं तेभ्यस्तद्द्रव्यं भवती समर्पयतु। ते च सूक्ष्मदृष्ट्या त्वदीयं द्रव्यं सत्कर्मसु विनियोक्ष्यन्त्येव। आचार्यस्येदं परमार्थसारं वाक्यं श्रुत्वा सा तथैव व्यवस्थां व्यधत्त। संघस्याग्रेसराः कार्यवाहकाः—(१) आदित्यनागगोत्रीयो लक्ष्मणशाहः (२)

श्रेष्ठिगोत्रीयो नागदेवः (३) चरडगोत्रीयः पुनडशाहः (४) सुचन्तिगोत्रीयो लिम्बाशाहः, एवमेते चत्वारो व्यवस्थापकास्तद्व्ययद्रव्यस्य जिनागमग्रन्थलेखनेन सद्व्ययमकार्षुः। सा च शुभे मुहूर्तेऽष्टभिः श्राविकाभिस्त्रिभिः श्रावकैश्च सह दीक्षिता बभूव। सूरीश्वरश्च मेघाशाहेन निर्मापितस्याभिनवस्य पार्श्वनाथमन्दिरस्य प्रतिष्ठामकरोत्।

ततो विहरन्नाचार्यो मेदपाट-बुंदेलखण्ड-शौरसेन-मत्स्य-पञ्चाल-कच्छादिषु प्रान्तेषु धर्मप्रचारकार्यमसाधारणशेमुखीबलेन विधाय सौराष्ट्रप्रान्तमाजगाम। तत्र शत्रुञ्जयतीर्थयात्रां लोकांश्च धर्मरतान् कृत्वा स्तम्भतीर्थे चातुर्मासिकीं स्थितिं कृत्वा मरुधरदेशं पावयामास। विहरणक्रमेण चन्द्रावतीं गते चन्द्रावतीसंघः सप्रश्रयं तं व्यवेदयत्। भगवन! जराजर्जरितावस्थो भवतो देहो वर्तततेऽतः कस्मैचित् शिष्याय सर्वगुणसंपन्नायाचार्यपदं देयम्। सूरीश्वरोऽपि स्वीकृत्य तदीयामभ्यर्थनां प्राग्वटवंशीयेन कुम्भाश्रावकेणानुष्ठिते महामहोत्सवे सर्वगुणगणविद्योतितप्रभावमुपाध्यायपदभूषितं मेरुप्रभमुनिं स्वपट्टे संस्थापयामास। अत्र परमधार्मिकेण तेन पञ्चलक्षसंख्यका मुद्रा व्ययीकृताः। मेरुप्रभस्य देवगुप्तसूरीति नाम विहितम्। ततश्च श्रीकक्कसूरिश्चतुर्विंशतिपरिमितानि दिनान्यनशनेन समाधियोगेनातिवाह्य स्वर्गमगमत्।

इदमवधेयं विशेषतः—अस्य शासनकाले चैत्यनिवासिनः साधवस्तदीयोपदेशं स्वीकृत्य सर्वत्र स्वधर्मप्रचारकार्यमात्रतत्परा महान्तं प्रयासं प्रयत्नञ्चाकार्षुः। येन शिथिलितप्रायोऽपि जिनधर्मः प्रबलतरवातावलिसंधुक्षितः स्फुलिंग इवाधिकां द्युतिमवाप।

## [वि॰ सं॰ ६०१ तः] ३७ आचार्यः श्रीदेवगुप्तसूरिः (सप्तमः) [वि॰ सं॰ ६३१ प॰

श्रीकक्कसूरिपट्टे परमयशोमूर्तिः सौजन्यौदार्यगुणगणोपमण्डितो जिनधर्मप्रचारचारुचरित्रो नानाविधविद्याविचक्षणश्चन्द्रावतीवास्तव्यः श्रीदेवगुप्तसूरिः पदमवाप। अस्य जनकः श्रावकव्रतनियमनिष्ठः पञ्चपरमेष्ठिमहामन्त्रोपासकः प्राग्वटवंशीयः सामाद्युपायचतुरो महामात्यो यशोवीरः। माता च सतीमण्डलमण्डनीभूता रामादेवी। तयोर्मंडन-खेता-जीवसिंहाख्यास्त्रयः पुत्रा आसन् परम्पराप्राप्तजिनधर्मकर्मनिरताः। तत्र पिता, मण्डनश्च राजकीयक्षेत्रे लब्धप्रतिष्ठौ, अपरौ द्वौ व्यवहारकार्यकुशलावभूताम्। व्यतीते काले यशोवीरः स्वकीयामात्यपदे मण्डनं प्रतिष्ठाप्य परमनिवृत्त्यर्थं रामादेव्या सह स्वोद्याने स्थिते श्रीकक्कसूरिप्रतिष्ठापिते चैत्यालये नलिनीदलमिव संसारान्निर्लेपो भूत्वा भगवन्तं जिनदेवमाराधयामास।

एकदा मण्डनस्य प्रासादपार्श्वे तारुण्ये वयसि वर्तमानः कश्चिद् दुर्भाग्यवशात् पञ्चत्वं प्राप्तः। अतोऽस्य कौटुम्बिका दुःखिताः करुणं मुक्तकण्ठमाचक्रन्दुः। चेतोविदारकं तेषां रोदनध्वनिं समाकर्ण्य मण्डनः संसारविषयकविचारनिमग्नो बभूव। प्रातः स्वनियमानुसारेण सूरिपार्श्वमेत्य स्ववैराग्यकारणं निवेद्य दीक्षायै सज्जीबभूव। नृपं पितरौ चापृच्छ्य स्वज्येष्ठात्मजं रावलं मन्त्रिपदे नियुज्य सप्तदशभिर्मुमुक्षुभिः सह दीक्षितोऽभूत्। मेरुप्रभेति समाख्यामसौ प्राप। शनैः शनैराचार्यसमीपे व्याकरणसाहित्यतर्कमीमांसादीनि शास्त्राण्यधीत्य जिनसिद्धान्तसरणीतरणीकृतबुद्धिप्रसरः पण्डितप्रकाण्डो जाबलीपुर उपाध्यायपदभूषितश्चन्द्रावत्यां सूरिपदालङ्कृतो बभूव। ततश्च देवगुप्तसूरिरिति प्रसिद्धिमगमत्।

तस्मिन् काले भृगुपत्तने सौगतानामतीव प्राबल्यमासीत्। सूरीश्वरोऽपि विहारक्रमेण लाटदेशमागतः स्तम्भतीर्थमगमत्। भृगुपुरवासिभिः श्रावकैः परम्परया ज्ञातं यदसावाचार्यः स्तम्भतीर्थमात्मना भूषयतीति श्रीसंघः स्तम्भतीर्थं प्रेषितः। सूरिरपि सकलं वृत्तान्तं विदित्वा प्रार्थनाञ्च स्वीकृत्य जिनधर्मप्रचारञ्चोद्दिश्य भृगुकच्छमयासीत्। तत्र स्याद्वादवादिनां पुरः क्षणिकवादिनो बौद्धाः स्थातुमपि न शेकुः। शास्त्रार्थस्तु दूरत एव तैः परिहृतः! न चायं प्रथमो दृष्टान्तः बहुशस्ते बौद्धा उपकेशवंशीयैराचार्यैः सह विहारकाले संगताः पराजिता बभूवुः। येन सूरीणां नामश्रवणमात्रादेव ते पलायन्ते स्म। प्रकृतमनुसरामः। स्याद्वादसिद्धान्तं

जनानां पुरतो ज्ञापयितुमारब्धः शास्त्रार्थो बलात् सूरीश्वरेण । बौद्धानां पराजयेन सर्वत्र जिनमतानुयायिनी कीर्तिः समैधत । अत्र चातुर्मासावस्थानेन धर्माभिवृद्धिं विधाय स सोपारपट्टनमाययौ । तत्र महाराष्ट्रप्रान्ते पाखण्डमतावम्बिनां शक्तिर्दिनंदिनमभिवर्धत इत्येकेन श्रावकेण निवेदितं श्रुत्वा सूरीश्वरोऽपि शिष्यैः सह महाराष्ट्राभिमुखं प्रयाणमकार्षीत् । सूरीश्वरस्याप्रतिहतप्रभावं धर्मसिद्धान्तं व्याख्यानतो विदित्वा निस्तेजका रुद्धवीर्या भोगिन इव तेऽभूवन् । समाप्य चात्र प्रचारकार्यं गृहस्थानां परिचयबाहुल्येनात्मनो व्यासक्तिर्माभूत्, सर्वत्र विविधप्रकृतीनां जनानां सहवासेन विशेषलाभः स्यात्, अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवतीत्यनुस्मृत्य सर्वत्र,धर्मप्रचारार्थं वरमेव विहरणमिति मत्वा तदेवानुतिष्ठति स्म ।

अथ विहरणे बहुविधानि दुःखान्यनुभूय "मनस्वी कार्यार्थी न गणयति दुःखं न च सुखमिति" वचनमनुस्मरन्नसौ सर्वमपि विमृश्य महाराष्ट्रप्रान्ते वर्षद्वयं विहारमकरोत् । अत्र दिगम्बरीया अपि साधवो विजह्नुस्तथापि समानस्नेहेन धर्मप्रचारं तेऽन्वतिष्ठन् । संपूर्णरूपेण धर्मप्रचारं विधाय मदुरापुर्यामाजगाम । अतिमहती चैका श्रमणसभा विहिता । सर्वेषां साधूनां प्रोत्साहनार्थं पदवीप्रदानमपि कृतं येन द्विगुणितधर्मप्रचारोत्साहास्तत्र विहरणमकार्षुः । तत आवन्तिकाप्रदेशं गत्वा माण्डव्यपुरे चतुर्मासावधिकां स्थितिं चकार । ततः शूरसेनकुर्वादिषु देशेषु विहरता कालान्तरे मथुरापुर्यां चतुर्मासो विहितः । तत्र श्रेष्ठिगोत्रीयेण हरदेवशाहेन चतुर्मासे श्रीभगवतीसूत्रवाचनामहोत्सवः कृतः । सपादलक्षपरिमितं द्रव्यं व्ययीकृतम् । समाप्ते च महोत्सवेऽष्टभिर्मावुकैर्भगवती दीक्षा गृहीता । अपरं च बप्पनागगोत्रीयेण चाचङ्गश्रावकेण श्रीपार्श्वनाथस्य महान् जिनालयो निर्मापितः । सूरीश्वरस्य वरदेन हस्तेनास्य भव्यसमारोहपुरःसरं प्रतिष्ठा विहिता । ततो भगवतः श्रीपार्श्वनाथस्य कल्याणभूमौ स्पर्शनादि विधातुं वाराणसीमगमत् । तत्रात्मशान्तिमनुभवितुं किंचित्कालं स्थिरनिवासो विहितः । ततः पञ्चालदेशे सिन्धप्रान्ते च धर्मप्रचाराय वर्षद्वयं व्यहार्षीत् । सर्वतोभावेन धर्मविषयकाणि व्याख्यानानि कृत्वा साधूनां समुत्साहाभिवृद्धयर्थमेका श्रमणसभा विहिता । तत्र गणिवाचनाचार्यादिभिः पदवीभिः साधवश्च सत्कृताः । एवं स्वकार्यं पूर्णोत्साहेन सम्पाद्याचार्यवर्यः सौराष्ट्रप्रान्ते विहरन् श्रीशत्रुञ्जयतीर्थमाससाद । पूजास्पर्शनादि विधायात्मसुखसंपादनार्थं कियन्तं कालं तत्रैव न्यवात्सीत् । ततो विश्रान्तिं लब्ध्वा लाटदेशे विहारं कुर्वन्, क्रमेण मरुधरे प्रथमश्चतुर्मासः पद्मावत्यां विहितः तत्र सूरीश्वरस्योपदेशं प्राप्य मासमात्रेण कृतपाणिपीडनां भार्यां त्यक्त्वा मुञ्जापुत्रेण प्राग्वटवंशीयेन सूरिपार्श्वे दीक्षा गृहीता । चतुर्मासानन्तरं नोढाश्रावकेण निर्मापितस्य श्रीमहावीरस्य जिनालयस्य प्रतिष्ठाविधिर्भव्येन समारोहेण कृतः । तदेवं समाप्य च धर्मकार्यं कोरण्टकपुरमयासीदाचार्यवर्यः । तत्र कोरण्टकगच्छीयाचार्यः श्रीसर्वदेवसूरीश्वरो न्यवात्सीत् । स च सूरीश्वरस्यागमनं विज्ञाय सशिष्यः प्रत्युज्जगाम सन्मानार्थम् । श्रीमालवंशीयेन खुमाणशाहेन सपादलक्षपरिमितं व्ययं कृत्वा नगरप्रवेशो महता समारोहेण विहितः

अथ कोरण्टकपुरेऽशुभकर्मोदयात् सूरीश्वरस्य वपुषि सञ्जातोऽसाध्यो व्याधिः । अतो रात्रावसावचिन्तयत्-ममाद्य वृद्धावस्था वर्ततेऽतः कस्मैचिन्मुनये सूरिपदं दत्वा आत्मकल्याणनिवृत्त्यर्थमवश्यं प्रयत्नो विधातव्यः । तत एव देवी सच्चायिका परोक्षरूपेण समीपमेत्यावादीत् भगवन् ? अष्टौ वर्षाणि जनकल्याणं भवान् विधास्यतीति मा खेदं करोतु । तत उपकेशपुरप्रत्यागमनाय प्रार्थयामास श्रीसघः । सूरिणाऽपि यादृशी क्षेत्रस्पर्शनेति स्वीकृतम् । देव्याः कृपया च शरीरस्य सौमनस्यं जातम् । कोरण्टकपुरान्निर्गत्य भिन्नमालाजाबलीपुरमेदिनीपुरादिषु ग्रामनगरेषु विहरन् सूरिर्माण्डव्यपुरमाययौ । अस्मिन् काले माण्डव्यपुरं तूपकेशपुराधिपस्य गोपालरावस्याधीनमासीत् । यतः श्रेष्ठिगोत्रीयं शोभासिंहं सूरीश्वरस्य स्वागतप्रबन्धाय स राजा प्राहिणोत् । स च तत्र महता समारोहेणापूर्वं स्वागतं सम्पाद्य चतुर्मासावस्थानायाग्रहमकार्षीत् । सूरिरपि तदाग्रहमनुमान्य तत्रैव स्थितिमनु-

मेने । डिडूगोत्रीयेण शोभासिंहेन सपादलक्षमुद्राणां व्ययेन श्रीभगवतीसूत्रवाचनामहोत्सवानुष्ठानेनाक्षयं पुण्यमासादितम् । चतुर्मासव्याख्यानश्रवणसमेधितवैराग्यभावनः षट्पञ्चाशद्वर्षीयस्यास्यात्मकल्याणे मतिरजायत । कौटुम्बिकानाहूयापृच्छ्य पञ्चाशल्लक्षद्रव्यव्ययेन माण्डव्यपुरदुर्गे जिनालयमुपाश्रयं च कारयित्वा सप्तभिः भावुकैः सह सूरीश्वरपार्श्वे दीक्षामगृह्णात् ततो विहरन्नाचार्य उपकेशपुरमेत्य देवीसच्चायिकाकथनानुसारेण रावगोपालस्याग्रहाच्च तत्रैव स्थिरवसतिमङ्गीचकार । समुचिते समये चादित्यनागगोत्रीयस्य चोरडियाशाखीयस्य रावल शाहस्य महामहोत्सवे ज्ञानकलशोपाध्यायं समधिगतशास्त्रतत्त्वज्ञमाचार्योचितगुणालयं मुनिं सिद्धसूरीति नाम विधाय स्वपट्टे स्थापयामास । स्वयञ्च सप्तदश दिनान्यनशनेन नीत्वा महाप्रयाणमकार्षीत् ।

अहो ! धर्ममयैकजीवनानां धर्मादृते नान्यामतिर्गतिश्च वर्तत इति शेषाणि वर्षाणि धर्मप्रचारकार्ये एव क्षपितानि । को नाम निवृत्तिप्राप्तौ प्रवृत्तिमङ्गीकुर्यात् । जिनगदितनियमाचारपालनरतानां समेषामयन्तु सार्वजनीनः पन्था एव ।

## वि० सं० ६३१ तः] ३८ आचार्यः श्रीसिद्धसूरिः । (सप्तमः) [वि० सं० ६६० प०]

श्रीदेवगुप्तसूरिपदे तपस्तेजःपुञ्जविद्योतितदिङ्मण्डलश्चारुचारित्रपाथोधिः शमकल्लोलकेलितः सदानन्दमूर्तिः परममाननीयः श्रीसिद्धसूरिः समायातः ॥ स च बप्पनागगोत्रीयः सिन्धप्रान्तस्थमालपुरनगरनिवासी चासीत् । पिताऽस्य क्रयविक्रयादिव्यवहारकुशलः परमधार्मिकः श्रावकव्रतनियमनिष्ठो देदाशाहः, माता च परमसौजन्यधन्या दाडमदेवी । तयोः पुत्रो नेत्रकमलानन्ददायको मुख्याधारस्तम्भ इवासलशानामाह । देदाश्रावकेण स्वोपार्जितद्रव्यस्यागमवर्णिते क्षेत्रे सदुपयोगं विधाय भगवतो महावीरस्य जिनालयो निर्मापितः । सम्मेतशिखरयात्रायै संघश्च निष्कासितः । देदाश्रावकस्य निधनानन्तरमासलोऽशुभकर्मोदयाद्दारिद्र्यमुपागतः । गृहस्थाश्रमभारं निर्वोढुमसौ सर्वथाऽसमर्थो बभूव । अस्यां विषमायामवस्थायामपि स नित्यनैमित्तिकधर्मकृत्यान्न प्रमत्तोऽभूत् । कर्मवादमर्मज्ञोऽसौ कर्मण एव गहना गतिरिति विचार्य शान्तमना धैर्यं न तत्याज ।

एवं व्यतीते कियति काले तदीयभाग्योदयादाचार्यः श्रीदेवगुप्तसूरिः सिन्धप्रान्ते विहरन् मालपुरनगरमाजगाम । एकदा सूरिणा स्वकीयव्याख्याने कर्मवैचित्र्यं प्रतिपादितमत आसलो विशेषश्रवणेच्छया मध्याह्नकालेऽपि सूरीश्वरसमीपमुपस्थितः । तच्चोदासीनमुद्विग्नञ्चावलोक्य सूरिणा संसारासारता साटोपमुपवर्णिता । पीयूषरसाप्लावितमाचार्योपदेशमाकर्ण्यासलेनोक्तम्-भगवन् ! संसाराद्विरक्तोऽहं किन्तु दारिद्र्यावस्थायां दीक्षाग्रहणेन स्वधर्मस्यावहेलना भविष्यतीति विचिन्त्य तथा प्रतिपत्तुं न शक्नोमि । यदाऽहं पूर्वामवस्थां प्राप्नुयां तदा सत्वरमेव गृह्णीयां दीक्षाम् । तदीयं वचः श्रुत्वा सूरिस्तमवोचत्-आसल ! सर्वां चिन्तां दूरीकृत्य धर्मानुचिन्तनमेव समाश्रय । धर्म एवास्मिन् संसारे परमसौख्यप्रद इत्युक्त्वा सूरिस्तु धर्मप्रचारार्थमन्यत्र प्रतस्थे ।

इतश्च धर्मध्यानासक्तत्वात्पापक्षयाच्चासलस्य धेनुबन्धनस्थलादक्षयो निधिः प्रादुरास । सोऽपि गुरुकृपैवेयमिति विज्ञाय सूरीश्वरं प्रति कृतज्ञतां प्रादर्शयत् । ततः प्रभृतिरसावासलो धनाधिप इवापरो बभव । धनिकावस्थायामप्यसौ सूरीश्वरोपदेशविस्मरणं न व्यधात् । किमनेन द्रव्येण सत्कार्यं कुर्यां यतो लक्ष्मीस्तोयतरङ्गभङ्गचपलेति सत्यमेव । प्रथममहं दरिद्राणां मनोरथान् पूरयेयम् । यत उच्यते दारिद्र्यान्मरणमेव वरम् ।

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो ! निर्धनता सर्वापदामास्पदम् ॥

एवं सूक्ष्मं विचार्य स्वसम्पदमर्थिसाच्चकार येन सर्पः कञ्चुकमिव ते दारिद्र्यं मुक्त्वा पुनरुज्जीविता इव विरेजिरे । ततः परमसौ स्वनगरेऽभिनवं जिनालयनिर्माणमारभत । इतश्च डमरेलपुरे सूरीश्वरस्यागमनं विज्ञायासलः कतिपयैर्जनैः सार्द्धं डमरेलपुरं ययौ । क्रमेण डमरेलपुरं प्राप्य सूरीश्वरस्य वन्दनं विधाय सविनयं मालपुरनगरालंकरणाय भूयो भूयः प्रार्थनामकरोत् । सूरिरपि भाविलाभं मन्यमानो मालपुराभिमुखं प्रतस्थे । सूरिराजस्यागमनं विज्ञाय नवलक्षपरिमितद्रव्यव्ययेनासलो महामहोत्सवसहितमस्य नगरप्रवेशं कारयामास । कानडरावप्रभृतीनां संघस्थानां श्रावकाणामाग्रहमभिवीक्ष्य तत्रैव चतुर्मासो विहितः । आसलश्चात्मनं धन्यं मन्यमानो भव्यसमारोहपुरःसरं श्रीभगवतीसूत्रवाचनामहोत्सवमारेभे । ज्ञानार्चने संप्राप्तद्रव्येण ग्रन्थान् लेखयित्वा ज्ञानकोशेऽस्थापयत् । प्रतिदिनं सूरीश्वरस्य व्याख्यानं शृण्वतो रावकानडस्येदृशी भक्तिर्जाता यथा स्वकार्याणि विहाय नियतसमये तन्मयो भूत्वा व्याख्यानमशृणोत् । ततः स्वगुरोर्वाममार्गानुसारिणः स्वेच्छाचारयुतां लीलां स्मृत्वा तद्धर्मान्निवृत्य जिनधर्ममङ्गीचकार । व्यतीते चतुर्मासे शत्रुञ्जययात्रार्थं संघं सूरेरनुमत्याऽसलो निष्कासयामास । शत्रुञ्जये महामहोत्सवं ध्वजारोपणपूजाप्रभावनादीनि कर्माणि समाप्य स्वनगरं प्रति न्यवर्तत । तत्र चाभिनवजिनालयप्रतिष्ठाकार्यारम्भमकरोत् । एवमसौ गृहस्थाश्रमोपयुक्तानि धर्मकार्याणि कृत्वा स्वज्येष्ठपुत्रं पोलाकं गृहव्यवहारकार्यभारवहनोचितं विधाय शुभे मुहूर्ते द्विचत्वारिंशत्संख्याकैर्जनैः सार्द्धं दीक्षितोऽभूत् । ततः परं तस्य ज्ञानकलशमुनिरिति प्रसिद्धिरासीत् । स्वस्य कुशाग्रबुद्धिबलेनाल्पेनैव समयेनासौ विविधभाषाविशारदः शास्त्रगूढरहस्यमर्मज्ञो विपश्चिद्वरेण्यो बभूव । तपःसाधनैकव्रतस्तपस्विनां मूर्धन्यधन्योऽसौ स्वयशो दिगन्तविततमकरोत् । तपःप्रभावोत्पन्नालौकिकज्ञानशक्तिः क्रमेणाऽभिग्रहपुरःसरं तपस्तप्तुं प्रयत्नं चकार । तथाहि—

१ एकदा रक्तवस्त्रालङ्कृता काचित् सौभाग्यवती वनिता मे भर्त्सनपूर्वकं भिक्षां दास्यति तदैव पारणां विधास्यामीत्यभिग्रहमकार्षीत् । चतुर्विंशतिदिनानन्तरमस्यायमभिग्रहः फलितः ।

२ घनघटाच्छादितं नभोमण्डलमालोक्यैव मे पारणा भविष्यतीत्याकारकोऽभिग्रहः पञ्चचत्वारिंशद्दिवसानन्तरं सफलो बभूव ।

३ भूमिपतिः स्वयमेव मां पारणाविधिं निर्वर्तयेत तदैवाऽयमभिग्रहः संपूर्णो भवेदिति सोऽपि पञ्चचत्वारिंशद्दिनैः सफलीभूतः ।

४ अभिनवपाणिग्रहणविधिमङ्गलग्रन्थिबन्धनौ जायापती पारणां मे संपादयेतां तदा मेऽभिग्रहः फलिष्यतीति सोऽपि षोडशभिर्दिवसैः फलितोऽभूत् ।

एवंविधैर्विविधैरभिग्रहैः शरीरकार्श्यतां प्राप्य शाणोल्लिखितमणिरिव बाह्याभ्यन्तरशुद्धिमान् सर्वजगन्मण्डलं चमच्चकार । अणिमाद्यैश्वर्यैरसाधारणमहामहिमशाली तापसव्रतानां चरमां सीमामवाप । किं दुष्करं तपस्विनाम् ! । येनाऽस्य तपःप्रभाववशीभूता देवा देव्यश्च सदैवास्य सन्निधिं स्थितास्तदभिलषितपूरणार्थमुद्यता इवाभवन् । अन्येषां बौद्धमतानुयायिनां वामाचाररतानाञ्च किं वक्तव्यम् । ते तु तदीयाभिधानश्रवणमात्रेणाकुतोभयं स्थानमवलोकयामासुः ।

कालान्तरे बलाहकगोत्रीयेण लालाशाहेनानुष्ठिते महामहोत्सव उपकेशपुरे महावीरमन्दिरे श्रीदेवगुप्तसूरिणा स्वपट्टे प्रतिष्ठापितः । सम्प्रदायपरम्परानुसारेणास्य श्रीसिद्धसूरीत्यभिधानपरिवर्तनं कृतम् ।

अथासावासाद्य सूरिपदं पूर्वाचार्याणामादेशमनुपालयन् मेदपाटसौराष्ट्रकच्छसिन्धपञ्चालकुणाललाटकोकणावन्तिकाशौरसेनमत्स्यादिषु देशेषु स्वतपःप्रभावोत्पन्नदिव्यतेजसा सर्वान् दर्शनमात्रेणैव धर्माचरणदक्षवानकरोत् । सर्वत्र तदीया विजयवैजयन्ती समुदसर्प । जिनसिद्धान्तसूर्योदयः सर्वासु दिक्षु स्वकीयधर्माच-

रश्मिमयूखमालां प्रसारयामास । अस्य शासनकाले चैत्यवासिनां साधूनां धार्मिकी वृत्तिः शिथिलितप्रायाऽसीत् । येन प्रचारकार्यमस्तप्रायं लोकाश्चोत्साहहीना बभूवुः । एवं सत्यपि शैथिल्ये मिथो विरोधाभावाद्धर्मोद्धारः कर्तु सुशक आसीत् । सूरीश्वरः सूक्ष्मविचारेण तान् सर्वान् यत्र तत्रोपदेशेन धर्मप्रचारकार्यनिरतान् विधाय सर्वेषु देशेषु सम्प्रेष्य जिनधर्मकर्मशैथिल्यं दूरीचकार । यतो लब्धावकाशा बौद्धा वाममार्गानुसारिणश्च साधवो हताशा बभूवुः । अभक्ष्यभक्षणप्रवृत्तान् जनानहिंसाधर्मस्य रहस्यं परमसुखसम्पादकत्वञ्च ज्ञापयित्वा जिनधर्माचरणशीलान् व्यधत्त ।

एकदा स्वीयविहरणक्रमेणासौ ग्रीष्मर्तौ सिन्धप्रान्तस्य कस्मिंश्चिद् ग्रामे समागतः । आत्मशान्तिमनुभवितुमसौ नासाग्रन्यस्तविलोचनो ध्यानावस्थायां स्थितः । अल्पसमयानन्तरमेवास्य सुरासुरविहिता विविधा उपसर्गा अभूवन् । स च दुःविषहानपि तान् शान्तचेतसोपेक्षितान् चकार । अन्ते तस्य धीरवृत्तितां विलोक्य सन्तुष्टो देवो वरं ब्रूहीति कथयामास । तेनानुक्तोऽपि विजयलक्ष्मीमवश्यं भवान् प्राप्स्यतीत्युक्त्वा देवोऽन्तर्हितः ततः परं प्राप्तवरप्रसाद आचार्यवर्यः सर्वत्र भूमण्डलेऽप्रतिहतगतिर्वीरः सैनिक इव धर्मप्रचाराय बभ्राम ।

एवं जिनधर्मस्य सार्वत्रिकीं वृद्धिं विधाय योगबलेन निजमृत्युकालमासन्नं ज्ञात्वा सर्वलक्षणलक्षण्यं रत्नमुनिमुपाध्यायपदभूषितमादित्यनागगोत्रीयेण पारखशाखीयेन सरवणशाहेनानुष्ठिते महोत्सवे स्वपट्टे संस्थाप्य कक्कसूरीत्यभिधेयं विधाय च दिवमगमत् सूरीश्वरः ।

## [वि० सं० ६६० तः] ३६ आचार्यः श्रीकक्कसूरिः । (अष्टमः) वि० सं० ६८० ]

श्रीसिद्धसूरिपट्टं बालब्रह्मचारी पण्डितमण्डलालङ्कारभूतः सर्वगुणगणालङ्कृतोऽसाधारणलोकोत्तरचमत्कारचिन्तामणिः श्रीकक्कसूरिरलञ्चकार । असौ पद्मावतीनगरनिवासी तप्तभट्टगोत्रीयश्चासीत् । पिताऽस्य वाणिज्यविचक्षणो न्यायोपार्जितसम्पत्समन्वितो लक्ष्मणशाहो, माता च धर्मकर्मनिरता सरयूदेवी । उभाविमौ प्रभूतद्रव्ये विद्यमानेऽपि सन्तत्यभावेन परमदुःखितौ कालमत्यवाहयताम् । एकदा भृशमुद्विग्ना साऽष्टाख्यं तपोऽङ्गीकृत्य कुलदेव्याः सच्चायिकायाः स्मरणमकार्षीत् । तृतीयोपवासावसाने स्वप्ने समेत्य सच्चायिका तामवादीत् कल्याणिनि ! पुत्रस्ते भविष्यत्येव किन्तु पञ्चदशवर्षीयोऽसौ दीक्षां ग्रहिष्यतीत्युक्त्वाऽदृश्यतामयासीत् । सा च पतिपार्श्वमागत्य स्वप्नवृत्तं तं न्यवेदयत् । सोऽपि देवीकृपामनुमान्य परमानन्दसन्दोहमग्नो बभूव ।

अथ सा सकलमङ्गलाधारभूतं गर्भमधत्त । स च तदीयामभिलाषां विविधवस्तुविषयिणीं सर्वतोभावेन पुपोष । सम्पूर्णे च समये प्राची जगत्कल्याणनिधानं रविमण्डलमिव सुकुमारं कुमारमसूत । जिनालये च परमभक्तिसमन्वितेन तेनाष्टाह्निकामहोत्सवो विहितः । दीनेभ्यो बहु धनं दत्तम् । साधवः साध्व्यश्च सम्मानिताः । तस्य च प्राप्ते नामकरणसमये खेमाशाहेति नामकरणं कृतम् । बाल्ये मातापित्रोरनुकरणशीलोऽसौ धर्माचरणे शनैः शनैः कृतप्रवृत्तिर्बभूव । सप्तवर्षीयः स मात्रा सह प्रतिक्रमणार्थमुपाश्रयं गच्छन्त्या तया गच्छन् द्वारे स्थितः साध्व्या क्रियमाणं प्रतिक्रमणविधिं श्रुत्वा निसर्गतः कुशाग्रबुद्धिः कण्ठेऽकरोत् । ततः परस्मिन् दिवसेवृष्टे रनवारत्वं दृष्ट्वा सा तदीया जननी प्रतिक्रमणचिन्ताकुलाऽभवत्तदा तेनोक्तम्-अहं त्वां प्रतिक्रमणं कारयिष्यामि मा खेदमवाप्नुहीति । तथैव तेन प्रतिक्रमणविधिः सम्पादितः । सा चाश्चर्ययुतमानसा द्वितीयस्मिन् दिवसे साध्व्योपालब्धा पुत्रकृतप्रतिक्रमणवृत्तान्तं न्यवेदयत् । साध्वी च तदीयालौकिकशेमुषीप्रभावमालक्ष्य मुदितान्तरङ्गा स्वगुरवे राजकुशालमुनये न्यवेदयत् । सोऽपि बालस्य बुद्धिप्रभावं श्रुत्वाऽश्चर्यसमन्वितो बभूव । कदाचिदस्य पिता राजकुशलमुनिं वंदनाय प्राप । स च बालकं तं कथयामास वत्स ! जानासि प्रतिक्रमणविधिम् ? । तेन च चटुलवृत्तिना तत्क्षणमेव प्रतिक्रमणमुक्तम् । अस्य पिता खल्वेवं नाजानात् । गुरुस्तं न्यवेदयत्-लक्ष्मण ! बालोऽसौ दीक्षितः स्यात्तदा परमभाग्यवान् भवेदिति । भगवन् ! ममाप्येवमेव प्रतिभातीत्युक्त्वा वन्दनं विधाय गृहमयासीत् । प्रसंगवशात्स

मुनिकथितं भार्यायै सविस्तरं निवेदयामास। सा च संसारसुखाभिलाषिणी झटित्येव विवाहोऽस्य कर्तव्यो येन न गृह्णीयादसौ दीक्षामिति पतिमुवाच। लक्ष्मणेन प्रोक्तम्-अस्तु किन्त्वसौ किमिच्छतीति प्रथमं ज्ञातव्यम्। एवं मिथो विवदमानयोः कालो व्यतीतः तत परं ६२९ वर्षे दुर्भिक्षमभवत् किन्तु सामान्यरूपं तदतिवाहि' येन केनापि प्रकारेण जनैः। तथापि ६३० वर्षे निखिलप्राणिघस्मर एकपद एव जगद् ग्रसितुं तत्परो भयानको दुष्कालः पपात। तत्र नववर्षवयस्कः करुणार्द्रचेताः खेमाशाहः पितरं द्रव्यस्यायमेव समुचितस्त्यागसमय इत्युवाच। पुत्रस्येदृशीं भव्यां जनहितप्रवणां भावनां दृष्ट्वा स च तथैव व्ययमकार्षीत्। एवं सोऽपि कालः सर्वैर्महता कष्टेनातिवाहितः। प्राप्ते चतुर्दशे वर्षेऽस्य पाणिपीडनविधये जनकजनन्योर्मिथः प्रादुरास विवादः। अस्मिन्नेव समये भगवतः श्रीकक्कसूरेरागमनं जातम्। भव्यस्वागतेन सूरेरागमनमहोत्सवः श्रावकैः कृतः। ततः परं व्याख्यानसमये सूरिणा संसरणशीलानां संसारिणां विषयोपभोगेन निरयमात्रफलकं जीवनम्। ए' सर्वथा सज्ञानां संसारनिःसारता प्रतिपादिता। ततः सूक्ष्मदृष्ट्या विचार्यमाणे दीक्षाग्रहणपूर्वमात्म-कल्याणमार्गानुसरणमेव वरमिति सर्वान् भावुकान् बोधयामास। स खेमाशाहः प्रथमत एव प्राप्तवैराग्यः सूरी-श्वरोपदेशामृतरसास्वादलुब्धः पितरौ विबोध्य ताभ्यां कृताभ्यनुज्ञ आत्मना सह त्रिंशत्संख्यकैर्भावुकैः सह दीक्षा-मग्रहीत्। दिक्षामहोत्सवे लक्षनवकं धनमुपयुक्तमवशिष्टं पुण्यक्षेत्रे व्ययीकृतम्। अनन्तरमस्याभिधेयं दयारत्न-मुनिरिति सार्थकमेव कृतं सूरिणा। ब्रह्मचर्यप्रभावविद्योतितशिष्यमण्डलोऽसौ क्रमेण व्याकरणन्यायादीनि शास्त्रा-ण्यधीत्य सर्वातिशायितेजा बभूव। अस्यासाधारणदीप्तिप्रोद्भासितदिङ्मण्डलं मुखं सर्वजनानां नयनेषु हृदयेषु च स्थानमवाप। शास्त्रेष्वकुण्ठितबुद्धिविभवः सर्वगुणसंपन्न इति कृत्वा सूरिणा नागपुरनगरे स्वपट्टे प्रतिष्ठापितः कक्कसूरीति नाम्ना।

अथाऽऽचार्यपदावाप्तिसमयादारभ्य विविधप्रान्तेषु पर्यटनं सम्पादलक्ष( अजमेर ) नाम्नि प्रान्ते विहारं कृत्वा शाकम्भरीमाजगाम। तत्र धर्मरुचिसंवर्धकं व्याख्यानमदात्। येन तत्रत्यो राजा गेंदारावोऽमात्यवरश्च जेसलोऽन्ये च जिनधर्मस्यौदार्यपूर्णान्सिद्धान्तान् दृष्ट्वा जिनधर्मेऽधिकरुचयोऽभूवन्। व्याख्याने षड्दर्शनसारश्चाद्वितीयपाण्डित्येन वर्णयित्वा सर्वान् स्वधर्मरुचिरुचिरहृदयान् व्यधत्त। अस्य कालनिरूपणात्मवादकर्मवादक्रियावादादयो विविधा जनमनोमोदका विषयाः स्थानमलभन्त व्याख्याने। अतः सूरीश्वरप्रभावसमासादितधर्माचरणवृत्तिरसौ गेंदारावो जीवहिंसाविधायकाखेटकादीनां कृत्यानां प्रत्याख्यानं सूरीश्वरसाक्षिपूर्वकमकरोत्। गेंदारावप्रमुखस्य श्रीसंघस्या-ग्रहातिशयं दृष्ट्वा तत्रैव चतुर्मासावस्थानं प्रत्यपद्यत। चतुर्मासे डिडूगोत्रीयेण साढगशाहेन पञ्चमाङ्गस्य श्रीभगवती-सूत्रस्य वाचनामहोत्सव आरब्धः। प्रभूतद्रव्यव्ययेनापूर्वो लाभः सर्वैरपि लब्धः। आचार्येणापि सर्वेषां धर्मरुचि-मवलोक्य विविधोपदेशप्रसङ्गपुरःसरं सूत्रवाचनाकार्यं समापितम्। आत्मकल्याणेच्छया गेंदारावप्रभृतिभिः कतिपयैर्भावुकैर्जिनधर्मः स्वीकृतः। समाप्ते चतुर्मासव्रते सूरीश्वरो मेदपाट-मत्स्य-सौराष्ट्र-कच्छ-पञ्चाल-बुंदेल-खण्डादिषु प्रान्तेषु शिष्यमण्डलीसमन्वित आचार्यो धर्मरुचिर्लोकानामभिवर्धयामास। बहूनां देवालयानां जीर्णोद्धारो, नूतनानां प्रतिष्ठापनं, धर्माभिरुचिरिति त्रितयप्रयोजनेनाचार्यत्वं सार्थकं व्यधत्त।

एकादा विहारक्रमेणासौ सूरीश्वर उपकेशपुरमाययौ। तत्रासातावेदनीयकर्मोदयात् शरीरे दाहवेदना प्रादुर्बभूव। अतो निजमृत्युकालं विज्ञाय चोरडियाशाखोद्भवस्य भेराश्रावकस्य महोत्सवपूर्वकं विमलप्रभमुनये सूरिपदं ददौ। परम्परानुसारेणास्य श्रीदेवगुप्तसूरिरिति नाम परिवर्तितम्। समाध्यनशनव्रताचरणपूर्वकं सप्त दिनान्यतिक्रम्य क्षणभङ्गुरं देहमुत्सृज्य श्रीकक्कसूरिः स्वर्गमगच्छत्।

## वि० सं० ६८० तः ] ४० आचार्यः श्रीदेवगुप्तसूरिः ( अष्टमः ) वि० सं० ७२४ प० ]

श्रीकक्कसूरिपट्टे न्यायव्याकरणाष्टमहानिमित्तादिशास्त्रपारङ्गतः प्रखरपाण्डित्यप्रतिभासंपन्नो जिनधर्म-

प्रचारकार्यकुशलश्चारित्रपवित्रीकृतजगन्मण्डलः परमप्रभावकः श्रीदेवगुप्तसूरिः समायातः । असौ च नानाविधतरुलताकुसुमफलस्तबकोपशोभितोद्यानवाटिकाप्रासादपङ्क्तिपरिशोभितां धनधान्यसमृद्धिसम्पन्नां नारदपुरीमुवास । पिताऽस्य सुचन्तिगोत्रीयो द्रविणनिधिर्महापरिवारो वाणिज्यकर्मनिपुणो धर्ममयैकजीवनो बीजाशाहः । माता च परमधर्मपरायणा वरजूदेवी । तयोः पुत्रः पुनडोऽतीव भाग्यवान् धर्मकर्ममर्मज्ञश्चासीत् । बाल्यावस्थायामसौ सरस्वतीकृपापरिपूर्णो व्यावहारिकधार्मिकविद्यासु वैचक्षण्यं प्राप । स्वर्गीयानपि सोऽत्यशेत । गुरूपदिष्टमसौ चायस्कान्त इव शीघ्रमेव बुद्ध्यारूढमकरोत् । गुरुरपि सर्वापेक्षया तस्मिन्नतितिस्निह्यति स्म । अवन्ध्ययत्नश्चासीत् स आचार्यः शिक्षाप्रदाने । अत एवोक्तम् अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ।

अथ श्रीकक्कसूरिर्धर्मोपदेशार्थं नारदपुरीमलंचकार । नगरश्रेष्ठिना देवलशाहेन सपादलक्षद्रव्योपयोगेन नगरप्रवेशमहोत्सवो विहितः । सूरिश्च मनुष्यदेहस्य क्षणिकत्वं सयुक्तिकं प्रत्यपादयद् व्याख्याने । तथाहि-श्रावकाः ! यदर्थमेव भवन्त आपातमात्ररम्ये संसारेऽहमहमिकया प्रवृत्तिं कुर्वन्ति तदिदमेव शरीरं जलबुद्बुद वातिचञ्चलम् । अनित्यानि शरीराणि विभवो नैव शाश्वतः । तस्मात्सर्वमिदं व्यर्थमेवेति मत्वाऽऽत्मकल्याणसाधनोद्यता भवन्तु भव्याः । यद्विभवाद्यर्थं सर्वत्र समेषां प्रवृत्तिर्दृष्टचरा तदप्यशाश्वतमिति जानन्तोऽपि जनास्तत्रासक्ता मुधैव जीवनं यापयन्तीत्यत्र दृष्टान्तरूपेणोच्यते यथा—कस्मिंश्चिन्नगरे कश्चिद् भूपती राज्यमशासत् । तस्य सूनू राज्यलोभाकृष्टः पितरं हन्तुमियेष । राज्ञा चेदं गुप्तचरसकाशादवगतम् । अत्रोपायः कश्चिद् विचिन्त्यो येन न मे मरणं न च राज्यच्युतिः स्यादिति मत्वा कंचिदमात्यवरमाहूय सर्वं वृत्तान्तं न्यवेदयत्तस्मै । तेन विचार्योक्तम्-देव ! प्रतिस्तम्भमष्टावेवं शताधिकाष्टपरिमितस्तम्भयुक्ते प्रासाद उपवेष्टव्यं तत्र तेन राजकुमारेण सर्वे ते स्तम्भा विजेतव्या एकमप्यसौ पराजयेत तदा प्रथमत एव द्यूतं खेलनीयम् । ईदृशी व्यवस्था भवत एव लाभाय तस्य चानिष्ठाय बोधाय च भविष्यति । राज्ञा च तदङ्गीकृत्य राजसभायां सर्वजनसमक्षमाह पुत्रम् । वत्स ! यदि ते राज्यमभिप्रेतं तदाष्टकोणसहितशताधिकाष्टपरिमिताः प्रासादस्य स्तम्भास्त्वया सर्वे एव विजेतव्याः । एकेनापि त्वं पराजितः स्यास्तदा पुनः खेलनं द्यूतस्य कार्यम् । मूढबुद्धिनानेनेदं न विचारितं यदेवं कृत्वा राज्यप्राप्तिः सुशका दुःशका वेति । अनेनेदं ज्ञायत एव क्षणिकलाभसन्तुष्टा जीवा आत्मनोऽमूल्यमेव जीवनं व्यर्थमेव यापयन्ति । अन्ते च दुःखिताः सन्तः पश्चात्तापयुता भवन्ति । अत आत्मकल्याणसाधने न कालस्यापेक्षा विद्यते । तत एवोक्तम्—

श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् । न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥

एवं सूरीश्वरस्य व्याख्यानकुसुमसौरभं जनमण्डलप्रशंसामारुतसञ्चालितं सर्वत्र नगरं व्याप्नोत् । यतो मधुकरा इव श्रोतारः स्वयमेवपुष्परसमिवोपदेशं ग्रहीतुमिच्छवः समागच्छन्, नात्र प्रेरणापेक्षाऽऽसीत् । उक्तञ्च

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् । आमोदो न हि कस्तूर्याः शपथेन विभाव्यते ॥

आचार्यवर्यस्य व्याख्यानं श्रुत्वा पुनडस्तत्क्षणादेव विरक्तिरागरञ्जितस्वान्तोऽभवत् । पितरावामन्त्र्य षोडशसंख्यकैर्भावुकैः सह दीक्षितो बभूव । दीक्षानन्तरमस्य विमलप्रभेति नामपरिवर्तनं कृतम् । गुरोः पार्श्वे विनयपूर्वकमागमाभ्यासं विधाय सर्वविषयेष्वसाधारणपाण्डित्यवैदग्ध्यविराजितो विदुषां समाजेऽग्रेसरो बभूव । उपकेशपुरे श्रीदेवगुप्तसूरीति नाम्ना पट्टपदं भूषयामास ।

अथाचार्यवर्य उपकेशपुरान्निर्गत्य माण्डव्यपुरशङ्खपुरासिकादुर्गमुग्धपुरखटकुम्पनगरनागपुरपाल्हिकापुरादि मरुधरप्रान्तस्थेषु ग्रामनगरेषु विहरणेन धार्मिकीं भावनामुपदेशामृतेन संवर्धयन् चतुर्मासं चन्द्रावत्यामङ्गीचकार । तत्रत्या भावुका आत्मानं धन्यं मन्यमानाः क्षणोऽपि दुर्लभ इति कृत्वा तदीयव्याख्यानलाभं परमप्राप्तव्यलाभममन्यन्त । चतुर्मासानन्तरं प्राग्वटवंशीयेन रोडाशाहेन सूरेरभ्यनुज्ञां प्राप्य तस्यैवाध्यक्षत्वे

शत्रुञ्जययात्रायै संघो निष्कासितः। तत्र यात्रां विधाय सूरीश्वरः सौराष्ट्रप्रान्ते धर्मोपदेशेनाहिंसाधर्मेऽभ्यधिकां जनमनोभावनां विशदीकृत्य सिन्धप्रान्तमाययौ ।

एकदा विहारकाले भयङ्करमरण्यं गच्छता सूरिणा मार्गे वनाधिपेन व्याघ्रेण सहाजायुद्धं दृष्टम्। कुतूहलाक्रान्तचेता असौ कञ्चित् कालं तत्रैव स्थितः। इतश्चाश्वारूढाः सहस्राधिकाः पञ्चालप्रान्तीयाः क्षत्रियवंशीयाः सैनिका अपि म्लेच्छाक्रमणभयादाययुस्तत्र । ते सर्वे च योगिराजं सूरीश्वरं वीक्ष्य वन्दनव्यवहारेणानुक्रमेण तस्य पार्श्वमुपस्थिताः । सर्वप्रमुखसैनिकमुखमण्डले क्षत्रियोचितभावनामालक्ष्यैते जिज्ञासवः श्रोतारश्च सन्तीति मत्वा सूरिस्तानवादीत्—आर्याः! धर्मशास्त्रं श्रोतुमिच्छन्ति भवन्तः ? ते च सर्वे सहसैव बाढ़मित्युक्त्वा धर्मतत्त्वजिज्ञासया तदीयविवेचनाय सूरिमभ्यर्थयामासुः । सूरिणाप्यवसरोचितं धर्मतत्त्वं विवेचितम् । यथा—

चला लक्ष्मीश्चलाः प्राणाश्चले जीवितयौवने ।
चलाचले च संसारे धर्म एको हि निश्चलः ॥
धर्मः शर्म परत्र चेह च नृणां धर्मोऽन्धकारे रविः ।
सर्वापत्तिशमक्षमः सुमनसां धर्माभिधानो निधिः ॥
धर्मो बन्धुरबान्धवः पृथुपथे धर्मः सुहृन्निश्चलः ।
संसारोरुमरुस्थले सुरतरुर्नास्त्येव धर्मात्परः ॥
धर्मो दुःखदवानलस्य जलदः, सौख्यैकचिन्तामणिः ।
धर्मः शोकमहोरगस्य गरुडो, धर्मो विपत्त्राणकः ॥
धर्मः प्रौढपदप्रदर्शनपटुर्धर्मोऽद्वितीयः सखा ।
धर्मो जन्मजरामृतिक्षयकरो धर्मो हि मोक्षप्रदः ॥

अयि मान्याः! मैत्रीधर्ममुद्दिश्य महाभारतेऽप्युक्तम्—

न तत्परस्य सन्दध्यात् प्रतिकूलं यदात्मनः ।
एषः संक्षेपतो धर्मो कामादन्यः प्रवर्तते ॥

इति विशदधर्मस्वरूपं जिनधर्मस्य च वैशिष्ट्यमाचार्येण वर्णितम्। तैः सर्वैरेव धर्मस्वरूपं तत्त्वतो ज्ञात्वा जिनधर्मः स्वीकृतः ! ततः सेनाधिपतिं रावगोसलं सूरिस्तस्मिन्नेवारण्यस्थाने नवनगरनिर्माणार्थं संक्षिप्तसूचनामकरोत् । ततः सूरीश्वरस्योपदेशात्तेन सर्वविघ्नोपशान्तये भगवतः पार्श्वनाथस्यारब्धो जिनालयः। क्रियमाणे च तदर्थं भूखननेऽक्षयो निधिर्निःससार । ततोऽसौ तं सिद्धपुरुषं मन्वान आचार्यवर्यं मुहुः प्रशशंस। पञ्चालप्रान्तीयस्य रावगोसलस्य नामसदृशं तन्नगरस्यापि गोसलपुरेति नाम कृतम् ।

गोसलपुराधीशस्य गोसलस्य चतुर्दशस्वात्मजेष्वष्टौ पुत्रा गोसलपुरं न्यवात्सुः। ते च आसलः पासलो देशलः खुमानो रामपालो भीमः खेंगारः साङ्गणाख्या आसन् ।

पुनरेकदाऽऽचार्यो देवगुप्तसूरिरनुक्रमेण विहरन् गोसलपुरमगमत् । गोसलपुराधिशस्यादरमनुमान्य तत्रैव चातुर्मासिकीं स्थितिं चक्रे। पूर्वस्मिन् काले संस्काररूपेण स्थापितां धर्मभावनां व्याख्यानपरम्परयास्मिन् संप्राप्ते समये पल्लवितामकरोदाचार्यः। चतुर्मासानन्तरं गोसलेन निर्मापितस्य जिनालयस्य प्रतिष्ठाविधिः सूरेरेव वरदहस्तेन सम्पादितः। ततः शत्रुञ्जययात्रायै संघनिष्कासनमपि निश्चितं सर्वैः। सर्वे च दूरस्थाः समीपस्था भावुकाः सप्रश्रयमामन्त्रिताः। ततः शुभे मुहूर्ते गोसलस्य संघपतित्वे सूरीश्वरस्याध्यक्षत्वे च संघः शत्रुञ्जयमभिप्रतस्थे ।

क्रमेण तत्र गत्वा ध्वजारोपणपूजाप्रभावनादिकं कृत्वा यात्राजनितपुण्यराशिं संगृह्य प्रतिनिवृत्य गोसलपुरमागच्छत्। सूरीश्वरस्तु तत्रैवात्मध्यानार्थं न्यवात्सीत्। कालान्तरेऽपरेण संघेन सह वीरपरम्परागतसाधवोऽपि पातकराशिप्रक्षालनसमर्थं श्रीशत्रुञ्जयमाजग्मुः। यदा तैर्देवगुप्तसूरेः समवसरणं ज्ञातं तदा सत्वरमेव ते वन्दनार्थं तत्समीपमीयुः। सूरीश्वरेण जिनशासनस्य वर्तमानकालीना स्थितिर्विर्णिता। तद्वारेण ते च कर्तव्याभिमुखाः कृताः साधवः। सूरेर्मार्मिकं समयोचितञ्च वक्तव्यं ज्ञात्वा धर्मप्रचाराय तेषां हृदये नूतनं चैतन्यमागतमिवालक्ष्यत। अपरेद्युस्ते सूरिणा सह परमसौजन्याकृष्टचेतसः साधव आदिनाथदर्शनार्थं पर्वतस्योपरिभागे गमनमकार्षुः।

भगवत आदिनाथस्य दर्शनं विधाय देवगुप्तसूरिः सौराष्ट्रदेशे सर्वत्र विहरणेन धर्माभ्युदयं विधाय कोकणप्रदेशे देवपट्टननगरे चतुर्मासमकरोत्। चतुर्मासादनन्तरं त्रयोदशभिर्भावुकैर्दीक्षा गृहीता। अभिनवजिनालयप्रतिष्ठापि तत्र विहिता। ततो दक्षिणप्रान्ते विहरन् विदर्भदेशस्थं बालापुरनगरमयासीत्। तत्रापि सूरेरुपदेशेन परमश्रद्धालुभिरेकादशभिः श्रावकैर्दीक्षा गृहीता। एवं जिनागमरहस्यवेत्ताऽसौ सूरीश्वरो महाराष्ट्रप्रान्ते विहरन्नष्टाविंशतिसंख्यकान् जनान् स्वधर्मोपासकान् विधाय दीक्षयामास। पञ्चभिः क्षपणकमुनिभिरपि श्वेताम्बरीया दीक्षा गृहीता।

एकदा सूरिणा शत्रुञ्जयमाहात्म्यमुपवर्णितम्। तन्नगरामात्यो रघुवीरः शत्रुञ्जययात्रायै संघायोजना योद्यतो बभूव। क्रमेण शुभे मुहूर्ते शतत्रयपरिमितैः श्वेताम्बरमुनिभिः पञ्चविंशत्यधिकैकशतपरिमितैर्दिगम्बरीयैः साधुभिः पञ्चविंशतिसहस्राधिकैः श्राद्धैः सह शत्रुञ्जययात्रार्थं संप्रतस्थे। संघस्त्वनुक्रमेण नीलमरकतपद्मरागादिभी रत्नैः पूजां देवमूर्तीनां विधाय तीर्थयात्राजन्यसुकृतराशिं संगृह्य परावृत्य स्वस्थानमाप। सूरिस्तु खेटकपुरस्तम्भनतीर्थादिषु प्रान्तेषु विहरन् भरुचनगरे चातुर्मासिकीं स्थितिं कृत्वाऽसाधारणपाण्डित्यबलेन समधिकां धर्मरुचिं लोकानामभिवर्धयन्—अवन्तिकामाण्डव्यगढमहेन्द्रपुररत्नपुरादिषु ग्रामनगरेषु धर्मप्रचारं विधाय चित्रकूटं ययौ। तत्र चतुर्मासकाले बलाहकगोत्रीयः श्रावकशिरोमणिर्देवगुरुचरणसरोजचञ्चरीकः पञ्चपरमेष्ठिमहामन्त्रस्मारकः श्राद्धगुणसंपन्नो निर्ग्रन्थकोपासको दुर्गाशाहो महामहोत्सवपूर्वकं श्रीभगवतीसूत्रवाचनामकारयन्नवलक्षपरिमितेन द्रव्येण पयामास ज्ञानार्चनागतद्रव्येण ज्ञानभण्डारप्रभृतीनि ज्ञानप्रचारसाधनानि स्थापयामास। चतुर्मासानन्तरं सप्तभिर्मुमुक्षुभिर्गृहीताऽत्मकल्याणसाधिका भगवती दीक्षा। ततो मेदपाटप्रान्तस्थग्रामनगरेषु धर्मोद्यमं विधाय सूरिर्नागपुरं भूषयामास। तत्र चतुःशतसंख्यकैर्विप्रैर्मिथ्यात्वं हित्वा जिनधर्मोऽङ्गीकृतः। ततः क्रमेणोपकेशपुरमागतः। तत्रत्ये संघे परस्परं मनोमालिन्यमासीत्। किन्तु सूरीश्वरस्योपदेशेन त्यक्तविद्वेषभावनः स मिथः स हार्देन व्यवहारमकार्षीत् संघः। चतुर्मासानन्तरं चोरडीयाशाखीयस्यात्मात्यस्यात्मजः करणः षण्मासविवाहितां पत्नीं हित्वा सूरिपार्श्वे दीक्षोद्यतो बभूव। एकत्रिंशत्परिमितैर्मुमुक्षुभिर्मुक्तिमार्गसाधिकां दीक्षामगृह्णात्। ततः कुमटगोत्रीयेण देवाशाहेन निर्मापितस्य भगवतः पार्श्वनाथस्य प्रतिमा प्रतिष्ठापिता। ततो विहरन् सूरिः स्वजन्मभूमिं नारदपुरमलञ्चकार। श्रीसंघस्योत्साहवर्धनार्थं तत्रैव चतुर्मासो विहितः।

चरमसमये योगविद्यया स्वनिधनसमयं ज्ञात्वा देवोसच्चायिकाप्रदत्तसूचनामनुमान्य नारदपुरीयेण प्राग्वटवंशीयेन डाबरशाहेन समनुष्ठिते महोत्सवे चन्द्रशेखरमुनये सूरिपदमर्पयामास। श्रीसिद्धसूरीति नाम्नः परिवर्तनं विहितम्। स्वयं च त्यक्ताहारः समाधिपूर्वकमेकादश दिनान्यतिवाह्य दिवमगच्छत्।

## वि० सं० ७२४ तः] ४१-आचार्यः श्रीसिद्धसूरिः। (अष्टमः) वि० सं० ७७८ प०]

श्रीदेवगुप्तसूरिपट्टपद्मं विविधप्राणिविघ्ननिवारको न्यायव्याकरणसाहित्यपारावारपारगो महाशासनप्रभावकः सुरासुरसेवितचरणसरोजयुगलः सिद्धपुरुष इवानेकगुणगणालङ्कृतः श्रीसिद्धसूरिरलञ्चकार। असावा-

दित्यनागगोत्रीय उपकेशपुरवास्तव्यश्चासीत् । पिताऽस्यामात्यपदविभूषितः संघपतिपदप्रतिष्ठितोऽर्जुनः । माता च सतीसमुदायशेखरीभूता फागूदेवी । तयोरयमात्मजोऽत्यन्ततेजस्वी प्रखरप्रतिभासंपन्नः करणः । आबाल-ब्रह्मचारी भविष्यामीति भीष्मप्रतिज्ञान्वितः । अमात्यस्यार्जुनस्याग्रहेणास्य पाणिपीडनं कस्यचित् श्रेष्ठिनः परम-सौन्दर्यसौजन्याद्यनेकगुणवत्या कन्यया सह जातं किन्तु विजयकुंवरीविजयकुंवराविव स्वप्रतिज्ञाविघातमुभावपि न चक्रतुः । यतो ब्रह्मचर्यं नामाप्रतिहतगति सर्वातिशायि परमात्मकल्याणसाधकमुत्कृष्टं साधनम् । ब्रह्मचर्यबलात् शरीरपरिपुष्टिस्तेजोमेधावर्धनम् दुष्करस्यापि कार्यस्य सौकर्येण साधनम् । तत्प्रभावासादितापूर्वोत्साहेनैहिकं पारलौकिकञ्च श्रेयः संप्राप्यते । पुराऽपि बहवो मुनीश्वराः सर्वत्र प्रबलतरान् वादिनो ब्रह्मचर्यसमेधितमेधाबलेन विजित्यात्मयशो दिक्षु सर्वासु प्रसारयामासुः । इदमेवात्मश्रेयसि प्रयुक्तं ब्रह्मचर्यं नाम साधनं कियदुपकारकं भवेदिति विचारयन्तौ तौ षण्मासपर्यन्तमेकशय्या स्वपन्तावपि स्वब्रह्मचर्यव्रते दृढपरिकरावास्ताम् । करणकुवो-पदेशबलादस्य भार्याऽनेन सह दीक्षोद्यता बभूव ।

इत परमपुण्योदयाज्जात्युद्धारको जिनगदितयमनियमनिष्ठो धर्माचार्यो देवगुप्तसूरिरुपकेशपुरमाजगाम । सूरीश्वरेण व्याख्यानेब्रह्मचर्यमाहात्म्यं विवेचितम् । तदाकर्ण्य करणो भार्यया सह पितरावापृच्छ्यैकत्रिंशत्परिमितै-र्जनैः सार्द्धं सूरिसमीपे दीक्षामग्रहीत् । अनन्तरमस्याभिधानं चन्द्रशेखरेति परिवर्तितम् । असौ चतुर्दशवर्ष-पर्यन्तं गुरुकुलेऽधीयान एकादशाङ्गोपाङ्गादीनि जिनागमतत्त्वानि साहित्यादीनि च शास्त्राणि कण्ठस्थान्यकरोत् । प्रसन्नमनाः सूरीश्वर उपाध्यायपदार्पणेन तं भूषयामास । ततः परमपि सूरिसमीपावस्थानेनानुभवज्ञानजन्या-द्वितीयप्रतिभासमन्वित आगमधुरन्धरोऽनेकान्तवादप्रचारको जातः । सिद्धाचलपर्वतस्य पवित्रतीर्थस्थले स्वनिधन-समयं परिलक्ष्य देवगुप्तसूरिणाऽसौ सिद्धसूरिनाम्ना प्रतिष्ठापितः सूरिपदे ।

सिद्धसूरिः शत्रुञ्जयपर्वतान्निर्गत्येतस्ततो विहरन् भृगुकच्छपुरमाययौ । तत्र धनधान्यसमृद्धिसम्पन्नो धनाधिप इव मुकुन्दनामा श्रेष्ठी प्रतिवसति स्म । अपरिमितधने विद्यमानेऽपि सन्तत्यभावाद् धनराशिरस्य दुःखोत्पादनायैवासीत् । अपुत्रस्य सर्वेषु वस्तुषु विद्यमानेष्वपि न तस्य सन्तोषाय किञ्चिद् भवति । अत एवोच्यते—

धिग् जीवितं प्रजाहीनं धिग् गृहं च प्रजां विना ।
धिग् धनं चानपत्यस्य धिक् कुलं सन्ततिं विना ॥

स च सूरीश्वरप्रशंसां जनश्रुतिपरम्परातोऽवबुध्यापत्यलाभाशया मन्त्रयन्त्रतन्त्रविचक्षणस्य सूरेः समीप-मगमत् । पादवन्दनं विधाय विनीतभावेनासौ तस्मै स्वगृहस्थाश्रमजीवनेतिवृत्तं सकलं निवेदयामास । सूरिरपि तत्सर्वमेव श्रुत्वा "बलिष्ठा कर्मणो गतिः" प्रारब्धकर्म बलवन् मुनयो वदन्तीत्यादिभिर्नीतिवचनैस्तं समाश्वा-सयत् । भोगलिप्सया संसारसुखासक्तिः परमार्थतः प्राणिनां दुखायैवोपकल्पते । सांसारिका हि विषयाः

अश्रद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः ।
सुदुस्त्यजास्त्यजन्तोऽपि, कामाः कष्टा हि शत्रवः ॥

एवं सयुक्तिकमुपदिष्टो मिथ्याग्रहग्रहोन्मोचितो जिनधर्मस्य परमोपासको भक्तोऽभवत् । व्यतीते हि कियति काले दोगन्दुको देव इवानुपमलावण्यपुञ्जः सुकुमारप्रकृतिः सुरुचिरमूर्तिः सुतो जन्म लेभे । अत एव तस्य जिनधर्मोपरि सविशेषा भक्तिरवर्धत । अयं खलु सूरेरेवोपकार इति मन्वानः स मुहुर्मुहुस्तं परमभक्त्या-प्रशशंस । कटाक्षकटाक्षितकलुषितचित्तवृत्तयो वेदधर्मानुयायिनश्च ब्राह्मणा लज्जाभरनताननाः अभूवन् ।

अथ समधिकानन्दसन्दोहसन्तुष्टान्तरङ्गोऽसौ, मुकुन्दः सूरीश्वरस्य स्थानं परम्परया ज्ञात्वा भृगुकच्छ-मलङ्कर्तुमाह्वानपत्रिकया सह भृत्यान् प्राहिणोत् । आज्ञापालकाश्च भृत्यास्तत्र गत्वा मुकुन्दसन्दिष्टं निवेदयामासुः । श्रद्धाभक्तिसमन्वितमिदं संदिष्टं समाकर्ण्याचार्यस्तानवोचत्-सेवकाः ! चन्द्रावतीचतुर्मासानन्तर-मुपकेशपुरस्थस्य भगवतो महावीरस्य यात्राभिलाषा मे वर्ततेऽतोऽस्मिन् समये तत्रागन्तुमहं न शक्नोमि । ते च सूरिसंदिष्टं मनसि कृत्वा स्वनगरं प्रत्याययुः ।

चतुर्मासानन्तरमुपकेशपुरयात्रायै सूरीश्वरस्यागमनं विज्ञाय मुकुन्देनाप्युपाध्यायमेरुप्रभमुनेरध्यक्षत्वे संघनिष्कासनं विनिश्चितम् । सर्वेभ्य आमन्त्रणं कृत्वा शुभे दिवसे संघ उपकेशपुरं प्रतस्थे । अस्मिंश्च संघे सह-स्राधिकाः साधवो विंशतिसहस्राधिकाश्च श्रावकाः संगता आसन् । मुकुन्दोऽप्यनुक्रमेणोपकेशपुरमाजगाम । प्रथमतस्तत्रागतं सूरीश्वरं मिलित्वा प्रणम्य ततो भगवतो महावीरस्य दर्शनार्चनाप्रभावनमहोत्सवादिकं धार्मिकं कृत्यमाचरत् । प्रभूतधनव्ययेनासाधारणं पुण्यधनेनासादितम् । पश्चादाचार्यं भरुचपत्तनागमनाय सविनयमभ्यर्थयामास । सशिष्य आचार्योऽस्य प्रार्थनामनुमान्य संघेन सह भृगुपुराभिमुखं विहारमकरोत् ।

सूरिराज उपकेशपुरचतुर्मासानन्तरं मेदपाटप्रान्तमाययौ । तत्र देवपट्टनपत्तनपार्श्वे दशसहस्राधिकान क्षत्रियान्स स्वधर्ममवबोध्य जिनधर्मानुयायिनश्चकार । तत्रतो निर्गत्य चित्रकूटे चतुर्मासेन सर्वान् स्वधर्मदृढ-भावनान्वितान् व्यधत्त । एवमवन्तिकादिप्रान्तीयचतुर्मासानन्तरं मथुरायां सौगताचार्येण सह शास्त्रचर्चां विधाय तं पराजित्य जिनधर्मपताकामुल्लासयामास । ततो भगवतः पार्श्वनाथस्य कल्याणभूमिस्पर्शनार्थं वाराणसीमगमत् । चतुर्मासश्च तत्रैव कृत्वा तदीयप्रभावमीर्ष्याऽसहमानान् ब्राह्मणान् पराजित्य विवादे पञ्चालदेशमव्राजीत् । तत्र महतीं श्रमणसभां कृत्वा सर्वेभ्यः साधुभ्यः समागतेभ्यः समयोचितं धर्मप्रचारोपदेशं दत्वा सिन्धदेशाभिमुखं विहारमकार्षीत् । सूरीश्वरस्य समवसरणेन तत्र धार्मिकी रुचिर्जनानामभूतपूर्वा बभूव । अस्मिन्देशे जिनधर्मप्रचारमुद्दिश्याचार्येण चत्वारश्चतुर्मासा ( वर्षचतुष्टयमिति यावत् ) विहितास्तत्र तत्र धर्मोपदेशादिना । ततः क्रमेण विहारं कुर्वन् गोसलपुरमाजगाम सशिष्यः । परमधार्मिक आसलो महामहोत्सवपूर्वकमस्य नगरप्रवेशमकारयत् । तदीयामभ्यर्थनां स्वीकृत्य तत्रैव चतुर्मासो निर्णीतः । समाप्ते च चतुर्मासे कज्जल-प्रभृतिभिः कतिपयैर्भव्यैर्भगवती दीक्षा गृहीता । अनन्तरं डमरेलपुर-वीरपुरोच्चकोटादिषु विहृत्य कच्छदेशे भद्रावतीमागच्छत् । तत्र धर्मप्रचारेण सकलधार्मिकाणां मनांसि धर्मव्याख्यानेन मोदयित्वा सौराष्ट्रप्रान्ते शत्रुञ्जयतीर्थमागत्य तत्र यात्रां विधाय शान्तिमनुभवितुं तत्रैव वसतिं चक्रे ।

अथ कश्चित् कालमुषित्वा शत्रुञ्जयं ततो भृगुपुरं भूषयामास । श्रीमुकुन्दश्रेष्ठिना नवलक्षपरिमिताभिर्मुद्राभिरस्य भव्यः स्वागतविधिरनुष्ठितः चिरादेवास्याचार्यागमनाभिलाषाद्य फलितेति महानानन्दस्य विषयः । ततः सप्तभिस्तनयैः सह सूरिपार्श्वमागत्य कृतज्ञतासूचकभावेन प्रार्थयामास भगवन् ! ममाभिलाषां पूरयितु-मर्हति भवान् । सूरिस्तमवोचत् श्रेष्ठिन् ! का तेऽभिलाषा ? । स चावादीत् आचार्यवर्य ! सम्मेतशिखरयात्रार्थं महासंघनिष्कासनरूपां स्वात्मनः श्रीमते समर्पणरूपाञ्च मे कामनां पूरयिष्यति पूज्यचरण इत्यहमाशासे । सूरिश्च तमुवाच कल्याणिन् ! समीचीनैव तेऽभिलाषा किन्त्वात्मश्रेयःसम्पादनं परमं प्रयोजनं तेऽवशिष्यते । सूरेर्वचः श्रुत्वा स आह-जराजर्जरितावयवोऽहमधुना दीक्षां ग्रहीतुं नेच्छामि । आचार्यश्च तद्वचनं समाकर्ण्य तमगादीत्-श्रेष्ठिन् !

पच्छाविते पयाया खिप्पं गच्छन्ति अमरभवणाइ ।
जेसिं पिओ तवो सञ्जमो खंतिअ बम्भचेरञ्च ॥

एवं सूरीश्वरवचनं श्रुत्वा विचारयिष्याम्यहमस्मिन्विषयेऽधुनेति तमवोचत्। अथ श्रीसंघस्यादरातिशयमालोच्य तत्रैव चतुर्मासः कृतः। चतुर्मासानन्तरं मार्गशीर्षमासस्यैकादश्यां मुकुन्दस्य संघपतित्वे महान् संघः सम्मेतशिखरयात्रायै निर्जगाम। यत्र पञ्च सहस्रसंख्यकाः साधवो लक्षाधिकाश्च धार्मिकाः संगता बभूवुः। समेत्य च सम्मेतशिखरं विधाय च पूजाप्रभावनाध्वजतोरणार्पणादीनि धार्मिकाणि कृत्यानि, ज्येष्ठपुत्राय नकुलाय संघपतिमालामारोप्य मुकुन्दो लल्लकल्लादिभिः पुत्रैरष्टादशभिश्च भावुकैः सहार्हतीं दीक्षामग्रहीत् सूरीश्वरपार्श्वे। संघेन सह निर्गत्य मथुरापुरीमाचार्य आजगाम। संघस्तु स्वपुरमभिप्रतस्थे। सूरिणा च मथुरायामेव चतुर्मासः कृतः। व्याख्यानेन धर्मरुचिमभिवर्धयन् स मेदिनीपुरमगमत्। तत्र योगबलेन स्वमृत्युसमयं विचिन्त्योपाध्यायपदालङ्कृतं मूर्तिविशालनामानं मुनिं कक्कसूरीति नाम कृत्वा स्वपट्टे समारोप्य स्वर्गमयासीत्।

## वि० सं० ७७८ तः] ४२-आचार्यः श्रीकक्कसूरिः (नवमः) वि० सं० ८३७ प०]

श्रीसिद्धसूरिपट्टपद्मं द्वादशतपोव्रताराधकोऽष्टप्रवचनमातृपालकोऽष्टसंपत्समन्वितः षट्त्रिंशत्सूरिगुणालङ्कृतः कल्पतरुरिव सकलार्थिजनाशापूरको मलयरुह इव शीतलप्रकृतिः सूर्य इव तेजस्वी चन्द्र इव रुचिरमूर्तिः श्रीकक्कसूरिरलञ्चकार। असावार्यगोत्रीयो गोसलपुरवास्तव्यश्चासीत्। अस्य पिता धार्मिकप्रवरः सर्वसंपत्समन्वितोऽग्रगण्यो भोगदेवनामा माता च वनिताजनललामभूता रमणीगुणगणोपमण्डिता सेणीदेवी। तयोरयमात्मजः कज्जलो दोगन्दुकदेव इव शैशवोचितक्रीडारतः सकलपुरवासिजनमनोमोहकः क्रमेण पितराविव धर्मकर्माचरणनिष्ठः सुशीलो बभूव।

अथैकस्मिन् काले प्राक्तनपुण्यपुञ्जपरिणामादाचार्यवर्यस्य सिद्धसूरेरागमनं तत्र पुरे जातम्। सूरीश्वरस्य जगन्निःसारताबोधकं वैराग्योत्पादकं व्याख्यानमाकर्ण्य कज्जलो विरक्तिमवाप। एकदा मध्याह्नकालेऽसौ सूरिपार्श्वमेत्य स्वस्य वैराग्यभावनां प्रकटीचकार। सूरिरपि यौवनं नाम गिरिनदीवेग इव चञ्चलं जीवतञ्चानवरतसञ्चाल्यमानगजकर्णयुगलमिवानतिस्थिरम्। विषयाश्चापातरम्याः परिणामदारुणाः सर्वथा हेया एवेति मनुष्येणात्मकल्याणप्राप्तये प्रयतितव्यम्। अनेन प्रकारेण तस्य विरक्तिभावनामवर्धयत्। सूरीश्वरस्यैवं वचः श्रुत्वा स आह सूरीश्वर! संसारादुद्विग्नोऽहं दीक्षां वाञ्छामि किन्तु जनकादेशाभावे दीक्षाग्रहणं भवति न वेत्यत्र सन्देहो भवतैव दूरीकरणीयः। तस्करवृत्तिमाश्रित्य व्यवहारविरुद्धं धर्माचरणमपि तवानुचितं मे प्रतिभाति। पुरा मेघकुमारजम्बुकुमारप्रभृतयो महापुरुषाः स्वजनकस्यैकाकिनः पुत्रा अष्टवधूका अपि दीक्षोत्कृष्टभावनोपपन्नमानसाः सांसारिकान् पौद्गलिकानर्थान् झटिति त्यक्त्वा पितरावापृच्छ्य मोक्षमार्गानुयायिनोऽभूवन्। त्वं तु वैवाहिकपाशनिर्मुक्तोऽस्मिन् काले। अतः पितृकृताभ्यनुज्ञस्यैव ते दीक्षास्वीकरणं न्याय्यमित्यवादीदाचार्यः।

असौ कज्जलः परमार्थसारं सूरिवचनमङ्गीकृत्य पितरावामन्त्र्य कतिपयैर्मुमुक्षुभिः सह दीक्षां स्वीचकार। मूर्तिविशाल इत्यभिधेयेनात्र विश्रुतो बभूव। दीक्षाग्रहणादनन्तरं गुरुकुलमुषित्वा जैनशास्त्रमर्माध्ययनकुशलः कविनिसर्गप्रतिभासमन्वितोऽचिरादेव विपश्चिच्चक्रवालसंभावनीयकीर्तिः सूरीश्वरमप्रीणयत्। प्राप्ते समये मेदिनीपुरे सिद्धसूरिणा स्वपट्टे प्रतिष्ठापितः।

श्रीकक्कसूरिसमये चैत्यवासिनो मुनयो व्रतनियमेषु शिथिलाचारिणोऽभवन्। अतश्चन्द्रावत्यां तेषामुत्साहवर्धनार्थं श्रमणसभा विहिता। सूरीश्वरश्च तान् स्वधर्मप्रचाराय तेषां स्वेच्छाचारादीन् दूरीकर्तुमगादीत्-महानुभावा मुनयः! यत्र तत्र विहरता मया या हि दुरवस्था दृष्टा सा न कदाचिदपि पूर्वं श्रुताप्यासीत्। धर्मो हि जगतः प्रतिष्ठा, वयञ्च तदीयस्तम्भभूताः। आधारस्तम्भशैथिल्ये स्थिरांशरहिते न तदुपरि स्थापितं गृहं प्रतिष्ठितं दृढमूलञ्च भवति। स्थानपरिग्रहमात्रेणात्मलाभं मन्यमानानामस्मदादीनां शिथिलाचारत्वादौदासीन्यादास्मयशः-

स्थापनदुराशादग्धहृदयत्वाच्च शासनकार्यं दूरमेवोत्सारितं परिणामेऽस्मद्धानये भवति । परहितमात्रनिरतैरस्माभिरयं संसार: परित्यक्त: प्रथममात्मकल्याणमासादयितुं किन्तु स्वश्रेयस्येव प्रमादश्चेत्तैरस्माभि: किं नाम लब्धम्। यैराचार्यै: स्वनामधन्यैर्दु:सहा: परिषहा: सोढा: , दुर्गमेष्वपि स्थलेषु विहारं विधाय धर्मप्रचारार्थं यावज्जीवमात्मकल्याणप्राप्तिपुर:सरं महाशासनसमुन्नतिर्विहिता । तत्र किमर्थमस्माभिर्लाघवं विधेयम् । यदि नाम न शक्येत तदभ्युदयस्तथापि तदवनतिस्तु नैव कर्तव्या । व्रतनियमैर्हार्दिकी शुद्धि: सा चात्मन: कल्याणाय कल्पत इति निश्चितम् । अतो भवन्तो दृढपरिकरा: स्वधर्माचरणे प्रचारे च संलग्ना भवन्तु । तथैव भवतां जीवनस्य कृतार्थता । सत्पथे विहरतां सर्वदा श्रेय एव भवतीति नूनं जानन्तु ।

श्रीकक्कसूरेरसाधारणब्रह्मचर्यप्रभावाज्जयाविजयाम्बा देव्यस्तदीयचरणकमलसामीप्यं कदाचिदपि न तत्यजु: । स आचार्य एकदानुक्रमेण विहरन् कान्यकुब्जप्रान्तमगमत् । तस्मिन्समये श्रीगोपाचले श्रीबप्पभट्टसूरिरासीत् । गोपाचलाधिपति: आमो बप्पभट्टसूरिणा सार्द्धं कक्कसूरे: स्वागतार्थमभिमुखं ययौ । तत: समाप्ते स्वागतविधौ बप्पभट्टसूरेराग्रहाद्देशनामदात् सर्वेभ्यो भावुकेभ्य: । बप्पभट्टसूरिरपि परं विस्मयमवाप सूरीश्वरस्याद्वितीयदेशनादानात् । तत: कदाचिद् एकान्ते सुखमासीन: कक्कसूरिर्बप्पभट्टसूरिमवादीत्—सूरीश्वर ! अद्य खलु चैत्यनिवासनिरतानां धर्मं प्रति शैथिल्यं दृष्ट्वा न जाने कीदृश्यवस्था भविष्यति नो धर्मस्येति चेतो मदीयं सततं तदीयविचारपरम्पराव्याप्तं दन्दह्यते । येषु धर्म: सर्वथा प्रचारसापेक्षतां गतस्त एव केवलं स्वकीयस्वेच्छावादरता धर्मस्य नामापि न शृण्वन्त: सुखेनैव कालं यापयन्तीति महानयं खेदस्यावसर: । स्वधर्मकर्मनिरतानां येषामाचरणानुसरणतत्परा: श्रावका आत्मन: कृतार्थतां मन्यन्ते त एवेदानीं स्वप्रभावं मिथ: प्रख्यापयन्त: पूर्वानप्याचार्यानतिशेरते । ये हि विमलयशोव्याप्तदिङ्मण्डला: प्रात:स्मरणीया रमणीयचरित्रचित्रीकृतनिखिललोका: स्वधर्माय जीवनमपि निरपेक्षममन्यन्त मानमपि दूरीकृत्य धर्माभ्युदय एव परमं कर्तव्यमिति दृढपरिकरा आसन् तेऽद्य चैत्यनिवासिनां शिथिलप्रायां परिस्थितिमुद्दिश्य परत्र स्वकीये स्वान्ते परितप्यन्त इव मन्ये । यदि तेषां शैथिल्यपरिहाराय कश्चन तीक्ष्ण उपाय आचरित: स्यात्तदा त एव विरोधिनो भवेयु: । ततो मिथ: संक्षुब्धे व्यवहारे धार्मिकाणामाश्रयदातॄणां च चेतसि महती ग्लानि: शासनं प्रत्युदासीनत्वञ्च ध्रुवं संभवेत् । एवं सति धर्मप्रचारे प्रोत्साहकानामभावेन स्वकार्यविरोध एव परिणमेत् । अथ चास्माभिरौदासीन्यमवलम्ब्येत तदा वयमेवानर्थपोषका: सर्वजनोपहासविषया अनादरणीयवचना: स्वधर्मविघातका भवेम । अन्यमतावलम्बिनश्चावसरं प्रतीक्षमाणा: सर्वतोभावेनास्मद्धर्मावहेलनां कृत्वा स्वधर्मस्थापनप्रचाराभ्युदयकर्मसु द्विगुणितोद्योगा अस्माभिरेव तत्र दत्तावलम्बना: स्यु: । येनेष्टप्राप्तिस्तु दूर आस्तामनर्थप्राप्तिश्च सुतरामुपस्थापिता स्यात् । अतोऽत्र संदिग्धप्राये वस्तुनि क: प्रतिकार: समुचित इति शीघ्रमेव विवेक्तव्यमनुष्ठेयश्चास्त इति । सर्वमिदं हृदयनिर्वेदापादकं मनोव्यथापूर्णं वृत्तान्तं चैत्यवासिनां समाकर्ण्य श्रीबप्पभट्टसूरिरेनमवोचत् मान्यवर ! भवदुक्तमशेषं तथैव वर्तत इत्यहमपि जानामि सैषा परिस्थितिर्न श्रेयस्करीति निश्चितमेव । न चात्रौदासीन्यं युक्तम् । नापि तीक्ष्ण उपायोऽपेक्षित: । एवं सत्युदारप्रकृतीनां धार्मिकाणामौदार्यं धर्मे संक्षुब्धभावं समालोच्यास्तमियात् । येन स्वसिद्धान्तानुचिन्तनं लोके सूत्रादिवाचनक्रमेण क्रियमाणो धर्मप्रचारश्च शैथिल्यं गत: स्यात् । स्वमतेऽप्येकच्छेदोपस्थापनीयमपरच्छेदोपस्थापनीयं भवेत् । चारित्रपर्यायेऽपि षड्गुणिका हानिरेव स्यात् । अन्ते च सर्वमिदं धर्मतन्त्रमनियन्त्रितमुच्छिन्नप्रायं च सर्वजनोपहसनीयं भवेत्तदेतन्माभूदिति कश्चन मध्यम: पन्था अवश्यमेव समाश्रयणीयो येन शनै: शनैरुपायोपक्रान्तास्ते स्वशैथिल्यं परित्यज्यात्मन्येव स्वेच्छाचारं निन्दन्तो विचारयन्त: स्वधर्मकर्माणि पुनर्धर्मप्रचारमात्रहेतुका: सर्वप्रयत्नेन सर्वासु दिक्षु धर्मप्रचारायाप्रेरिता एव विचरेयु: । भवन्तमत्र भूयो भूयोऽहमभ्यर्थये यदवश्यमस्माभिरीदृशी धार्मिकी परिस्थिति: कथंचिदप्युपेक्षणीया न भवेत् । अहम-

प्यत्र संपूर्णं भवते सहयोगं दास्यामीति दृढमत्र विश्वसितु भवान्। "श्रेयांसि बहुविघ्नानि" स एष सार्वजनिको नियमः। तथापि खलु"न निश्चितार्थाद्विरमन्ति धीराः" इति विचार्य भवता सत्वरमेव तदर्थं प्रयतितव्यमिति। अन्यथा छिद्रेष्वनर्था बहुलीभवन्तीति निश्चितम्।

अथ श्रीकक्कसूरिरनुदिनं धर्मप्रचारमेव लक्ष्यीकृत्य मासकल्पं तत्र स्थितिं विधाय लक्ष्मणावतीमियाय। तत्र जिनधर्मोपासको धर्मपालो नाम राजा न्यवात्सीत्। तदीयादरवशीकृतचेता असौ चतुर्मासावस्थानेन द्विगुणितां धर्मभावनां भावुकानां सम्पाद्य वैशालीराजगृहादिषु ग्रामनगरेषु विहरन् पाटलीपुत्रमगच्छत्। ततः सम्मेतशिखरतीर्थयात्रां विधाय कलिङ्गदेशमाययौ। कलिङ्गपत्तने चतुर्मासं कृत्वा महाराष्ट्रप्रान्ते वैदिकधर्मप्रचारकस्य कुमारिलभट्टस्यागमनं ज्ञात्वा तत्र जगाम। कस्मिंश्चित् पत्तने कुमारिलभट्टेन सहाचार्यवर्यस्य शास्त्रार्थो निश्चितः। उभयोरेव परस्परजयैषिणोर्मध्ये तुल्यबलत्वात्संदिग्धमानसा विजयलक्ष्मीः कुत्रापि निर्भरं पदं न चकार। स्वस्वसिद्धान्तप्रतिपादनमुभाभ्यां साटोपं सयुक्तिकं कृतम्। तथापि हिंसाकर्मणि जनानामनास्थायाः प्राकृतिकत्वात्सभ्यैः स एवाहिंसा धर्मो विशेषतोऽनुमोदितः। तन्मूलाश्च सूरीश्वरस्य जिनागमसिद्धान्तप्रतिष्ठा सर्वमान्या बभूव। ततः सूरिर्विदर्भलाटादिषु विहरन् सोपारपत्तने चातुर्मासिकीं स्थितिं चक्रे। सर्वजनमनोरमं स्वशास्त्रसिद्धान्तप्रतिपादकमलौकिकं व्याख्यानं श्रुत्वा को नाम मुदं नोपेयादत्र। विहरणक्रमेण सौराष्ट्रदेशे शत्रुञ्जयतीर्थयात्रां विधाय कञ्चित् कालं तत्रैव न्यवात्सीद् विश्रमितुमसौ।

अस्मिन्नेव विश्रान्तिकाले कच्छमरुधरदेशस्थौ संघौ यात्रार्थमाजग्मतुस्तत्र। तौ च स्वस्वप्रान्तमागमनेनालंकर्तुमाचार्यं न्यवेदयताम्। सूरिरपि किं विधेयमिति संदिहानो विचारयामास। तस्यामेव निशायां देवी सच्चायिका सूरेर्दर्शनार्थमागताऽभूत्। तदीयामुक्तिमनुमान्य स कच्छदेशाभिमुखं विहारमकरोत्। तत्र सर्वत्र विहरतोऽस्य चतुर्मासो भद्रेश्वरपत्तने निश्चितः। चतुर्मासानन्तरमत्र श्रेष्ठिगोत्रोद्भवो लोढाशाहात्मजो मासद्वयात्प्राक् कृतोद्वाहां भार्यां त्यक्त्वाऽष्टादशभिर्मुमुक्षुभिः सह दीक्षितो बभूव। ततः सिन्धपञ्चालकुर्वादिषु प्रान्तेषु धार्मिकीं लोकभावनामुद्दीपयन् हस्तिनापुरे चतुर्मासावस्थितिमङ्गीचकार। तत्र तात्त्विकदार्शनिकैर्विहासिकादिषु विविधविषयेषु क्रमेण व्याख्यानदानेन भावुकान् सन्तोषयामास।

A-शाङ्करमतप्रचारको वैदिकशिरोमणिः श्रीशङ्कराचार्यो भगवान् वैदिकधर्मप्रचाराय तस्मिन् काले मथुरामलंचकार। एतत्परम्परया विदित्वा श्रीकक्कसूरिरपि स्वधर्मरक्षणार्थं तत्रैव विहारक्रमेणाजगाम। मिलितौ चोभावाचार्यौ। सानन्दं सबहुमानं सामयिकीं परिस्थितिं जनानां समीक्ष्य स्वस्वसिद्धान्तालोचनं कृतम्। भगवता शंकराचार्येण तदा—

अग्निहोत्रं गवालम्भं संन्यासं पलपैतृकम्।<br>देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्॥

इति सिद्धान्तितम्। महतां हि प्रादुर्भावो जगत्यस्मिन् जनानां जीवनरहस्यपथदर्शनाय न तु मिथो विरोधप्रदर्शनेन वैरानुबन्धाय भवति।

---

लेखकः—ब्राह्मणधर्मप्रचारकस्य भगवतः श्रीशंकरावतारस्य श्रीशंकराचार्यस्य प्रादुर्भावो मलबारप्रान्ते कालटीग्रामे, युधिष्ठिरशके २६३१ तमे इति शंकरदिग्विजये सुस्पष्टमेतदवगम्यते। अन्यान्यपि बहूनि प्रमाणान्यत्रोपलभ्यन्ते। दिग्विजये सिद्धान्तिते तु न पराजयगन्धोऽपि। श्रीमज्जगद्गुरुरिति भगवत उत्तमपदस्यापि व्यवहारो दूरापास्त एव स्यात्। अतोऽत्र सूक्ष्मेक्षिकया सुधीभिरेव तत्वनिर्णयो विधेयः।

ततश्चतुर्मासानन्तरमसावाचार्यः करणाशाहेन निर्मापितस्य भगवतो महावीरस्य जिनालयस्य प्रतिष्ठाकार्यं सम्पादयामास ; ततो निर्गत्याजयपुरमाययौ । धर्मोपदेशादिभिः सर्वान् सम्भाव्य मरुधरशाकम्भरीहंसावलीमेदिनीपुरनागपुरादिषु विहरणं कृत्वा खटकुम्पनगरं माण्डव्यपुरञ्चालङ्कृत्य चरमसमये स्थिरवासमुपकेशपुर एवाङ्गतवान् । तत्र योगविद्यया निजनिधनमासन्नं ज्ञात्वा ध्यानसुन्दरं नाम मुनिमाचार्यपदसमुचितं भाद्रगोत्रीयेण लुणाशाहेन समारब्धे महोत्सवे स्वपट्टे स्थापयामास । तस्याभिधानञ्च श्रीदेवगुप्तसूरीति विहितमभूत् । अन्ते च त्रयस्त्रिंशद्दिनानि समाध्यनशनादिभिर्यापयित्वा पञ्चपरमेष्ठिमहामन्त्रस्मरणपूर्वकमिदं स्थूलं शरीरमुत्ससर्ज ।

## वि० सं० ८३७ तः] ४३-आचार्यः श्रीदेवगुप्तसूरिः (नवमः) वि० सं० ८९२ प०]

अथ श्रीकक्कसूरिपट्टे प्रातःस्मरणीयनामधेयः सुरासुरमानवादिभिरभ्यर्चनीयचरणारविन्दः प्रखरप्रतिभासंपन्नो वादिगजकेशरी महाशासनप्रभावकः श्रीमान् देवगुप्तसूरिः समाययौ । असौ पाल्हिकानगरीवास्तव्यः सुचन्तिगोत्रीयश्चासीत् । अस्य पिता वाणिज्यकर्मकोविदो धर्मरतिः श्रेष्ठी राणानामको, माता च सतीधर्मव्रतपरायणा भूरीदेवी । यस्यां नगर्यामसौ जन्म लेभे सा खलु विविधपण्यगणविराजिता निखिलजनमनोरमा सकलकलाकलापिनी मरुधरवक्षःस्थलालंकारभूता समधिकं व्यराजत । एतदीयवर्णनप्रसंगे केनचित्कविनाऽभाणि यत् —

वापीवप्रविहारवर्णवनिता वाग्मी वनं वाटिका
वैद्यो ब्राह्मणवादिवेश्मविबुधा वेश्या वणिग्वाहिनी ।
विद्यावीरविवेकवित्तविनयो वाचंयमा वल्लकी
वस्त्रं वारणराजि वैशरवरं चैति पुरं शोभते ॥

( उपकेशगच्छपट्टावलीसमुच्चयम् )

सकलसमृद्धिसमन्वितां नगरीमधिवसतोऽस्य श्रेष्ठिनो राणाशाहस्य वाणिज्यव्यवहारो न केवलमत्र भारतेऽपि तु चीन-जापान-जावा-बलुचिस्तान-प्रभृतिषु महता प्रमाणेनासीत् । व्यापारोऽपि महामूल्यानां नीलमरक्तपद्मरागादीनां रत्नजातानां सुवर्णरजतादीनामन्येषामपि समग्रवस्तूनां दैनंदिनमभिवर्धमानोऽभूत् । प्राक्तनजन्मसुकृतसमुपार्जितद्रविणराशिरसौ धार्मिकेषु कृत्येष्वपि तथैव कृतादरः स्वजातीयेभ्योऽधिकतरं सहयोगमदात् । तीर्थयात्राजनितपुण्यप्राप्तयेऽनेन वारत्रयं तीर्थयात्रायै संघनिष्कासनमपि भव्यसमारोहेण विहितमासीत् । दुष्कालसमये ह्युपस्थिते सर्वविधसाहाय्याचरणेन गांभीर्यौदार्यादिगुणगणसमलंकृतः स्वकीयं शरदिन्दुरुचिरुचिरं यशश्चतुर्दिक्षु वितेने । महामहिममहनीयकीर्तीनां यतिवर्याणां समागमेनासौ शुश्रूषणलाभं द्रव्यलाभादप्यधिकममन्यत । एवमेवासौ सुखेन दिनान्यत्यवाहयत् । पञ्चकोटिपरिमितं धनं सत्कर्मणि न्ययुङ्क्त ।

दिनेषु गच्छत्सु जगति विश्रुतकीर्तिः परमधर्ममर्मव्याख्याता शान्तिनिकेतनस्तत्रभवानाचार्यवर्यः श्रीकक्कसूरिः पाल्हिकानगरीमात्मनाऽलंकरोति स्म । श्रीसंघश्च समारोहपुरःसरमस्य सन्मानार्थं महोत्सवानुष्ठानमकार्षीत् । श्रेष्ठिगोत्रीयेण दयालशाहेन लक्षत्रयपरिमितं द्रविणं विनियुक्तमत्र । एवं सत्कारविधिसमर्चितः श्रीमदाचार्यवर्यो भावुकेभ्यो हृदयंगमां देशनामदत्त । तदनु नित्यक्रमेण सकलजनमनोमोदकान्यस्य व्याख्यानान्यभूवन् । दार्शनिकशिरोमणिर्विद्वज्जनवरेण्यस्तुलनात्मकदृष्ट्या धर्मतत्त्वप्रबोधकव्याख्यानपरम्परया श्रोतॄन् श्रवणसमेधितमानसान् व्यधत्त । एकदा सूरीश्वरः संसारस्यासारतां लक्ष्म्यास्तरलत्वं कौटुम्बिकानां स्वार्थजन्यस्नेहसद्भावं शरीरस्य क्षणभङ्गुरत्वमायुषश्चास्थैर्यमुद्दिश्य परमवैराग्यरतिसंवर्धनक्षमं व्याख्यानमश्रावयत् । येन राणाशाहस्य मङ्गनामा तनयः संसारमोहपाशादात्मनो मुक्तये वैराग्यरञ्जितमानसो दीक्षायै दृढपरिकरो बभूव ।

कृतप्रयत्ना अपि कौटुम्बिका तीव्रतरविरक्तिभावोपपन्नमानसमेनं निश्चयान्निवारयितुं मनागपि नाशक्नुवन् । अन्ते च तैरेवानुज्ञात एकादशभिर्भावुकैः सार्द्धं मङ्गलमुहूर्तोपयुक्ते दिने सूरीश्वरकरकमलेन भगवतीमगृह्णाद्दीक्षां वैक्रमे ७९९ तमे हायने फाल्गुने शुक्लतृतीयायाम् । ध्यानसुन्दरनाम्ना तदनु प्रसिद्धिमाप सः । चिरकालं गुरुकुलसम्पर्कमासाद्य समधिगतनिखिलागममर्मज्ञः सूरिपदसमुचितगुणगणविद्योतितविद्वज्जनमण्डलः सूरीश्वरेण कक्काचार्येण विक्रमस्य ८३७तमेऽब्दे स्वपदे प्रतिष्ठापितः । अस्य श्रीदेवगुप्तसूरीत्याख्या विश्रुता बभूव ।

आचार्यवर्यः श्रीदेवगुप्तसूरिर्गुरुसिद्धान्तसरणीमनुसृत्य स्वधर्मप्रचारहेतुकं विहरणं कुर्वन् सिन्धप्रान्तमयासीत् । शिष्यमण्डलीमण्डनायमानोऽसावेकदा रात्रौ मार्गाभ्याशवर्तिनः कस्यचिद् वटवृक्षस्याधस्तात् कृतावस्थितिर्बभूव । सर्वे मुनियो निद्रामुद्रितनेत्रा अभूवन् । सूरीश्वरश्च संग्रहणीशास्त्रस्य स्वाध्यायमकार्षीत् । तद्वटवृक्षाधिष्ठायकः कश्चिद् यक्षो निद्रावशंगतान् मुनीनालोच्य रोषारुणितनयनस्तस्यैव वृक्षतलस्योपरि कृतावस्थितेः सूरीश्वरस्याभ्याशमाययौ । स्वाध्याये स्थितस्यास्य मुखकमलान् मनोहरान् शब्दान् समाकर्ण्याश्चर्यचकितहृदयः शिथिलीभूतरोषावेश एकमनाः स्वाध्यायमशृणोत् । स्वाध्याये क्रियमाणं देवभवननिर्माणादिकं वृतान्तमसौ सादरं श्रुत्वा परमसन्तुष्टमानसो यदा भवता मदीयं स्मरणं करिष्यते तदाऽवश्यमहं भवत्समीपमेवोपस्थितो भविष्यामीत्युक्त्वा सोऽन्तर्दधे । ततः परं व्यतीतायां रजन्यां जाते च प्रभाते सूरीश्वरः शिष्यगणसमन्वितो विहरन् वीरपुरमाससाद । पथि समागतस्य कस्यचिन्मठायतनस्याधिष्ठायकोऽस्य प्रतिरोधार्थं संचरणमार्गे सर्वत्र सर्पानाच्छादयामास । तदीयां मन्त्रबलशक्तिं सम्यगनुमाय सूरीश्वरो यक्षं सस्मार । स्मरणान्तरमेवोपस्थितोऽसौ मयूरानुत्पादयामास । ते च सर्पान् चञ्च्वा गृहीत्वाऽकाशमुदचरन् । आचार्यवर्यस्येदृशं महामहिमशालित्वं ज्ञात्वा निस्तेजस्कः स सन्यासी क्षमां ययाचे । स्वाश्रम एवैनमस्थापयत् । भगवन् ! धर्मस्वरूपविषयके विचारे बौद्धवेदान्तिचार्वाकजैनादिविविधनामपरिकल्पनं किं हेतुकम् ? नाममात्रविवादाडम्बरे निमग्नहृदयाः किमात्मश्रेय आसादयितुं समीहन्ते उतानर्थम् ? सत्यपि सिद्धान्तज्ञाने दृढतरे वेशपरिवर्तनादिकं शक्यमशक्यं वेति संदिग्धमानसोऽसौ सूरीश्वरं पप्रच्छ । मिथ्याग्रहनिवारकः स्वकल्याणसाधको निराबाधको धर्मः सिद्धान्तत्वेन परिज्ञातस्तदा तदनुकूलाचरणेनैवेष्टसिद्धिरिति समुचितमुत्तरमासाद्य, मिथ्याग्रहमुन्मुच्य, सम्यक्त्वं ।त्य च द्वादश श्रावकव्रतान्यङ्गीचकार स सन्यासी । एवमद्वितीयप्रभावमस्य कर्णपरम्परया विदित्वा वीरपुराधिपतिर्मुदितमानसोऽस्य स्वागतविधये स्वयमेवोद्युक्तो बभूव । नगरशोभासंस्काराद्यर्थं राजसेवकानादिदेश । प्रातरुन्मिषत्युषोरागे भगवति च सहस्रांशुमालिन्युदिते च चतुरङ्गबलसमन्वितः प्रधानकर्मचारिभिर्नगरनिवासिभिः पुरन्ध्रीभिर्वादित्रमांगलिकघोषपुरःसरमस्य भव्यं स्वागतं विदधे राजा सोनगदेवः । नगरीमलंकृत्याचार्यवर्यः सभायां सारगर्भितां देशनामदात् । येन जनाः प्रमुदितान्तरङ्गा धर्मामृतपानसादरा बभूवुः ।

अथैकदा मिथो राजा सर्वसंपत्समन्वितोऽप्यनपत्यदुःखदवाग्निदन्दह्यमानमानसः सूरीश्वरसमीपमुपेत्य तदर्थं स्वदुःखं व्यवृणोत् । न खलु धर्मकर्मान्तरा समीहितसिद्धिः कस्यचिदपि दृष्टचराऽत्र जगतीतलेऽवलोक्यते । अतस्तदर्थमेव त्वमनुचिन्तय । अपत्यलाभादिकन्त्वानुषङ्गिकमवेहि" इति शास्त्रप्रमाणप्रयुक्तं वचः सादरमाकर्ण्याऽसौ राजा धर्माचरण एवाधिकां रुचिमकार्षीत् ।

आचार्यः श्रीदेवगुप्तसूरिः श्रीसंघस्य राज्ञो सोनगदेवस्य चाग्रहातिशयमनुमान्य तत्रैव चातुर्मासिकीमवस्थितिं, स्वीचकार । जनता चापूर्वलाभं मन्यमानाऽत्मकल्याणसाधनाय क्षणोऽपि दुर्लभ इति मत्वा सोत्साहा बभूव । आचार्यसदुपदेश समुत्साहितो राजा भगवतो महावीरस्य मन्दिरमेकं भव्यं निर्मातुं शिल्पिन आदिदेश ।

अथैकदा सन्यासिनो मानसे पूर्णतयाऽकृतार्थतामनुमानेन परिकल्प्य सभायामसौ सूरीश्वरः साधूनामाचारविषयं सशास्त्रं सुस्पष्टमित्थं विवृणोति स्म । जैनश्रमणा हि द्विविधा जिनकल्पिनः स्थविरकल्पिनश्चेति । तत्र

जिनकल्पिनः पात्रपाणयः केचिद्योपकरणवन्तोऽपि, अपरे शास्त्रोक्तोपकरणवन्तः। तत्राप्युपकरणानि तत्प्रमाणं प्रयोजनञ्च विस्तरतो दर्शितम्। यथा—पत्तो पत्ताबन्धो पायट्ठवणं च पायकेसरिया। पडलाइ रयत्ताणं गुच्छओ पायनिओगो। इत्येवमादीनि द्वादशोपकरणानि, कुत्रचिन्न्यूनाधिकप्रमाणमप्युपलभ्यते। उपकरणानामुत्तमम्ध्यमादिभेदेन गणनाभेदः कथ्यते शास्त्रे। प्रमाणं यथा मुखपट्टिकायाः—चउरंगुल विहत्थि एवं मुहणंतगस्सउप्पमाणं वीयं मुहप्पमाणं गणण पमाणेणं इक्किकं। एवमादीनि समेषामुपकरणानां प्रमाणान्यप्याम्नातानि। प्रयोजनपर्यालोचने दिङ्मात्रं यथा—रयमाइरक्खण ट्ठा पत्तग ठवणं वि उवइस्सति। होइ पमज्जणहेउ गुच्छुओ भाणवत्थाणं। पायपमज्जणहेउ केसरिया पाए २ इक्किका, गुच्छ पतगठवणं इक्किकं गणणमाणेणं॥ अपराण्यपि प्रयोजनानि तत्तच्छास्त्रेषूपलभ्यन्ते। साध्वीनामप्येतान्यन्यान्यप्युपकरणानि दृश्यन्ते। न खलु किंचिदपि शास्त्राद् बहिर्भावेन दृश्यतेऽत्र यस्य स्वरूपं शास्त्रनिरूपितं न स्यात्। अथ दीक्षाग्रहणे दीक्षां ग्रहीतुमभिलषतो जनस्य क्षेत्रगुणव्यवसायपराक्रमाद्यालोचनं नितान्तमावश्यकम्। बाल-वृद्ध--नपुंसक-कृतनपुंसक--जड-व्याधिताप्रतीत--कृतघ्न-प्रमत्त-हीनांग-स्त्यानगृद्धि–दुष्ट परिणाम-मूढ-दुष्टधनलुब्धाप्राप्ताज्ञाः ऋणकर्ता ऋणवञ्चकश्चैते न कदाचिद् दीक्षामर्हन्ति। न खलु दीक्षाग्रहणं बालानां खेलनम्। दृढतरविरक्तिभावनाभावितहृदयस्यैव तत्राधिकार आत्मकल्याणसाधनायोपदिष्टो जिनागमे। सर्वमिदं शास्त्रीयं तत्त्वमालोच्यासौ सन्यासी विंशतिसंख्यकैर्भावुकैः सह शुभलक्षणोपेते मुहूर्तेऽग्रहीद् भगवती दीक्षां सूरीश्वरकरारविन्देन। ज्ञानानन्द-नाम्ना च प्रथितोऽभूत्। राजा सोनगदेवोऽत्र महोत्सवे प्रभूतं धनमुपायुंक्त। एवं माङ्गलिकानि देशना-दीक्षादानादीनि सत्कर्माणि समाप्य ततो विजहाराचार्यवर्यः। तत्र सिन्धप्रान्ते-उच्चकोट-मारोटकोट-रेणुकोट-मालपुर-कपाली-धारु-डामरेलपुर-देवपुर-गोसलपुर-दीवकीटादिषु ग्रामनगरेषु विहरणेन धार्मिकं प्रचारं महता प्रयत्नेनान्वतिष्ठत्। अन्ते सम्प्राप्ते चतुर्मासममये श्रीसंघामन्त्रणेन डामरेलनगरमगात्।

यदा वीरपुरनगरे राजा मन्दिरनिर्माणाय खातमुहूर्तमकरोत्। तस्मिन्नेव पुण्यपर्वणि तस्य राज्ञी सरस्वती यथान्तः सलिलामिव सर्वशुभलक्षणलक्षणीयं गर्भं दधौ। व्यतीते हि नवमे मासे रुचिरमूर्तिं सौन्दर्यादिसकलगुणभूयिष्ठं सुकुमारं कुमारमजनिष्ट। यतो समेधितगुरुचरणसरोजभक्तिरसौ नागरिकानादृत्यामन्त्र्य च सहैव नीत्वा डामरेलपुरे सूरीश्वरदर्शनार्थं शुभेऽहनि प्रायासीत्। एत्यच भगवन् भवदीयकृपामृतदृष्टेरेवेदं फलमित्युक्त्वा पुत्रमदर्शयत्। आचार्येण तदुपरि वासःक्षेपोऽकारि सर्वसंपन्निधानस्यास्यामोघफलं दर्शनं विधाय नूतनमन्दिरप्रतिष्ठायै तत्रागमनार्थमभ्यर्थयामास। यथा वर्तमानयोग इत्युक्तोऽसौ दिनान्यष्टौ स्थितोऽष्टाह्निकामहोत्सवं पूजाप्रभावनास्वामिवात्सल्यं, च विधायाचार्योपदेशसुधाप्लुतान्तरंगः श्रीसंघेन साकं वीरपुरमभिप्रतस्थे।

समाप्ते चतुर्मासव्रते श्रीदेवगुप्तसूरीश्वरो मन्दिरप्रतिष्ठायै वीरपुरमुद्दिश्य विहारमकरोत्। शुभे मुहूर्ते राजा सोनगदेवः सूरीश्वरकरकमलेन महासमारोहपुरःसरंप्रतिष्ठाविधिमकारयत्। अस्मिन्महोत्सवे राजा संघस्थेभ्यो भावुकेभ्यः सुवर्णमुद्रिका ददौ। दीनेभ्यश्चान्नवस्त्रादिकमपि, मुक्तहस्तेन। ततश्च विहरन् गोसलपुरमेत्य तृतीयं चतुर्मासावस्थानमकार्षीत्। तत्र धर्मजागृतिं विधाय ततः पञ्चनदप्रान्तमागत्य तत्रत्यां श्रमणमण्डलीं धर्मप्रचारायाधिकमुपदिदेश वर्षद्वयमत्र तस्थौ। बहवोऽत्राज्ञाविधायिनो धर्मप्रचारकर्मकुशला मुनयः सन्तीत्यालोच्य विहरन्नसौ मार्गागततीर्थस्थलदर्शनभावुकोपदेशादिकं कुर्वन् पूर्वस्यां दिशि पाटलीपुत्रमाययौ। चातुर्मासिकीं स्थितिं कृत्वा ततः कलिंगानाजगाम। तत्र गिरितीर्थयात्रां सम्पाद्य तत्समीपवर्तिषु प्रान्तेषु ग्रामनगरेषु धर्मप्रचारेण जनानां जिनधर्मभावनामुद्दीपयन् महाराष्ट्रदेशमाजगाम। सूरीश्वरस्यागमनं ज्ञात्वा पूर्व-

प्रेषिता धर्मप्रचारकाः साधवोऽपूर्वोत्साहपरिपूर्णमानसा बभवुः । आचार्यश्च तानभिननन्द । अस्यागमनेन श्वेताम्बरदिगम्बरमतावलम्बिनां साधूनां मिथःसमधिकं सौमनस्यमभूत् । ततः सर्वतोभावेन सौकर्येण च धर्मप्रचारकार्यं समपद्यत । येन वैदिकधर्मो लब्धपूर्णप्रचारोऽपि सहसाऽदर्शनमलभत । व्याख्यानेऽप्यस्यापूर्वां शास्त्रतत्त्वबोधिकां शेमुखीमालक्ष्य राष्ट्रकूट-चोल-पाण्ड्य-पल्लव-चोलुक्य-कलचुरी-होयल-गंग-कदम्बवंशीया राजानो महाराजाश्च श्रद्धाभक्तियुता जिनधर्मोपासका बभूवुरिति प्रत्नतत्त्वविद्भिर्गवेषकैर्लब्धेभ्यो दानपत्रादिभ्योऽवगम्यत इदानीमपि । विस्तरभिया विरम्यतेऽत्र विषये । स्वधर्ममूलदृढीकरणार्थं पञ्च चतुर्मासव्रतानि महाराष्ट्रप्रान्त एव चकार । तत्र भ्रष्टमार्गाः सन्मार्गेस्थापिता जैनेतरा जिनधर्मानुरागिणः, अन्ये च धर्मेऽधिकरुचिमापादिताः । अस्मिन् प्रान्ते श्रमणानामुभयपक्षीयाणां सभामकारयदुपदिदेश च भव्याः ! विषमे ह्युपस्थिते काले नाममात्रभेदे न मूढबुद्धय इव पारस्परिकविरोधाचरणैकधियो भवन्तु । प्राप्य च परस्परमेकतां जिनधर्मे एक एवेति मत्वा तदर्थमेव कृतोत्साहाः कृतप्रयत्नाः मिथः साहाय्यमत्राचरन्तु । येनापरे छिद्रान्वेषिणो न भवेयुः । संघे शक्तिः कलौ युगे-इति निश्चितमेव जानन्तु । भगवतो महावीरस्याहिंसा, स्याद्वादः, तद्रक्षणं पोषणञ्चोभयत्र समानमिति दृढं विश्वसन्तु । तथैव प्रयत्नेन प्राप्नुवन्तु सर्वे सफलतामित्येव युष्मत्सकाशादाशासे भूयो भूय इति । तेऽपि तथैव प्रतिपेदिरे । अन्ते च समुचितयोग्यतां प्राप्ताः गणि-गणावच्छेदकोपाध्यायादिभिः पदैः सत्कृता दृढोत्साहाश्च बभुवुर्मुनयः ते च यत्र तत्र विहारार्थं सूरीश्वराज्ञां प्राप्य प्रययुः । आचार्यश्च विदर्भकोङ्कणदेशयोर्विहृत्य सोपारपत्तने चतुर्मासं कृत्वा सौराष्ट्रदेशे तीर्थराजस्य श्रीशत्रुञ्जयतीर्थस्य गिरिनालस्य च यात्रां व्यधत्त । तत्र कियन्तं कालमुषित्वा विहरणक्रमेण लाटावन्तिकामेदपाटप्रान्तेषु धर्मभावनाभिवर्धनं कुर्वन् मरुधरप्रान्ते डिड्डुनगरे नागपुरे च चतुर्मासं कृत्वा पश्चादुपकेशपुरमयासीत् । देवी सच्चायिका परोक्षरूपेण तमभ्यनन्दत् । भवदीया वृद्धावस्था वर्ततेऽतोऽत्रैव विहार उचित इत्युक्त्वा साऽदर्शनमगात् । असावत्र साधूनां शिथिलाचारमालक्ष्य माघशुक्लपूर्णिमायां श्रमणसमायोजनमकरोत् । अत्रोपकेशपुरशाखीयभिन्नमालगच्छीयाः, कोरण्टकगच्छीया, अन्ये च वीरधर्ममनुसरन्तः पञ्चसहस्राधिकाः साधवः समाजग्मुः ! धर्मशैथिल्यमुद्दिश्य विस्तृतं व्याख्यानं चकार येन ते शैथिल्यं दूरीकृत्य नूतनोत्साहा बभूवुः । योग्यतां गतेभ्यः पदवीप्रदानं कृत्वा सभा विसर्जिता । उपकेशपुरीयेण श्रीसंघेन सर्वेषां भावभव्यं स्वागतं विहितम् । सर्वेच धर्माचरणं तत्प्रचारश्चेति परममस्मत्कर्तव्यमिति निश्चित्य विजह्रुः । अनन्तरमसौ मरुभूमावेव विजहार । एतदवधिमध्यमेकवारं मथुरायां पश्चात्संघेन सह शत्रुञ्जयतीर्थयात्राया उल्लेखः पट्टावलीतो ज्ञायते ।

अन्ते चोपकेशपुरे चतुर्विधसंघसमक्षं भगवतो महावीरस्य मन्दिरे विक्रमस्य ८९२ तमे संवत्सरे माघशुक्लपूर्णिमायां सर्वागममर्मविदे कल्याणकुम्भनाम्न उपाध्यायाय सूरिपदं दत्वा स्वयं २७ दिनान्यनशनेन पञ्चपरमेष्ठिमहामन्त्रस्मरणेन चातिवाह्य दिवं ययौ ।

आचार्यवर्येण श्रीदेवगुप्तसूरिणा ५५ वर्षपर्यन्तं महता परिश्रमेण जिनशासनस्यातिमहती सेवा विहिता यां वर्णयितुं नास्माकं शक्तिः परिमिता ।

कुंकुमजातिः—अडकमलराठौड़ः कतिपयैर्वयस्यैः सह चौर्यमाचरति स्म । एकदा तदर्थं निर्गतो मध्य एव विहरणक्रमेण संमुखमागच्छतां मुनीनां दर्शनं कृत्वाऽद्यानिष्टमेषां दर्शनं तदङ्गच्छेदनलब्धरुधिरेण परिहरणीयमिति वयस्यानाह । सूरीश्वरश्च तद्वार्तां तापेन विदित्वा तेषां मनोरथं निर्भीकमना-भावुका ! सुखेन गृह्णन्तु रुधिरं, भवादृशा एव ग्राहका अस्मद्भाग्येनैव प्रापिता इति नानवादीत् । श्रुत्वा चेदं वचो लज्जावनतमुखोऽसौ न किंचिदप्यब्रवीत् । पश्चान्महता प्रयत्नेन सन्तुष्टः । भवान् मनोरथमस्मदीयं सफलीकर्तुं दयतामित्ययादीत् । तेन च धर्मोपदेशं सर्वाभिलाषापूरकं निखिलदुःखदलनक्षमञ्च दत्वा कस्यचित्तरोस्तले स्थितिमाश्रित्य

प्रतिक्रमणादि सामयिकं धर्मकृत्यमाचरितम् । असावत्यत्रैव पश्चादायमौ रात्रौ । कुंकुमादेवी निद्रामुद्रितनेत्रं तं विबोध्य कल्याणिन्! अस्यामेव भूमौ भगवतः पार्श्वनाथस्य प्रतिमा तद्धामपार्श्वे चाक्षयो धननिधिः । त्वरितमेव प्रातरुत्थाय खनित्वा तां भूमिं भव्यं मन्दिरं निर्मापय । स्थापय च तत्र प्रतिमामासादय च धर्मकर्मानुष्ठानेन शाश्वतं पुण्यमित्युक्त्वा सा तिरोदधे । प्रातश्च सूरीश्वरं स्वप्नवृत्तं निवेदयामास । स च तमभिननन्द । चतुरान् समाहूय शिल्पिनो मन्दिरं निरमापयत् । नूतननगरनिर्माणमप्यारब्धम् । तस्य च देवीपुरीति नाम देव्यनुरूपं विहितम् । भव्यस्य जिनालयस्य च कुंकुमविहारेत्यभिधानमकरोद् अडकमलः । समाप्ते च कार्ये सूरीश्वरमाहूय महता द्रव्यव्ययेन प्रतिष्ठाविधिमन्वतिष्ठ् कुंकुमादेवीं कुलदेवतात्वेनास्थापयच्च ।

अथ व्यतीते काले कमनीयमूर्तिः सर्वलक्षणसमन्वितः पुत्रोऽजनि । तस्य कुंकुमकुंवरेति नाम चकार । परमधार्मिकः कुंकुमः प्राप्तवयस्कः श्रीशत्रुञ्जययात्रार्थं महान्तं संघं निष्कासयामास । अपराण्यपि धार्मिकाणि कार्याणि संपादयामास येन तस्य शरदिन्दुरुचिरुचिरं यशः सर्वत्र प्रससार । अस्य परम्परा कुंकुमजात्या जगतीतलविश्रुता बभूव । अस्या एव चोपडा-गणधर-कूँकड-धूपिया-वटवटा-रांकावाल-संघवी-जावलियादिकाः प्रभूताः शाखा प्रचारमवापुः ।

विनायकिया जातिः— भंभोरियानगरनिवासी देव्यर्चनाय हिंसानिरतो विनायकरावः सूरिणोपदिष्टः स्वकीयराज्ये प्राणिवधं न्यवारयत् । भगवतः पार्श्वनाथस्य भव्यं मन्दिरं निर्माय मूर्तिप्रतिष्ठां सूरीश्वरवरदहस्तेन कारयामास । ततः परं जिनधर्मोपासको बभूव । अस्य वंशजा विनायकिया इत्याख्यां लेभिरे ।

## वि० सं० ८९२ तः] ४४ आचार्यः श्रीसिद्धसूरिः (नवमः) [वि० सं० ९५२ प०

निखिलागमदत्त्वावबोधविभावितदिङ्मण्डलालंकारचूडामणिर्महामहिममहनीयकीर्तिरखिलविबुधवरेण्यः श्रीसिद्धसूरिः श्रीदेवगुप्तसूरिपदे प्रतिष्ठामवाप । तपःप्रभावसमासादितसिद्धिरसौ डिड्डूपुरनगरवास्तव्यः श्रेष्ठिगोत्रीयश्चासीत् । विविधवणिककर्मकलाकलापकलापी पिताऽस्य शाहोपाधिविभूषितो लिम्बाश्रेष्ठी, माता च गृहकर्मकुशला पतिधर्मानुरागिणी रोलीनाम्नी बभूव ।

पूर्वजन्मकृतसुकृतप्रभावेण व्यापारेऽपरिमितं द्रविणराशिं प्राप्य लिम्बाशाहो धर्म एव हतो हन्ति धर्मो रक्षति रक्षित इति मत्वा पुण्यकर्माराधनतत्पर एव कालमनैषीत् । तीर्थयात्रायै वारत्रयं संघायोजनं कृत्वा तज्जनितमक्षय्यं पुण्यमर्जयामास । सप्तकृत्वश्चाप्ययज्ञमकार्षीत् । कल्पद्रुम इव याचकेभ्यो मनोभिलषितं दत्वा दारिद्र्यञ्च तेषां दूरीचकार । एवं स्वजातीयानामभ्युन्नतिविषयेऽसौ प्रयतमानो प्रभूतं द्रव्यं विनियुज्य साहाय्यमाचरति स्म । एवं धर्ममयैकजीवनस्यास्य सप्त पुत्राः, पञ्च पुत्र्यश्च बभूवुः । तत्र सप्तसु पुत्रेषु पुनडनामा पुत्रः परमोदारस्वभावः सरलमतिः प्रतिभान्वितश्चासीत । तदीयं गाम्भीर्यमौदार्यं धर्मज्ञतां परोपकारनिरतत्वं वीरताञ्च दृष्ट्वा कौटुम्बिकाः स्वकुटुम्बस्य भाविनमुत्कर्षमाशंसन्ते स्म । यथा बीजं तथाऽङ्कुर इत्येवंसः स्वपितरमनुकरोति स्म ।

भाग्यवशादेकदा शिष्यगणसमन्वितः श्रीदेवगुप्तसूरीश्वरो डिड्डूनगरमात्मना भूषयामास । जैनेतराणामाश्चर्यजनकमस्य भव्यं स्वागतमत्रत्यः श्रीसंघो महता समारोहेण चकार । लक्षाधिकमत्र धनमुपयुक्तमासीत् । सामयिकमुपदेशं दत्वा सभा विसर्जिता । व्याख्यानानि क्रमशः प्रारब्धानि । प्रसंगवशान्मानवो देहो दुर्लभ इति विषयेऽवोचि सूरीश्वरेण ।

महानुभावाः ! अनादिकालादयं जीवः संसारे चक्रवद् बंभ्रम्यमाणोऽवलोक्यते स्वकृतशुभाशुभकर्मवशगः । क्वचित्सुकृतप्रभावेण देवगतिं कदाचिच्चाशुभकर्मवशगः नारकीयां दुःसहां गतिमवाप्नोति । एवमस्य सुखदुःखमिश्रास्ववस्थासु बहूनि जन्मानि व्यतीतानि, अन्यान्यपि व्यतीष्यन्ति च । अत एवोच्यते ।

एगया देवलोए सु नरएसु विएगया । एगया आसुरं कायं अहाकम्मेहिं गच्छइ ।
एवं भव संसारे संसरइ सुहासुहेहिं कम्मेहिं । जीवो पमाय बहुलो समयं गोयमा मापमायए ॥

एवमस्य चतुरशीति लक्षपरिमितासु योनिषु परिभ्रमणं भवतीति शास्त्रे प्रतिपादितम् । अतो येन केनचिदपि प्रकारेणात्मश्रेयस्येव सफलो यत्नो विधेयो मानवैः । नात्र मनागपि प्रमदितव्यम् । अलसस्य निरुद्यमिनः सिद्धिःसुदुर्लभैव । सर्वसाधनश्रेष्ठतरे ज्ञानसाधने न केनाप्युपेक्षा कर्तव्या । येन पश्चात्तापो न भवेत् । आत्मप्रयत्नसाध्या सिद्धिर्नान्यलभ्या । मोक्षमार्गानुसरणं बुद्धिमतां परमं कर्तव्यम् । तदर्थमेतानि साधनान्युच्यन्ते यथा— णाणं च दंसणं चेव चरित्ते च तवो तहा । एयमग्गमणुपत्ता जीवा गच्छन्ति सोग्गइं ॥ ज्ञानदर्शनचारित्रतपांसि सत्वाराधितानि मोक्षसाधकानि भवन्ति । एतदंगानां जघन्यवृत्त्याश्रयणेनापि पञ्चदशासु भवेष्वस्य जीवस्य मोक्षोऽवश्यम्भावीति सत्यमेव जानन्तु भवन्तः । एवं वैराग्यभावनाभरितं मार्मिकं व्याख्यानं श्रुत्वा सभायां संस्थितः पुनडः प्राक्तनादृष्टप्रभावोद्बोधितविरक्तिभावयुतमानसो बभूव । गृहमेत्य मातापितरौ कौटुम्बिकांश्च तत्त्वतो बोधयित्वा तदनुमतो विक्रमस्य ८७० तमे संवत्सरे माघशुक्ल पूर्णिमायां लिम्बाशाहेनानुष्ठिते दीक्षामहोत्सवे षोडशभिर्भावुकैर्भगवतीमग्रहीज्जिनधर्मदीक्षाम् । तदनु कल्याणकुंभेत्याख्यामगमत् । असौ ।विंशतिवर्षाणि गुरुकुले स्थित्वा वर्तमानकालीनं साहित्यं निखिलशास्त्रतत्त्वञ्चाध्यैत । श्रीमता देवगुप्तसूरिणाऽयमाचार्यपदे सर्वथा समुचित इति मत्वा श्रीसंघसमक्षमुपकेशपुरे सूरिपदे प्रतिष्ठापितः संवत्सरे वैक्रमे ८९३ तमे माघे पूर्णिमायाम् । परम्परामनुसृत्य श्रीसिद्धसूरीति नाम चकार श्रीदेवगुप्तसूरिः ।

समधिकविहरणशीलो धर्मप्रचारकः श्रीसिद्धसूरिः स्वशासनकाले चैत्यवासिनां शैथिल्यस्य चरमां सीमामालक्ष्य संतप्यमानस्तदुद्धारार्थं सर्वत्र विहरणक्रममंगीचकार ।

सालेचाजातिः—आचार्यो विहरणक्रमेण खेटकपुरमाययौ । प्राप्तस्वागतसत्कारोऽसौ धर्मोपदेश नामदात् सभायां व्याख्यानप्रसंगेन । तस्य सर्वजनमनोहरां वस्तुप्रतिपादनशैलीयुतां व्याख्यानपद्धतिं दृष्ट्वा सर्वे नागरिका मतमतान्तरं दूरीकृत्य समाजग्मुः । कर्णपरम्परयाऽचार्यवर्यस्य प्रशंसां चालुक्यवंशीयो वीरः सालुनामा भगवद्भक्तिभजनैकप्रवणानामग्रेसरोऽशृणोत् । स च नियमतो व्याख्यानश्रवणाय सभायामायाति स्म । एकदा प्रसंगवशाद्भगवद्भक्तिविषयमवलम्ब्य विस्तरेणावादीत् सूरीश्वरः—इह हि संसारे भगवद्भक्तिमात्रतत्पराणां भक्तानां ध्येयमुद्दिश्यैव ध्यानमालक्ष्यते सर्वत्रेति सर्वथाऽभिनन्दनीयं तत् । केचिदत्र महानुभावा ध्येयस्वरूपमपि न जानन्तो भजनादिभिर्भगवन्तमुपासते । ध्येयस्वरूपं तत्त्वतोऽबोधवन्तो न समीहितफलप्राप्तयेऽधिकारिणो भवन्तीति सार्वजनीनमिदम् । न खलु वस्तुतत्त्वं परमार्थतोऽज्ञात्वा तज्जन्यफललाभेनाप्यात्मनः कृतार्थताऽसादयितुं शक्यते केनापि । अतो भावुकैः प्रथमतो ध्येयवस्तुनः स्वरूपज्ञानमवश्यं कर्तव्यं येनात्मोन्नतिः साधीयसी श्रेयस्करी च स्यादिति कथयित्वा दृष्टान्ता अपि समुपन्यस्ताः । एतदीयं वचोऽसौ शिरोमान्यममन्यत । सूरीश्वरसमीपं गत्वा साञ्जलिबन्धमब्रवीत् महात्मन ! यदवोचि भवता सभायां ध्यानध्येयविषये तत्तत्त्वतोऽधिगन्तुमभिलषामि । आचार्यश्च सत्स्वरूपमस्य बोधयन्नवोचत ।

प्रत्यक्षतो न भगवान् ऋषभो न विष्णुरालोक्यते न च हरो न हिरण्यगर्भः ।
तेषां स्वरूपगुणमागमसंप्रभावाद् ज्ञात्वा विचारयत कोऽत्र परापवादः ॥

यत्र रागद्वेषस्नेहमोहेच्छादयो विकारा न संभवन्ति स एव भगवान् देवशब्दवाच्यः । ये च भक्ता एवंविधं भगवन्तं भजनेन, भक्त्योपासनया च सेवन्ते त एवात्मकल्याणं सौकर्येण प्राप्नुवन्ति । एवमागमनिरूपितं भगवत्स्वरूपं परमार्थतो ज्ञात्वा सपरिवारोऽसौ जिनधर्मोपासको बभूव । पवित्रधर्मरागरंजितस्वान्तश्च स श्रीशत्रुञ्जयतीर्थे भगवतः श्रीऋषभदेवस्य भव्यं मन्दिरं निरमापयत् । शत्रुञ्जयतीर्थमुद्दिश्य च संघं निष्कासयामास । येन स्वजातीया अन्ये च प्रभूतं पुण्यं तीर्थयात्राजनितपर्जयामासुः । एवमसौ जीवनावधि धर्मकार्याण्यन्वतिष्ठत् । एतदीया सन्तानपरम्पराऽस्मादेव सालेचा जातिरिति सर्वत्र प्रसिद्धिमाप ।

वाघमारजातिः—तुंगीनगर्यां राजा सुहडनामाऽसीत् । असौ ब्राह्मणधर्मोपासकः कदाचिद् वाराधममुद्दिश्य यज्ञं कर्तुमियेष । शुभमुहूर्ते यज्ञारंभो जातः । विविधा मूकाः पशव एकत्रिताः । अस्मिन्नेवकाले सद्भाग्यवशात् श्रीसिद्धसूरिस्तत्रायायौ । पशुहनन धर्मकं यज्ञं दृष्ट्वा सत्वरमसौ राजसभां गत्वा राजानमुपदिदेश—राजन् ! दैवी सृष्टिरियं, देवाश्च कारुणिकाः रक्षकाः सर्वेषां प्राणिनां कथं ते हिंसारुचयो भवेयुः । अपरं च यथात्मनः शरीरे पीडाऽसह्या भवति तथैवान्येषां कथं न स्यात् । यदत्र शुभमशुभं वा कर्मानुष्ठीयते तस्य फलमवश्यं परत्रोपभोक्तव्यम् । येन याताः पितामहास्तेनैव व्यवहारे सर्वसुखं नितरां सम्पद्यते इत्युपदिश्य स्वस्थानमगात् सूरीश्वरः । कृतावबोधो राजा ब्राह्मणैः पुनरुपदिष्टोऽपि न तद्वचोऽन्वमन्यत । रुष्टास्ते गृहं ययुः । राजा च वृष्ट्यभावेन प्रजादुःखस्य दूरीकरणार्थं सूरिसमीपं गत्वाऽवोच् । भगवन् ! भवदुक्तं सर्वमेव यथार्थमवैमि । किन्तु मदीया प्रजा वृष्ट्यभावेन भृशं दुःखिता, तदर्थमेव कश्चिदुपायश्चिन्त्य एव । येन देवतासन्तोषः स्याद् वृष्टिश्च भवेद् । अन्यथा रुष्टा इमे ब्राह्मणा अभिचारादिना महान्तमुपद्रवमाचरिष्यन्ति । राजवचो निशम्य सूरीश्वरो धर्मे दृढभावनायै पुनरुपादिशत् । राजाऽपि सूरिवचसि विश्वस्य राजगृहमयात् । रात्रौ संस्तारापौरुषीं पठित्वा शयनायैच्छन्नपि सर्वजनश्रेयश्चिन्तयन्न निद्रां लेभे । अन्ते सच्चायिकामस्मरत् । परोक्षरूपेण सोपस्थिता सूरीश्वरमभिनन्द्यावादीत् भगवन् ! धर्माभ्युदयाय ते प्रवृत्तिः साधीयसी । अद्यारभ्याष्टमे दिने वृष्टिरवश्यं भविष्यतीत्युक्त्वाऽदृश्यतामयासीत् । तदनु प्रभाते दर्शनार्थमागतं नृपं तथैवाष्टमे दिने वृष्टिर्भविष्यतीति जगाद । निर्धारिते दिने सहसा धारावृष्टिः पपात । आनन्दाप्लुतमानसा प्रजा राजा च जिनधर्माभिरुचयो विना विलम्बेन जिनधर्मं स्वीचक्रुः । वंशावलीष्वियं घटना ९३२ वि० संवत्सरे ज्येष्ठशुक्लसप्तम्यामजनीति स्पष्टमुल्लेखः ।

अस्यैव राज्ञः सूर्यमल्लेत्यपरं नामासीत् । तस्य सलक्षणनामा पुत्रः कदाचित् केनचित् कार्यप्रसंगेनाश्वारूढः कुत्रचिद् ययौ । सूर्यास्तसमयेऽसौ समीपवर्तिनो वेणीनगराद् बहिः स्थितस्य कस्यचिद् गृहे रात्रीनिवासार्थमाजगाम । तन्नगरं तदानीमवरुद्धद्वारमभूत् । गृहाधिपतिस्तमवोचत्-महाशय ! प्रतिरात्रमत्र कश्चिद् व्याघ्र आयाति तद्भयात् सर्वाणि द्वाराणि सायंकालादेवावृतानि क्रियन्ते । अतो भवानपि स्थानान्तरं रक्षणायान्वेषयतु । असौ तु पौरुषातिरेकात् तस्य वचो नाजीगणत् । तत्रैवासौ सावधानेन स्थितो यावद् व्याघ्र आयाति तावदेवैकेनैव खड्गप्रकारेणतं द्वेधाऽकरोत् । प्रातर्नागरिकास्तंव्याघ्रं मृतं, एनं चाक्षतशरीरं च दृष्ट्वा राजानमवोचन् समग्रं वृत्तान्तम् । राजा च हर्षेण प्रत्युद्व्रजन् स्वागतेन विधिना नगरप्रवेशमकारयत् । तदीयपराक्रमसन्तुष्टमानसोऽस्मै लक्षपरिमितान् रूप्यकान् कांश्चिद् ग्रामान् दत्वा च स्वसमीप एवास्थापयत् । तत आरभ्यास्य वंशजा बाघमार-जात्या—प्रसिद्धिमगमन् । बाघचारेति नाम भ्रममूलकम् । व्याघ्रमारेति संस्कृतस्यं सार्थकस्य शब्दस्य स्थाने रूढ्या बाघमारेत्यपभ्रंशशब्दप्रयोगः ।

मंडोवरा जातिः—प्रतिहारदेवादीन् । मांसभक्षिणः क्षत्रियान् सूरीश्वरः प्रतिबोध्य मांसमदिराद्यभक्ष्यभक्षणान् निवर्त्य विक्रमस्य ९३९ तमे संवत्सरे जिनधर्मदीक्षितानकरोत् । एतेषां निवासस्थानं मण्डव्यपुरम-

भूसतस्ते मण्डोवरा नाम्ना प्रसिद्धाः । एतद्वंशीया महाप्रभावशालिनो दिगन्तविश्रुतकीर्तयश्च बभूवुः ।

मल्ल-जातिः—खेडीपुराधिपस्य राठोडोपाह्वं रायमल्लं जिनतत्त्वं संबोध्य वैक्रमे ९४५ हायने दीक्षितमधत्ताचार्यः । उपकेशीयवंशेऽस्य सन्तानपरम्परा मल्लजात्या ख्यातिमगात् । वीतरागा-कीडेचा-सोनी-सुखिया-महेता-नखरादयोऽस्या एव जातेर्भेदा गण्यन्ते । अत्रापि बहवो दानवीरा धर्माचरणशीला महापुरुषाः समुत्पन्नाः ।

छाजेडजातिः—आचार्यः श्रीसिद्धसूरिर्विहरन् शिवगढनगरमगमत् । समहोत्सवं भावुकैरसौ सत्कृतः पुरं प्रवेशितः । यदाऽसौ शिवगढ कृतावस्थितिरासीत्तस्मिन्नवसरे नगराधिपते राठोडोपाह्वस्य-आसलरावस्य सूनोः कज्जलरावस्योद्वाहविधिरासीत् । एकदाऽऽचार्यस्य शिष्यः कश्चिन्मुनिः शौचार्थं कस्यचिद् वृक्षस्य व्यवधान-माश्रित्य स्थितस्तदा मृगयां गतस्य कस्यचित् क्षत्रियस्य बाणासनयन्त्रमुक्तो लक्ष्यभ्रष्टो बाणस्तस्यैव साधोर्जंघां भित्त्वा दूरं पपात । अन्यः साधुः शौचविधिं समाप्य यावदस्य समीपमायाति तावदेनं मूर्च्छितं ददर्श । बाणक्षेप्तारं क्रुद्धोऽसौ मुनिर्बहुभर्त्सयत । कृतापराधोऽप्यसौ गर्वपूर्णहृदयस्तवाप्येषा गतिर्भविष्यतीत्यवादीत् । कथंचित् स्वस्थप्रकृतिं विधाय मुनिं सहैव नीत्वा गुरुसमीपमेत्य मदोद्धतानां क्षत्रियाणां सन्मार्गस्थापनार्थं शासनलघुतापरिहारार्थं च भाव्यनर्थनिवारणाय चावश्यं शिक्षा समुचितेत्युक्त्वा-निखिलवृत्तान्तं निवेदयामास । समुचितमस्य वचः समाकर्ण्य सूरिरसावुपायं चिन्तयामास । अन्यत्र क्षत्रियकृतं मुनेरुपद्रवं ज्ञात्वा भृशं खिन्न-मानसो महाजनसंघः क्रुद्धः सन् प्रतिकारार्थं तत्परोऽभूत् । क्षत्रिया अपि मद्धोद्धताः कृतमप्यपराधमकृतंमन्यमानाः प्रतिकारतत्पराय महाजनसंघाय द्रुह्यन्ति स्म । पक्षद्वयं परस्परसंप्रहारायोद्यतमासीत् । महाजनसंघेन क्षत्रिय-पक्षाय निवेदितम्-भवन्तः सर्वे सूरीश्वरसमीपे क्षमां याचयित्वा विरोधं परिहरन्तु । क्षत्राभिमानमदमत्ता नास्य वचो गणयामासुः । अतो विषमा परिस्थितिरभूत् । सूरीश्वरश्च करुणावलयः कथमसावुपद्रव उपशाम्येत्, क्षत्रियाश्च शिक्षिताः स्युरिति विचारयन् रात्रौ भगवतीं सच्चायिकामस्मार्षीत् । सा च परोक्षरूपेणोपेत्य समाश्वासनपूर्वक-मेनमगादीत्-भगवन् ! नात्र काचिच्चिन्ता विधेया । प्रातरेव सर्वमिदं तन्त्रं संक्षुब्धमप्यपगतवैरं शान्तिमेष्यति । तन्निमित्तं च भवदीयं यशः सर्वत्र प्रसरिष्यतीत्युक्त्वा यथागतमगात् । अथ मांसभोजिनः क्षत्रिया रात्रावा-हारार्थं मिलिता मांसं पाचयामासुः । दैववशात् पतितो विषजन्तुरपि पाकेन सह मिलितो येन मांसभोजनाः सर्वे ते विषव्यथामूर्छिता बभूवुः । प्रातस्तान् तदवस्थान् दृष्ट्वा साधोर्व्यथाजननिमित्तमिदं फलं, मन्त्रतन्त्र-विचक्षणसाधुसमुदायस्येदं चेष्टितं, जिनमुनीनां मायेयमिति बहुविधं प्रालपन् जनाः । ओसवालजातीयः संघो महदिदमकारणं दूषणमापतितमस्मास्विति तदपनोदनार्थमवशिष्टमांसस्य परीक्षणं कर्तव्यमिति यावत् परीक्षन्ते तावद्विषमिश्रितमिति निर्णयो जातः । सूरीश्वर एव सर्वान् सचेतनान् विधातुं शक्ष्यति इति मत्वा सप्रश्रयं तत्समीपमुपेत्य लज्जावनतमुखाः क्षत्रियाः सखेदं क्षमां ययाचिरे । असौ च समाश्वास्य देवगुरुसाधूनामाशातनं कदापि प्रमादेनापि न विधेयं भवद्भिः । न हि रक्षकाणां रक्ष्येषूपद्रवः शोभते । महाजनसंघेन सूरीश्वरचरणप्रक्षालितं जलं मूर्छितानामुपरि प्रक्षिप्तं येन ते झटिति सचे-तना बभूवुः सूरीश्वरपुण्यप्रभावात् सच्चायिकायाः साहाय्याच्च । आचार्यप्रभावप्रभाविता आत्मानमनुशोचन्त-स्ते सर्वे जिनधर्मोपासकाः शिष्यतामगमन् कज्जलेन सह केवलं चमत्कारदर्शनेनाकृष्टचेतसां धर्मभावना न दृढ-मूला संपद्यत इति मत्वा स सर्वे प्राणिनोऽस्माभिरात्मदृष्ट्या एव द्रष्टव्याः, आत्मनः सत्स्वरूपज्ञानार्थं हिंसाम-यैकजीवनं लुब्धप्रकृतिं गुरुमपास्योदारचरितः सर्वजगद्धितभावनोपपन्नस्त्यागमयैकजीवनो निस्पृहः कर्तव्य-पथप्रदर्शको गुरुः संसेव्यः सर्वतोभावेनेत्युपादिशत् । पट्टावलीकारैरियं घटना वि० सं० ९४२ तमेऽब्दे सम-जनीत्युक्तम् । क्षत्रियास्तत्स्मरणार्थं शिवगढनगरे विशालं महावीरमन्दिरं निर्मापयामासुः । राव-कज्जलस्य

पुत्रो रावधवलो बभूव। तत्सूनुः छाजूरावो यो देव्याः सच्चायिकायाः प्रसादेनाक्षयं धननिधिं लेभे। परमधार्मिकोऽसौ भगवतः श्रीपार्श्वनाथस्य सुशोभनं मन्दिरं शिवगढे निर्मापयामास। शत्रुञ्जयादितीर्थयात्रार्थं संघं निष्कास्य स्वजातीयेभ्यः सुवर्णमुद्रिकाप्रभावनं चकार। धार्मिकेषु कार्येष्वसौ कोटिपरिमितं द्रव्यमुपायुंक्त। एवमस्य सत्कर्मानुष्ठानजन्यं शुभ्रं यशः सर्वत्र प्रससार। एतज्जातीयाः सन्तानपरम्परा छाजोड-जात्या विश्रुता बभूवुः। नच्चाचावा-संघवी-भाखरिया-नागावत-महेता-रूपावतादिका अस्य बह्व्यः शाखाः प्रादुरभूवन्।

गान्धी-जातिः—आचार्यः श्रीसिद्धसूरीश्वरः कस्मिंश्चित्समयेऽर्बुदाचलं प्रति विजहार मध्येऽरण्यस्य देव्या मन्दिरस्यैकस्मिन् भागे सर्वे क्षत्रिया अपरत्र च हननार्थमजामहिषादयः पशवः स्थिताः। मार्गभ्रान्त्या स आचार्यस्तत्राजगाम। दयार्द्रचेताः सूरीश्वरो जीवहिंसानिषेधाय तानुपादिशत्। मदोद्धतास्ते न किंचिदपि शुश्रुवुः। तथापि स्थिरनिश्चयः स तन्मध्यात् कांश्चित् पृथक् कृत्वा मिथोऽगादीत्—भव्याः! जगदम्बिकेयं सर्वस्य जगतो माता। कुपुत्रो जायेत क्वचिदपि कुमाता न भवति। यथा सा युष्मान् रक्षति तथैवान्यानपि। अतो निरयमात्रफलां हिंसां त्यक्त्वाक्तवादयावृत्तयो भवन्तु। एवं युक्तिप्रचुरमुपदिश्य तानखिलान् पशूनमोचयत्। सर्वे च ते स्वोद्योगं मनसि निदन्तो मिथो विचारयन्तः सूरीश्वरसमीपमहिंसामयं जिनधर्मं सिषेविरे। तस्मिन् क्षत्रसमूहे रावरखंगार-रावचूडा-रावअजड-रावकुंभादयोऽग्रेसरा आसन्। तत्र रावखंगारस्य सन्तानपरम्परायां सप्तमः कलहणरावो बभूव। तस्य नवसु पुत्रेषु सारंगः केसरकस्तूरीकर्पूरधूपादिवस्तूनां वाणिज्यमकरोद् येन जनास्तं गांधीति नाम्ना संबोधयामासुः। अस्य परम्परा गांधीत्यभिधेयेन प्रसिद्धिमगमत्। वस्तुपालस्य तेजपालस्य कारणेन लहोड़ासाजन, बड़ासाजनेति शाखाद्वयं जातम्।

ढेलडिया वोहरा—आचार्यस्याज्ञापालकः पण्डितो राजकुशलो मुनिगणसहितो विहरन् चन्द्रावतीमभिप्रतस्थे। काननस्य मध्येऽन्येऽश्वारोहा आययुः। मार्गागतवटवृक्षसमीपस्थिताया वाप्या एकदेशे विश्रामाय राजकुशलादयस्तस्थुः। अश्वारोहाश्च तस्यैव वृक्षस्याधस्तात् स्थितिमकार्षुः। तत्र कश्चिदेको मुनिसमीपमेत्याब्रवीत्-भवन्तः सर्वे कुतस्त्याः कुत्र गच्छन्ति? मुनिश्च तमगादीत्-वयं सर्वे जिनश्रमणा अनियतवासा यत्र धर्मप्रचारः शक्यते कर्तुं तत्रैव गच्छामः। ततः स उवाच-मन्त्र-तन्त्रादिकं भूतभविष्यद्विषयकं जानाति भवान्? यदि च जानाति तर्हि कथयतु-अस्माकं राज्ञो माधोजीरावस्य गृहे पुत्रो भविष्यति न वा। श्रुत्वा तद्वचनं निमित्तज्ञोऽसौ राजकुशलोऽब्रवीत्। यदि पुत्रः स्यात्तदा किं करिष्यति भवान्! तेनोक्तम् राज्यं धनं वा यदिष्यते तत्सर्वमेव भवदभिलषितं राजा पूरयिष्यत्यवश्यम्। निःस्पृहा न वयं राज्यं धनं वाऽभिलषामः किन्तु जाते पुत्रे संसारसागरसंतारकः परमपुनीतो जिनधर्म आत्मकल्याणाय राज्ञा स्वीकार्यः। तथेति कथयित्वा शीघ्रमसौ राजसमीपमुपेत्य सर्वं वृत्तान्तं निवेद्य तेन सहैव तत्रागत्य तस्मै तमदर्शयत्। राजा च सप्रश्रयं तं प्राणंसीत्। मुनिरसौ तदुपरि वासःक्षेपमकरोत्। परमसन्तुष्टमना राजा साग्रहं सपरिवारं तं सोनगढनगरं नीत्वा भव्यस्वागतेन वसतिमकारयत्। मासावधिकमत्र धर्मव्याख्यानादिकं कृत्वा पुनरसौ राजकुशलो व्यहार्षीत्।

अथ प्राप्तगर्भा राज्ञी समाप्ते नवमे मासि देवोपमं तेजपुञ्जपुञ्जितं कुमारमसूत। परमानन्दसन्दोहसंभृतान्तरङ्गो राजा महाजनसंघद्वारा सिन्धप्रान्ते मालपुरे चतुर्मासनिमित्तं कृतावस्थितिं मुनिमुपलभ्य तमाह्वातुं सेवकांस्तत्र प्राहिणोत्। सविनयं प्रेषितवृत्तान्तं विज्ञाय मुनिः समाप्ते व्रतेऽहमागमिष्यामीति प्रतिसन्देशं हारयामास। ते च तत्र प्रतिनिवृत्य तथैव न्यवेदयन्। समाप्य व्रतं सशिष्यो राजकुशलः शिवगढनगरमयासीत्। महता समारोहेण हार्दिकमस्य स्वागतं राज्ञा पौरैश्च विहितम्। पूजाप्रभावनादिकं विधाय सपरिवारो राजा माधोजीरावो राजकुशलसकाशाज्जिनधर्मं वीचार। तस्मिन्नगरे श्रीमद्भगवतो महावीरस्य जिनालयो निर्मापितो यस्य च प्रतिष्ठा श्रीसिद्धसूरीश्वरपाणिपंकजेन विहिता। शत्रुञ्जयतीर्थयात्रायै शुभे दिवसे संघं

निष्कासयामास । रैवतकतीर्थयात्रामपि विधाय स्वजातीयानां सन्मानं कृत्वा महाजनसंघेन सह भोजनोद्वाहादिभिः व्यवहारैः संबंधमकार्षीत् ।

अस्यैकादशो नौघणरावो महाभाग्यवान् विविधव्यापारकुशलो बभूव । असौ ढेलडियाग्रामे स्थित्वा कुसीदव्यवहारमकरोत् । ततस्तन्निवासिनो जनास्तं—ढेलडिया वोहरा-पदेन संबोधयामासुः । तत आरभ्यास्य सन्तानपरंपरा तथैव प्रसिद्धिमगात् । अत्र बहवो हि राजकर्मचारिणो महामात्या, व्यापारिणो राजनैतिका, धार्मिकाश्च महापुरुषाः प्रसिद्धिमवापुः । अस्या अपि बह्व्यः शाखाः प्रशाखाश्च विस्तृता बभूवुः ।

एवमस्याचार्यवर्यस्य शासनकाले तदीयाद्वितीयप्रभावेण बहव उपकृता जिनधर्मसंसेवका राजानो महाराजानश्चात्मकल्याणमधिजग्मुः । संप्रदायशैथिल्यमपि सर्वथा दूरीकृत्य सर्वतोभावेन जिनधर्मदार्ढ्यमापादितम् । आज्ञापालनतत्परा अनेके शिष्याः सर्वत्र भारते धर्मप्रचारार्थं विजह्रुः । स्वयमपि तथैव सर्वत्र विहरणेन धर्मप्रचारं, जनतायां धर्मेऽधिकां च रुचिमापादयन् बाहुल्येन जिनधर्मसाम्राज्यं स्थापयामास । षष्टिवर्षपर्यन्ते शासनकालेऽनेके मुमुक्षवो दीक्षां जगृहुः । मंदिराणां मूर्त्तीनां च निर्माणं संस्थापनञ्च प्रबलतरेणोत्साहेन संपन्नम् । बहूनां संघानामप्यायोजनेन जनहितसाधनमपि संपादितम् । वादिनां विजयेन तदा सर्वत्र जिनधर्मपताका समुल्लसति स्म ।

अन्ते च तत्रभवानाचार्यवर्यः श्रीसिद्धसूरिर्नागपुरे आदित्यनागगोत्रस्य चोरडियाशाखीयेन श्रद्धाभक्तिसमन्वितेन मल्लुकशाहेन नवलक्षद्रव्यव्ययेन समनुष्ठिते आदित्यनाथस्य भगवतश्चैत्यालये महामहोत्सवे चतुर्विधसंघसमक्षं मुक्तिसुन्दरं नामोपाध्यायं संस्थाप्य श्रीककसूरीति नाम च कृत्वा स्वपट्टे संस्थापयामास । अस्मिन्नेव शुभावसरे समुचितेभ्यः शिष्येभ्य उचितपदवीप्रदानमप्यकरोत् ।

अन्तिमसंलेखनासक्तोऽसौ चतुर्विंशतिदिनान्यनशनेनातिवाह्य स्वर्गपथप्रवासी बभूव ।

## वि. सं. ९५२ तः ] ४५ आचार्यः श्रीककसूरिः (दशमः) वि. सं. १०११ प० ]

अत्रभवानाचार्यवर्यः श्रीककसूरिः प्रखरतपःक्षपितमनोमलः शासनशुभाभ्युदयैककर्ममर्मपारगो हिंसादयाक्षमादिसकलगुणगणालंकृतो रुचिरमूर्तिराचार्यपदं भूषयामास । असौ गोसलपुरवास्तव्य आर्यगोत्रीयश्चासीत् । अस्य पिता धर्मकर्मसमासक्तचेता व्यापारलब्धाधिकद्रविणराशिर्जगमल्लशाहो माता च मनोवाक्कायकर्मभिः पतिहितनिरता धर्माचरणप्रिया सोनीनामिका । पूर्वजन्मकृतसुकृतप्रभावेण संप्राप्तसंपत्समन्वितोऽसौ जगमल्लोऽपरो धनाधिप इवात्र पुरे व्यराजत । धनव्ययेनात्मकल्याणाय स वारत्रयं तीर्थयात्रार्थं संघं निःसारयामास । स्वजातीयेभ्यस्तथैव सुवर्णमुद्रिका वस्त्रालंकारादिकं च दत्त्वाऽऽत्मकर्तव्यमन्वतिष्ठत् । अस्य सप्त कुलभूषणाः पुत्राश्च तस्रश्च कन्यका आसन् । तत्र मोहननामा सूनुः परमभाग्यवान् प्रचण्डप्रभावश्चासीत् ।

एकदा तदीयपुण्यानुयोगादाचार्यवर्यः श्रीसिद्धसूरिर्गोसलपुरमाजगाम । तदीयमुपदेशमनुमान्य जगमल्लशाहः संमेतशिखरयात्रार्थं संघं निष्कासयामास । मोहनश्च बाल्यादेवाप्तधर्मसंस्कारः सूरीश्वरशुश्रूषायां स्थितो धार्मिकवार्तालापेन परमसौख्यं प्राप । सूरेः पादत्राणाभावे कण्टकाद्यावृते पथि संचरणेन द्वाविंशतिपरिमितानां परिषहाणामनुभवेनाश्चर्यान्वितः सः सूरिमगादीत् । भगवन् ! साधारणया वृत्त्या निर्वाहं कुर्वन् भवान् किमर्थमीदृशानि दारुणानि दुःखान्यनुभवति ? तदीयमज्ञातमुनिभावं वचनं श्रुत्वा सूरिस्तमाह-वत्स ! मुनिजीवनस्य चारित्रविषयिणीं सूक्ष्मतमां वृत्तिं त्वं न जानासि यैनैवं वदसि । आवयोः सुखसमृद्धियुतः पन्था भिन्न एव । साधुजीवनजीवनाय महाप्रभावैश्चक्रवर्तिभी राजभिरक्षयो धननिधिः समृद्धिमद्राज्यमपि, दूरमुत्सारितम् । न धनमेव धनमाहुः शास्त्रकाराः किन्तु यस्य निरुपमसुखसाधनमात्मज्ञानमेव विद्यते तस्यैव तस्येह परत्र च कल्याण-

परम्परासाधकं धनमिति । सम्यग्दर्शनेन ज्ञानेन चारित्रेण च सह यावत् शरीरदमनं क्रियेत तावदेव भाविसुख-लब्धये कल्पते । एवं ज्ञानवादेन समयमतिवाहयन्नसौ सम्मेतशिखरतीर्थमाससाद । तदनन्तरमेव दीक्षाग्रहण-भावनां पित्रे निवेदयामास । माता तु दीक्षानामग्रहणेन स्वचेतसि परं दुनोति स्म । तथापि संसारनिःसारतां बोधयित्वा तदाज्ञां मोहनोऽलभत । त्रयोदशभिर्भावुकैः सह शुभे मुहूर्ते भागवतीं जिनदीक्षां सूरीश्वरवरदहस्तेन स्वीचकार । ततोऽसौ मुनिसुन्दरेति नाम्ना प्रथितो बभूव । चतुर्विंशतिवर्षपर्यन्तं गुरुकुले स्थित्वा काव्यव्याकरण-न्यायगणितमन्त्रतन्त्रादिविविधागमतत्त्वचिन्तनपरायणः सर्वगुणविद्योतितजनमनोमोदकोऽसौ विक्रमसंवत्सरे ९५२ तमे नागपुरे चोरलियाशाखीयेन मल्लुकशाहेनानुष्ठिते पट्टमहोत्सवे भगवत आदिनाथस्य चैत्यालये संघसमक्षं सूरीश्वरेणाचार्यपदे प्रतिष्ठापितः श्रीकक्कसूरिनाम्ना ।

अनुसृत्य पूर्वाचार्यपरम्परामसौ पञ्चशतसंख्यकैर्मुनिभिः सार्द्धं सौराष्ट्रप्रान्तं व्यहार्षीत् । तत्र तीर्थराजस्य श्रीशत्रुञ्जयस्य यात्रां संपाद्य ग्रामनगरेषु व्याख्यानादिना धर्माभ्युदयं कुर्वन् कच्छदेशं पावयामास । तत्र भद्रेश्वरनगरे स्थितानां धर्मप्रचारार्थं विहरतां साधूनां समागमं प्राप्याभिनन्दनेन प्रचारकार्यप्रोत्साहन-मकरोत् समुचितेभ्यः पदवीप्रदानेन। ते च सर्वत्र द्विगुणितोत्साहेन धर्मप्रचारमकार्षुः । सूरीश्वरश्च ततः सिन्धप्रान्तं विहारक्रमेणागमत् । तत्र पातोली-वीरपुर-मारोटकोटादिषु नगरेषु भावुकानां हृदयानि धर्मामृतो-पदेशेन भावुकानि कुर्वन् उमरेलपुरमेत्य चतुर्मासावस्थानं निश्चिकाय येन शासनकार्यं सौकर्येण सम्पादितम् । ततश्च जन्मभूमिं गोसलपुरमलमकार्षीत् । जनाश्च महता गौरवेणास्यापूर्वं स्वागतं कृत्वा वदुपदेशामृतमादरात् पिबन्त आत्मानं पावयांचक्रुः । एकादश भावुका वैराग्यरागपूर्णान्तरंगा दीक्षां जगृहुः । मांसमदिराद्यभक्ष्य-भोजिनश्चाहिंसाधर्मरुचयो बभूवुः । एवं धर्मकर्म समाप्य सूरिः पञ्जाबप्रान्तमयासीत् । श्रावस्त्यां नगर्यां संघसभायोजनं कृतवान् । तत्र कुरुपञ्चालशौरसेनादिषु विहरन्तो मुनयः श्रावकाश्च समाजग्मुः । सूरीश्वरस्यो-पदेशेन विशेषतो धर्मजागृतिः संपन्ना । मुनयश्चोपाध्यायगणिगणावच्छेदकादिभिः पदैः सम्मानिताः समुत्साहा धर्मप्रचाराय यत्र तत्र विजह्रुः । ततश्च मथुरामागच्छत् । तत्र वैदिकबौद्धधर्मानुयायिनस्तथैव जिनधर्मानुरा-गिणोऽपि बहुसंख्याका अवात्सुः । ततस्तेन स्याद्वादकर्ममार्गप्रतिपादकेन सामाजिकहितकारकेण व्याख्यानेनापूर्वो धर्माचरणोत्साहः प्रेरितो भावुकानां चेतःसु । ततो ग्रामनगरेषु विहरन् मत्स्यराजधानीं वैराटनगरं गत्वा धर्म-प्रचारञ्च कृत्वा तदनु सूरीश्वरः—अजयगढनगरमव्रजत् । संघानुमतस्तत्रैव चातुर्मासिकीं स्थितिमन्वमन्यत । असाधारणवैदग्ध्यपूर्णं व्याख्यानं सादरं समाकर्ण्य जातवैराग्या द्वादश भावुका दीक्षामगृह्णन् । पश्चात् पद्मा-वती-शाकंभरी-डिडूपुर-हंसावल्यादिषु विहरन् नागपुरमयासीत् । तत्रैव चतुर्मासावस्थानेन सर्वेषां धर्माचरण-शास्त्रसेवनदेवपूजाप्रभावनादीनि शिक्षयामास ।

नक्षत्र-जातिः—मुग्धपुरेऽक्षय्यद्रव्यनिधिर्महाकुटुम्बकः सदाशंकरनामा विप्रवर्यो मन्त्रविद्यासाधनोपा-येनोपाश्रयस्थितमाचार्यं कञ्चित् सप्रश्रयमुपेत्य कञ्चिन्मन्त्रोपदेशयाचनमकार्षीद् द्रव्यलिप्सुः, तेन च प्रसन्नहृदयेन नक्षत्रमंत्र उपदिष्टस्तत्साधनप्रकारश्च प्रदर्शितः । असौ च गृहमेत्य षण्मासावधिकमनुष्ठानमारभत । अवशिष्टे दिनत्रये श्मशानं गत्वा मन्त्रं साधयामास येनानुचितप्रकाराचरणेनोन्मत्तो बभूव तत्कुटुम्बञ्च महद्दुःखमवाप बहुभिरुपायैश्चिकित्सितो न प्रकृतिं गतः । आचार्यः श्रीकक्कसूरिरस्मिन्नेव समये मुग्धपुरमाययौ । संघेन भव्येन स्वागतविधिना सत्कृतो मन्त्रतन्त्रादिविषयकं व्याख्यानमदात् । तदीयालौकिकशास्त्रकौशलाकृष्टमानसा ब्राह्मणाः सविनयं तमुपेत्य सप्रणामं न्यवेदयन्-भगवन् ! ब्राह्मणमेतं महतो दुःखादुद्धरतु भवदभिलषितमवश्यं वयं पूरयि-ष्याम इति स्नेहभरितं करुणार्द्रं वचो निशम्य जातदयोऽसौ तानगादीत्—भवन्तः सर्वे विहायैनं स्वगृहं गच्छन्तु प्रातरेवासौ स्वस्थप्रकृतिको भविष्यति । समुत्पन्नविश्वासास्ते तथास्त्वित्युक्त्वा स्वगेहं ययुः । प्रातरेवासौ

सूरीश्वरालौकिकप्रभावेण प्रकृतिमापन्नः 'जिनधर्माचरणप्रभावमुदितमानसो जिनदीक्षां स्वीचकार। ब्राह्मणा— श्राचार्यप्रभावमुग्धचेतसो यथाप्रतिज्ञं जिनधर्मं सिषेविरे। अस्य परम्परा नक्षत्रजात्या सर्वत्र प्रसिद्धिं लेभे।

घीया-जातिः। अस्या एव नक्षत्रजातेरियं जातिः प्रादुर्बभूव। यथा व्यापारार्थं स्तम्भतीर्थे (खंभात-नगरम्) ययुर्नक्षत्रजातीयाः केचित्। व्यापारे च प्रचुरं द्रव्यमवाप्य तत्रैव न्यवात्सुः। जिनधर्मानुरागिणा दल-पतशाहेन जिनालयनिर्माणमारब्धम्। तदर्थं च शिल्पिनः कर्मकराश्चादिष्टाः। जातं च भूखननम्। तदनु कश्चि-च्छिल्पी श्रेष्ठिनो गृहमाजगाम यावदसौ भोजनमकरोत्। घृतपात्रे पतितां मक्षिकामसौ निष्कास्य स्वपादेऽस्थापयत्। संपाद्य भोजनविधिमसौ बहिरागच्छत्। शिल्पिना तत्सर्वमेवास्य चेष्टितमवलोकितमासीत्। श्रेष्ठिन्! भूखननं संपन्नम्। प्रातरेवोष्ट्रशतभारवाह्यप्रमाणं तत्र घृतमपेक्षितं यतो मूलदार्ढ्यं स्यात्। एवमस्य शिल्पिनो वचः श्रुत्वा प्रभाते तत्र प्रेषयिष्यामि इति तमाह श्रेष्ठी। असौ च गृहं गतः। जातं प्रभातम्। श्रेष्ठी च प्रातस्तत्र गत्वा ताव-त्प्रमाणं घृतं नीत्वाऽब्रवीत्तम्। भोः शिल्पिन्! अधिकमपेक्षितं तर्हि वक्तव्यं किन्तु मूलदार्ढ्यं विधेयम्। श्रुत्वा चासौ विस्मितः सन् जहास। हासकारणं च तं पप्रच्छ श्रेष्ठी। तेनोक्तम्—घृतान्मक्षिकां निष्कास्य पादे स्थापयता भवतेदृशं खल्वौदार्यं प्रकटितमिति हेतोर्मे हासः। श्रुत्वा च श्रेष्ठी तमाह—भवन्तो जानन्तु वयं महाजनाः। धर्मकार्ये धनोपयोगार्थं न किंचिद् विचारयामः। धनाद् धर्मोऽधिकतरः। अत एव च मक्षिकायाः पादे संस्थापनेन चर्मस्पृदुत्वं पिपीलिकानां तद्भक्षणार्थमागतानां हिंसनञ्च न स्यादिति श्रुत्वाऽसौ लज्जितोऽभूत्। दलपतशाहेन द्विपञ्चाशदुपमन्दिरयुक्तो भव्यो जिनालयो निर्मापिता यस्य प्रतिष्ठाविधिराचार्येण सम्पादितः। एतदीया परम्परा घीयाजात्या व्यवहृता। घटनेयं वैक्रमे ११२३ तमे संवत्सरेऽजनीति विभाव्यम्।

संघवी-जातिः—नक्षत्रजातीयो मालाशाहो विक्रमस्य ११४५ तमेऽब्दे नागपुरात् महान्तं संघं निष्कासयामास ततो तद्वंशजाः संघवीजातीया इति प्रसिद्धिमगमन्।

गरीया-जातिः—नक्षत्रजतीयः सवलाशाहो गरीयाग्राममध्यस्थेन सह वैमनस्यं प्राप्य पाटणनगरं निवासाय गत इति हेतोस्तत्रत्यास्तं गरीयेत्युपनाम्नाऽजुहुवुः। तत्परम्परा गरीयानाम्ना विश्रुता बभूव।

खजानची-जातिः—विक्रमस्य संवत्सरे १२४२ तमे गरीयाजातीयो रूपणशीशाहो धारानगर्या तदधिपतिना कोषाध्यक्षपदे नियुक्ततस्तं कोषाध्यक्षं खजानचीपदेनाह्वयन् जनाः। अस्य पुत्रेणोदयभाणेन धारा-नगर्यां भगवतः पार्श्वनाथस्य भव्यो जिनालयो निर्मापितो यस्य प्रतिष्ठामहोत्सवो वि० सं० १२८२ माघशुक्ल— पंचम्यामनुष्ठितः। एतद्वंशीया खजानचीपदेन प्रसिद्धाः।

कागजातिः—एकदा सूरीश्वरो विहरन् लोद्रवापत्तनं प्रतस्थे। मध्ये कागनाम्नी सरित्समागता। यस्या-स्तटे कागनामा महर्षिः शिष्यमंडलसहितोऽग्निकुण्डं संस्थाप्य स्थितः। अनेन सूरये सत्कारार्थमासनं दत्तम्। स च रजोहरणेन भूमिशोधनं कृत्वा स्वकीयमासनं स्थापयित्वोपविष्टः। तापसेन तत्कारणं पृष्टम्। सूक्ष्म-जीवानां हिंसापरिहारायेदं समाचरणमिति कथितोऽसौ स्वासनं पश्यति तावदसंख्याः पिपीलिका ददर्श। पश्चात्तापयुतमानसोऽसौ श्रीकक्कसूरिमहिंसातत्त्वस्वरूपमपृच्छत्। तेन च सयुक्ति सप्रमाणं जिनधर्मतत्त्वपुरः-सरमहिंसास्वरूपं वर्णितम्। आत्मकल्याणसाधनायायमेव, जिनधर्मः कल्याणकर इति मत्वा सर्वशिष्यमंडल-सहितो दीक्षां जग्राह। तस्य तापसगुणानुरूपं तपोमूर्तिरिति नामकरणं कृतम्। अस्य परिचर्यारतो रोलीग्रा-माध्यक्षः पृथ्वीपालोऽपि सूरीश्वरप्रभावप्रभावितो वासक्षेपपूर्वकं शुद्धिं प्राप्य उपकेशवंशे समाविष्टः सूरिणा। कागर्षेः स्मृतिचिह्नार्थं पृथ्वीपालादयः क्षत्रियाः कागनाम्ना लोके प्रथिताः। पृथ्वीपालस्याग्रहमनुमान्याचार्यो रोलीग्रामं गत्वोपदेशदानेन सर्वान् जिनधर्मतत्त्वं बोधयामास। बहवश्च सूरीश्वरवरदहस्तेन दीक्षामग्रहिषुः। अस्या घटनाया विक्रमस्य १०११ तमः संवत्सरः सम।

बागरेचाजातिः—अथैकदा विहरन्नाचार्यः सायं मार्गागतस्य देवीमन्दिरस्य समीपमाययौ। मन्दिर एव सामयिकीं स्थितिमकृत। ततोऽर्धरात्रे सुप्तान् मुनीन् दृष्ट्वा व्याघ्रवाहना देवी समागता रोषारुणितनयना ज्ञानध्यान-क्रियानिरतं सूरीश्वरं साटोपं ततो निर्गन्तुमाह। तेन च यथा तथा वा भवतु किन्तु सायंकालादनन्तरमस्माभिर्हिंसा-दोषपरिहारार्थं पदात् पदमपि प्रचलितुमशक्यमित्युक्त्वा सूक्ष्मदृष्ट्या तदाचारस्वरूपमस्यै विस्तरश उपदिष्टम्। श्रुत्वा च प्रसन्नवदनपुण्डरीका देवी तदारभ्य शुभां प्रतिज्ञामकरोद्-भगवन्! अद्यारभ्य नाहं जीवहिंसानुमोदनं करिष्यामि भवानत्र दृढं विश्वसितु। एवमुक्त्वा साऽन्तर्दधे। प्रातश्च केचन क्षत्रिया अजामहिषाद्युपहारनिवेदनेन देवीं प्रसादयितुमत्राजग्मुः। मन्दिराद् बहिर्निर्गन्तुं तान् व्यज्ञापयन्। ततः सूरीश्वरस्तदोयां, हिंसाप्रवृत्तिं वार्तालापप्रसंगेन विदित्वा हिंसानिषेधार्थमादिदेश तान्। तत्रैकोऽमेसरस्तेषां सूरिवचनमनादृत्याजागलस्योपरि खड्ग-प्रहारमकरोत्। स एव खड्गस्तस्यैव, गले पतितः पञ्चत्वं च गतः। अतो गजसिंहरावादयः क्षत्रिया भयत्र-स्तमनसः क्षमां ययाचिरे। सूरीश्वरेण समाश्वासिता धर्मतत्त्वमुपदिष्टा जिनधर्मदीक्षां जगृहुः।

रावगजसिंहस्य द्वे भार्ये बभूवतुः चत्वारश्च पुत्राःतत्र ज्येष्ठो दुर्गासिंहः। मिथो जाते कलहे तेन बाघा-नामको भ्राता सकटाक्षमुक्तः—रे मूर्ख! यदीदृशस्त्वं, पौरुषातिरेकनिधिरसि, नूतनं किमपि राज्यं स्थापयिष्यसि किम्। ततोऽसौ भृशमुद्विग्नमानसो व्याघ्रेश्वरीमन्दिरं गत्वा दिनत्रयं तदाराधनतत्परोऽभूत्। प्रसन्ना च देवी तम-ब्रवीत् कल्याणिन्! तव ललाटे राज्यं न लिखितं किन्तु गच्छ मन्दिरस्य पश्चात् भूमौ षोडश द्रविणकुंभाः। खनित्वा च गृहाण। संपादय धर्मकार्याणि। ततो राज्यलाभादपि तेऽधिकं यशः सर्वासु दिक्षु प्रसरिष्यति। शुभं ते भवत्वित्युक्त्वा साऽदर्शनं गता। प्रातरनेन च तथैव विहितम्। प्रथमं स्वग्रामाद् बहिर्भगवतो महावीरस्य चतु-रशीत्युपमन्दिरयुतो जिनालयो निर्मापितः। धर्मध्यानार्थं तत्समीपे च धर्मशाला। एवं धर्माचरणेन दिनान्य-नैषीत्। दुर्भाग्यवशात् सर्वक्षयंकरो भीषणो दुष्कालोऽभवत् प्रभूतं धनमत्रोपयुज्य मनुष्याः पशवः पक्षिणश्चो-ज्जीविताः। तदनु जाते सुभिक्षेऽस्य दानजन्यं महद् यशः सर्वत्र प्रसृतम्। आचार्य देवगुप्तसूरिमाहूय मन्दिरप्र-तिष्ठामकारयत्। चतुर्मासे भगवतीसूत्रवाचनामहोत्सवानुष्ठानेनापरिमितं पुण्यमाससाद। नवलक्षपरिमिता मुद्रा व्ययिताः। ततः श्रीशत्रुञ्जयतीर्थयात्रायै संघं निष्कासयामास। तीर्थयात्रां विधाय संघस्थाः सर्वे सुवर्णमुद्रिकाभिः सत्कृताः। एवमनेन धर्माचरण एव धनव्ययो विहितः। अस्य परम्परा व्याघ्रेश्वरीप्रसादनिमित्तेन बागरेचानाम प्राप। एतद्वंशे बहवो जिनधर्मानुरागिणो महापुरुषाः समुत्पन्नाः।

एवमाचार्यः श्रीकक्कसूरिः सर्वत्र परिभ्रमणेन धर्मप्रचारं कृत्वा श्रीमहाजनसंघस्याभ्युदयमकरोत्। महा-राष्ट्रप्रान्ते तदीयोपदेशेन बहवो मांसाद्यभक्ष्यभोजनं त्यक्त्वा जिनधर्मं सिषेविरे। बहूनां मन्दिराणां प्रतिष्ठापनेन धर्मरुचेरभिसंवर्धनमापादितम्। पदवीप्रदानेन प्रचारकेभ्यः साधुभ्यः प्रोत्साहनं दत्तम्। असाधारणशास्त्रज्ञानवै-भवेन वादिनो विजित्य स्वधर्मे स्थापयामास।

अन्ते च शासनोन्नतिमाधाय बाधाशाहेनानुष्ठिते महामहोत्सवे पद्मप्रभोपाध्यायं सूरिपदालंकृतं कृत्वा देवगुप्तसूरीति नाम परिवर्त्य चतुर्दशदिनपर्यन्तमनशनं विधाय स्वर्गपदवीमनुससार।

## वि. सं. १०११ तः] ४६ आचार्यः श्रीदेवगुप्तसूरिः (दशमः) वि. सं. १०३३ प.]

वन्दनीयचरणपंकजः सकलवाङ्मयप्रकाण्डपण्डितः विद्वद्गणशिरोमणिर्जिनशासनसमुन्नतिदृढोत्सा-होत्साहितः श्रीदेवगुप्तसूरिः श्रीकक्कसूरिपट्टपदे प्रतिष्ठितः। असौ दशपुरनगरवास्तव्य आदित्यनागगोत्रस्य चोरडियाशाखीयश्च। अस्य जनको दयादानसौजन्यादिगुणवरिष्ठो मन्त्री सारंगनामा, जननी च परमसुशीला रत्नीदेवी। अस्य शुभजन्ममहोत्सवं सारंगो भव्येन माङ्गलिकेन विधिनान्वतिष्ठत्। यत्र च लक्षरूप्यका व्ययी-

कृता: । प्रथमे पुत्रजन्मनीदं महोत्सवानुष्ठानमस्य नैसर्गिकमेव । सूनुरयमसौ यदा गर्भस्थितिमकार्षीत्तदाऽस्य जननी निशायामर्द्धरात्रे षोडशकलाकलितमूर्तिं चन्द्रमद्राक्षीत् स्वप्ने । अतस्तदनुसारेण पुत्रस्य चन्द्रेति नामकरणमकरोत्सारंग: । महता वात्सल्येन लालनपोषणादिभिर्मनोहरमूर्तिरसौ मधुरयाऽव्यक्तया वाचा न केवलं मातापित्रोरपि तु समेषां कौटुम्बिकानां मनांसि मोदयामास । दिने दिने वर्धमानकल: कलानाथ इव लावण्यमयानवयवान् पुपोष । प्राप्ते हि विद्याध्ययनकाले पितु: प्रयत्नेनासौ धार्मिक-व्यापारिक-राजनैतिकादिषु विषयेषु परं प्रावीण्यमुपागमत् कुशाग्रबुद्धि: । पूर्वसुकृताचरणानुरूपमपरस्मिन् जन्मनि तदीयकर्तारमिवानवद्या विद्या एतमनायासेनैव प्रपेदिरे एतदनन्तरमस्य माता चतुर: पुत्रान् तिस्रश्च कन्यका असूत ।

अथाधिगतसर्वकलाकलापोऽसौ प्राप्तैकविंशतिवर्षवयस्क: श्रेष्ठिगोत्रीयस्य देवाशाहस्य रूपशीलसमन्वितां मालतीं नाम कन्यां परिणिनाय । सापि छायेव तमनुसरन्ती गृहकर्मतत्परा दिनान्यनैषीत् । जिनधर्माचरणमस्य परम्पराप्राप्तम् । अस्य पितामहेनार्जुनशाहेन दशपुरे जिनालयो निर्मापितस्तत्र सारंगस्तस्य धर्मपत्नी च स्फटिकमयीं प्रभुप्रतिमामपूपुजत् प्रतिदिनम् । श्रीशत्रुञ्जयसम्मेतशिखरादिषु तीर्थस्थलेषु संघायोजनं कृत्वा प्रभूतं पुण्यमाससाद । स्वामिवात्सल्यं विधाय संघस्थितेभ्य: सुवर्णमुद्रा अर्पयामास । एवमनुदिनं धार्मिकेष्वेव कर्मस्वनेन धनव्ययमपरिमितं कृत्वाऽक्षयं पुण्यमलम्भि ।

सारंगे मन्त्रिपदान्निवृत्ते सर्वकर्मक्षमोऽसौ चन्द्रो मन्त्रिपदं लेभे । यश्चामात्यपदे चन्द्रसेननाम्ना प्रथितो बभूव । अस्य चत्वार: सूनव: सामदानविधिभेदविग्रहा: सर्वसिद्धियुता उपाया इव विरेजिरे ।

स्वकृतसुकृतबलादेकदा विहरन्नाचार्य: श्रीकक्कसूरिर्दशपुरमयात् । श्रीसंघश्च भव्यमस्य स्वागतं समपादयत् । मन्त्रिणा चन्द्रसेनेनात्र नगरप्रवेशे प्रभावनायाञ्च सपादलक्षमुद्रिका विनियुक्ता: । प्रारंभिकं देशनं दत्त्वा सूरीश्वरस्तदनु धर्मप्रचाराय प्रतिदिनं व्याख्यानपरिपाटीमुररीचकार । यदाऽसौ संसारस्यासारतां त्यागस्योपादेयतामात्मकल्याणस्य चावश्यकतां यथाशास्त्रमवर्णयत्तदा तद्वर्णनश्रवणसमासक्तचेतसो भावुका गानलुब्धा मृगा इव मन्त्रमुग्धा बभूवु: । बुद्धे: फलं तत्त्वविचारणञ्चेति मत्वाऽलभ्येषु साधनेषु दैववशान्मिलितेष्वात्मश्रेय:-संपादनमेव सर्वजनानां नितान्तमभिलषणीयं ममेति विचार्य संसारप्रपञ्चेभ्य आत्मानमुन्मुच्य कल्याणपरंपरायै सूरीश्वरचरणकमलशुश्रूषणं दीक्षाग्रहणमेव च विधेयमिति निरणैषीत् । अन्ते च पुत्रेभ्यो व्यवहारभारं समर्प्य समुचितां बुद्धिमुपदिश्य सप्तदशभि: श्रावकैरष्टभिश्च श्राविकाभि: शुभे दिने दीक्षामग्रहीत् चन्द्रसेन: । पश्चाच्च पद्मप्रभनाम्ना प्रसिद्धो बभूव ।

निसर्गत एव तीक्ष्णबुद्धिरसौ पद्मप्रभ: सूरीश्वरानुपमकृपया श्रद्धाभक्तिविनयोपपन्नमानसो न्यायव्याकरणकाव्यकोषादीन्यध्यैत । सर्वसिद्धान्तमर्मपारग: सहस्रांशुरिव वादिव्रजस्य नितान्तं दु:सहो बभूव । सर्वथाऽयमाचार्यपदसमुचित इति कृत्वाऽचार्योऽस्मै गुरुपरम्पराप्राप्तविद्यामन्त्राम्नायादीनि गूढतराण्यपि विततार तदीयगुणगौरववशीभूतचेता: । योग्यताञ्चालोच्य पण्डितवाचनाचार्योपाध्यायपदवीविभूषितं तं व्याघ्रपुरे वाघाशाहेनानुष्ठिते महामहोत्सवे देवगुप्तसूरीति नाम विधाय स्वपदे प्रतिष्ठापयामास ।

पूर्वाचार्यपरम्परामनुमान्य वादिमानविमर्दक: शासनहितमात्रतत्परोऽसौ सूरीश्वरो विहरन् पावागढमाययौ । मध्येमार्गं मृगयायै गच्छन् प्रतिहारजातीयो लाधाराव: समगच्छत । तदीयं भावं स्वचेतसि समालोच्य अहिंसाधर्मतत्त्वमुपदिश्य तं जिनधर्मानुरागिणमकरोत् । उपकेशवंशे संमेलनमस्य कृत्वा तद्गौरवमवर्धयत् । घटनेयं वैक्रमे १०२६ तमेऽब्दे इति पट्टावलीकारा आहु: ।

अस्य वंशे दुल्लारावेण चिक्कणरसस्य ( गुंदेति भाषायाम् ) व्यापार: कृतस्ततस्तदीया परम्परा गुंदेचा नाम्ना प्रथिता बभूव । अस्या जातेरपि गंगोलिया-नागोरी-मच्छा-गुंदगुंदा-रामानिया-चामवदादय: प्रभूता:

शाखाः प्रशाखाश्च विस्तृताः । यत्र लब्धजनिभिर्महापुरुषैस्तीर्थसेवासंघायोजनधर्मशालानिर्माणादीनि, सत्कर्माणि, शौर्यसंपन्नानि च जगतीतलविश्रुतानि कर्माणि विहितान्यासन् ।

विविधविद्याविभावितदिङ्मण्डलेन शिष्यगणेन समन्वितः सूरीश्वरोऽलौकिकचमत्कारचिन्तामणिनिभां प्रभाविकतां प्रदर्शयन् शिवगढ-जावलीपुर-भिन्नमाल-सत्यपुर-कोरटपुरादिषु भावुकानां धर्मप्रचुरां भावनामुत्तेजयन् क्रमेण चंद्रावतीमाययौ । जिनधर्मपरायणः प्राग्वटवंशीयो भूताशाहः श्रीसंघसमन्वितो भव्यमस्य स्वागतं व्यधात् । चतुर्मासाधिवासार्थमभ्यर्थयामास । तदनुमान्य तत्रैव स्थितिमङ्गीचकाराचार्यवर्यः । धर्मतत्त्वावबोधनपराणि प्रारब्धानि व्याख्यानानि श्रोतृणां चेतांसि चमच्चक्रुः । समाप्ते चतुर्मासे सर्वत्रामंत्रणानि प्रेषयित्वा कृतप्रस्थानमंगलः शुभे दिने श्रीशत्रुञ्जययात्रायै संघं निष्कासयामास । तत्र गत्वाऽष्टान्हिकामहोत्सवं दर्शनस्पर्शनादिकं विधाय स्वजातीयेभ्योऽन्येभ्यो वस्त्राभरणादिकं ददौ । दीनेभ्यश्चान्नदानादिकम् । पुत्रेभ्यो व्यवहारभारं समर्प्यैकादशभिर्भावुकैः सह परमपवित्रे तीर्थे सूरीश्वरवरदहस्तेनात्मकल्याणसाधिकामग्रहीद् भगवतीं दीक्षाम् । विनयरुचिनाम्ना प्रसिद्धमगमत् । आचार्यश्च कच्छसिन्धादिषु देशेष्वपूर्वं धर्मप्रचारं कृत्वा पञ्चनदप्रान्तमयासीद्विहरन् । नवदीक्षितो ज्ञानाभिलाषुको मुनिरसौ विनयरुचिः प्राक्तनस्य ज्ञानावरणीयकर्मणः प्राबल्येन कृतपरिश्रमो दिवारटितमप्यध्ययनं रात्रौ विसस्मार । वर्षावधिकालेन केवलं प्रतिक्रमणावश्यकमध्ययनं महता कष्टेन संपादितम् । तथापि कृतोत्साहः स रात्रिन्दिवमधीतं रटति स्म पुनः पुनः । रात्रौ महता स्वरेण घोषणेन निद्रामलभमाना अन्ये मुनयस्त्रेसुः । तत्रैकेनावादि मुने ! प्रत्यहमेवंविधेन रटनेनापि न ते विद्यालाभः, कथमीदृशस्त्वं कस्मैचिद् राज्ञे धर्मोपदेशं करिष्यसि ? उपदेशाभावे कथञ्च शासनशुश्रूषाऽपि त्वया कर्तुं शक्या ? तेन सप्रश्रयमवोचि-भवद्विधानां शुभाशीर्वादेनैवाहं मदीयं ज्ञानाध्ययनमात्मसाद्विधास्याम्येवेति मदीया दृढा बुद्धिः, एवं विनयरुचिरं समुचितमुत्तरं दत्वा रात्रौ देवसेवायां निरतस्य ज्ञानध्यानं कुर्वतः सूरीश्वरस्य समीपमुपेत्य साञ्जलिबन्धं व्यजिज्ञपद् भगवन् ? किमिदं मया पूर्वजन्मनि दुष्कृतमाचरितं येनात्र कृतप्रयत्नोऽपि सर्वथा निष्फलो भवामि । अवश्यमेव विधायानुग्रहं यथा मया शक्यते ज्ञानोपार्जनं कर्तुं तथैवोपायं कञ्चिद् दर्शयतु करुणालयो भवान् । विनयान्वितं भावगभीरमेतदीयं समाकर्ण्य वचः सूरीश्वरः कल्याणिन् ! गच्छ काश्मीरान् । आराधय वाग्देवतामनुदिनमेकमनाः, इष्टसिद्धिस्तेऽवश्यं भविष्यतीत्युक्त्वा मन्त्रपुरःसरमनुष्ठानप्रकारमवोचत् । प्राप्य च गुरोराज्ञां कतिपयैर्मुनिभिः सह व्यहार्षीदसौ विनयरुचिः । गत्वा चातन्द्रितः सावधानेन मनसा चउविहारोपवासानेकविंशतिदिनानि कृत्वा भगवतीमाराधयामास सरस्वतीम् । तदीयशुश्रूषणप्रसन्नहृदया साऽदृश्यरूपेणोपस्थिता वरं ब्रूहीत्यवादीत् । भगवति ! किमन्यदहं याचे ! केवलं विद्यालाभ एव मेऽभिप्रेतः, ज्ञानं च मे कदापि न स्यात् कुण्ठितमित्येव प्रणतिसहितं याचे । तथाऽस्त्वित्युक्त्वा सा यथागतं ययौ । समाप्याराधनमसौ यत्रावशिष्टा मुनयस्तस्थुस्तत्र नगराद् बहिः समागत उपवासपारणामकरोत् । यस्य मुहुर्मुहुर्घोषणेनापि शास्त्रज्ञानं दुर्लभमभूत् , तस्यैकवारमालोचनेनाप्रतिहतगति वाग्वैभवविद्योतितं ज्ञानं सर्वजनचेतश्चमत्कारजनकं समुत्पन्नं भगवत्याः कृपाकटाक्षेन ।

अस्योत्कर्षस्यासहिष्णवो ब्राह्मणा वादेन विजेतुं समीपमेत्य गीर्वाणगिरा धर्मविषयकान् प्रश्नांश्चक्रुः । परं सयुक्तिकं सशास्त्रमुत्तरमासाद्य मन्दाक्षमुद्रितमानसास्तत्प्रभावोपहततेजसस्तदीयव्याख्यानश्रवणसमुत्सुकास्तदर्थं सविनयं ययाचिरे । मुनिरपि सुविशदं धर्मस्वरूपं निरूप्य जिनधर्मसेवनं प्रति मानसानि तेषां समाचकर्ष । तदनु सूरीश्वरपार्श्वमेत्य सर्वं निजमुदन्तं श्रावयामास । येन स आचार्योऽधिकं तुतोष ।

एवं पञ्चनदप्रान्ते नूतनां धर्मक्रान्तिं विदधदसौ सूरीश्वरः श्रीपार्श्वनाथस्य कल्याणभूमेः स्पर्शनार्थं वाराणसीमगमत् । तत्र दर्शनं च विधाय कतिपयदिनान्यत्यवाहयत् । एकदा सूरीश्वरादिष्टो विनयरुचिः

सभायां दार्शनिकविषयमादाय तुलनात्मकदृष्ट्या जिनसिद्धान्तस्य सर्वजनोपादेयत्वमवर्णयत्। यथार्थमप्येतदीयं सिद्धान्तं वाराणस्यां विप्रसमूहसमुपजुष्टायां को नाम यथार्थत्वेनावेदयेत्। अतस्ते जिनश्रमणकथितं सिद्धान्तं शास्त्रप्रमाणमनुसृत्यैव कश्चित् श्रमणः स्वसिद्धान्तत्वेन प्रतिपादयेत्तेन सह वयमेवा शास्त्रार्थाय सज्जाः स्मेत्यूचुः। तदनु मध्यस्थानामध्यक्षत्वे विनयरुचेर्ब्राह्मणसमाजस्य च शास्त्रार्थः प्रारब्धः। वैदिकी हिंसा हिंसा न भवतीति वादिनः पूर्वपक्षो विनयरुचिना सशास्त्रं खण्डितः, येन स नताननो मन्त्रप्रतिरुद्धविषवेगो भोगीव महतीं त्रपामवाप। तत्रत्येनोपदेशीयेन श्रीसंघेन सहर्षं मुनये विनयरुचये पण्डितपदं दत्तम्। सूरीश्वरोऽपि चतुर्मासिकीं तत्र स्थितिमङ्गीचकार श्रीसंघस्यादरातिशयमनुमान्य। बहवो ब्राह्मणाश्च सूरीश्वरस्यापूर्ववाग्वैभवप्रभावमनुभूय तदनुयायिनो बभूवुः। येन शासनसमुन्नतिरधिकप्रचारा सर्वजनश्लाघनीया च समजनिष्ट।

एवमत्र वाराणस्यामपि जिनधर्मप्रचारं विधाय विहरणक्रमेणाचार्यवर्यः सशिष्यो मथुरामाययौ। श्रीसंघेनापूर्वसमारोहेण विहितमस्योदाहरणीयं स्वागतम्। तदभ्यर्थनामनुमान्यात्र चतुर्मासावस्थानं निश्चितम्। तदानीन्तने काले बौद्धधर्मप्रचारः शैथिल्यं प्राप्तो, ब्राह्मणधर्मश्च वाराणसीशास्त्रार्थश्रवणसमनन्तरमेव निस्तेजस्को बभूव। बलाहगोत्रीयः शादाशाहो लाधाशाहश्च श्रुतज्ञानभक्तिनिमित्तं सपादलक्षपरिमितं धनं विन्ययुङ्क्ताम्। तेन धनव्ययेनागमपुस्तकानि लेखयित्वा ज्ञानकोशेऽस्थापयत्। सूरीश्वरोपदेशप्रबुद्धमानसाः सप्तसंख्यका जना दीक्षोद्यता बभूवुः। दीक्षाञ्च दत्वा सर्वान् धर्मलाभाशीर्वादेन संभाव्य ततो व्यहार्षीत्।

अथ क्रमशो विहरन्नाचार्यवर्यो धर्मोपदेशेन सर्वत्र धार्मिकमुत्कर्षमभिवर्धयन्नजयगढनगरमगमत्। ततश्च मरुधरप्रान्त इतस्ततो विजहार। विभागशः कृता मुनयोऽपि समीपवर्तिषु ग्रामेषु धर्मप्रचारार्थं विहरन्तस्तदनु नगरे संगता बभूवुः। तत्रोपाध्यायो विनयरुचिर्गुरोराज्ञां प्राप्य शाकम्भरीमभिप्रतस्थे। सरस्वतीदत्तवरप्रसादोऽसौ सर्वैर्भावुकैः सानन्दं नगरं प्रवेशितो मर्मतत्त्वप्रतिपादनपरं सकलजनमनोरञ्जकं व्याख्यानमदात्। एतदीयमस्खलितं महाप्रभावं व्याख्यानवो ज्ञात्वाऽकारणाविष्कृतवैरदारुणा वाममार्गिणो जिनधर्मप्रचारका एते श्रमणा जनान् भ्रमे पातयन्ति नास्तिकाः सत्यधर्मविनिन्दका उपेक्षणीया एवेति सर्वत्र [illegible]यामासुः। मुनेरस्य प्रभावातिशये विश्वसन्तो जैना राजसभायामेवोभयोः शास्त्रार्थप्रबन्धं कारयामासुः। सम्प्राप्ते च शास्त्रार्थसमये वाममार्गिणो [illegible] महदाडम्बरेण स्वमतप्रस्तावं चक्रुः किन्तु यत्र सरस्वत्या एव अनुग्रहस्तत्र को नाम पराभवितुं कुयात्। यतस्ते जिनधर्मस्य सिद्धान्तमनुमोदयामासुः। तेन जिनधर्मपताका दिगंगने रिङ्गन्ती व्यराजत।

आचार्यवर्यस्य शिष्या अपि महाप्रभावशालिनो बभूवुः। तत्र सोमसुन्दरमुनेश्चरितमुदाहरणीयमिति कृत्वा प्रदर्श्यते। एकस्मिन समये सूरीश्वरः शिष्यानागमग्रन्थमध्यापयत्तदाऽष्टमस्य नन्दीश्वरद्वीपस्य प्रासङ्गिकं वर्णनमायातम्। तत्र द्विपञ्चाशत्संख्यकानां जिनालयानां हृदयंगमं वर्णनमाचार्येण रुचिरया वाचा विहितम्। सादरमिदं समाकर्ण्य वर्णनं समीपस्थः सोमसुन्दरो मुनिः सविनयमवादीद् भगवन्। सर्वेषामेषां जिनालयानां यात्रां सम्पाद्य जीवनस्य कृतार्थतामभिलषामीति। देवयोनिसंचरणार्हेऽत्र द्वीपे मानवानां गतिरेवात्र दुर्लभेति सूरीश्वरगदितमाकर्ण्य कञ्चिदुपायमत्रभवान् मे दर्शयतु येन ममेच्छा स्याफलादिति सविनयमसौ निरतमवोचत्। आकाशगामिन्या विद्यया सम्यग्दृष्टिदेवाराधनेन वा तत्र गन्तुं शक्तिः प्राप्यते। तत्र संप्राप्तेनैकेन केनचिदुपायेन तेऽभिमतसिद्धिर्भविष्यति। सादरं निशम्य गुरुवचोऽसौ तदारभ्य षण्मासावधिकमाष्टमिकं तपश्चचार। तेन च सम्यग्दृष्टिदेवमाराधयामास। ततः पूर्वजन्मन्येतत्संपादितसाहाय्येन धर्माचरणे दृढमनाः कश्चित् सजातीयः पूर्वकृतमुपकारं स्मरन् प्रत्युपकर्तुमस्य संमुखो भूत्वावादीत्—मुने! भवत्कृतोपकारेण मे देवयोनिप्राप्तिरतः कर्तव्यं किंचिन्मामादीशतु येनाहं ऋणमुक्तः स्यामिति कथितं श्रुत्वा नन्दीश्वरद्वीपस्थितानां जिनालयानां दर्शनमहमभिलषामीति तं जगाद सोमसुन्दरः। मम पीठमारुह्य सुखेन तत्र गत्वा संपाद्य

यात्रां प्रतिनिवर्ततां भवान् इत्युक्त्वा तमारोप्यपीठमयं जंबुद्वीपः, अयं लवणोदधिः अतः परं धातकीखण्डः एवं मार्गागतान् द्वीपसागरान् दर्शयन् प्रमाणं सूर्याचन्द्रमसोर्गतिप्रदेशमपि वर्णयन्निक्षुसमुद्रादनन्तरं नन्दीश्वरद्वीपमाजगाम । मध्यमस्य गत्वाञ्जनगिरावावतारयत् । अत्र यात्रां विधाय देवादेशेन सुरभिपुष्पमादायपुनस्तथैव प्रतिन्यवर्तत । देवोऽसौ गुरुनिवासस्थलेऽवतार्य वं यथागतं ययौ । चरणकमलवन्दनं कृत्वा भवत्कृपया मे मनोरथः फलित इत्युक्त्वा तदेव पुष्पं तत्संमुखं स्थापयामास । देवप्रसादरूपस्यास्य पुष्पस्य रत्नमयस्य वर्णगन्धरसस्पर्शाश्चिरकालादपि तथैवासान । प्रमुदितान्तरंगः सूरीश्वरः सभायां नन्दीश्वरद्वीपवर्णनाय तमादिशत । असौ च नमस्कृत्य तं श्रोतृनुद्दिश्योवाच–भव्याः ! द्वीपोऽयं १६३८४००००० योजनपरिमितो दृश्यते । अस्य मध्ये चतुर्दिक्षु चत्वारोऽञ्जनगिरयः । प्रतिपर्वतमत्र १००० योजनपरिमितायां भूमौ ८४००० योजनप्रमाणोच्छ्रया भूमिः । उपरितले नीलरत्नखचितं यत्र भव्यं सिद्धायतनं विराजते । यद् दृष्ट्वा प्रमुदितमानसोऽहमभवम् । यच्च शतयोजनविस्तीर्णं पञ्चशतयोजनायामं द्विसप्ततियोजनोच्छ्रायं विद्योतते । चतुर्दिक्षु चत्वारि भव्यानि द्वाराणि । चतुर्णां मण्डपानामग्रे चत्वारः प्रक्षेपमण्डपाः । तन्मध्ये रत्नखचितमाधारपीठमास्ते । तदुपरि सिंहासनं सूक्ष्मवस्त्राच्छादितं वज्रांकुशसहितञ्च विराजते । यत्रांकुशे घटप्रमाणकानि मुक्ताफलानि विद्यन्ते । प्रक्षेपमण्डपस्याग्रे एकैकः स्तूपः । तत्र चतुर्दिक्षु रत्नग्रथितान्याधारपीठानि यत्र पद्मासनस्था जिनप्रतिमाः । यासां दर्शने न मयाऽत्मा प्लावितः । ताश्च स्तूपसंमुखा विराजन्ते । प्रतिस्तूपं चत्वारि रत्नजटितान्याधारपीठानि । तत्र रत्नप्रभोद्भासितसर्वाङ्गाश्चैत्यवृक्षाः संदृश्यन्ते । तत्पुरोऽष्टयोजनप्रमाणकं मणिपीठम् । अत्र सहस्त्रोपध्वजयुक्तो महेन्द्रध्वजश्चतुः पुष्पष्टियोजनोच्छ्रायो नभस्युड्डयते । तदग्रे नन्दापुष्करानाम्न्यो वापिका वर्तन्ते । ताश्च शतयोजनायामाः पञ्चाशद्योजनविस्तीर्णा दशयोजनगभीराः कमलकदम्बविराजिता ध्वजतोरणछत्रचामरादिभिरलंकृता द्रष्टॄणां मनांसि मोदयन्ति । तत ऊर्ध्वं प्रत्येकं वनखण्डम् । यस्य वर्णनं वाचामविषयम् । तस्य प्रतिदिशं ४००० मण्डलाकाराणि, ४००० चतुष्कोणाकृतीनि चासनानि सन्ति यत्र देवा देवांगनाश्च यात्रार्थमायाताः संविशन्ति । सर्वमिदमेकस्य चैत्यालयस्य बहिःस्थं वर्णनम् । चैत्यालयस्यान्तः षोडशयोजनपरिमितं मणिपीठम् । तदुपरि तावानेव देवच्छदः ।

यत्र शान्तमुद्राः पद्मासनस्था वीतरागभावनाभाविता १०८ जिनप्रतिमाः । यासां दर्शनेन मान्तरात्माऽनन्दसन्दोहसंभृतः समजनि । देवेन सह द्वितीयमञ्जनगिरिमथां तत्र पूर्ववदेव सर्वं दृष्टवान् । तथैव तृतीये चतुर्थे च । सर्वत्र दर्शनचैत्यवन्दनादिकं सम्पाद्यात्मनः कृतार्थतामन्वभवम् । अथ प्रतिपर्वतं चतुर्दिक्षु लक्षयोजनायामाः पञ्चाशत्सहस्रयोजनविस्तीर्णं सहस्रयोजनगभीरा वाप्यश्चतस्रः सन्ति । तन्मध्ये दधिमुखनामा पर्वतः । तत्र श्वेतरत्नैस्तलमास्तृतम् । अर्थात् षोडश वापिकाः षोडश दधिमुखाः पर्वताः सन्ति । तत्र च षोडश चैत्यालया अञ्जनगिरिवर्णने यथा वर्णितास्तथैव विद्योतन्ते । षोडशानां वापिकानामन्तरे द्वौ द्वौ कनकगिरी इति कृत्वा ते द्वात्रिंशत्संख्यकाः कनकगिरयः । येषां कनकमयानि सानूनि सर्वत्र प्रकाशन्ते । तेषु तत्संख्याकानि चैत्यायतनानि । द्विपञ्चाशत्संख्यकपर्वतातिरिक्ताश्चत्वारो रत्नमयाः पर्वताः । तेषां प्रतिदिशं मिलित्वा षोडश राजधान्योऽवलोक्यन्ते । सर्वमिदं सम्यक् दृष्ट्वाऽलौकिकानन्दमग्नस्तत्रैव स्थितिं कुर्यामिति विचारमकरवम् । किन्तु प्रतिनिवर्तनमावश्यकं मां न्यषेधयत् । एतत्कथितं नन्दीश्वरद्वीपवर्णनं सर्वपापौघहरं निशम्य श्रीसंघस्तमभिननन्द । सर्वे च तत्र समधिकश्रद्धालवो बभूवुः । अयं सर्वत्र विहृत्य स्वप्रभावमहिम्ना जनान् जिनधर्मदीक्षितान् विधाय शासनगौरवमभिवर्धयामास ।

श्रीमद्भगवतो महावीरस्य परंपरायां चतुरशीतिसंख्याका गच्छा इति कथ्यन्ते । इदं परंपरायातम् । इदानीमत्र शतत्रयादधिका संख्या विद्यते । एषु संदेशुनामकः कश्चिदेको गच्छः । अत्र महामहिममहनीयकीर्तय

श्वरसूरि-यशोभद्रसूरि-शालिभद्रसूरि-सुमतिसूरयश्च महाशासनप्रभावका आचार्या बभूवुः। तत्र यशोभद्रसूरेश्चरितमधिकं चमत्कारजनकं पाठकानाञ्च मनोरञ्जकमिति कृत्वा संक्षेपेणात्र लिख्यते।

## श्री यशोभद्रसूरिचरितम्

सर्वगुणजेगीयमानकीर्तिरमलविद्याविद्योतितदिङ्मण्डल आचार्यः श्रीयशोभद्रसूरिर्मारवाडदेशे पलासीग्रामवास्तव्यः प्राग्वटवंशालंकारभूतश्चासीत्। अस्य पुण्यसारनामा जनकः माता च गुणसुन्दरी निखिलगुणनिकेतना। वैक्रमे ९५७ तमेऽब्दे जनिमलभतासौ। अस्य सौधर्मेति नामकरणमभूत्।

एकदा सांढेरागच्छीयस्याचार्यः श्रीश्वरसूरिः पञ्चशतसंख्यकैः शिष्यैः सहितो विहरन् धर्मप्रचारमकरोत्। विहरणक्रमेण मुंडाराग्राममाजगाम। स्वस्यानन्तरं पट्टधरस्य समुचितस्य शिष्यस्याभावेन खिन्नमानसस्तत्र बदरीदेवीमाराधयामास। समुपस्थिता च सा पात्रे सूरिणावतारिता। तदनु तां पप्रच्छ-भगवति ! मदीयोऽयं गच्छो विच्छेदमाप्स्यति, कश्चित् सच्छिष्यलाभो वा भविष्यतीति। पलासीग्रामवासी शाहपुण्यसारस्य गुणसुन्दर्याश्च पुत्रः पाठशालामधीयानो मसीपात्रभंजनेन सहपाठिना ब्राह्मणबालकेन कलहायितः, ब्राह्मणबालकेन तदेव मसीपात्रं याचितम्। असौ च सुवर्णस्य रूप्यस्य च ददामीति तमवादीत्। मदीयमेव देहीति ब्रुवन्नसौ तं बहुभर्त्सयत्। विवदमानौ तौ गुरुसमीपं गतौ तेन च बोधितौ। तथाप्यसौ स्वीयं दुराग्रहं न तत्याज। न केवलमिदमपि तु प्रतिज्ञामप्यकार्षीद्-विप्रपुत्र धुरि दई गाली क्रूर करंबु तुम्ह कपाली। जु षउ तु वांमण सही नहीं तरी भरइउ भणिजे भई। सौधर्मोऽपि रोषाविष्टस्तमब्रवीत्-तवते घइ वोलिउ सुधर्म जोजे वांमण सही नहीं तरी भरइउ भणिजे भई। सौधर्मोऽपि रोषाविष्टस्तमब्रवीत्-तवते घइ वोलिउ सुधर्म जोजे वांमण माहरुकर्म। मूञ्रो न मारु तुज्ञ प्राणिउ, नहींवर नहीं सुघड वणियो। लवण्यसमयकृतयशोभद्रसूरिरास। एवंविधः सौधर्म एवानेतव्यः। दीक्षितोऽसौ भवदीयगच्छभारं वक्ष्यतीत्युक्त्वसा देवी यथागतमगमत्। सा च तत्र गत्वा सौधर्ममातरमुपदिश्य तमदीक्षयत्। षण्मासानन्तरमेवासौ सर्वगुणसंपत्समन्वितः सर्वागमपारगश्च बभूव। सूरीश्वरश्च मुंडाराग्राममेत्य द्वादशगोत्रीयैः सह बदरीमाराधयामास। सा संघसमक्षमेव सौधर्मकपाले तिलकं विधाय पुष्पमालामारोप्य सूरिपदं दत्वा यशोभद्रसूरीति नाम च कृत्वाऽदृश्यतामगात्।

अथाचार्यः श्रीयशोभद्रसूरिर्विहरन् पालीनगरमगच्छत्। श्रीसंघेन च सत्कृतः। कदाचित् शौचनिवृत्यर्थं सूर्यमन्दिरस्यापरपार्श्वमुपाविशत्। भगवान् सूर्यश्च तदीयां महाप्रभावपूर्णां तपस्यामालक्ष्य तत्समीपं नीलमरकतपद्मरागादीनि रत्नानि प्राक्षिपत्। तथाप्यसौ निःस्पृहो न जग्राह। ततश्च सूर्यो वृष्टिं पातयामासासूरिश्च सूर्यमन्दिरमाययौ। द्वारञ्च तेनावृतम्। किंचिन्मत्सकाशाद् याचस्वेत्युक्तः सूक्ष्मजीवदर्शनाय चूर्णं देहीत्यवोचत्। द्वितीयेऽह्नि स सर्वविद्याराधनप्रकारप्रदर्शकं ग्रन्थं यन्त्रयुक्तं, अंजनशलाकामेकां च सूरिनिवासस्थानं गत्वा तस्मा अयच्छत्। तत्रोपदिष्टाः सर्वा अनवविद्या विद्या आत्मसाच्चकार। ततस्तदेव पुस्तकं सूर्यमन्दिर एव स्थापयितुं बलभद्रमुनिमप्रेषयत्। अनेन च तस्मात् पत्रत्रयं चोरितम्। मन्दिरे निधायोच्चैररुदत्। सूर्येणोक्तम्-मुने ! मा रुदिहि मया दत्तमेव तत् पत्रत्रयमतो मा ते शोको भवत्विति।

यशोभद्रसूरीश्वरो नवनिधि-अष्टसिद्धि-आकाशगामिनी-इत्याद्या विविधा विद्या वशीचकार। तत्प्रभावेण प्रतिदिनमसौ शत्रुञ्जय-रैवतक-सम्मेतशिखरादीनां तीर्थानां यात्रां विधाय भोजनमकरोत्।

अथ पालीनगराद्विहरन् साढेरावग्रामं मन्दिरप्रतिष्ठार्थमाजगाम। दर्शनार्थमागतानां जनानां कृते प्रारब्धे पाकनिर्माणे घृतं प्रमाणापेक्षया न्यूनतां गतम्। श्रुत्वैतत्सूरिरन्यधर्मावलम्बिनो धनिकस्य गृहाद् घृतमानाययामास। कार्ये च समाप्ते व्यवस्थापकास्तस्य मूल्यप्रदानाय तद्गृहं ययुः। तेषु च मूल्यं ददत्सु

तेनावोचि-मया घृतमेव न दत्तं मूल्यग्रहणस्य का कथेत्युक्त्वा-घृतपात्राणि पश्यति तदा सर्वाण्येव तानि घृतपूर्णान्यपश्यत्। सूरेरेवायं चमत्कार इति निश्चिन्वानोऽसौ सूरिसमीपमेत्योपदेशं श्रुत्वा दीक्षामग्रहीत्।

एकस्मिन् समये आघाट-रहेट-कविलाण-मैसर-संभरि-नगरे युगपदेव प्रतिष्ठामूहूर्तं दत्त्वा सममेव स्वहस्तेन प्रतिष्ठाकार्यं स्वविद्याबलेन विविधरूपधरः संपादयामास।

एवमाघाटनगरश्रेष्ठिना निष्कासितेन संघेन सह अणहिलपुरं ( पाटणेति प्रसिद्धमधुना ) जगाम। राज्ञा मूलराजेन सत्कृतः। तदनु स्वप्रासादे द्वारमावृत्य स्थापितोऽपि लघुशरीरेण रन्ध्रान्निर्गत्य राज्ञे धर्मलाभाशीर्वादमदात्। राजा च चमत्कारजनकमस्य वृत्तं दृष्ट्वा विस्मितो बभूव। एवमस्यालौकिकं चरितं सर्वजनमनोमोदकं जिनशासनप्रभावकमासीत्।

## एतद्विषये १५५७ वैक्रमेऽब्दे नाडोलाईग्रामेऽयं शिलालेखः।

## ॥९०॥ श्रीयशोभद्रसूरिगुरुपादुकाभ्यां नमः ॥

संवत् १५५७ वर्षे वैशाखमासे शुक्लपक्षे षष्ठ्यां तिथौ शुक्रवासरे पुनर्वसु ऋक्षप्राप्त चन्द्रयोगे श्रीसंडेरगच्छे। कलिकालगौतमावतार। समस्त भाविकजनमनोऽम्बुजविबोधनैकदिनकर। सकललब्धिनिधानयुगप्रधान। जितानेकवादीश्वरवृन्द। प्रणतानेकनरनायकमुकुटकोटिस्पृष्टपादारविन्द। श्रीसूर्य इव महाप्रसाद। चतुःषष्टिसुरेन्द्रसंगीयमानसाधुवाद। श्रीषंडेरकीयगणरक्षकावतंस। सुभद्राकुक्षिसरोवरराजहंसयशोवीर साधुकुलाम्बरनभोमणिसकलचारित्रचक्रवर्तिचक्रचूडामणि भ० प्रभुश्रीयशोभद्रसूरयः। तत्पट्टे श्रीचाहुमानवंशशृंगार। लब्धसमस्तनिरवद्यविद्याजलधिपार श्रीबदरीदेवीगुरुपदप्रसादस्वविमलकुलप्रबोधनैकप्राप्तपरमयशोवाद भ० श्रीशालिसूरिः त० श्रीसुमतिसूरिः। त० श्रीशांतिसूरिः। त० श्रीईश्वरसूरिः। एवं यथाक्रममनेकगुणमणिगणरोहणगिरीणां महासूरीणां वंशे पुनः श्रीशालिसूरिः। त० श्रीसुमतिसूरिः तत्पट्टालंकारहार भ० श्रीशांतिसूरिवराणां सपरिकराणां विजयराज्ये। अद्येह श्रीमेदपाटदेशे। श्रीसूर्यवंशीयमहाराजाधिराजश्रीशिलादित्यवंशे श्रीगुहिदत्तराउल श्रीबप्पाक श्रीखुम्माणादिमहाराजान्वये। राणाहमीरश्रीषेतसीह श्रीलषमसीहे। पुत्र श्रीमोकलमृगांकवंशोद्योतकारप्रतापमार्तण्डावतार। आसमुद्रमहिमण्डलाखण्डल। अतुलमहाबलराणाश्रीकुंभकर्णपुत्र राणाश्रीरायमलविजयमानप्राज्यराज्ये ततपुत्र महाकुमारश्रीपृथ्वीराजानुशासनात्। श्रीउपकेशवंशे रायभण्डारीगोत्रे राउल श्रीलाखणपुत्र श्री मं० दूदवंशे मं० मयूरसुत मं० साहूलहः। तत्पुत्राभ्यां मं० सीहासनदाभ्यां सद्बान्धव मं० कर्मसीधारालाखादि सकुटुम्बयुताभ्यां श्रीनन्दकुलवत्यां पुर्यां सं० ९६४ श्रीयशोभद्रसूरिमंत्रशक्तिसमानीतायां मं० सायरकारितायां देवकुलिकाधुद्धारितः सायरनाम श्रीजिनवसत्यां श्रीआदीश्वरस्य स्थापना कारिता कृताश्रीशान्तिसूरिपट्टे देवसुन्दर इत्यपरशिष्यनामभिः आ० श्रीईश्वरसूरिभिः इति लघुप्रशस्तिरियं लि. आचार्य श्रीईश्वरसूरिणा उत्कीर्णा सूत्रधारसोमाकेन ॥ शुभम् ॥

## अयं श्रीनाडोलाईग्रामस्य मन्दिरे विद्यत एवेदानीम् ॥

एवमस्य सूरीश्वरस्य बहवः शिष्याः स्वविद्याबलेन महाशासनाभ्युदयकर्मणि सहयोगं ददुः।

अथाचार्यः श्रीदेवगुप्तसूरीश्वरो विहरन्नागपुरमयात्। सभाजितश्च श्रीसंघेन चातुर्मासावधिकमुवास व्याख्यानदानेन समापिते चतुर्मासे १९ भावुका दीक्षां जगृहुः। बप्पनागगोत्रीयेण नाहराशाखीयेन दुर्गाशाहेन निर्मापितस्य भव्यस्य जिनालयस्य प्रतिष्ठाकार्यं समपादयत्। ततो मुग्धपुरमेदिनीपुरखटकुम्पनगरादिषु विहरन् सूरिरुपकेशपुरमागच्छत्। सुचन्तिगोत्रीयो लालाशाहो लक्षत्रयपरिमिताभिर्मुद्राभिरस्य नगरप्रवेशं कारयामास। सर्वांश्च धर्मव्याख्यानेन संतोष्य तत्रैवावात्सीत्। देवीसच्चायिकावचनमनुनान्योपाध्यायपद-

विभूषिताय विनयचन्द्रमुनये सूरिपदमयच्छत्। विक्रमस्य १०३३ तमे हायने आषाढे शुक्लप्रतिपदि डिडूगोत्रीयेण तेजसीशाहेनारब्धे सूरिपदमहोत्सवे सिद्धसूरिनाम्ना स्वपट्टे तं स्थापयामास। समुचितेभ्यः पद्वीप्रदानमप्यकृत। नवलक्षमुद्रा व्ययिता अत्र।

## वि० सं० १०३३ तः ] ४७ आचार्यः श्रीसिद्धसूरिः (दशमः) वि० सं० १०७४ प० ]

परमोपकारनिरतः सहस्ररश्मिरिव दुःसहप्रतापस्तपःक्षपितमनोविकारः सुधावर्षी कलानिधिरिव सर्वजगदाल्हादको जिनेश्वरगदितागममर्मपारदृश्वा जिनधर्मधुरंधर आचार्यः श्रीसिद्धसूरिः श्रीदेवगुप्तसूरीश्वरपट्टपदे प्रतिष्ठामलभत। असौ मेदपाटप्रान्तीयदेवपट्टनगरनिवासी सुचन्तीगोत्रीयश्च। पितास्य पुण्यकर्मरुचिश्चतरशाहो जननी च शीलसौजन्यवती भोलीदेवी। तयोरयं लाडुकनामा कुलदीपकः सूनुरासीत्। अस्य जनकः सुकृतसमासादितेन धनेन वारत्रयं शत्रुञ्जयरैवतकादीनां पापौघविध्वंसकानां तीर्थानां यात्रां, संघनिष्कासनं स्वजातीयेभ्यश्च सुवर्णमुद्रिकादिप्रदानञ्च कृत्वाऽक्षयं यशोराशिमवाप। श्रीशत्रुञ्जयतीर्थे भगवतः पार्श्वनाथस्य भव्यं जिनालयं निर्मापयामास। लक्षाधिकद्रव्यव्ययेन ज्ञानार्चनां कृत्वा ज्ञानकोषानस्थापयत्।

कालस्य कुटिला गतिरिति समृद्धिमस्यस्मिन् कुले भगवत्या लक्ष्म्या लाडुकस्य मानसेन प्राग्भवीयाशुभकर्मणा उदयेन सेवितं वैराग्यम्। परं दारिद्र्यमनुभवन्नप्यसौ न मनागपि धर्माचरणात् शिथिलादरोऽभूत्। धर्मेणैव प्राप्तव्यं सर्वं प्राप्यते नान्येनोपायेनेति स्वचेतस्यमन्यत।

एकदा योगविद्यानिपुणः कश्चिद् योगी देवपट्टनमायात् स च नानाविधान् भौतिकान् चमत्कारान् योगविद्यया दर्शयन् पौरान् स्वमतानुसरणाय समाचकर्ष। कतिपयदिवसानन्तरं परम्परया लाडुकस्य दारिद्र्यपीडितामवस्थां ज्ञात्वाऽसौ तद्गृहमाययौ। प्रवृत्ते च वार्तालापेऽस्य निःस्पृहत्वं निरभिमानित्वञ्चानुभूय परमाश्चर्यान्वितमानसो बभूव योगी। धर्मात् प्रलोभयितुमगादीत् वत्स! दारिद्र्यदलनसमर्थं मन्त्रं ते दास्यामि, यस्यानुष्ठानेन ते दुरवस्था नंक्ष्यति किन्तु जिनधर्मं त्यक्त्वा मदीयधर्मानुसरणं कर्तव्यमिति। जिनधर्मानुरागिणा तेनावोचि महात्मन्! यद्भावि तद्भवतु न खलु संपल्लाभमुद्दिश्य शाश्वतो जिनधर्मो मया कदापि त्यक्तव्यः। धर्मादेवार्थकामौ शक्येते लब्धुम्। कर्मण एवायं प्रभावः। बलिष्ठा हि कर्मणो गतिः। भगवतां तीर्थंकराणामपि कर्मण उपभोगः समासक्तः, का कथा मादृशस्याल्पजीवस्य। ज्ञानामृतोपदेशेन भवभयं नाशयन् परमकारुणिस्वभावः स्वधर्मधुरीण आचार्यः श्रीदेवगुप्तसूरीश्वर एवात्र सर्वसंपदां निधानमिति स एव मे जिनधर्ममात्रपरायणस्य गुरुरिति नान्यं गुरुं नान्यं च धर्ममाश्रये विषमेऽप्युपस्थिते प्राणसंकटेऽपि। तदीयं वचो निशम्य क्वासौ पूज्यवर्यः स आचार्यः! तत्समागमः शक्यते प्राप्तुं मयेत्यवादीत् तम्। अचिरकालभावी तत्समागमः, स खल्वत्रैव समागमिष्यतीति श्रुतं मया। भवानप्यत्रैव तावन्निवसतु। योगी च समाकर्ण्य तदुक्तं स्वस्थानमगात्।

अथ कदाचिद् गृहस्य संस्कारार्थं भूखनने विहिते लाडुकः प्राक्तनसुकृतप्रभावाद् द्रविणनिधानमक्षय्यमवाप। परमात्मविचारकुशलो नश्वरं धनं पुण्योपार्जनसाधनेषु सप्तसु क्षेत्रेषु न्ययुंक्त। स्वजातीयेषु ज्ञानप्रचारं दीनानामनाथानाञ्च दुःखनिवारणमेवमत्कर्तव्यमिति स्वावस्थया विचार्य तदन्वतिष्ठत्। भाग्यवशात्प्राप्तमिदं धनं वथैवोपयोक्तव्यं येनात्मकल्याणं साधयितुं शक्येतेति मुहुर्मुहुश्चिन्तयामास।

एवं समये व्यतीते पुण्यानुयोगात् पार्श्वकुलकमलदिवाकरो भव्यहृदयपुण्डरीकविबोधकः परमवन्दनीयचरणपंकजयुगल आचार्यः श्रीदेवगुप्तसूरीश्वरो देवपट्टनपुरमगात्। भक्तिरसभरितमानसो लाडुकः श्रीसंघेन

महास्य नगरप्रवेशमकारयत् । अथ योगी गुरुवर्यस्यागमनं विदित्वा लाडुकेन सार्द्धं सूरीश्वरसमीपमगमत् । आत्मनः कर्मणा सह संबन्धः कथं संपद्यत इत्यादिकां बहुविधां शंकां कृत्वा सिद्धान्तपूर्णं समुचितमुत्तरमाससादाचार्यसकाशात् । संसारं कारागृहं मन्यमानावुभौ च दीक्षोद्यतौ बभूवतुः । लाडुकोऽसौ महता प्रयासेन कौटुम्बिकान् प्रबोध्य भवविनाशिनीं दीक्षां योगिना साकमगृह्णात् । अस्य सोमसुन्दरेति नामकरणं कृतं सूरिणा । गुरुचरणभक्तिपरिपूरितमानसः शीघ्रमेवैकादशांगादीन्यागमशास्त्राण्यध्यैत । तदतिरिक्तम्-अध्यात्मवादनयवाद-परमाणुवादमन्त्रतन्त्रादिषु शास्त्रेषु परं प्रावीण्यमाससाद । आचार्यवर्यो विविधगुणविभूषितं गच्छभारवाहनक्षमं सोमसुन्दरं पारसशाखीयेन नेमाशाहेनानुष्ठिते महामहोत्सवे सर्वसंघानुमत्या स्वपदे प्रतिष्ठापयामास श्रीसिद्धसूरिनाम्ना । योगिराजश्च दीक्षितो धर्मरत्ननाम्ना प्रसिद्धः शतसंख्यकैः शिष्यैः सहितो गुरोराज्ञया सर्वत्र धर्मप्रचारं कुर्वन् प्रीतमानसेन सूरिणोपाध्यायपदेन भूषितः ।

समारोपितशासनकार्यभारः श्रीसिद्धसूरिर्विहरन्नेकदा सत्यपुरमभिप्रतस्थे । मार्गागतस्य कस्यचिद् देवीमन्दिरस्याभ्याशं संमिलितान् मानवान्, पशुहननोद्यतान् ददर्श । वधार्थमुपस्थापिता मूका दीनदीनाः पशवोऽपि दृष्टाः । करुणार्द्रचेताः सूरिर्भृशमुद्विविजे । त्वरितमेव तत्र गत्वा तानुद्दिश्यावादीत्-भव्या ! रुचिरवदना भवन्तः सर्वे महाप्रशस्तकुलोत्पन्ना आकृत्या विलोक्यन्ते । नेदं भवतां सर्वसत्वशिवंकराणामुचितं कर्म । नात्र भवन्तोऽपराध्यन्ति, कस्यचिद् मांसभक्षणशीलस्य संसर्गजन्यैव प्रवृत्तिरियम् । अतः स्वजातिकुलक्रममनुसरन्तः स्वमभिलषितं सुखेन सम्पादयन्तु । आत्महननतुल्यां प्रवृत्तिं च हिंसारूपां निरयमात्रफलां च दूरमुत्सारयन्तु । सौख्यसंवर्द्धकं मुनिवचः श्रुत्वा केचनात्र विरेमुः । केचिच्च महात्मन् ! देव्युपम्हारसमर्पणमिदं कुलपरम्परागतं कथं त्यक्तव्यं स्यात् । अस्मदीयपरम्पराचारपद्धतिमजानन् भवानेवात्रोपदेशदानेऽपराध्यति । स्वसुखमाराधयन् परोपकारधुरंधरो भवान् स्थानादस्मात् त्वरितमेवान्यत्र प्रयातु । प्राणिनश्चैते म्रियमाणाः सर्वजनाभिलषणीयं दुरापं स्वर्गमेव प्राप्स्यन्तीति सरोषं सगर्वञ्चोचुः । यद्येवमनेन हिंसनेनालभ्यः स्वर्गलाभस्तर्हि, भवतां किं नाभिलषणीयः स्वर्गः । स्वयमेवोपहारीभूताः प्राप्नुवन्तु स्वर्गम् । स्वकीयेनैव दृष्टान्तेन व्यवहरन्तु । एवं व्यवहारपरिपाटीमाश्रित्य तदनु शास्त्रप्रमाणैश्च तान् बोधयामास । दयाधर्मप्रचुरं वचनमाकर्ण्य पश्चात्तापदुःखदुःखितास्ते चौहानवीरमहारावप्रमुखाः सर्वे पशून् बन्धनस्थानादमुञ्चन् । पशवः सूरीश्वरमाशिषा संभावयन्तो मूकवाचा, स्वस्थानं गत्वा परमानन्दमवाप्नुवन् । सूरिश्च तान् धर्मतत्वमुपदिश्य जिनधर्मदीक्षां ग्राहयामास । विनयान्वितो महारावो मालपुरागमनमभ्यर्थयामास । अङ्गीकृत्य तद्भावनां सूरिस्तत्र कतिपयैः शिष्यैः सह ययौ । सर्वेभ्यो धर्मतत्वं तदाचरणसाधनानि च व्याख्यातानि । येन धर्मरुचिना महारावेण भव्यो जिनालयो निर्मापितः । यस्य प्रतिष्ठाविधिः सूरिणा वैक्रमे १०४५ तमे वर्षे माघशुक्लपूर्णिमायां विहितः ।

महारावस्य पुत्रः शिवनामा । तस्य च सूनुः सांवतः । असौ मनोवाक्कायकर्मभिर्जिनधर्माचरणपरायणो बभूव । तद्भक्तिभाववशीभूता देवी सच्चायिका गरुडमारुह्यार्धनिद्रितावस्थायामस्मै दर्शनमदात् । सा च कल्याणिन् ! गोबन्धनस्थलस्याऽधस्तादक्षयो निधिः । तं गृहीत्वा धर्मकार्योपयोगेनात्मानं कृतार्थं कुरु" इत्युक्त्वा विरराम । अर्द्धनिद्रितः केवलमसौ गरुडमद्राक्षीत् । तदनु सहसा तुमुलः शब्द उदचरत् । व्यक्तनिद्रो यावदितस्ततः पश्यति तावत्सोऽप्यन्तर्हितः । प्रबुद्धोऽसौ रात्रिशेषं प्रभोराराधनेनात्यवाहयत् । प्रातर्जिनमन्दिरं गत्वा गुरवे निवेदयामास । गुरुश्च तमभ्यनन्दत् । प्राप्तं धननिधिं शासनोत्कर्षे दीनानाथोद्धरणे न्ययुंक्त ।

यस्मिन् समये तस्य स्वप्नलाभस्तस्मिन्नेव समये धर्मपत्नी क्षत्रियकुलोत्पन्ना स्वप्ने पार्श्वप्रभुप्रतिमां ददर्श । उत्थाय स्वपतिं निवेदयामास । स च स्वकीयं स्वप्नवृत्तान्तमकथयत् । अयि भाग्यशालिनि ! कोऽप्य-

साधारणप्रभावो जीवस्त्वयि स्थितः। फलितास्ते मनोरथाः। धर्मेऽधिकां प्रीतिमावहेति तामगादीत्। व्यतीते च काले सा मंगलमूर्त्तिं कुमारमसूत। तस्य पारसेति नाम चकार। जनाश्च धर्मकर्मणि द्रव्यमुपयुञ्जानं तमब्रुवन् भोः कुतस्तवेयान् द्रव्यलाभः। भगवतो गरुडस्यैषः प्रभाव इति प्रत्युत्तरं प्राप्य तदनु तं गरुडेत्युपनाम्नाऽह्वयन्। एवञ्च तद्वंशजा गरुडजातीया इति प्रसिद्धाः। एवमेवात्र ओसवालवंशे हंसा-मच्छा-कागेत्यादिका जातयः प्रादुर्बभूवुः।

अथ पारसजन्मान्तरं केनचिन्निमित्तेन राज्ञा सह वैमनस्यमजनि। ततः सत्यपुरं विहाय स्त्रीपुत्र-सहितो नागपुरमसावर्द्धरात्र एवाभिप्रतस्थे। तद् ज्ञात्वा राज्ञा अश्वारूढाः प्रेषिता मध्ये च ते मिलित्वा राजसन्देशं श्रावयित्वा प्रतिनिवर्तयितुमयतन्त। तेन च तन्निषेधः कृतः। संजातक्रोधैस्तैन सह कलहायितम्। शस्त्रप्रहारभीषणं युद्धमभूत्। चत्वारस्ते भूमौ पतिताः प्राणांस्तत्यजुः। असौ सांवतः तीक्ष्णशस्त्रप्रहारच्छिन्न-गात्रो देहमुदसृजत। सतीभवितुमिच्छती सा शान्ता पुत्रस्नेहविह्वला वस्तुजातमेकीकृत्य फलवृद्धिनगर-मयासीत्। तत्र स्वज्ञातीयै रक्षित्वा न्यवात्सीत्। यत्र धर्मघोषसूरिणा पञ्चशतसंख्यकैः शिष्यैः सह चतुर्मासो विहितः। धर्ममयैकजीवना शान्ता पुत्रमुपलालयन्ती धर्मध्यानमेवाङ्गीचकार। एकदा रात्रौ देवी पद्मावती पारसमर्धनिद्रितं विबोध्यावोचत्। पारस! पूर्वस्यां दिशि करीरवृक्षस्य समीपे प्रकृत्या गोर्दुग्धं स्त्रवति तस्य तले श्रीपार्श्वनाथस्य श्यामवर्णा प्रतिमा विद्यते। यदा त्वं तत्र गत्वा द्रक्ष्यसि तदा तत्र पञ्चवर्णां पुष्पवृष्टिं पतितामेव द्रक्ष्यसि। देवीवचः श्रुत्वा तामब्रवीत्। भगवति! त्वदुक्तं सर्वमहं विधास्ये किन्तु मन्दिरनिर्माणार्थं धनं नास्ति। यत् किंचिद् वस्तु रात्रौ करीरवृक्षतले स्थापयित्वा प्रभाते तत्र गतस्तत्सर्वमेव सुवर्णं भविष्यति तत एव सर्वं सम्पाद्यमित्युक्त्वा साऽन्तर्दधे। स च प्रातरुत्थाय स्वप्नवृत्तं मात्रे कथयित्वा मांगलिकवाद्यघोषेण तत्स्थानं गत्वा यावद् भूखननं करोति तावत्तथैव श्यामवर्णां ददर्श प्रभुप्रतिमाम्। नीत्वा च शुभे स्थानेऽस्थापयत्। प्रारब्धं मन्दिरनिर्माणम्। समाप्ते तत्कार्ये सूरीश्वरपार्श्वमेत्य प्रतिष्ठायै निवेदयामास। तेनावोचि—भव्य! आचार्यः श्रीमद्देवगुप्तसूरिरधुना नागपुरे विराजते तमत्राह्वय। तेन सहैव मिलित्वा प्रतिष्ठाकार्यं करिष्यामीति वचः समाकर्ण्य नागपुरं गत्वा प्रार्थयामास फलवृद्धिमलंकर्तुम्। शुभे दिवसे सूरीश्वरस्तत्राजगाम। महता समारोहेणानन्देन च विक्रमस्य ११८१ तमे संवत्सरे माघशुक्लपूर्णिमायां प्रतिष्ठा विहिता। मन्दिरस्यावशिष्टं कार्यं नागपुरीयैः समापितं तदनु वादिनो देवगुप्तसूरीश्वरस्य वरदहस्तेन प्रतिष्ठाकार्यं संपन्नमभूत्। संप्रति फलौदी नगरे कश्चिदेतद्विषयको लेखो नास्त्येव तथापि निम्नलिखितः शिलालेखः समुपलभ्यः।

यथा—"संवत् १२२१ मार्गसिर सुदि ६ श्रीफलवर्द्धिकायां देवाधिदेवश्रीपार्श्वनाथचैत्ये श्रीप्राग्व-टवंशीय रोपिमुणि मं० दसाढ़ाभ्यो आत्मश्रेयार्थं श्रीचित्रकुटीयसिलफटसहितं चन्द्रको प्रदत्तः शुभम् भवतु"।
"बाबू० पूर्ण० सं० जैन लेख० सं० प्रथमखण्ड शि० ले० नं० ८७०"

भूरा-जातिः—नारपुरस्य शिवधर्माराधकः भूरसिंहनामा सेनाधिपतिर्ग्रामान्तरं गच्छन् संमुखमेव समा-गतान् साधून् विलोक्यापशकुनमनुमाय तानतर्जयत् तावदेव पश्चादागच्छन् परमानन्दसूरिर्दृष्टः। सूरिश्च सर्वं विदित्वा श्रमणाचारजिनधर्मस्वरूपादिकमवर्णयत्। श्रुत्वा च जिनधर्मस्वरूपं विशेषतो ज्ञातुमभ्यर्थनामकरोत्। सूरिश्च विशदं तत्स्वरूपमस्मै श्रावयामास। असौ च सन्तुष्टमानसो जिनधर्माराधको बभूव। नारपुरनगरे श्रीपार्श्वनाथमन्दिरं निरमापयत्। तस्य सप्त पुत्राः परमादरेण जिनधर्मानुरागिणः स्वाभ्युदयमकार्षुः। एतदीय-वंशपरम्परा भूराजात्या प्रथिता बभूव।

## जम्बुनागमुनिचरितम्।

आचार्यस्य श्रीसिद्धसूरेः शिष्योऽलौकिकचमत्कारपूर्णविद्यापारगो ज्योतिःशास्त्रकोविदो बभूव।

स्वविद्याबलेनासौ धर्मप्रचारं कुर्वन् मरुधरप्रान्ते लुद्रुया ( लोद्रवा ) नगरं ययौ । तत्रत्यः संघः सबहुमान-माहत्य निवेदयामास-भगवन् ! वयमत्र नगरे जिनमन्दिर-निर्माणाय प्रयतमाना ब्राह्मणानामुपद्रवेण विघ्नित्ता विफलमनोरथा जाताः । भवत्समीपेऽस्माकं साऽभिलाषा पूर्णा स्यादित्येव प्रार्थयामहे । भवंतः सर्वे मिलित्वा राजानमेतदर्थं निवेदयतेति जम्बुनागमुनेर्वचनं सादरं श्रुत्वा तत्र गत्वा मन्दिरनिमार्णार्थं भूमिं ययाचिरे । धर्मभावनां तेषां विदित्वा राज्ञा भूप्रदानं प्रतिश्रुतम् । मन्दिरनिर्माणार्थं भूमिखननमारब्धम् । किन्तु द्वेषबुद्धि-भिर्ब्राह्मणैस्तदुपरुद्धम् । इदं ज्ञात्वा मुनिरसौ तान् सप्रश्रयमगादीत्—भव्याः ! त्रिजगत्पूजनीयस्य परमाराध-नीयस्य भगवतो जिनदेवस्य मन्दिरनिर्माणे भवतां का क्षतिः ? अत्रोपरोधेन महत्पापाचरणं वो न न्याय्यम् । यदि च शास्त्राभिमानो भवतां तर्हि मनोनुकूलेन शास्त्रार्थेन परीक्षितव्यः । एवमेतदीयं गर्वपूर्णमिव वचो निशम्य जिनमुनयो दार्शनिका इति ज्योतिःशास्त्रवादेन सुखं जेतव्या इति मत्वा शास्त्रार्थोद्यता बभूवुः । उभयपक्षीयै राजा मध्यस्थत्वेन स्वीकृतः । तेन चोक्तम्-मदीयं वर्षफलादेशं कुर्वन्तु । यस्य विशेषतो भूतकालीनं सत्यं स एव पक्षो विजयी भविष्यतीति । सर्वैश्चाङ्गीकृतम् । ब्राह्मणै दैनंदिनीयं तत्कृतम् । मुनिना च प्रत्येकघटिकाया । राज्ञा च तन्नीत्वा कोषाध्यक्षाय समर्पितम् ।

जम्बुनागेन भाविफलमित्थमुल्लिखितमासीत्—अमुकस्मिन् दिनेऽमुकघटीप्रमाणेन सम्राट् यवनो मुम्मुचिः पञ्चाशत्सहस्रसंख्यकैः सैनिकैः सह तव राज्यग्रहणायाक्रमणं विधास्यति । यदि भवांस्तदीयसेनानिवेशात् प्रागेव तं महता वेगेनाक्रमिष्यति तदा तव विजयो ध्रुवम् । नात्र सैन्यन्यूनता शंक्या । तदर्थमयं संकेतः—यदा भवान्निर्गमिष्यति तं विजेतुं तदा मार्गागतस्य पाषाणस्य खण्डद्वयं विधास्यतीति । समीपमागते शत्रौ राजा युद्धार्थं निर्गतः स्वकुलदेवताभिवन्दनार्थं तन्मन्दिरं गच्छन्मध्यपतितस्याश्मनः खण्डद्वयमकरोत् । ततश्च जम्बुनागवचने विश्वस्य केशरी द्विपघटामिव शत्रुसेनां प्रमथ्य शत्रुं जीवग्राहमगृह्णात् । तदीयकोशसैन्यादिकमात्मसाचकार । बहवश्च सैनिकाः प्राणपरित्राणविह्वला दिक्षु पलायन्त । मुनिसमीपमेत्य कृतज्ञतां प्रकटीचकार । तदादिष्टः स्वनगरे भगवतो महावीरस्य मन्दिरं निर्मापयामास । यत्र मूर्तिप्रतिष्ठा जम्बुनागेनैव संपादिता । ब्राह्मणाश्चापि तस्मिन् मुनौ परमस्निह्यन् । निर्मानमोहाः सरलमनसा व्यवहारमकार्षुः ।

असौ मुनिः साहित्येऽपि सर्वाङ्गीणामुन्नतिमधात् । तन्निर्मिता ग्रन्था नेदानीमुपलभ्यन्ते केवलं संवत्सरे वैक्रमे १००५ तमे रचितं मुनिपतिचरित्रं १०२५ वर्षे प्रणीतं जिनशतकञ्चेति द्वयं दृग्गोचरीभवति । अपरञ्च बहवो मांसमदिरासेविनः प्रतिबोधिता दीक्षां प्रापिताः ।

## श्रीपद्मप्रभमुनिचरितम् ।

जम्बुनागमुनिपरम्परायां जिनभद्रो मुनीश्वरः समायातः । असौ सशिष्यो विहरन् पाटणनगरमयासीत् । अद्वितीयव्याख्यानपरिपाट्या श्रोतृमनांसि मोदयामास । सभायां राज्ञः सिद्धराजस्य भ्रातृव्यपुत्रः कश्चित् क्षत्रियकुमारो धर्मरुचिरागतोऽभूत् । तस्य च धर्मभावनां शुभानि सामुद्रकलक्षणानि च दृष्ट्वा धर्मशासन-समुन्नतिं विचिन्त्य तज्जननीं प्रबोध्य तदनुज्ञातश्च तस्मै दीक्षामदात् । अल्पेनैव कालेन नूतनदीक्षितोऽसौ पद्मप्रभनामा मुनिः सर्वाणि शास्त्राण्यधीत्य पण्डितमण्डलीमण्डनायमानो बभूव । भगवत्याः सरस्व-त्याश्चानुग्रहेण संगीते व्याख्यानवक्तृत्वकलायामलौकिकं प्राप नैपुण्यम् । विहारकालेऽसौ मुनिर्वक्तृत्वकलया सर्वानाश्चर्यरसनिमग्नान् कृत्वा वाचकपदवीमवाप ।

एकदा पाटणनगरे धर्मव्याख्यानकौशलमस्य ज्ञात्वाऽऽचार्यः श्रीहेमचन्द्रसूरिः स्वस्थाने समाह्वयद् व्याख्यानार्थम् । असौ च यावदायातस्तावदेव सूरिः कुमारपालश्च राजा सभायामेव निभृतौ तस्थतुः । श्रुत्वा

च शब्दच्छटाबहुलं भावमनोहरं प्रौढार्थनिर्भरं व्याख्यानमाकर्ण्य श्रीहेमचन्द्रसूरिस्तस्मिन् पद्मप्रभमुनौ समधिकादरोऽनुदिवमरिनद्यत्। धर्मप्रचाराय समभावनाभावितौ तौ समुचितसर्वगुणसंपन्नाय परपर्द्धतुः। अन्ते स्वसमीपे स्थापयितुं देवप्रभं सूरिर्जिनभद्रमुनिं न्यवेदयत। स च तन्निषेधमकरोत। आचार्यस्य राज्ञः कुमारपालस्य वशवर्तित्वमालोच्य स मुनीश्वरः पद्मप्रभेण सहार्धरात्रे सिनपल्ली (सिनवली) नामके स्थाने स्थितिमकरोत्। पश्चाद्राजपुरुषा इतस्ततोऽन्वेषयन्तो नासाद्य प्रतिनिववृत्तिरे।

अथ यत्रोभौ स्थितौ तत्समीपवर्तिनो नागरिका कस्यचिद्भावुकस्य शरीरे कृतसंनिधानया देव्या उक्ताः। भद्रमुखाः! द्वौ मुनीश्वरौ युष्मद्ग्रामसमीपमायातौ तत्र पद्मप्रभं नाम मुनिं गत्वा देवी स्वमन्दिरे भवन्तमाह्वयतीति निवेदयत। श्रुत्वा च ते तत्र गत्वा देवीसंदिष्टं न्यगादिषुः। मुनिश्च श्रुत्वा जगाम तन्मन्दिरम्। प्रणनाम च भगवतीम्। सा तमवादीत् कल्याणिन्! अहं त्रिपुरादेवीं वन्दनार्थमगमम्। तया चाहमादिष्टा यत्तव मन्दिरे योऽयं पद्मप्रभो मुनिरागच्छेत्तं त्वं निवेदय—त्वया जन्मत्रयं म उपासना विहिता किन्त्वल्पायुषा त्वया नाहमधिगता। अतः परं त्वं मामाराधय यतोऽहं ते सिद्धा भविष्यामीति। एतन्निवेदनायैव मया त्वमाहूतः। असौ तु विधाय वन्दनं तदारभ्यैव त्रिपुरादेव्याराधनमकरोत्। क्रमेण च सा मन्त्ररूपेणाराधिता वरमस्मा अदात्। उपाध्यायपार्श्वमागत्य सः सकलं वृत्तान्तमवोचत्। स च शिष्योत्कर्षसन्तुष्टमानसो बभूव। शिष्योत्कर्षस्तु गुरोरेवोत्कर्षसाधकः।

ततो विहरन्तौ तावुपाध्यायवाचकौ मुनीश्वरौ सिन्धप्रान्ते उमरेलपुरमागमतुः। तदानीं सुहडनामा नृपतिः प्रजाः शशास। यः प्रातः प्रतिदिनं सपादकोटिपरिमितं धनं विभज्य याचकेभ्यो ददाति स्म। मंत्री च यशोदित्यः परमधर्मरुचिस्तस्य हितैषी प्रजापालने साहाय्यमाचरति स्म। उभौ तौ महामहोत्सवपुरःसरमनयोः स्वागतविधिं संपादयामासतुः। तदनु वाचकस्य पद्मप्रभस्य मुनेरश्रुतपूर्वं मनोमोदकं सारगर्भितं व्याख्यानं श्रुत्वा सप्रश्रयं राजा द्वात्रिंशत्सहस्रपरिमितान् द्रम्मान् (तदानींतना तन्नामिका मुद्रा) तावत एवाश्वान् तत्प्रमाणानेव चोष्ट्रानुपायनरूपेण समर्पयामास सन्तुष्टमानसः। असौ तु निःस्पृहो न मे धनादीनां प्रयोजनम्। धर्मप्रचार एव मे मुख्यं प्रयोजनं येन तत्रैवेदं धनमुपयुंक्ष्व। मंत्रिणानुमतः स राजा विचार्याश्वोष्ट्रकप्रमाणकांश्चतुःषष्टिसहस्रसंख्यकान द्रम्मान् परिकल्प्य मिलित्वा षण्णवतिसहस्रपरिमितान् द्रम्मान् धर्मकर्मणि विन्ययुंक्त। यशोदित्यश्च मन्त्री तेन धनेन रामरोदीनगर्यां भव्यं जिनालयं निरमापयत्। यस्य प्रतिष्ठाविधानं समजनि जिनभद्रवरदहस्तेन।

एवं ततो यशोदित्यसहायेन पञ्जाबप्रान्तं विहरन्नाययौ। आराधयामास त्रिपुराम्। प्रसन्ना च सा वचनसिद्धिरूपं वरमदात्। एकदा मार्गे वृषभस्य पोठे मारिचपूर्णां गोणीं संस्थाप्य ग्रामान्तरं गच्छन् कश्चिन्मिलितः। उपाध्यायेनोक्तम्-भद्रमुख! किं तव गोण्यां वर्तत इति। जातशंकः स माषा वर्तन्त इत्यवोचत्। तथास्त्वित्युक्ते यावत्पश्यति गोण्यामसौ माषानेवाद्राक्षीत्। तत्प्रभावानभिज्ञतया मृषा वदन्नसौ क्षमामयाचत। ततश्च जातदयेनोपाध्यायेन पूर्ववदेव माषाः मारिचानि कृतानि। एवं वचनसिद्धिविद्याप्रयोगनिरतः स गुरुणा सह गुर्जरप्रान्तमाययौ। तत्र भीमदेवस्य राज्ञो महिषी प्रतिदिनमध्यात्मशास्त्रनिरता वस्तुतत्त्वावधारणसमर्थं योगिनं कंचिदप्यलभमाना समागतानपि पण्डितान् मुनींश्च नाद्रियत। न चासनादप्युदतिष्ठत्। एतदीयं वृत्तान्तं श्रुत्वा गुरुशिष्यौ तत्पार्श्वं ययतुः। सा तु पूर्ववदेवोदासीना नैव तयोः सम्माननमकरोत्। उपाध्यायेनाभ्यागतसत्कारविधावस्या नादरहेतुः पृष्टः। समीचीनतत्त्वविदः प्रायो ह्यत्र दुर्लभा दृश्यन्ते योगिनो ये स्वयं तथैवाध्यात्मज्ञानाराधनैकबुद्धयो भवन्ति। स्वविद्याचमत्कारदर्शनपरोऽसावुपाध्यायस्तामवादीत्-कल्याणिनि! अष्टांगयोगमर्मज्ञोऽहम्। अत्रैव त्वदग्रे प्राणान् निरुन्धे। त्वया च मदीयानि प्राणबहिर्गमनस्थानानि कार्पासेन

निरोद्धव्यानि । ब्रह्मरन्ध्रेणैवाहं प्राणान् प्राणनिरोधानन्तरं बहिर्मोक्ष्यामिति । तथा च कौतुहलाकृष्टचेतसा तथैव स्वीकृतम् । प्राणायामविधिसमाप्तिकाले प्राणवायुर्ब्रह्मरन्ध्रेण बहिर्निर्गतः । तदुपरि स्थितं कार्पासं दूरं पतितम् । सा राजमहिषी झटित्येवासनादुत्थाय साष्टाङ्गं प्रणनाम । प्रभूतं च द्रव्यमुपायनं ददौ । निःस्पृहेण तेन प्रद्युम्नेण मुनिना सन्मार्गव्ययस्तस्य धनस्योपदिष्टस्तस्यै । शुभलक्षणे काले गुरुत्वेन पूजयामास । एवं विद्यायोगसाधनवचनसिद्धिसमन्वितो महाप्रभावाकृष्टसकलजनहृदयोऽसौ जिनधर्मस्य प्रभावमभिवर्धयामास ।

बहवो मुनयः श्रीजम्बुनागाचार्यस्य परम्परायां महाप्रभावसंपन्ना जिनधर्मप्रचारकार्यसमर्थकाश्च बभूवुः ।

अनेन सुस्पष्टं विज्ञायत एव श्रीसिद्धसूरीश्वरस्य शासनकार्यं समुचितशिष्यमण्डलेनैव सौकर्येणानुष्ठितम् ।

आचार्यः श्री सिद्धसूरीश्वरश्चित्रकोटनगरे श्रेष्ठिगोत्रीयेण मांडाशाहेन समनुष्ठिते सूरिपदमहामंगलोत्सवे भुवनकलशनामानं सकलविद्यापारदृश्वानमाचार्यगुणभूयिष्ठं १०७४ तमे वैक्रमेऽब्दे वैशाखे शुक्लत्रयोदश्यां दिनानि षोडशानशनेनातिवाह्य दिवमगात् ।

## वि० सं० १०७४ तः] ४८ आचार्यः श्रीकक्कसूरिः [एकादशः वि० सं० ११०८ तः

आचार्यः श्री कक्कसूरिः प्रतिभासंपन्नो बालब्रह्मचारी तीव्रतपस्वी हिमांशुरिव मृदुप्रकृतिः सहस्रांशुरिव प्रचण्डप्रतापो मेरुरिव दृढस्वभावः श्रीसिद्धसूरिपट्टपदं भूषयामास । असौ गुर्जरदेशालंकारभूताणहिलपुर (पाटण) निवासी । एतन्नगरनिर्माणविषये संक्षिप्तमितिवृत्तमिदम्—राजा जयशिखरः परमशौर्यसंपन्नो प्रतिपक्षीयेण नृपतिना भुवडनाम्ना सहसाऽऽक्रान्तो तुमुले युद्धे स्वर्गपथप्रवासी बभूव । रूपशीलसौजन्योपेता महिषी रूपसुन्दरी मौलै रचिता संपूर्णगर्भदिवसाऽरण्यवसतिमकरोत् । पूर्णेकाले वनराजनामकं केशरिकिशोरमिव पुत्रं प्रासूत । एकदा पंचासरचैत्यवासी शीलगुणसूरिर्विहरन् यत्र वृक्षे ग्रन्थिबद्धवस्त्रे सुप्तमेनमपश्यत् । वृक्षच्छायां तस्योपरि स्थिरतां गतामालोक्याऽयं शिशुर्महामहिमशाली भविष्यतीति निश्चिकाय । तदनु तत्रागतां रूपसुन्दरीं तद्वृत्तान्तमसावप्राक्षीत् । तया च सर्वमुदन्तमश्रुमुख्या सकरुणं निवेदितम् । तांश्च समाश्वास्य सूरिः पंचासरं गत्वा तत्रस्थान् श्रावकान् वृत्तान्तमिमं निवेदयामास । जातदयास्ते च तत्र गत्वा रूपसुन्दरीं नवजातशिशुसहितामानीय साहाय्यं विधाय स्वग्रामे वसतिमकारयन् । सा च जिनधर्मानुरागिणी जिनदेवमाराधयन्ती दिनान्यनैषीत् । व्यतीते च काले गोपालकानां सवयस्कानां साहाय्येन अणहिलनामकस्य गोपालाग्रेसरस्य स्मृतिचिन्हरूपेणाणहिलपुरनगरनिर्माणमकरोत् स वनराजः । वैक्रमे ८०२ तमे वत्सरे वैशाखशुक्लतृतीयायां रोहिणीनक्षत्रे शीलगुणसूरेर्वासःक्षेपपूर्वकं वनराजस्य राज्याभिषेकोऽभूत् । वनराजश्च गुरूपदिष्टमार्गेण मरुधरदेशादुपकेशवंशीयान् प्राग्वटगोत्रीयान् मालववंशजांश्चाहूय स्वनगरे विविधमानुकूल्यं कृत्वा तत्राधिवासमकारयत् । दिने दिने चास्य सर्वजनमनोमोदप्रदाऽभ्युन्नतिर्बभूव । चावडोपाह्वो वनराजः क्रमेणाचार्योपदेशानुष्ठितप्रकारेण स्वकीयाद्वितीयपौरुषबलेन च पितुः समग्रं राज्यं प्राप ।

अस्मिन्नेव समृद्धिमति नगरे बप्पनागगोत्रीयश्चन्द्रनामा वाणिज्यकर्मनिपुणः कोट्यधिपः श्रेष्ठी प्रतिवसति स्म । अस्य पिता पुनडशाहो व्यापारार्थं विदेशं गत्वा महामूल्यानि रत्नानि प्रभूतान्याससाद । तेन च सप्तांगुलप्रमाणा माणिक्यमयी प्रभुप्रतिमा गृहे पूजार्थं स्थापिता । श्रेष्ठिनश्चन्द्रस्य पंच पुत्रा आसन् । कनीयान् भोजश्च पितुरिव व्यापारकर्मसंलग्नोऽपरिमितं द्रव्यमलभत । विदेशेषु परिभ्रमणेनासौ हीरकनीलपद्मरागादीनि रत्नान्युपार्जयामास । ततश्च जिनदेवदृढानुरागया धर्मपत्न्या मोहिन्या विविधरत्नमयी माला निर्माय प्रभुकंठे समर्पिता । तदर्थं च भगवत आदीश्वरस्य चैत्यालये महानुत्सवो विहितः । मोहिनीप्रणयमनुमान्य तेनैव

भगवतः कण्ठे मालार्पणं विहितमासीत् । तदनन्तरमियं मोहिनी दर्शनाय गता हारं नाद्राक्षीत् । ततश्च गृहमेत्य पतिमवादीत् । दयित ! भवदनन्तरं देवदर्शनाय याता मन्दभागिन्यहं हारं नाद्राक्षम् । परमश्रद्धासमन्वितया मयैव तत्सुकृतमनुष्ठितं यस्य दर्शनेऽपि मे नाधिकारः । असौ च श्रेष्ठी समाश्वासयन्नाह—अवश्यमेव स मया प्रभुकण्ठे समर्पितो, यस्य रक्षणं देवालयाधिष्ठायकस्याधीनम् । स एव व्यवस्थां विदधाति । यद्येतदधीनमिदं तदा कथमसावत्रोदास्ते । तेन तु तस्यान्वेषणमवश्यमेव कर्तव्यमिति प्रकारेण हारविषयको विवादः प्रतिदिनं प्रचलति स्म ।

एष्वेव दिवसेषु महाशासनप्रभावकः श्रीसिद्धसूरीश्वरः पाटणनगरमलंकर्तुमाययौ । श्रीसंघश्च भव्येन स्वागतविधिनाऽस्य नगरप्रवेशमकारयत् । असौ समयोचितां मांगलिकीं देशनां भावुकेभ्यो ददौ । तदनुक्रमेणात्मकल्याणसाधनानां दुष्प्राप्यत्वं मनुजजन्मनश्च महामूल्यत्वं व्याख्याने सशास्त्रं सयुक्तिकमवर्णयत् । येन बहवः श्रावका वीतरागा बभूवुः । प्राप्तवैराग्यो भोजश्च मोहिनीं प्राबोधयद् दीक्षाग्रहणार्थम् । हारविषयिणी दुराशाऽपि मां बाधते इत्युक्त्वा सा भृशमुद्विग्ना बभूव । तस्यामेव रात्रौ हारो देव्याऽधिष्ठायिकया भोजाय दत्तः । प्रातरसौ तस्यै तमदर्शयत् । सन्तुष्टान्तरंगा सा देवालयाधिष्ठायकाय हारं समर्पयामास देवभूषार्थम् । ततश्च भोजो नागरिकान् दीक्षाग्रहणार्थं न्यवेदयत् । तेन च चतुस्त्रिंशत्संख्यका भावुका दीक्षोद्यता बभूवुः । विक्रमस्य १०५५ तमे संवत्सरे वैशाखे शुक्लतृतीयायां शुभे दिने सूरीश्वरवरदहस्तेन तैः सह मोहिनीसहितश्च भोजो दीक्षामग्रहीत् । दीक्षानन्तरं भुवनकलशनाम्ना विश्रुतो बभूव ।

मुनिरसौ भुवनकलशः क्रमेण न्यायव्याकरणकाव्यकोशादीन्यधीत्य जिनागमरहस्यपारंगमो निखिलगुणकमनीयमूर्तिः पद्माशाहेन समनुष्ठिते दीक्षामहोत्सवे विक्रमसंवत्सरे १०७४ तमे माघशुक्लपूर्णिमायां श्रीसिद्धसूरिणाऽऽचार्यपदे श्रीककसूरीति नाम विधाय प्रतिष्ठापितः ।

परमप्रभावकः शासनाभ्युदयकर्मपरायणोऽसौ षष्ठपारणाव्रतमन्वतिष्ठत् । तत्राप्येकविग्रयग्रहणस्य भीषणां प्रतिज्ञां पालयामास । विमलतीव्रतरतपोऽनुष्ठानेन काश्चिदपूर्वा लब्धयोऽस्य स्वयमेव प्राप्ताः, तथैव सर्वजनचेतश्चमत्कारकाः शक्तयोऽपि । येन न केवलं साधारणजनताया अपि तु महामहिम्नां राज्ञां महाराजानां च मनांसि समाकर्षत् । तीव्रतपश्चर्यालब्धसिद्धिश्च विहरन् सशिष्यो धर्मप्रचारमालक्ष्य नागपुरमगमत् । सम्पादितमस्याकृत्रिमप्रेमरसाभिरामं भव्यं स्वागतं श्रीसंघेन । तदभ्यर्थनामादृत्य तत्रैवावात्सीत् स चतुर्माससत्रार्थम् । विविधागमज्ञानपूर्णान्यस्य व्याख्यानानि सर्वेषां भावुकानां चेतःसु कामपि धर्मभावनां प्रादुरभावयन् । समाप्ते च चतुर्मासे सूरीश्वरप्रभावसमेधितभक्तिरसपूर्णान्तरंग आदित्यनागगोत्रीयः कर्मणशाहः शत्रुञ्जयतीर्थमुद्दिश्य संघं निष्कासयामास । तत्र संघे सहस्रत्रयपरिमिताः साधवः साध्व्यो लक्षपरिमिताश्च जनाः समगच्छन्त । क्रमेण तीर्थस्थानं गत्वा मणिमौक्तिकदामभिः पूजाप्रभावनादिकं चकार ।

अथ सूरीश्वरः सशिष्य उपकेशपुरमयात् । श्रीसंघेन च कृतसत्कारोऽभूत् । भावुकानां भव्यां भावनामनुमान्योररीचकार तत्र चतुर्मासावस्थानम् । सर्वसौख्यमार्गप्रदर्शनपरं वैराग्यभावनोपयुतं व्याख्यानमाकर्ण्य दश भावुका दीक्षास्वीकरणेनात्मानं पावयामासुः । तदनन्तरमपरश्चतुर्मासः पालीनगरे निर्धारितः । बप्पनागगोत्रीयेण मूलाशाहेन श्रीभगवतीसूत्रवाचनामहोत्सवोऽनुष्ठितः । तप्तभट्टगोत्रीयो बालामेहराजोऽष्टाह्निकामहोत्सवाराधनेनालभ्यं धर्मलाभमलभत । यत्र चानेन लक्षपरिमिता मुद्रिका नियुक्ताः । स्वधर्मिभ्यो यथायोग्यं सुवर्णमुद्रिकामूल्यवस्त्रादिकमुपहारीकृतम् । चतुर्मासानन्तरं भाणाशाहस्य श्रेष्ठिगोत्रीयस्य सुपुत्र उदाशाहः परिणयानन्तरं षट्सु मासेष्वतीतेषु धर्मपत्नीं परित्यज्य जातवैराग्यो दीक्षामग्रहीत् । यत्र महोत्सवे सपादलक्षं धनं

विनियुक्तमासीत् । एवमत्र धर्मप्रचारमाधाय भिन्नमाल-सत्यपुर-शिवगढ-जावलीपुरादिषु धर्मजागृतिं कुर्वन् सूरिश्चन्द्रावतीं चतुर्मासावस्थित्याऽलंचकार । अत्र च सूरीश्वरोपदेशसमासादितधर्मसंस्काराः पंवारजातीयाः क्षत्रिया जिनदीक्षां प्रापुः । प्राग्वटवंशेऽस्तभाविता आचार्येण ।

शाकम्भर्यां नगर्यां दुर्दैववशान्महामारी रोगः सहसोदभूत् । मन्त्रतन्त्रदेवाराधनादिकान् बहूनप्युपायान् कृत्वा ब्राह्मणा निष्फला बभूवुः । ततः श्रीसंघस्तच्छान्तये सूरीश्वरमानेतुं चन्द्रावतीमयुः । परोपकारमात्र-जीवनो निःस्पृहः सूरिस्तेषां वचनमादृत्य तत्राजगाम । एत्य चाष्टाह्निकामहोत्सवं, शान्तिस्नात्रपूजां च विधाय स्वयं चाष्टमिकं तपोऽनुष्ठाय जिनदेवमाराधयामास । येन त्वरितमेव रोगोपद्रवः शान्तिमगात् । असाधारणम-हिमानं तं विदित्वा ब्राह्मणा जिनधर्मानुयायिनो दीक्षिताः श्रीसंघेन मिलिताः परमानन्दमवापुः । धर्मा-चरणानुरक्तचेताः सुचन्तिगोत्रीयः फागुशाहो भगवतो महावीरस्य मन्दिरं ज्ञानध्यानोपयोगार्थं पौषधशालाञ्च निरमापयत् । डिडूगोत्रीयश्चार्जुनशाहो वैराग्यज्ञानसंवर्धनाय च श्रीभगवतीसूत्रवाचनामहोत्सवमकारयत् ।

एकदा स्थंडिलभूमिं गत्वा प्रतिनिवर्तमानं सूरिं चौहानजातीय आभडरावोऽन्ये चाश्वारोहा मृगयार्थं गच्छन्तो मार्गे मिलिताः । तदीयानुपमप्रभावप्रतिष्टब्धमृगयाभिलाषास्तेः किंकर्तव्यमूढा बभूवुः । सूरिश्च तान्ना-कारवेषपरिधानादिना क्षत्रिया एवैते मत्वा हिंसाप्रवृत्तिं च तेषां दूरीकर्तुमहिंसाधर्मतत्वमुपदिदेश-निखिलप्राणिनां च प्राणा नितान्तं प्रियाः । तदर्थमेव ते सर्वथा चेष्टन्ते स्वस्वमार्गेण । उक्तञ्चैतद् आचारांगसूत्रे यथा । सव्वे सुह साया दुह पडिकूला अप्पिय वहा पिय जीविणो तम्हा णातिवाएज्ज किंचणं ॥

अर्थात—सर्वेषां जीवनमभिमतम् । अनुकूलं सुखम् । दुःखञ्च प्रतिकूलम् । पूर्वकृतसुकृतपरिणामरूपो देहो यथा स्वकल्याणमेव साधयितुं प्रभवेत्तथैवाचरणीयम् । कृतं च भोक्तव्यं देवमनुष्यतिर्यग्जातीयैः सर्वैः । यतो युष्माभिः स्वात्मदृष्टान्तेनात्र व्यवह्रियताम् । तथैव वो ध्रुवं श्रेयः । एतदर्थं भगवती सर्वकल्याणप्रधाना केवलमहिंसैव सर्वाणि श्रेयांसि साधयितुमलम् । एवमाचार्यभाषितमात्मोन्नतिसाधनपरं सादरमाकर्ण्य ते विलज्जमानाः क्षमामयाचन्त । सूरिसमक्षं दृढप्रतिज्ञा चाहिंसाधर्मपालनाय कृता । स्वनगरं तमाचार्यं नीत्वा जिनदीक्षां जगृहुः । ततः परमपि शतत्रयमिताः क्षत्रिया वासःक्षेपपूर्वकं दीक्षां प्रापिताः । सर्वे च धर्मव्याख्यान-लाभेन कृतार्थतामगमन् । एवमसौ धर्मप्रचारमात्रेण स्वकीयब्रह्मचर्यतपःप्रभावेण शासनकार्यं साधयामास ।

सूरीश्वरानुमत आभडरावश्चिन्तामणिपार्श्वनाथस्य मन्दिरं निर्मापयति स्म । श्रीशत्रुञ्जययात्रायै संघं निष्कास्य प्रभूतपुण्यमाससाद । मन्दिरनिर्माणाय भूखननलब्धधनेनासौ स्वश्रेयःसमाराधनतत्परः समाप्ते जिनालये सूरीश्वरविमलकरकमलेन प्रतिष्ठामकारयत् । सत्संगतिः कथय किं न करोति पुंसामिति सत्यमे-वोक्तम् । ओसवालवंशे तज्जातीया आभडसंज्ञया प्रथिता बभूवुः ।

एवं सर्वत्र विहरणकाले प्रबलतरोत्साहेन धर्माभ्युदयं कुर्वन् सूरीश्वरः सच्चायिकावचनानुसारेण मेदपाटप्रान्ते व्यहार्षीत् पञ्चशतपरिमितैःशिष्यैः सह आघाटनगरे चित्रकूटे, उज्जयिन्यां चन्देरीनगरे च चतुर्मासा-धिवासेन भावुकानां दीक्षाप्रदानमभिनवमन्दिरमूर्तीनां च प्रतिष्ठापनं जैनेतराणां जिनधर्माभिरुचिजननञ्च संपाद्य मथुरानगरीं विभूषयामास । तत्र कोरण्टकगच्छीयस्य सर्वदेवसूरेः समागमेन विशेषतः कार्यसौकर्य-मभूत् । जैनानां ब्राह्मणानाञ्च मिथः काकोलुकीयम् । विप्रवर्याणां च जिनसंप्रदायो वेदनिन्दक इति दूषणं शास्त्रार्थेनैव परिहृतम् । मिथ्याग्रहमहाभिभूतमानसास्ते जिनधर्मतत्वं सूरीश्वरात् सम्यग् ज्ञात्वा दीक्षामापुः ।

सूरीश्वरश्चैकदा सम्मेतशिखरादीनां द्वाविंशतिसंख्यकानां तीर्थानां सरलमधुरया वाचा वर्णनमाचष्ट, येन तीर्थयात्राभिरुचेर्बप्पनागगोत्रस्य नाहटाशाखीयस्य श्रावकस्यासलस्य पूर्वप्रान्तीयतीर्थयात्रायै संघायोजनेच्छा

समुद्भूता। तदर्थमसौ प्रार्थयामास। सर्वत्रामन्त्रणानि प्रेषितानि। आचार्यस्याज्ञां संप्राप्य वैक्रमेऽब्दे १०८३ तमे मार्गशीर्षशुक्लपूर्णिमायां सूरीश्वरस्य नेतृत्वे अस्य च संघपतित्वे महान् संघो यात्राभिमुखं प्रययौ। यात्रायां पूजाप्रभावनाष्टाह्निकामहोत्सवध्वजारोपणादीनि सत्कर्माणि संपाद्य स्वामिवात्सल्यमपि विहितम्। संघश्च प्रतिनिवृत्ते। आचार्यस्तु कलिंगदेशमयात्। तत्र कुमारकुमारीतीर्थयात्रां संपादयन् सशिष्यः पूर्वस्यां दिशि व्यहार्षीत्। श्रीमद्भगवतः पार्श्वनाथस्य कल्याणभूमौ वाराणस्यां दर्शनस्पर्शनपूजादिभिरात्मा पावितः। ततः पञ्चाबप्रान्तं परिबभ्राम। साधवः साध्व्यः समुपासकाश्च तदीयदर्शनोपदेशश्रवणादिभिः परममुदितान्तरात्मानो बभूवुः। चतुर्मासद्वयेन धर्ममूलस्थैर्यमापादितमत्र। पदवीप्रदानेन समुचितेभ्यो मुनिभ्यो धर्मप्रचारकर्तव्ये समुचितां देशनां दत्त्वा सिन्धदेशमाजगाम सः। नवोद्यतं चन्द्रमिव पश्यन्तो भावुका निर्निमेषनयना बभूवुः। समारोहपुरःसरमस्य भव्यं पुरप्रवेशं कारयामासुः। गोसलपुर-डमरेल-मारोटकोटेषु नगरेषु चतुर्मासंसमये वीरपुरनगरे श्रमणानां सभां संपाद्य तेषां चेतःसु कर्तव्यभावनोत्साहमधिकमवर्धयत्। संमानिताश्च योग्यतां गता मुनयो गणिगणाध्यक्षोपाध्यायपदैः। अनन्तरं कच्छप्रान्ते भद्रेश्वरपुरे चतुर्मासस्थित्या धर्मसंभावना विहिता। तदनु सौराष्ट्रदेशमाययौ। तत्र श्रीशत्रुञ्जययात्रामकरोत्। तदानीमत्र मरुधरवासिनां त्रयः संघा भरोचनगरस्य चैकः संघः समागतः। चतुर्णां पञ्चमेन समागमः सामदानभेददण्डानामुपायानां फलसंपद्गुणेनेव विशेषेण मनोरमोऽभूत्। जंगमतीर्थलाभोऽपि पुण्यप्रदो लब्धः संघेन। संघाश्च विधाय यात्रां स्वदेशं प्रत्यगच्छन्। उषित्वा तत्र च कतिचिद्दिनानि सूरीश्वरः सौराष्ट्रलाटदेशयोर्विहरणक्रमेण भृगुकच्छमाजगाम। तत्र विंशतितमस्य तीर्थंकरस्य मुनिसुव्रतस्वामिनो दर्शनस्पर्शनादिकं कृत्वा कोकणदेशस्य प्रधाननगरे सोपारपत्तने परिभ्रमणं व्याख्यानदानं धर्मप्रचारं च विधाय शौर्यपुरमवात्सीत् चतुर्मासव्रताय। अत्र महती धर्मप्रभावना कृता। पञ्चदशवर्षपर्यन्तविहरणेन सार्धशतपरिमितानां दीक्षादानम्, परःशतानां मांसादिपरिहारव्रतम्। जैनेतरान् दीक्षया जिनधर्मे स्थापयित्वा ओसवंशाभिवृद्धिः, शास्त्रार्थेषु वादिविजयश्चेतत्सर्वमेव शासनकार्यं स्वकीयसततोत्साहेन संपादितम्।

अथ वार्द्धके सूरीश्वर उपकेशपुर एव चिरस्थितिमकृत। सकलशिष्यगुणसमन्वितं शासनगौरववर्धनक्षमं देवचन्द्रोपाध्यायं सूरिपदसमुचितमिति मत्वा चिंचटगोत्रस्य देसरडाशाखीयेन जयकरणशाहेनानुष्ठितेऽष्टाह्निकामहोत्सवे भगवतः श्रीपार्श्वनाथस्य मन्दिरे चतुर्विधसंघसमक्षं सूरिपदे प्रतिष्ठापयमास देवगुप्तसूरिनाम्ना। स्वयञ्चैकविंशतिदिनान्यनशनं विधाय सुरलोके पदं न्यधात्।

## धर्मवीरो भैंसाशाहः—गदइयाजातिश्च।

डिडूपुर (डिडवाना) नगरे द्रव्येऽपरो वैश्रवण इव भैंसाशाहो गधाशाहश्च प्रतिवसति स्म। नामैतयोः पशुसदृशं, कर्म तु धर्ममयम्। जिनधर्मानुरागिणावेतौ शमदमाविव परं स्नेहमुपागतौ सुहृदौ वाणिज्यकर्मकुशलौ देवपूजनशास्त्रश्रवणादिभिः सत्कर्मभिश्च समयमत्यवाहयताम्। व्यतीते च कियति काले दैववशादसौ गधाशाहो परं दारिद्र्यमुपागतः। न च सर्वथा सर्वदा प्राणिनां सुखं दुःखं वा। यदुपनतं तदेव भोक्तव्यम्। अत एवोक्तम्।

सुखमापतितं सेव्यं दुःखमापतितं तथा।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च॥

ततश्च मित्रेण भैंसाशाहेन प्रभूतमस्य साहाय्यमाचरितम्। येनासौ दुःखादुन्मुक्तः। अथ दैवप्रातिकूल्याद् भैंसाशाहस्य व्यापारे महती क्षतिरायाता। विदेशादागच्छन्तः प्लवाः समुद्रमध्ये मज्जिता अभूवन्। तथाप्यसौ

धर्ममयैकजीवनो महता दुःखेन समयं यापयति स्म । तदीयां दुर्दशामालोच्य सुहृद्धर्ममनुस्मरन् कृतोपकारं जानन् गधाशाहो रहस्तत्पार्श्वमुपेत्यावोचत्-मित्र ! मा ते दुःखं भवतु । भवदीयमेवेदं धनमिति मत्वा गृहाण । त्वया च बहूपकृतम् । मया न तन्न विस्मर्तव्यम् । उपकारस्तु प्रत्युपकारेण शोभते । इयमेव नीतिः । यथा—

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु वा न विशेषे विदुषामिह ग्रहः ॥

श्रुत्वा च तद्वचोऽसौ तमवादीत्—अयि सखे ! त्वदुक्तं सर्वमेव सत्यम् । यच्चोपस्थितं शुभमशुभं वा फलं तदेवानुभवितव्यम् । भोगेन कर्मणां क्षयः । कर्मक्षयं विना न निरतिशयसुखास्वादः । तदभावे च किमिदं जीवनम् । यत्रात्मकल्याणं नासाद्यते कर्मबन्धनेनेदं दुःखमनुभूयते । पुनरहं त्वत्साहाय्यं प्राप्य कथमपरमप्यनर्थजनकं गृह्णीयाम् । यच्चाकर्तव्यं तत्तु नैव कर्तव्यम् ।

अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ।
कर्तव्यं तत्तु कर्तव्यं प्राणैः कण्ठगतैरपि ॥

अत आत्मकृतानां कर्मणां फलमात्मनैवानुभवितव्यमित्येव जानामि । त्वं तु मित्रधर्ममनुसरसीति प्रशंसनीय एव । बहुविधं बोधितोऽप्यसौ स्वनिश्चयं न तत्याज ।

अथैकदा परोपकारी लब्धिसंपन्नः करुणावलयः श्रीकक्कसूरिर्भूभ्रमणनिमित्तेन तत्रायासीत् । स्वयमेव गोचरीचर्यायै तदीयगृहं जगाम । अनेन च खिन्नचेतसा परमधार्मिकेण बर्जरीधान्यं ( बाजरी ) गोचरीरूपेण दत्तम् । तदीयां भक्तिं परीक्ष्य सूरीश्वरस्तद्धान्यराशेरुपरि रजोहरणं भ्रामयामास । येन धान्यराशिः सुवर्णमयो जातः । एतद् दृष्ट्वाऽश्चर्ययुतमानसः स आचार्यचरणकमलयुगले प्रवृद्धभावनो बभूव । प्राक्तनकर्मक्षयेऽस्योपादानकारणात्पृथक् सूरीश्वरसमागमरूपं निमित्तं कारणं प्राप्तमतः पूर्ववदेव धनाधिपोऽभवत् । महात्मनां किं दुःसाध्यम् सूरीश्वरश्च ततो विजहार । भैंसाशाहोऽपि गुरुपादपद्मवन्दनं विधाय गृहमायातः । अक्षयद्रविणराशिलाभेनासौ गदइया-नामिकाः सुवर्णमुद्रा निरमापयत । गुरुकृपाप्राप्तधनराशिनाऽनेन भव्यो जिनालयः, प्रवासिनामुपयोगार्थमगाधजलः कूपो, नगरपरिरक्षणार्थंच्चाभेद्यो दुर्गश्च निर्मापितः । अद्यापि तत्स्मारका एते विद्यन्त एव ।

गदइयामुद्रानिर्माणेन जना तं गदइयेत्युपनाम्ना संबोधयामासुः । एतदीया वंशजास्तथैव ख्यातिमगमन् ।

आचार्यवर्योऽतीते कियति समये भिन्नमालनामकं भैंसाशाहस्य श्वसुरनिवासभूतं नगरमगात् । तत्रोपस्थितोऽसौ नवलक्षपरिमितद्रव्यव्ययेन निरुपमं स्वागतं चकार । संघसभायोजनमपि कृतम् । दूरदूरमामन्त्रणानि प्रेषितानि । समागताः सहस्राधिकाः साधवः साध्व्य उपासकाश्च । वर्तमानपरिस्थितिपर्यालोचनेन धर्माराधनप्रचारार्थं हृदयंगं व्याख्यानं कृत्वा देवभद्राय सूरिपदं, ज्ञानकल्लोलादिभ्यः सप्तभ्य उपाध्यायपदं, हर्षवर्धनादिभ्यः सप्तभ्यो गणिपदं, देवसुन्दरादिभ्यो नवभ्यो वाचनाचार्यपदं, शान्तिकुशलादिभ्य एकादशभ्यः पण्डितपदं च दत्त्वा सूरीश्वरः सभां विससर्ज । अत्रातिमहति पुण्यकर्मणि दानवीरः श्रेष्ठी भैंसाशाह एकादशलक्षसंख्यका मुद्रा विन्ययुंक्त । एवं धर्माचरणेनात्मकल्याणमाससाद । ईदृशा दानवीरा धर्मवीराश्च तदानीन्तने काले बहव आसन् येषां धर्म एवं धनमिति सिद्धान्ति मासीत् ।

आचार्यवर्यः श्रीकक्कसूरीश्वरश्चतुस्त्रिंशद्वर्षाणि शासनसेवां पूर्णपरिश्रमेण सर्वत्र संपादयामास । वार्द्धके भगवतः श्रीमहावीरस्य मन्दिरे चिंचटगोत्रीयेण जयकरणशाहेनारब्धेऽष्टाह्निकामहोत्सवे देवचन्द्रमुपाध्यायं

सूरिपदे प्रतिष्ठाप्य महाशासनकार्यभारान्निर्मुक्तो बभूव। प्रवर्तमाने च विक्रमस्य ११०८ तमे हायने नश्वरं देहं त्यक्त्वा सुरलोकपदे पदं चकार।

## [वि० सं० ११०८ तः ४६ आचार्यः श्रीदेवगुप्तसूरिः (एकादशः) वि० सं० ११२८ प०]

आचार्यप्रवरश्रीककसूरिपट्टे महाशासनप्रभावका जिनधर्मप्रचारको नानाविधविज्ञानवद्धहृदयो विविधलब्धिलब्धयशोराशिः श्रीमान् देवगुप्तसूरीश्वरः स्थितिमवाप। असौ सिन्धप्रान्तस्थडमरेलपुरवास्तव्य आदित्यनागगोत्रीयो गुलेच्छाशाखीयः। जनकोऽस्य दानवीरो धर्मपरायणः सौजन्यमूर्तिः श्रेष्ठी पद्माशाहः, माता च धर्मरता पतिचित्तानुसरणशीला भोलीनाम्नी। तयोरयमात्मजश्चोखानामकः कुलदीपकः। त्रयोदशसु पुत्रेष्वयं परमधार्मिको विनयसौजन्याद्यनेकगुणभूयिष्ठः पित्रोः स्वान्ते परमानन्दं विस्तारयामास। येन तौ

> एकोऽपि गुणवान् पुत्रो निर्गुणैः किं शतैरपि।
> एकश्चन्द्रो जगन्नेत्रं नक्षत्रैः किं प्रयोजनम्॥

एवं विचारयन्तौ पुत्रेणानेनात्मानं कृतार्थममन्येताम्। क्रमेण कालेऽतीते यदासौ विंशतिवर्षवयस्कोऽभूत्तदाऽस्य वाग्दानं भाद्रगोत्रीयस्य समदडियाशाखीयस्य गोसलशाहस्य कुलपुत्र्या निखिलकलाकोविदया रूपगुणसंपत्समन्वितया रोली-नामिकया कन्यया सह निर्धारितम्। विवाहार्थमपि विचारः प्रचलति स्म।

अस्मिन्नेव समये श्रीमदाचार्यवर्यः श्रीककसूरिः शासनोद्योतभास्करः सकलशिष्यसमन्वितो डमरेलपुरमायासीत्। कृतश्च संघेन स्वागतविधिः। प्रारम्भिकीं देशनां समाकर्ण्य सर्वे भावुकाः सन्तुष्टमानसा बभूवुः। एकदा प्रसंगवशात्सूरिणा नरकनिगोदानां वर्णनं यथार्थतया विहितम्। सर्वे च भविष्यति कालेऽस्माकमीदृशी दुःखबहुला परिस्थितिर्मा भूदिति कोऽत्र प्रतीकारः कथञ्चानुष्ठेय इति स्वचेतसि चिन्तयामासुः। सभायां समासीनश्चोखाशाहोऽपि सांसारिकीं संसरणशीलां क्लेशबहुलामवस्थां परिलक्ष्य–

> अर्थाः पादरजःसमा गिरिनदीवेगोपमं यौवनं
> आयुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवितम्।
> धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
> पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते॥

एवं विचार्य सर्वथा धर्मध्यानमेव श्रेयस्करमात्मकल्याणपरम्परायै इति निश्चिकाय। विचार्य च "मम तु मतिर्न मनागपैतु धर्माद्" इति भगवन्तं मुहुर्मुहुर्ययाचे। असारसंसारविरक्तमतिस्तीक्ष्णबुद्धिरसौ गृहं गत्वा पित्रोरग्रे दीक्षाग्रहणाभिलाषां निवेदयामास समाकर्ण्य च दुःखितान्तःकरणौ तौ तं बोधयामासतुर्नशेकतुस्तं निवारयितुं निश्चयात्। जनकेन चास्य श्वशुराय सर्वो वृत्तान्तो निवेदितः। उद्वाहविधिनैवासौ संसाराकृष्टमानसो भविष्यतीति विचार्य शुभे दिने पाणिपीडनविधिः सम्पादितः। तेन च सा प्रथमरात्रावेव तथोपदिष्टा यथा दीक्षाग्रहणाय सज्जीबभूव नववधूः। अन्ते मात्रा पित्रा चानुज्ञातौ तौ विक्रमस्य १ ९६ तमे संवत्सरे फाल्गुने शुक्ले पक्षे पञ्चम्यां स्थिरे लग्ने श्रीककसूरेर्वरदहस्तेन द्विचत्वारिंशत्संख्यकैर्भावुकैः सार्धं दीक्षां जगृहतुः। दीक्षाग्रहणादनन्तरमस्य देवभद्रमुनिरिति नाम कृतम्। एतदीयदीक्षाग्रहणवृत्तान्तः सिन्धप्रान्ते धर्मप्रचारकर्मणि प्रभूतं सौकर्यमकरोत्। महतां हि चरितमनुकरणीयं भवति सर्वत्र।

असौ देवभद्रमुनिराचार्यवर्यस्य समीपे स्थितोऽल्पेनैव कालेन न्यायव्याकरणतर्कालंकारादिषु शास्त्रेषु

परं नपुण्यमाससाद । अष्टांगयोगविद्यायां निमित्तज्ञाने च तथैव कुशाग्रबुद्धिः सर्वानत्यशेत । विक्रमस्य ११०८ तमेऽब्दे चन्द्रावतीस्थः संघस्तं महामहोत्सवपूर्वकमुपाध्यायपदविभूषितमकार्षीत् । तस्मिन्नेव संवत्सरे भिन्नमाल-नगरे वैशाखशुक्लपूर्णिमायां भैंसाशाहेनानुष्ठिते सूरिपदमहोत्सवे श्रीककसूरिराचार्यपदे स्थापयामास । पर-म्परानुसारेण तस्य देवगुप्तसूरीति नाम चकार ।

आचार्यः श्रीदेवगुप्तसूरिः प्रखरप्रतिभान्वितो बालब्रह्मचारी पण्डितधुरन्धरो धर्मप्रचारकः शासनसमुन्न-तिकारको बभूव । तदीयालौकिकतपस्तेजःप्रभावेण जनानां मानसानि स्वयमेव तं प्रति समाकृष्टान्यासन् । व्याख्यानशैली च मधुरा हृदयग्राहिणी चतुरस्रपाण्डित्यपूर्णा श्रोतृजनमनोरञ्जिकाऽभूत् । सर्वत्र शिष्य-मण्डलीमण्डितो विहरणेन जनान् धर्मतत्त्वमुपदिश्य सत्पथानुसरणशीलान् व्यधत्त। एवमसौ विहरन् भैंसा-शाहस्याग्रहमनुमान्य भिन्नमालनगरे चतुर्मासावधिकमुवास । सपादलक्षपरिमितधनेन सः श्रेष्ठी श्रीभगवती-सूत्रवाचनामकारयत् । श्रेष्ठिनो जनन्या प्रतिप्रश्नं सुवर्णमुद्रया ज्ञानपूजा कृता । समाप्ते चतुर्मासे तस्य मातुः श्रीशत्रुञ्जयतीर्थं प्रति संघनिष्कासनस्याभिलाषो जातः । तदर्थं तस्मै सा न्यवेदयत् । परमधर्मरुचिरसौ प्रसन्न-मनसा तदी ' वचः स्वीचकार । सूरीश्वरस्यापि संमतिः प्राप्ता । संभृतानि घार्थमुपकरणानि । मात्राऽसावुक्तः पुत्र ! संघनिष्कासनार्थमुपयुक्तं धनं विद्यत एव किन्तु मार्गेऽकस्मादावश्यकता स्यात्तदर्थमपेक्षितम् । भैंसाशाहेन सा प्रोक्ता । अम्ब ! यत्रावश्यकता तत्समीपस्थे ग्रामे नगरे वा मम नामकथनेन तत्रत्यः कश्चिदपि धनं तेऽवश्यं दास्यति । सा च तथास्त्वित्युक्त्वा शुभे दिने महता संघेन सह यात्रार्थमभिप्रतस्थे । क्रमशो मार्गागतानां देव मन्दिराणां दर्शनादिकं कृत्वा संघः सिद्धाचलमाययौ । तत्राष्टाह्निकामहोत्सवपूजाप्रभावनादीनि कृत्वा प्रभूतं पुण्यलाभमलभत सा श्रेष्ठिनो माता । यात्रां विधाय संघो निर्गतः क्रमेण पाटणनगरमाजगाम । तदानीं तन्नगरं कोट्यधिपैः परिपूर्णं समृद्धिसमन्वितमभूत् । तैः सह स्पर्धमाना सा तत्र धर्मकर्मणि धनमधिकं विन्ययुंक्त । कोशोऽपि रिक्ततामगमत् । सा च संघप्रबन्धकैः सह नगरं गत्वा श्रेष्ठिन ईश्वरदासस्य समीपमुपस्थिता । प्रबन्ध-कैश्चोक्तम्-इयं धनकुबेरस्य भैंसाशाहस्य जननी तीर्थयात्रां सम्पाद्य धर्मार्थं धनं विनियुज्य रिक्तकोशा वर्ततेऽतो मान्यो भवान् अस्यै द्रव्यमुपयुक्तं ददातु । स्वस्थानं गत्वा वयं तद् द्रव्यं प्रेषयिष्यामः । एवमप्यविश्वासश्चेदिमां पेटिकां न्यासरूपेण गृह्णातु भवान् । स च तदीयं वचोऽनादृत्य तानवोचत् सोपहासम्-नाहं तं भैंसाशाह-श्रेष्ठिनं जानामि । अस्माकं नगरे बहवो भैंसा जलभरणकर्मकराः सन्ति । सा च समाकर्ण्य गर्वपूर्णं तस्य वचनं यथागतं प्रत्याययौ प्रबन्धकैः सह । द्रव्यप्राप्तये श्रेष्ठिनो माता नगरं गतेत्युपलभ्य सर्वे संघस्थाः स्वसमीपस्थं धनालंकारादिकं सव प्रत्यागतायै तस्यै समर्पयामासुः । सा च क्रमशो भिन्नमालनगरं प्रत्याजगाम । सर्वे च संघस्थाः सुवर्णमुद्रावस्त्रादिभिश्च सत्कृताः स्वगृहं ययुः । कुशलप्रश्नानन्तरमसौ श्रेष्ठी स्वमातरमगादीत्-मातः ! मम नाम्नः प्रसिद्धिः कियद-वधिका कीदृशी च ? अस्मदीयनगरद्वारावधिकस्त्वन्नामप्रचार इति साक्षेपं सा तमवादीत् । स च ग्लानिमापन्नो मुहुर्मुहुरत्र कारणमप्राक्षीत् । जननी च सर्वं पाटणनगरे श्रेष्ठिन ईश्वरदासस्य वृत्तान्तमस्मै श्रावयामास । स च वज्राहत इव तस्य प्रतिकारार्थं घृततैलक्रया ' स्वकीयकर्मकरान् तत्र प्राहिणोत् । ते च गत्वा क्रयार्थं तन्नग-रव्यापारिभ्यः प्रभूतं द्रव्यं ददुः । स्वयंञ्च समीपस्थग्रामेभ्यः प्रमाणाधिकं धनं दत्वा घृततैलसंचयं चक्रुः । येन लाभलोलुपास्ते पाटणनगरनिवासिनो व्यापारिणो घृततैलसंचयं कृत्वा तेभ्यः प्रत्यर्पयितुं नालंबभूवुः । ततः खिन्नमानसास्ते भैंसाशाहस्य कर्मकरानवादिषुः मान्याः ! धनमिदं गृह्णन्तु भवदीयं भवन्तो, नास्माभिर्घृत-तैलसंचयः कर्तुं शक्यते येन भवद्भ्योऽर्पयितुं वयं समर्था भवेम। व्यापारिणामिदं वचनमाकर्ण्य ते प्रोचुः-जानन्ति भवन्तो वयं भैंसाशाहस्य कर्मकराः स्मः । यस्य माता संघमत्र संस्थाप्य रिक्तधना धनार्थं याचमाना

भवद्भिरुपहसिता न केवलमिदमपि तु भैंसा हि बहवोऽत्र जलाहरणकर्मकराः सन्तीत्यपमानितासीत्। वच एतदीयं श्रुत्वा तद्प्रेसर ईश्वरदासो लाज्जयाऽधामुखः स्वचेतसि महतीं ग्लानिमवाप। विफलमनोरथास्ते भिन्नमालं गत्वा सप्रश्रयं श्रेष्ठिनं भैंसाशाहमवोचन् स्ववृत्तान्तं क्षमां चायाचन्त। तेन च भृशमुपालब्धास्ते प्रत्युत्तरं दातुं नाशक्नुवन्। अन्ते सः श्रेष्ठी तेषामपराधमक्षमत। कृतादराश्च तत्र नद्यां क्षिप्यमाणं घृतं तैलञ्च माण्डवगढ़नगरस्थासु घृततैलवापीसु प्रवाहरूपेण गच्छद्ददृशुः। अयं सच्चायिकाया एव महान् प्रभाव आसीत्। सा च श्रेष्ठिनोऽनुग्रहतत्परा वर्तत इति विचारयन्तः स्वदेशं प्रतिनिववृतिरे।

वंशावलीकारा अत्र वदन्ति-पाटणनगरे मरुधरदिशि वर्तमानस्य द्वारस्योपरिभागे भैंसाशाहस्य पाषाणमयी प्रतिमा स्थापिताऽभूत्। तदधोमार्गेण ते गुर्जराः क्षमां याचमानाः स्वस्थानं प्रति ययुः॥

पाटणनगराद् बहिर्यस्यां घृतं तैलं च निक्षिप्तमासीत् सेदानीमपि तेलिया-नदीति लोके व्यवह्रियते।

श्रीमान् चन्दनमलजीनागोरी-नामको लेखकः भैंसाशाहेन माण्डवगढ़नगरे निर्मापिता घृततैलवाप्यः पूर्वमासन् तासां भग्नप्राया अवशेषा इदानीमपि दृश्यन्त एवेति लिखति।

भैंसाशाहस्य माता तीर्थयात्रां कृत्वा स्वस्थानमाजगाम तदा तेन प्रतिजनमेकादश मुद्रा इति नियमेन सबहुमानं सवस्त्रं सर्वे संघस्थाः सत्कृता बभूवुः। याचकेभ्यश्चाश्ववस्त्रादिकं दत्तं यस्य वर्णनमपि कर्तुमशक्यम्।

मात चली जब जात बेटा जब बाल समर पे।
कत पडत तोय काम धन नाम मम लेत करपे॥
• ◦ ◦ ◦ ◦ ◦ ◦ ◦ ◦ ◦ ◦ ◦ ◦
भैंसाज सेठ खरहत्थतणो आपणा बोल निभाइयो॥

एवमस्य घटनाया उल्लेखः पट्टावल्यां दृश्यते।

अथैकदा श्रीमदाचार्यचरणाश्चन्द्रावतीमाययौ। तत्र धर्मतत्त्वोपदेशेन सभ्यान् धर्मरुचिरुचिरानकरोत्। कश्चिदेको भावुकः सहसा तत्रोत्थाय धन्येयं भूर्यत्र विद्वद्वरेण्यस्य श्रीगुरुवर्यस्यामृतमयी देशनाऽस्मान् पावयति। धन्यश्चायं दिवसो यत्र धर्मतत्त्वश्रवणेन प्रभूतं पुण्यमासादितम्" इति बहुविधमाचार्यस्यैव प्रशंसामकरोत्। श्रुत्वा च दुःखितान्तःकरणः स आचार्यस्तमवादीत्, महाशय! नाहं तथा प्रशंसनीयः अधिको हि मानोऽपमानं जनयति। क सर्वतन्त्रस्वतंत्रसिद्धयस्तीर्थंकराः कैवल्यदर्शनाः, क चाल्पज्ञः परिमितशक्तिको मादृशः पामरः। भवत्कृतां प्रशंसामहं निन्दामेव मन्ये। अतो वाग्व्यवहारो विचारपुरःसरमेव शोभते। भगवन्तः श्रीतीर्थंकराः कैवल्यज्ञानेन दर्शनेन च लोकालोकस्थानखिलान् पदार्थान् हस्तामलकवत् प्रत्यक्षान् कुर्वन्ति। यत्र तेषां परमं पवित्रं विमलं ज्ञानमुत्पद्यते तत्र भूमौ देवताः खलु समवसरणस्य दिव्यां रचनामातन्वते। यथा वायुकुमारस्य देवता स्वकीयदिव्यवैक्रियशक्त्या योजनप्रमाणाया भूमेः काष्ठकण्टकपाषाणादीन् दूरमुत्सारयति। शुद्धां पवित्रां च करोति। ऋतुदेवदाश्च तत्र पञ्चवर्णां जानुदघ्नां पुष्पवृष्टिं कृत्वा तत्स्थानमधिकमनोहरं विधत्ते। यथा समवायांगसूत्रे।

जलथलय भासुर पभूतेणं विठंठाविय दसद्धवण्णेणं कुसुमेणं जाणुस्सेहप्पमाण मित्ते पुप्फोवयारे किज्जई॥ इत्यादि॥

एवमन्या अपि देवतास्तां भूमिं विविधरत्नसुवर्णरचनादिभिरधिकमनोहरां कुर्वन्ति। तत्र स्थिताः श्रीतीर्थंकरा निखिलान् देवदानवयक्षादीन् धर्मदेशनां श्रावयन्ति। न तत्र रागद्वेषमानापमानाः प्रवेशं लभन्ते। यत्र स्वाभाविकवैरा गोमहिषादयोऽपि विगतवैरा देशनां शृण्वन्ति। एवं यत्र तीर्थंकराणां कैवल्यज्ञानमुत्पद्यते तत्रैकं

समवसरणमपरमन्यत्रेति समवसरणद्वयं भवति। परन्त्वस्मिन्नवसर्पिणि काले भगवतः ऋषभदेवस्याष्टौ समवसरणानि जातानि। तदानीं जनाश्च भद्रिका आसन्। भगवतः श्रीमहावीरस्य द्वादश समवसरणानि यतो मिथ्याग्रहग्रसिता जना याज्ञिकानां पशुहिंसानिरतानाञ्च प्राबल्यम्। अवशिष्टानां द्वाविंशतिसंख्याकानां श्रीतीर्थंकराणां प्रत्येकं द्वे द्वे समवसरणे। तेषां व्याख्याने बाह्याऽभ्यन्तरीया चेति द्विविधा विभूतिः बाह्यायामष्टौ महाप्रतिहार्याणि, आभ्यन्तरं केवलज्ञानं केवलदर्शनञ्च। धन्या एव ते महानुभावाः यैस्तीर्थंकराणां समवसरणं प्राप्य निखिलपातकक्षपणसमर्थानि स्वकल्याणसाधकानि श्रुतानि व्याख्यानानि। सर्वमिदं शास्त्रे सुविशदं निरूपितं मयाऽत्र संक्षेपेणोक्तम्। श्रीतीर्थंकरसमवसरणविषयकं व्याख्यानमाकर्ण्य सभ्या आत्मानं धन्यममन्यन्त।

आचार्यः श्रीदेवगुप्तसूरीश्वर एवं विंशतिवर्षाणि शासनस्यातिमहतीं सेवामकरोत्। मांसमदिराद्यभक्ष्यभक्षणशीलान् धर्मतत्त्वामृतं पाययित्वा जिनधर्मदीक्षादिक्षितान् चकार। नूतनानां मन्दिराणां मूर्तीनाञ्च प्रतिष्ठापनं विराट्संघायोजनमिति बहुविधानि शासनकार्याण्यविरतं संपाद्य धर्मलतां दृढमूलामकरोत्।

अन्ते च स्वपट्टे श्रीसिद्धसूरिं प्रतिष्ठाप्यानशनसमाधिसेवनेन स्वर्गपथप्रवासी बभूव।

## उपकेशगच्छे खटकुम्पशाखा।

आचार्यस्य श्रीककसूरेरनन्तरं श्रीसिद्धसूरिनामक आचार्यो बभूव। असौ सर्वगुणसंपन्नः शासनप्रभावक खटकुम्पनगरे स्थिरवसतिमकार्षीद् येन विहाराद्यभावेन धर्मप्रचारशैथिल्यमालक्ष्य शुभचिन्तकैः श्रमणैर्विज्ञापितोऽपि स्वाग्रहं नात्याक्षीत्। ततस्तैर्मिथः शासनसमुन्नतिं विचार्य देवविमलनामानमाचार्यगुणभूयिष्ठं नूतनमाचार्यं प्रतिष्ठाप्य तदध्यक्षत्वे सर्वत्र विहरणदेशनादिभिर्धर्मप्रचारकार्यमारब्धम्। खटकुम्पनगरनिवासिनः श्रीसिद्धसूरेरध्यक्षत्वे बहवः साधवः साध्व्यश्चासन्। तथापि न कश्चित्समुचितः शिष्यः स्वपदेऽनेन प्रतिष्ठापितः। अकस्मादेव सः स्वर्गमव्रजत्। अतस्तदीयकार्यभारं तस्य यक्षमहत्तरनामा शिष्य उवाह।

एकदा परिभ्रमन्नसौ मथुरामयासीत्। तत्र गृहीतारण्यकदीक्षो नन्नभट्टनामा महाप्रभावो नगराद् बहिः सिद्धान्ताभ्यासार्थमवात्सीत्। तमुपदिश्य श्वेताम्बरीयां दीक्षां दत्वा निखिलगुणवरिष्ठं तमाचार्यस्य श्रीसिद्धसूरीश्वरस्य पट्टे स्थापयामास। नाम चास्य श्रीककसूरीति चकार। अयं च जनान् धर्मतत्त्वं विबोध्य दीक्षां दत्वा स्वगच्छाभिवृद्धिमकार्षीत्। श्रमणानाञ्चातिमहती संख्या बभूव। तत्र कृष्णर्षिनामकः परमतपस्वी तीक्ष्णबुद्धिर्विप्रश्रमण आसीत्। सर्वगुणसंपूर्तिरसौ जिनागमतत्त्वज्ञः क्रमेण बभूव। किन्तु आचार्यः श्रीककसूरिरस्य दीक्षाग्रहणानन्तरमल्पेन कालेन स्वशरीरमत्यजत् तदानीं यक्षमहत्तरः खटकुम्पनगरे स्थिरवासमङ्गीचकार। कृष्णर्षिश्च तत्र गत्वा ककसूरिवृत्तान्तं निवेदयामास। ज्ञात्वा च स्वसमीपे तमुपसंपदादिक्रियाकलापं शिक्षयामास। अन्ते च शासनभारं तस्मै समर्प्य सोऽप्यनशनसमाधिव्रतानुष्ठानेन तत्याज नश्वरं देहम्।

कृष्णर्षिस्तु देव्याश्चक्रेश्वर्या अनुज्ञामासाद्य चित्रकूटं गत्वा कस्यचिदाचार्यस्य समीपं कञ्चिदेकं शिष्यमध्यापयामास। सकलगुणमण्डितञ्च तमाचार्यपदे संस्थाप्य देवगुप्तसूरीति तन्नाम कृतवान्। गच्छकार्यभारं तस्मै समर्प्य स्वयं स्वतन्त्रो भूत्वा विहरणक्रमेण नागपुरमाययौ। तत्र तदीयमलौकिकगुणसमन्वितं धर्मप्रचुरं व्याख्यानं श्रुत्वा नारायणनामा श्रेष्ठी चतुःशतसंख्यकैः कुटुम्बिभिः सार्धं जिनधर्मदीक्षामगृह्णात्। तदीयप्रभावसमाकृष्टमानसः श्रेष्ठी मन्दिरनिर्माणार्थमाज्ञां प्राप्य तन्नगराधिपतिं राजानमुपेत्य सप्रश्रयमगादीत्। राजन्! सर्वजनकल्याणसाधकमेकं मन्दिरं निर्मापयितुमहमभिलषामि, तस्मात्तदुचितां भूमिं मे ददातु भवान् इति तद्वचः सादरमाकर्ण्य सन्तुष्टमना राजा समुचितां दुर्गभूमिं तस्मै तदर्थं ददौ विना मूल्यम्। प्रसन्नमानसः श्रेष्ठी शुभे

दिने आतमुहूर्ते कृत्वा मन्दिरकार्यमारभत । समाप्ते मन्दिरकार्ये कृष्णर्षिसमीपमेत्य तत्प्रतिष्ठायै निवेदयामास । स च समवोचत् श्रेष्ठिन् ! अवश्यं प्रतिष्ठाविधिः सत्वरं कर्तव्य इत्यहं जाने । किन्तु श्रीदेवगुप्तसूरिर्योऽद्य गुर्जरदेशे विहरति स एवात्रागत्य तत्कार्यं सम्पादयिष्यति तदेव न्याय्यम् । अतस्तमाह्वातुमामन्त्रणं प्रेषयतु भवान् । प्रेषिताः सेवकाः । शासनशुभचिन्तकः स देवगुप्तसूरिर्नागपुरं समाययौ । शुभे मुहूर्ते प्रतिष्ठाविधिं समपादयत् । मन्दिरमिदमतीव विशालमासीद् यस्य व्यवस्थायै द्विसप्ततिपरिमिताः पुरुषास्तावत्यश्च स्त्रियो नियुक्ता आसन् । प्रतिष्ठाकार्यं समाप्य कृष्णर्षिः सपादलक्षप्रान्ते विहृत्य जिनधर्मप्रचारमकार्षीत् ।

देवगुप्तसूरीश्वरः स्वपट्टे जयसिंहमुनिं सिद्धसूरिनाम्ना स्थापयामास । स च वीरदेवं मुनिं कक्कसूरीति नाम्ना सूरिपदप्रतिष्ठितमकरोत् । कक्कसूरिश्च वासुदेवं मुनिं देवगुप्तसूरीत्यभिधेयेनाचार्यपदे नियोजयामास । तस्य स्थानेऽपरः सिद्धसूरिः समायातः । स च चन्द्रावत्यां श्रीमेरुतिलकमुपाध्यायं स्वपदे संस्थाप्य स्वर्गस्थोऽभूत् । यस्य कक्कसूरीति प्रसिद्धिः । एवं सिद्धसूरेर्द्वौ पट्टधरौ । एकश्चन्द्रावतीस्थश्चन्द्रावतीशाखीयः, अपरश्च खट-कुम्पशाखीयः । द्वयोः परम्परा कक्कसूरि-देवगुप्तसूरि-सिद्धसूरीति क्रमेण प्रचलति । चन्द्रावतीशाखा कियत्पर्यन्तं प्रचलितेति निर्धारणं दुःशकम् । खटकुम्पशाखा त्विदानीमपि नंगी-पोसालो-नाम्ना विद्यत एव ।

## आचार्यः श्रीकक्क सूरिः ।

मारोटकोटनगरे काकूनामको मांडलिकः क्षत्रीयवंशीयो राजा बभूव । असौ स्वनगरस्य परितो वर्तमानस्य दुर्गस्य जीर्णोद्धारार्थं दाढ्यार्थं च कर्मकरानादिदेश । ते च यावत्खननमारभन्ते तावदेव ततो भगवतो नेमिनाथ-स्य विशालां मूर्तिं ददृशुः । दृष्ट्वा च राजानं व्यज्ञापयन् । प्रीतेन च राज्ञा मन्दिरनिर्माणाय शिल्पिनः समादिष्टाः । प्रासादस्थितो राजा, अन्तःपुरस्थिता राज्ञी चानायासेन दर्शनं कर्तुं शक्नुयात्तादृशं बृहत् मन्दिरं तैर्निर्मितम् ।

अस्मिन्नेव शुभावसरे तत्रभवानाचार्यः श्रीकक्कसूरिस्तत्राययौ । राजा मन्त्री प्रजाश्च भव्यमस्य स्वागतं चक्रुः । सर्वान् धर्मलाभाशिषा संभावयन् प्रतिष्ठार्थं निवेदितः शुभलक्षणान्विते मुहूर्ते रम्यां मूर्तिं प्रतिष्ठापयामास । तस्मिन् समये मारोटकोटनगरे श्रावकाणां चतुःशतानि गृहाणि पंच पौषधशालाश्चासन् । अनेनानुमीयते यत्तदा तन्नगरं जैनानां महत् केन्द्रस्थानमासीदिति यथा राजा तथा प्रजेति नियमेन सर्वे जिनधर्माचरणेनात्मकल्याणा-भिरुचयो बभूवुः ।

प्रतिष्ठाविधिं समाप्य धर्मप्रचारार्थं विहरन्नसौ कक्कसूरी राणकदुर्गमाससाद । तत्र धर्मतत्त्वव्याख्यान-श्रवणसमेधितजिनधर्मभावनो राजा सुरदेवो यावदत्र मन्दिरं तिष्ठति तावदेव सर्वे धार्मिका दर्शनस्पर्शनमहोत्स-वादिभिरात्मश्रेयःसम्प्राप्तौ प्रयतिष्यन्ते" इति महान्तं धर्मलाभं मन्यमानः सूरेराज्ञां प्राप्य रमणीयं विशालं मन्दिरमेकं निर्मापयामास । यस्य प्रतिष्ठाकार्यं सूरिणैव सम्पादितम् । दीर्घदर्शी सूरिर्यथाधर्मभावना सर्वेषां तथैव वर्धेतेति विचार्याष्टाह्निकामहोत्सवानुष्ठानमादिदेश । राज्ञा च तद्वचः शिरसाऽभिनन्दितम् ।

एकदा श्रीकक्कसूरिः शान्तिमुनिं स्वशिष्यमगादीत्—मुने ! त्वमपि कंचिद् राजानं प्रतिबोध्याभिन देवालयं निर्मापयिष्यसि-किम् ?तेन च तदीयं वचनं साक्षेपं मन्यमानेन तथैवोक्तम् , यद्येवं स्यात्तदा भवानपि प्रति-ष्ठाविषये तत्रागमिष्यति किम् । गुरुणा च तथेत्यङ्गीकृतम् । गुरोराज्ञां प्राप्यासौ त्रिभुवनदुर्गं गत्वा तदधिपतिं प्रतिबोधयामास । मन्दिरनिर्माणं धर्मव्याख्याने मुख्यमुद्देश्यम् । मन्दिरनिर्माणेनालौकिकपुण्योपार्जनेऽनेकेषां राज्ञामुदाहरणानि प्रदर्शितानि । हृदयंगममुपदेशमस्य श्रुत्वा नूतनजिनालयनिर्माणार्थमभिलाषं प्रकटीचकार राजा । तदनुमतश्च स शिल्पिन आदिदेश तन्निर्माणार्थम् । शीघ्रमेव मन्दिरकार्यं शिल्पिभिः समापितम् । शान्तिमुनिः प्रतिष्ठार्थं राज्ञा कक्कसूरिमामन्त्रयामास । शिष्यस्याज्ञापालनं विचार्य सन्तुष्टमानसः स आचार्यस्तत्र गत्वा शान्तिमुनिमभिननन्द । सर्वशुभलक्षणलक्षणीये मुहूर्ते प्रतिष्ठामकरोत् स्वकीयवरदहस्तेन । सूरीश्वरप्रभावसमाकृष्ट-

चेता राजा राज्ये सर्वत्राहिंसाधर्ममुद्घोषयामास ।

अहो साक्षेपं वचोऽपीदृशमेव शोभते यत्र परिणामो निजधर्मप्रचार एव स्यात् ।

## आचार्यदेवगुप्तसूरेर्वीणावादनम् ।

चन्द्रावतीनगरवास्तव्यः प्राग्वटवंशीयो वीरजगदेवः श्रीकक्कसूरेः सकाशं दीक्षामग्रहीत् । अल्पेनैव समयेन सर्वाणि शास्त्राण्यधीत्य सर्वगुणोपपन्नोऽसौ देवगुप्तसूरीतिनाम्ना सूरिपदे प्रतिष्ठापितोऽभूत् । गच्छीयकार्यभारः सर्वस्तधीनः, तथाप्यसौ जिनभक्तिपरायणो भक्त्यावेशेन वीणया देजिनवमुपवीणयन् समयमतिवाहयति स्म। वीणावादनमिदं चारित्रवृत्तिविघातकमिति मन्यमानः श्रीसंघस्तं सादरमभ्यर्थयामास आचार्यवर्य ! वीणावादनमिदं साधुवृत्तिविघातकं शिष्यानर्थानुबन्धि ततश्च स्वेच्छाचारप्रवृत्तिः साधूनामपि भवेत् । तदनुसरणशीला भावुका भवेयुः । येन धर्मतन्त्रमिदं सर्वथा स्वेच्छाचारपूर्णं धर्माचरणप्रतिकूलं स्यात्तदेतन्मा भूदिति भवानेव विचारयतु । एवमुक्तोऽप्यसौ नात्याक्षीद् वीणावादनम् । मदोद्धतो गजोऽकुंशमिव नाजीगणत्सूरिः श्रीसंघाभ्यर्थनाम् । श्रीसंघश्च विमनस्को बभूव । ततो व्यतीते कियति काले शासनगौरवरक्षणाभिलाषुकः स्वप्रवृत्तिं धर्मप्रतिकूलामपि प्राक्तनजन्मसंस्कारमूलामप्रतिकार्यां मन्यमानः सविनयं श्रीसंघसमक्षमवोचत् मान्याः !

अहं नात्मवशः किन्तु वशगः पूर्वकर्मणाम् ।
जानन्नपि जिनादेशं धर्म्यं यद्व्यसने रतः ॥
गौरवं रचितं वः स्याद्धर्मस्यात्र मुहुर्मुहुः ।
जिनभक्तिरते चित्ते नास्त्यपेक्षा गुरोः पदे ॥

एवमस्य ममत्वरहितं शासनसमुन्नतिसूचकं वचनमाकर्ण्य न किंचित्तेऽवादिषुः । अन्ते च स्वयमेव संघसमक्षं गुणभद्रमुनिं स्वपदे प्रतिष्ठाप्य सिद्धाचलमभिप्रतस्थे । पवित्रतीर्थसेवनेन स आयुषः शेषमत्यवाहयत् । अयं भिन्नमालशाखीय आचार्यः । पट्टावल्यामियं घटना वैक्रमे ९९५ तमेऽब्दे समजनीति समुल्लेखो दृश्यते ।

आचार्यः श्रीकक्कसूरिर्यदा डमरेलपुरमेत्य जिनधर्मप्रचारमकार्षीत्तदा केचन विरोधिनो द्वेषोपरक्तमानसाः कञ्चनमन्त्रशक्तिकुशलं मुनिमन्यतो देशादाहूय भौतिकैश्चमत्कारैर्जनान् जिनधर्मानुरागिणः स्वपक्षे समाचकृषुः राजा हमीररावोऽपि भ्रमभ्रान्तहृदयः स्वधर्मं दूरीकृत्य तत्पक्षीयो बभूव । दुःखितान्तःकरणैः कैश्चिज्जिनभक्तिपरायणैः सूरिर्निवेदितः । स च गुणसुन्दरं नाम मन्त्रशक्तिप्रभावरञ्जितसकललोकमानसं शिष्यं राज्ञः समीपं प्राहिणोत् । मुनिस्तु गुरुणाऽदिष्टो राजसभां गत्वा राजानं प्रतिबोधयामास—राजन् ! भवान् परम्परातो जिनधर्मोपासकः । आत्मकल्याणप्राप्तये स एव धर्मः परीक्ष्यमाणः सर्वधर्मोत्कृष्टः कथमद्य निरपेक्षं भवता त्यज्यते । भौतिकचमत्कारदर्शनेन न खल्वात्मकल्याणमासादयितुं शक्यते केनापि । तत्र तु बुद्धेर्व्यामोह एव फलम् । तथापि भवतस्तत्रैवाभिरुचिस्तदा जिनधर्मेऽपि तादृशचमत्कारबहुलानि शास्त्राणि । द्रष्टुमभिलषति भवान् यदि क्रमश उभयोरपि प्रयोगान् पश्यतु । राज्ञा चः तदीयं वचः सहर्षं स्वीकृतम् । उपस्थिता उभयपक्षीया जनाः । आरब्धाः प्रयोगाः क्रमेणोभयोः । प्रतिपक्षीयेण कथंचित् प्रथमो दिवसोऽतिवाहितः । तदनु रात्रावेव पलायितः सः । आचार्यः श्रीकक्कसूरिः शिष्यप्रभावसन्तुष्टहृदयः स्वधर्मप्रचारार्थं तत्रैव चतुर्मासमङ्गीचकार ।

## वि० सं० ११२८ तः] ५० आचार्यः श्रीसिद्धसूरिः । (एकादशः) [वि० सं० ११७४ प

श्रीमदाचार्यवर्यः श्रीदेवगुप्तसूरीश्वरपदं परमश्रद्धेयो विविधागममर्मज्ञो विविधकलाकलापी महातपस्वी ज्ञानदर्शनचारित्रचित्रीकृतनिखिलजनमनोमोदकोऽसारसंसारार्णवनिमग्नभग्नहृदयोद्धारकः श्रीमान् सिद्धसूरिरलंच-

कार ! अयं भिन्नमालनगरनिवासी सकलजगद्विद्योतितकीर्तिमण्डलस्य श्रेष्ठिवर्यस्य भैंसाशाहस्योदारचरितस्य परमभाग्यशाली संस्कारसंस्कृतमतिः सूनुः । अस्य माता सौभाग्यसौजन्यौदार्याद्यनेकगुणगणालंकृता ललनाजनललामभूता परमभगवद्धर्मानुरागिणी सुगनी देवी । नाम चास्य पूर्वाश्रमस्थं धवलेति ।

यदा भैंसाशाहस्य जननी शत्रुञ्जयं प्रति संघं निष्कासयामास तदा संघस्य व्यवस्था धवलेन स्वीकृताऽसीत् । धार्मिके कर्मणि तस्य समधिका हार्दिकी रुचिरेवाचार्यस्य देवगुप्तसूरीश्वरस्य तस्मिन् पक्षपाते मुख्यो हेतुरभूत् । सूरीश्वरस्य परमवैराग्यजनकानि संसारस्य हेयत्वप्रदर्शकानि परमार्थतत्त्वनिरूपणपराणि व्याख्यानानि प्रसंगवशादसौ बहून्यशृणोत् । येनात्मकल्याणसाधनेच्छा तस्य चेतसि दृढमूला शनैः शनैः पल्लविता बभूव ।

एकदा सिद्धाचले निवृत्तिमाश्रित्य समीपस्थितं धवलं सूरीश्वरोऽवोचत् कल्याणिन् ! आत्मकल्याणसाधनायोद्यतो दीक्षाग्रहणेन बहूनां संसारसमासक्तचेतसां जनानां मोहपाशं छित्त्वोपदेशेनात्मकल्याणं प्रापयितुं सर्वथा शक्यस्त्येव भवान् । स्वार्थेऽप्यानुषङ्गिकः परमार्थोऽवश्यमेव त्वया कर्तव्यः । संसारे स्थितोऽपि बहूनि सामाजिकानि कार्याणि साधयिष्यति किन्तु तानि संसारसंसरणसमर्थानि नात्मकल्याणसाधकानि भवेयुः । सादरं समाकर्ण्य सूरीश्वरवचः सूक्ष्मदृष्ट्याऽऽत्मकर्तव्यं विचार्य भवदुक्तमेव वरमिति निश्चित्य तीर्थयात्रादर्शनस्पर्शनध्वजारोपणादीनि धार्मिकाणि संपाद्य कार्याणि क्रमशो भिन्नमालं प्रत्याययौ । प्रत्यागत्य च मातापित्रोरग्रे दीक्षाग्रहणाभिलाषां निवेदयामास । पिता तस्मै शुभकर्मणि दीक्षाया अदादाज्ञाम् । माता तु दीक्षानामश्रवणेनैव भृशमुद्विग्ना पतिमुवाच स्वामिन् ! अहं धवलस्य दीक्षाग्रहणं नाभिनन्दामि, सर्वगुणसंपन्नो धवलो मे महामूल्यं रत्नम्, अक्ष्णः कनीनिका, वार्द्धकस्याश्रयोऽन्धस्य यष्टिरिव जर्जरितशरीराया मेऽवलंबनम् ! यथा तथा वा भवतु किन्तु दीक्षाग्रहणमशक्यमेव मयि जीवितायामस्य । श्रुत्वा च वात्सल्यस्नेहभावं तस्या भैंसाशाहस्तां बहुनुनीयावादीत्–प्रिये ! दीक्षां गृहाणेति धवलमादेष्टुं नेच्छामि, किन्तु दीक्षाग्रहणाभिलाषमनुमोदितुं तस्याभिलषाम्येव । मोहजन्यं स्वार्थमात्रसारं पुत्रप्रेम दूरीकृत्यात्मकल्याणसंपादनायोद्यं पुत्रमवश्यं त्वमनुमोदयस्व । यतो हि जन्म प्राप्यान्ते म्रियमाणाः सर्वे दृश्यन्ते किन्तु मातृकुलं पितृकुलं स्वकुटुम्बञ्च यशसोज्ज्वलीकृत्य स्वर्गं व्रजन्तो विरला एव विलोक्यन्तेऽत्र जगति । अत एवोच्यते ।

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥

पत्युरेवं परमार्थसारं निशम्य वचनं सा शीघ्रमेवानुज्ञां ददौ दीक्षार्थम् । सूरीश्वरः परममांगल्योपपन्ने मुहूर्ते भैंसाशाहेनानुष्ठिते महामहोत्सवे जिनमन्दिरे एकादशभिर्मुमुक्षुभिः सार्द्धं धवलाय दीक्षां ददौ । ततोऽस्येन्द्रहंसेति नाम्नः प्रसिद्धिरासीत् ।

मुनिरसौ राजहंस इव नीरक्षीरविवेकविचक्षण, इन्द्रहंसोऽल्पेनैव, कालेन, प्राक्तनजन्मकृतसुकृतप्रभावेण सकलागमतत्त्वसंग्रहणैकदक्षो विद्वज्जनवरेण्यो जितानेकवादी सत्यवादी विनयगाम्भीर्याद्यनेकगुणविभूषितमानसः प्रमोदमानमानसोऽभिनवतर्ककर्कशीकृतद्विषद्हृदयः, परमतपस्वी यशस्वी बभूव । अनेकासु राजसभासु स्वसिद्धान्तप्रतिपादनपटुः समेषां राज्ञां सभ्यानां च मनांसि रञ्जयामास ।

एकदा श्रीदेवगुप्तसूरीश्वरो विहरन् जावलीपुरमाययौ सकलशिष्यमण्डलीसमेतः । श्रीसंघेन सत्कृतस्तत्रैव स्वीचकार चातुर्मासिकीं स्थितिम् । श्रेष्ठिगोत्रीयो लिम्बाशाहो भगवतीसूत्रवाचनामहोत्सवमारभत । हस्तिन उपरि श्रीभगवतीसूत्रपुस्तकं संस्थाप्य महासमारोहेण परिक्रमणं कारयित्वा सूरीश्वराय समर्पयामास । श्रवणाभिलाषुकाश्चापूर्ववक्तृत्वशैलीपरिपूर्णं व्याख्यानं श्रुत्वा धर्मेऽधिकां रुचिमादधिरे । समाप्तिमगाच्च महोत्सवः । सर्वे च यथासुखं श्रवणमन्यपुण्यमलभन्त । तदनु लाखणशाहः सूरीश्वरस्याधिष्ठातृत्वे स्वस्य च

संघपतिस्त्वे शत्रुञ्जययात्रार्थं महान्तं संघं निष्कास्य प्रयाणमकार्षीत्। मङ्गलमये दिने च क्रमशस्तत्र गत्वा तीर्थदर्शनस्पर्शनपूजनध्वजारोपणादीनि सत्कर्माण्यन्वतिष्ठत्। संघस्था अपि भावुका यात्राजनितपुण्यलाभेनात्मानं धन्यं मेनिरे।

अथ कदाचिन्निर्वर्तितनित्यक्रियाकलापं सूरीश्वरमुपेत्य श्रद्धाभक्तिसमन्वितो लाखणशाहः सप्रश्रयं साञ्जलिबन्धं विज्ञापयामास भगवन्! भवत इदानीं वृद्धावस्था वर्ततेऽतः कमपि समुचितमाचार्यगुणगणनीबकीर्ति गांभीर्यमूर्ति मुनिमाचार्यपदे स्थापयितुमर्हति भवान्। चिरं विचार्य तदीयं वचोऽनुमान्य सूरीश्वरो लाखणशाहेनानुष्ठिते सूरिपदमहोत्सवे मुनिमिन्द्रहंसं सिद्धसूरिनाम्ना प्रख्याप्य स्वपदे स्थापयामास श्रीसंघानुमत्या सर्वमङ्गलकारके मुहूर्ते।

पूर्वाचार्यपरम्परामनुसृत्याचार्यः श्रीसिद्धसूरीश्वरः क्रमेण धर्मप्रचारमुद्दिश्य विहरन् पाटणनगरमात्मना भूषयामास। सर्वे च संघस्थास्तस्य भावभव्यं स्वागतं व्यदधुः। तदानीन्तने काले परमसमृद्धिमत्युपकेशपुरे करालकलिकालसाम्राज्येन मिथः कुटुम्बक्लेशेन पीड्यमाना यत्र तत्र बुद्धिमन्तः आत्महितनिरता निवासार्थं निर्जग्मुः। तत्रत्यः सुचन्तिगोत्रीयः कदर्पी श्रेष्ठी निवासार्थं पाटणनगरमभ्युपेतः स्वजातीयैर्दत्तावलम्बनः सहयोगमवाप्य राज्ञा सिद्धराजेनानुमतः स्वव्यापारकार्यमारभत। व्यापारे च प्रभूतमाससाद द्रव्यम्। तेनैकदा सूरेर्व्याख्याने जिनालयनिर्माणमाहात्म्यमाकर्णितम्। यथा—

काउंपि जिणायणेहिं मंडियं सयल मेइणीवट्टं। दाणाइचउक्केणवि सुड्डोवि गच्छिज्ज अच्चुअयंण परउगोयमगिहित्ति।

अर्थात्—भगवतो जिनेश्वरस्य मंदिरैरुपशोभितां पृथ्वीं विधाय दयादानसत्याहिंसादिरूपं धर्मं संसेव्य च श्रावको द्वादशं देवलोकमवाप्नोति। एकेनापि मन्दिरनिर्माणेन श्रावकस्य दर्शनपदमाराधितं भवतीति। श्रावककुले प्राप्य दुर्लभं मानुषं जन्म नूतनजिनालयनिर्माणम्, श्रीमद्भगवतीसूत्रवाचनामहोत्सवानुष्ठानम्, सूरीश्वरपदमहोत्सवः, स्वामिवात्सल्यम्, पूजाप्रभावनादिकम्, इत्येतानि पुण्यजनकानि कर्माण्यविरतमनुतिष्ठेत् श्रेयस्कामः। मन्दिरनिर्माणेन निर्मापकस्य केवलं न धर्मलाभोऽपि तु भावुकानां दर्शनस्पर्शनपूजादिभिरपि पुण्यप्राप्तिः। सम्राट् संप्रतिर्दृश्यतामुदाहरणम्। अद्य कियन्ति शतकान्यतीतानि तस्य। तथापि देवमन्दिरनिर्माणजन्यं यशस्तस्य समुज्जृम्भतेऽद्यापि। सूरीश्वरस्यैतद् व्याख्यानं श्रुत्वाऽभिनवजिनालयनिर्माणार्थमनुज्ञां प्राप्याचार्यवर्यस्य राज्ञः सिद्धराजस्य समीपमेत्य सोपहारं सविनयमगदीत् कदर्पी श्रेष्ठी—राजन्! नवीनस्य जिनालयस्य निर्माणाय भूमेरावश्यकता सा च भवतैव सौहार्देन दातुं शक्यते। राजा च धर्मरुचिः सहर्षमाह श्रेष्ठिन्! यथा ते रोचते तथैव गृहाण विना मूल्यं भूमिम्। नात्र संकोचो विधेयः। भूमिदानेनाहमपि पुण्यं किंचिल्लभे। अत्र काऽपेक्षा म उपहारस्य? श्रेष्ठिना चावोचि सरलप्रकृतिकः परमधार्मिको भवानिति जानामि नात्रोपहारापेक्षा चेत्यपि तथाप्ययं खलु शास्त्रीयः सिद्धान्तः—

अरिक्तपाणिं न पश्येद् राजानं देवतां गुरुम्।

यतो रिक्तपाणिना मया न भवान् द्रष्टव्य इति मत्वोपहृतं मयेति विनयरुचिरमस्य वचो निशम्य राजा परं प्रीतिमुपागतो भूमिं श्रेष्ठिने ददौ सहर्षम्। शिल्पिनः शिल्पकलाकुशलानादिदेश निर्मातुम्। कृतश्च कार्यारम्भः। संपूर्णे च रंगमण्डपे मन्दिरस्य श्रेष्ठिनोऽभिलाषा किंचित्पित्तलादिभिर्मिश्रितेन सुवर्णेनैव प्रतिमाविरचनस्याऽभूत्। तदर्थं मर्मज्ञान् पप्रच्छ।

यत्राभिनवजिनालयस्तस्य समीपमेव भावड्डशाखीयानां श्रावकाणामपि जिनालयो विराजते स्म। तत्र तद्गच्छीय आचार्यः श्रीवीरसूरिर्विविधमन्त्रविद्याविचक्षणो न्यवात्सीत्। विशालस्य सर्वाङ्गसुन्दरस्य मन्दिरस्य

परमरमणीयां शोभामभिवीक्ष्य स्वमन्दिरस्य शोभा प्रभावश्च निस्तेजस्को भविष्यतीति तस्य चेतसि द्वेषः पदं न्यधात्। स च स्वविद्याबलेन यत्र कर्मकरा धातुरसं मेलयित्वा प्रतिमां विरचयन्ति तत्रैव सहसा अनभ्रवृष्टिं चकार। ततश्च निष्फलमनोरथो दूयमानचेताः कदर्पी सूरीश्वरं सिद्धसूरिं प्राप्य सखेदं निवेदयामास सर्व-! वृत्तान्तम्। ज्ञानदृष्ट्या सर्वमेतद् वीरसूरेरेव चेष्टितमिति निश्चित्य समाश्वासपूर्वमसौ प्रोक्तः सूरिणा—श्रेष्ठिन् मा खेदं कुरु गच्छ, नातः परं किंचित्प्रातिकूल्यं ते भविष्यतीति। स च विश्वस्तो गत्वा कार्यमारभत। तस्मिन् समये वीरसूरिणा कृतामनभ्रवृष्टिं श्रीसिद्धसूरिः स्वमन्त्रबलेन स्तंभयामास। प्रतिमा च सर्वजनमनोनेत्ररमणीया सौकर्येण रचिता। नेत्रयोः स्थाने महामूल्यौ मणी शशिदिवाकराविवाखिललोकप्रकाशकौ स्थापयामास। परमप्रमोदमानमानसः श्रेष्ठी सूरीश्वरं बहु मन्यमानः प्रतिष्ठाविधये सादरं विज्ञापयामास। तदानीं तस्य कौटुम्बिकेन ब्रह्मदेवेन धर्मपरायणेनावादि—श्रेष्ठिन्! अतः परमहमपि किंचित्पुण्यं लभेयम्। ततस्तद्वचोऽनुमान्य सर्वमेव प्रतिष्ठादानादि कार्यं तेनैव सम्पादयामास कदर्पी श्रेष्ठी। अहो! गतः स समयो यत्रेदृशं सौमनस्यं जनानां च धर्माभिरुचिः।

आचार्यः श्रीमान् श्रीसिद्धसूरीश्वरो जिनागमगहनगहनाटवीसंचरणपञ्चाननोऽपीतरशास्त्रतत्त्वसंग्रहणकोविदो मन्त्रविद्यार्णवमथनमन्दराचलो दृढोत्साहेन महाशासनाभ्युदयमकरोत्। सर्वत्र प्रान्तेऽविरतं विहारक्रममङ्गीकृत्य शिष्यमण्डलं विभज्य धर्मप्रचारार्थं प्राहिणोत्। जैनेतरानपि धर्मतत्त्वं बोधयित्वा जिनधर्मे स्थापयामास। सर्वेषामात्मकल्याणसाधना " पाठशालानां संस्थापनम्, धर्मशास्त्राणां मिथश्चिन्तनम्, वादविवादेन तत्त्वनिर्णयः, विविधगच्छीयानामपि परस्परसहयोगेन धर्मप्रचारकार्यमस्य प्रधानोद्देश्यभूतमभूत्। धार्मिकाणां ग्रन्थानामध्ययनेन गृहस्थानां व्यवहारो विनयरुचिरो देवगुरुश्रमणेषु च दृढा श्रद्धाऽप्यवर्धत। साधारणमपि तेषां शास्त्रज्ञानं विनयादिगुणैर्विस्तृतमासीत्।

अद्य तु सखेदं वक्तव्यं यदेकस्मिन् गच्छे बहूनामाचार्याणां मिथो वैमनस्यम्। अहमहमिकयैव परस्परपक्षोपमर्दने व्यवसायात्मिका बुद्धिः। परमार्थो विलीनः! आचार्यमहाशया अपि स्वशास्त्राध्ययनार्थमन्यमतावलम्बिनमाश्रयन्ते। तत्र स्वसिद्धान्तज्ञानस्य कथा तु दूरे वर्ततामपि तु तस्याध्यापकोऽहमेव गुरुः, स चायमस्माकं वेतनमात्रलाभसन्तुष्टोऽध्यापकः, अस्माकमासनमाचार्यत्वेनोच्चतरमस्य चाश्रितत्वेन निकृष्टमिति विचारेण वर्तनेन च कालं मुधैव यापयन्ति। पुरा विहरणं धर्मप्रचारहेतुकमधुना तु, स्वानुकूल्यं विदधतां गृहस्थानां चेतोरञ्जनार्थम्। उपरित एव धर्मप्रचारप्रदर्शनम्। प्रायः स्थिरवासेनात्मनः कृतार्थता। गतः स समयः। गतास्ते जीवितनिरपेक्षं जिनधर्माभ्युन्नतिमात्रप्रयोजना निरभिमानिनो महात्मानः सरलमतयो यैर्धर्मस्तंभा दृढं निखाताः। तत एवेदानीं गतेऽपि कियति कालेऽद्य जिनधर्मः कथं कथंचिदपि जीवति। विस्तृतमस्य साहित्यमिदानीं गवेषकाणां ताम्रपत्रशिलालेखप्रतिमादिकं दृष्टिपथमायाति। अन्यधर्मावलम्बिनोऽप्यपगतवैराः प्राप्तं जिनधर्मसाहित्यं सहर्षमाद्रियन्ते। वयमेव स्वकीयगौरवसंरक्षणपरा अन्नवस्त्रादिभिरेवात्मलाभं मन्यमानाः स्वधर्मं दूरीकृत्य स्वेच्छया विहराम इत्यत्र किं नाम वक्तव्यमवशिष्यते। भगवान् जिनदेव एवास्मान् सन्मार्गानुगामिनः कुर्यादित्येवालम्।

प्रकृतमनुसरामः—कोरण्टकगच्छीया गुरवो यथा जैनेतरानपि जिनधर्मे दीक्षितान् व्यदधुस्तथैवोपकेशवंशीया अपि लक्षाधिकान् जनान् जिनधर्मतत्त्वबोधनेनात्मकल्याणप्राप्तये स्वधर्मे निवेशयामासुः। गच्छभेदेऽपि कार्यभेदो मनागपि नासीत्। जानन्ति भवन्तः पाठकाः श्रीपार्श्वनाथपरम्परायां षष्ठः पट्टधर आचार्यः श्रीरत्नप्रभसूरीश्वरः कनकप्रभसूरिं लघुगुरुभ्रातरं शासनगौरवरक्षणार्थमेव स्वहस्तेन कोरण्टकपुरे सूरिपदे स्थापयामास। तदारभ्यैव भगवतः श्रीपार्श्वनाथस्य परम्परायाः शाखाद्वयं प्रचलति। तत्र श्रीरत्नप्रभसूरीश्वरस्य परम्परा लोके

उपकेशगच्छनाम्ना, श्रीकनकप्रभसूरीश्वरस्य च कोरण्टक-गच्छनाम्ना प्रसिद्धा। प्रथमायामाचार्याणां नामपरम्परा श्रीरत्नप्रभसूरिः-श्रीयक्षदेवसूरिः-श्रीकक्कसूरिः-श्रीदेवगुप्तसूरिः-श्रीसिद्धसूरिः-एवं क्रमशः प्रचलिताऽभूत् किन्तु सा पञ्चत्रिंशत्तमं पट्टधरं व्याप्यैव, तदनु देव्याः सच्चायिकाया आदेशेन प्रथमं नामद्वयं ज्ञानकोश एव श्रीसंघेन स्थपितम्। कोरण्टकगच्छस्य नामपरम्परा-श्रीकनकप्रभसूरिः-श्रीसोमप्रभसूरिः-श्रीनन्नप्रभसूरिः-श्रीकक्कसूरिः-श्रीसर्वदेवसूरिः-एवं क्रमेण प्रचलिता। तथापि स्वसिद्धान्तानुसरणं धर्मप्रचारश्चकमश्येनै सव राचार्यैः संरक्षितमासीत्॥

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

---

## लेखकस्याभ्यर्थना।

शान्ता—स्वपंकजपरागतमामपास्य
श्रीशारदा—मृदुवचोऽमृतसंविपासुः।
श्रीशान्तमूर्तिवरदेवमहं जयन्तं
सर्वातिशायिरसरूपमजं नमामि॥१॥

माता च पार्वती देवी, मोतिरामः सुधीः पिता।
गौरीनाथस्तयोः सूनुर्यस्येयं सरला कृतिः॥२॥

सूरीश्वरपदे भव्ये श्रीसंघेन समादृतः।
ज्ञानसुन्दरनामाऽत्र मुनिर्विजयतां सदा॥३॥

अनुवादेऽहमादिष्टः सुधिया तेन सूरिणा।
मया च लिखितः सोऽयमितिहासो यथामति॥४॥

विदुषां परमो धर्मो गुणानां ग्रहणं मुदा।
खलानां परमो धर्मो गुणानां गर्हणं सदा॥५॥

ॐ शान्तिः शान्तिः शान्तिः।

शुभं भवतु।

समाप्तोऽयं ग्रन्थः॥

पुस्तकें मिलने का पता—

१—श्रीरत्न प्रभाकर ज्ञान पुष्पमाला

मु० फलोदी ( मारवाड़ )

२—मुताजी नवलमलजी गणेशमलजी

तमाकु बजार-जोधपुर.